**डा. लक्ष्मीकान्त पन्थी**
जन्मस्थानः गुल्मी, धुरकोट, वाग्ला बडाचौर
मातापिताः नीलमाया, भीमकान्त पन्थी



**शैक्षिक योग्यताः**
- विद्यावारिधि (२०५२) त्रिभुवनविश्वविद्यालय
- धर्मशास्त्राचार्य (२०४८) नेपालसंस्कृतविश्वविद्यालय
- वेदान्तदर्शनाचार्य (२०४५) नेपालसंस्कृतविश्वविद्यालय
- एम्.ए. नेपालीसाहित्य (२०३४) त्रिभुवनविश्वविद्यालय
- एम्.ए. संस्कृतसाहित्य (२०३१) त्रिभुवनविश्वविद्यालय

**अनुभव**
- सहप्राध्यापक (२०३५ देखि २०७३ सम्म) त्रि.वि.का विभिन्न तहमा अनुसन्धान एवं प्राध्यापन
- अतिथि प्राध्यापक (२०६५ देखि २०६७ सम्म) काशीहिन्दूविश्वविद्यालय, वाराणसी

**सम्मानः**
- कविता महोत्सव (२०३१) नेपाल राजकीय प्रज्ञाप्रतिष्ठान, नेपाल
- कविता महोत्सव (२०४३) नेपाल राजकीय प्रज्ञाप्रतिष्ठान, नेपाल
- जयतु संस्कृतम् साभिनन्दन पुरस्कार (२०६३) नेपाल
- कुलचन्द्रस्मृतिपुरस्कार (२०६६) कुलचन्द्रस्मृतिप्रतिष्ठान, २०६५, नेपाल
- महाकवि श्रीहर्षपुरस्कार (२०६६), काशीहिन्दूविश्वविद्यालय
- अन्तर्राष्ट्रिय संस्कृतसाहित्यसम्मेलनम् (२०६६), काशीहिन्दूविश्वविद्यालय
- अन्तर्राष्ट्रिय नेपालीसाहित्यसम्मेलन (२०६६), काशीहिन्दूविश्वविद्यालय

**मानपद्वीः**
- महेन्द्र विद्याभूषण क-श्रेणी (२०५३), राजदरवार नेपाल- द्वारा शिक्षा मन्त्रालय
- महेन्द्र विद्याभूषण ख-श्रेणी (२०५२), राजदरवार नेपाल- द्वारा शिक्षा मन्त्रालय
- दीर्घ सेवापदक (२०६९), त्रिभुवनविश्वविद्यालय

**प्रकाशित कृतिः**
- नेपाली साहित्यको विकासमा गोरखापत्रको योगदान (२०४१)
- सजिलो कुण्डलीफल (२०४१)
- ऋतुविचार काव्य संस्कृतानुवाद (२०६२)
- प्राकृतपोखरा काव्य संस्कृतानुवाद (२०६७)
- हठयोगप्रदीपिका नेपाली अनुवाद (२०६७)
- सांख्य-योगदर्शन-नेपाली व्याख्या (२०७३)
- हिन्दू संस्कार-परिचय र विमर्श (२०७३)
- चाणक्यनीतिदर्पण-नेपाली अनुवाद (२०७४)
- काव्यमालिका (२०७५)

**काव्यमालिका**
किरण पुस्तकालय प्रकाशनमालाको
चौधौं पुष्प

9 789937 049382

मूल्य : ३७५/-

काव्यमालिका
डा. लक्ष्मीकान्तः पन्थी



# काव्यमालिका

डा. लक्ष्मीकान्तः पन्थी

C M Y CM MY CY CMY K

किरण पुस्तकालय, तम्घास, गुल्मीद्वारा

**प्रकाशित पुस्तकहरू**

| | | |
|---|---|---|
| १ | सन्त शशिधरको वाणोपनिषद् (२०३३) | स्वामी शशिधर |
| २ | रेसुङ्गाका आध्यात्मिक कृति (२०३६) | महाप्रभु लक्ष्मीनारायण, योगकुमार, लीलाम्बर भुसाल |
| ३ | केही जनश्रुतिहरू (२०४२) | डा. टीकाराम पन्थी |
| ४ | रूरूक्षेत्र (२०४३) | केशवप्रसाद पौडेल |
| ५ | नेनेपालः (२०४४) | डा. टीकाराम पन्थी |
| ६ | बुद्धस्मरणम् (२०५४) | डा. टीकाराम पन्थी |
| ७ | मेरो देश नेपाल (२०५४) | मुकुन्दहरि ज्ञवाली |
| ८ | गुल्मीको ऐतिहासिक झलक (२०५५) | डा. राजाराम सुवेदी |
| ९ | मानवताको कलङ्क-जातपात र छुवाछूत प्रथा (२०५८) | मोदनाथ प्रश्रित |
| १० | सांस्कृतिक चिन्तन (२०६२) | डा. टीकाराम पन्थी |
| ११ | अर्वाचीन रेसुङ्गा (२०६४) | डा. टीकाराम पन्थी |
| १२ | तपोभूमि रेसुङ्गा धाम (२०६७) | परशुराम उपाध्याय पन्थी |
| १३ | ग्रहविमर्श (२०६८) | अर्जुनप्रसाद भट्टराई |
| १४ | काव्यमालिका (२०७५) | डा. लक्ष्मीकान्त पन्थी |

## मम सुप्रभातम्

विघ्नेश्वरः सकलविघ्नविनाशदक्षो
दक्षात्मजा भगवती हि सरस्वती च ।
दृप्ताष्टभैरवगणा नवदिव्यदुर्गा-
देव्यः सुराः प्रकुरुतां मम सुप्रभातम् ॥ १ ॥

भानुः शशी कुजबुधौ गुरुशुक्रमन्दा
राहुः सकेतुरदितिर्दितिरादितेयाः ।
शक्रादयः कमलभूः पुरुषोत्तमेन्द्रो
रुद्रः करोतु सततं मम सुप्रभातम् ॥ २ ॥

पृथ्वी जलं ज्वलनमारुतपुष्कराणि
सप्ताद्रयोऽपि भुवनानि चतुर्दशैव ।
शैला वनानि सरितः परितः पवित्रा
गङ्गादयः प्रकुरुतां मम सुप्रभातम् ॥ ३ ॥

दिक्चक्रमेतदखिलं दिगिभा दिगीशा
नागाः सुवर्णभुजगा नगवीरुधश्च ।
पुण्यानि देवसदनानि विलानि दिव्या-
न्यव्याहतं विदधतां मम सुप्रभातम् ॥ ४ ॥

वेदाः षडङ्गसहिताः स्मृतयः पुराणं
काव्यं सदागमपथो मुनयोऽपि दिव्याः ।
व्यासादयः परमकारुणिका ऋषीणां
गोत्राणि वै विदधतां मम सुप्रभातम् ॥ ५ ॥

(आधार- आनन्दरामायण विलासकाण्ड)

# जीवनदर्शनम्

(कविताराशि:)

# प्रथमोन्मेषः

## १. मङ्गलाचरणम्

मत्स्यः कूर्मो वराहो हरिमुखमनुजो वामनः पर्शुरामः
रामः सीतापतिः श्रीयदुकुलतिलकः कृष्णरूपो मुरारिः।
बुद्धः सर्वज्ञदेवस्तदनु च सुकृती कल्किरूपावतारी
कृष्णोऽसौ राममूर्तिर्दशमुखभयकृत् पातु मां मञ्जुरूपः।।१।।

श्रीरामचन्द्रस्य मुखाम्बुजश्री
राज्याभिषेकेऽपि न हि प्रफुल्ला।
सैषा न मम्ले वनवासतोऽपि
कुर्यात् सदा मञ्जुलमङ्गलं मे।।२।।

श्रीविष्णुरंशस्य नरोत्तमस्य
श्रीरामचन्द्रस्य मुखाम्बुजश्रीः।
श्रीरामभक्तस्य सदा करोतु
दीर्घायुषं मञ्जुलमङ्गलं मे।।३।।

अज्ञानहर्त्री भयनाशकर्त्री
या बुद्धियोगस्य प्रदानशीला।
श्रीरामचन्द्रस्य मुखाम्बुजश्री-
र्दद्यात् सदा मे शुभबुद्धियोगम्।।४।।

लोकाभिरामा नयनाभिरामा
या लोकमात्रा रमते सदैव।
मयाऽपि नित्यं रमतां शुभश्रीः
श्रीरामचन्द्रस्य मुखाम्बुजश्रीः।।५।।

श्रीभीमकान्तोऽस्ति पिताऽस्मदीयः
श्रीनीलमायाङ्गजनुर्भवोऽहम्।
लक्ष्मीपदेनान्वितकान्त एष
पुत्रः प्रियोऽसौ भरताभिधानः॥६॥

सभ्रातृकोऽहं परिवारयुक्तः
मातुः पितुश्चाशिषमर्थयेऽत्र।
सन्तं गुरुं स्वं पितरं प्रणम्य
लिखामि काञ्चिद् विषयानुभूतिम्॥७॥

❋ ❋

## २. मङ्गलम्

गुरुकाव्यादयो देवाः कवयो जनकादयः।
यं नत्वा सफला जातास्तं नमामि गजाननम्॥१॥

सरस्वतीं च वाग्देवीं मातरं मे शिवात्मिकाम्।
वागर्थप्रतिपत्त्यर्थं प्रणमामि मुहुर्मुहुः॥२॥

शिवारूपास्ति माता मे शिवरूपः पितास्ति मे।
मूढोऽहं पुत्ररूपोऽस्मि तयोस्तौ कुरुतां शिवम्॥३॥

मया प्रज्ञाविहीनेन रचितं कृपया तयोः।
पौत्ररूपमिमं श्लोकसङ्ग्रहं कुरुतां शिवम्॥४॥

युवयोः प्रीतिमापन्नं पौत्ररूपमिदं लघु।
पद्यबन्धनमेतन्मे भूयाज्जीवनदर्शनम्॥५॥

भूयान्नित्यानित्यवस्तुविवेकस्य समुद्भवः।
संसारासारतां बुद्ध्वा कुर्याज्जीवनदर्शनम्॥६॥

❋ ❋

## ३. गणेशप्रार्थना

गणेश! मे नाशय विघ्नसङ्घान्
द्विरूप! मे सिद्धिमतिप्रदोऽसि।
सर्वात्मभावोऽसि गजाननोऽसि
त्वं ब्रह्ममूर्द्धासि जगत्पदोऽसि।।१।।

समाधिना गच्छति यत्र गः स्यात्
यस्माज्जगज्जीवति सैष जः स्यात्।
गजस्वरूपं तव हंसरूपं
सोऽहंस्वरूपं नररूपमन्यत्।।२।।

त्वदुत्तमाङ्गं गजरूपमस्ति
शरीरभागं नररूपमस्ति।
उच्चैः स्थितं तत्पदवाचकं स्यात्
शिरो, वपुस्त्वं पदभाङ्नरः स्यात्।।३।।

जीवं स्वमात्मानमनेन ब्रह्म-
रूपं नृणातीति नरोऽस्ति सार्थः।
नरोऽहमस्मीति विचारणेन
शीघ्रं नय त्वं निकषा गजं माम्।।४।।

यातामैक्यं यदि नरगजौ तद् गणेशस्वरूपम्
स्यादेकं चेज्जगदपि परब्रह्मणि स्वस्वरूपम्।
तत् त्वं रूपेऽप्यसि पदयुते चैकभावं समीतः
तर्हि ब्रूहि त्वमहमपि किं साम्यभावं न यावः।।५।।

तवापि मातापितरावुमाभवौ
गणैः समेतोऽसि गणेशरूपः।
ममापि मातापितरावुमाभवौ
गणैर्युतोऽहं गणकस्वरूपः।।६।।

❊ ❊

# ४. अनुतापः

अहो अहोभिर्बहुभिश्च मासै-
वर्षैरनेकैरभवं वयस्कः।
जीवानि सत्यं शरदां शतं चे-
दर्धं तदायुर्विगतं ममैतत्।।१।।

बालः पूर्वं तदनु च रुजा पीडितोऽहं नितान्तं
कैशोरं मेऽक्षरपरिचयान्निर्गतं नानुभूतम्।
पौगण्डं मे पशुचरणतः कानने सम्प्रयुक्तं
तस्मादर्वाक् प्रपठितुमना गेहतो विप्रयुक्तः।।२।।

पाठाभ्यासे खेलने लेखने च कालो यातः कर्म किञ्चित् कृतं न।
शिक्षा दीक्षा नैव लब्धोत्तमापि याताऽऽयाते काल एष व्यतीतः।।३।।

सोऽहं पितुः प्रथमपुत्र इहास्मि तादृक्
यादृक् पितुः सुखकरो न च मातुरेव।
या पञ्चमाब्दवयसोऽति सुसेवितापि
सा भारती न सुमुखी विमुखी ममास्ति।।४।।

कदाचिद् भ्रातृणामनुगमनसँल्लग्नमनसः
कदाचिद् वामाङ्गीमनुगमयितुं दत्तमनसः।
कदाचित् पुत्रीणामनुगमनसम्भ्रान्तमनसः
कदाचिच्छात्राणामनुगमनसञ्जातमनसः।।५।।

गतः कालो यावान् स च मम हृदा नैव गणितः
कृतः श्वासोच्छ्वासोऽशनवसनहेतोर्विचलितः।
अभूवं वर्षिष्ठस्तदनु सुकृते मे मतिरिह
कथङ्कारं गच्छेत्तदपि न मनश्चिन्तयसि किम्?।।६।।

**

## ५. सदाचारः

यो गणेशादिकान् देवान् प्रभाते प्रार्थयेद् यदि।
तस्मै समर्प्य सद्बुद्धिं सन्मार्गं दर्शयन्ति ते।।१।।

विहाय शय्यां प्रत्यूषे परिभ्रमति यो जनः।
नित्यं शुद्धसमीरेण स्वास्थ्यं तस्य विवर्द्धते।।२।।

परिभ्रमणशीलो यः प्रभाते कोऽपि सज्जनः।
निर्मलेन समीरेण स्वमायुः स प्रवर्द्धयेत्।।३।।

नित्यस्नानेन विमलो नित्यदेवार्चने रतः।
नित्यस्वाध्यायसँल्लग्नः स नित्यं लभते सुखम्।।४।।

कालोऽस्ति कीदृशोऽद्यत्वे कोऽयं कोऽहमिति स्वयम्।
सुविचार्य व्यवहरेत् स्वाचारं समनुस्मरन्।।५।।

प्रातरागामिनं कालं चिन्तयेद् विगतं निशि।
स्खलनं चेत् क्वचित्तस्य श्वः कुर्यात् शोधनं सुधीः।।६।।

सङ्गतिः कुत्र कर्तव्या किं वा हेयं प्रदेयकम्।
त्याज्यं वा ग्रहणीयं किं चिन्तनीयं विशेषतः।।७।।

पादयोः सन्नतिः कुत्र यद्वा कुत्र नमस्कृतिः।
आशीर्वाचः कुत्र देयाः क्व कार्यं करमेलनम्।।८।।

कुत्र सम्भाषणं कार्यं तच्छ्रोतव्यं क्व वा पुनः।
कुत्र देया मन्त्रणा वा गोपनीया विचार्यताम्।।९।।

❊ ❊

## ६. श्रीरामः शरणं मम

श्रीरामः शरणं ममास्तु सकलाः शेषा नरा वाऽनरा
गन्धर्वाः ससुराऽसुराश्च पिशुना व्याला वृकाः कुक्कुराः।
देहान्तर्भवरोगतापविषयाः कामादयः शत्रवः
किञ्चिन्नैव विकुर्वते ग्रहगणा रामः सदा रक्षतु।।१।।

श्रीरामः शरणं ममास्तु सकले देशे प्रदेशे पथि
कान्तारे गहने वनेऽथ सलिले यादोगणैराकुले।
यानारोहितशीघ्रमार्गचलने पद्भ्यां गतौ वा गृहे
विघ्ना नैव विकुर्वते क्वचिदिते रामः शरण्यो मम।।२।।

श्रीरामः शरणं ममास्तु शयने निद्रां गते जागरे
स्नाने प्रीणनपूजनेऽथ जपने वा भोजने पाठने।
वार्तायां पठने गृहान्तरभवे बाह्यस्थिते लेखने
केचिन्नैव विकुर्वतेऽखिलजना रामाग्रतः पातु माम्।।३।।

श्रीरामः शरणं ममास्तु भवने मात्रालयेऽन्यस्थितौ
पित्रोर्गेहमुपागतेऽथ स्वशुरावासे निवासेऽन्यतः।
यद्वा शैलमुपागते गिरिणदीकूलेऽपि तीर्थाश्रये
यात्रायां व्यवहारकर्मनिरते रामाश्रयः स्यान्मम।।४।।

श्रीरामोऽस्तु सदा मम प्रियतमो रामं भजे सर्वदा
रामेणैव सुरक्षितं जगदिदं रामाय तस्मै नमः।
रामाद् दिव्यतमो न हि त्रिभुवने रामस्य कार्यं महत्
रामे चित्तलयो ममेह भवताद् राम! त्वमेवाश्रयः।।५।।

* *

# ७. श्रीकृष्णार्पणमस्तु

श्रीकृष्णार्पणमस्तु बाल्यसमये चापल्यमस्मत्कृतम्
मातुःक्रोडगतेऽपि बाहुचरणैर्माता मया पीडिता।
निष्क्रान्ते बहिरागतेऽपि च तदा मात्रा समालिङ्गिते
दुःखं केवलमर्पितं तदधिकं दातुं न शक्तोऽभवम्।।१।।

श्रीकृष्णार्पणमस्तु शैशवगते दुग्धेन वा निद्रया
पीडायां विगतो व्यथां निगदितुं नैवाभवं सक्षमः।
किं दुग्धं पिबतीत्यसौ किमु न वा शेते च दोलोपरि
चेत्थं शैशवकालदुःखभरितो मात्रा भृशं चिन्तितः।।२।।

श्रीकृष्णार्पणमस्तु पूर्ववयसि द्रागेव पित्रानुगः
सोऽहं साक्षरतां गतस्तदनु किं साङ्कः सुलेखैर्युतः।
पुत्रो 'राक्षस' इत्युपाधिविदितो मा स्यादसौ चिन्तित
इत्थं बालककाल उत्पथगतः पित्रा सदा रक्षितः।।३।।

श्रीकृष्णार्पणमस्तु दुःखभरितः पौगण्डकालो मम
यस्मिँस्त्यक्तगृहः प्रवासमगमं नैके समा यापिताः।
शय्यार्थं न मयात्र खाद्यविषये चिन्ता न काचित्कृता
विद्यां लब्धुमभीप्सुना हि सततं सा भारती संश्रिता।।४।।

श्रीकृष्णार्पणमस्तु प्रोषितवतः कालो न किञ्चित्कृतः
प्रातर्वा निशि वा दिनेऽप्यधिगते विद्या समासादिता।
तौ मातापितरौ सदा गृहभवौ किञ्चिन्न संसेवितौ
यौ स्तो मे जनुरादिकारणभवौ स्वर्भूमिमात्राधिकौ।।५।।

श्रीकृष्णार्पणमस्तु कालकलिते कैशोरभावे मया
नान्येषामुपकारकारणगतो नैवोपदेशः कृतः।
किं किं स्यादिति चिन्तनेन मनसा या राष्ट्रसेवा कृता
स्वात्मार्थं स्वसमाश्रितार्थमपि वा धान्यं धनं नार्जितम्।।६।।

श्रीकृष्णार्पणमस्तु यौवनगते काले मयोद्वाहिता
जाया संसृतिकारणं निगदिता शास्त्रैः पुराणैरपि।
भक्तिर्भावनयाऽऽश्रिताऽस्तु विपुला तत्साधना चेतना
संयुक्ता मनसि स्फुरन्त्विह जनौ याभिर्हरिः प्रीयताम्।।७।।

श्रीकृष्णार्पणमस्तु वाक्यमुदितं यद्यन्मया स्वाननात्
सत्यं तद्रहितं हिताहितकरं यद्वा प्रियं वाप्रियम्।
तस्यार्थान्तरमस्तु कृष्णनमनं तत्प्रार्थना पूजनं
नो जाने मम जीवने कतिविधं वाक्यं समुच्चारितम्।।८।।

श्रीकृष्णार्पणमस्तु यत्प्रपठिताः पाठा गुरोः सन्निधौ
ज्ञातार्था न तथाथवा गुरुजनैः संशोध्य सम्बोधिताः।
काव्ये व्याकरणेऽथवाऽमरकृतौ बोध्यस्तदर्थो मयि
कृष्णे भक्तिकरो भवेत् स हि यतः शास्त्रैकगम्यो महान्।।९।।

श्रीकृष्णार्पणमस्तु नेत्रविषयीभूता यथेष्टं मम
आ शृङ्गादधिसागरान्तरगता भूमेः प्रदेशाः कति।
ग्राम्या नागरिका भवन्तु वनजा कृष्णस्य यात्रोत्सवै
रम्यैर्मन्दिरमूर्तिभिर्विजयिनः कृष्णेन पूर्णं जगत्।।१०।।

श्रीकृष्णार्पणमस्तु बाहुचरणैर्यत्राऽऽक्रमो मेऽभवत्
सर्वः कृष्णमहोत्सवे भवतु तत्सार्थः समर्थोऽपि च।
कृष्णार्थं मम वक्त्रदृग्भुजपदैर्यद्यत्कृतं कारितं
तत्सर्वं मनसा निवेदितमहो! कृष्णोऽस्ति सर्वं मम।।११।।

श्रीकृष्णार्पणमस्तु प्रौढसमये यद्यन्मयाऽऽसादितं
विद्यां वित्तमथापि गेहमथवा वस्त्रं च धर्मार्जितम्।
मानुष्यं पुनरेव विप्रजननं ज्ञानं कवित्वं च मे
श्रीकृष्णार्पणमस्तु वस्तु सकलं कृष्णः शरण्यो मम ।।१२।।

श्रीकृष्ण! विष्णो! मधुकैटभारे! दुःखार्तबन्धो! करुणैकसिन्धो!।
इमानि नामानि जपामि नित्यं श्रीकृष्ण! दामोदर! वासुदेव!।।१३।।

पूजां न जानामि न वा स्तुतिं ते नाहं सदाचारसमन्वितोऽस्मि।
नामानि जानामि जपामि तेऽद्य वैकुण्ठ! नारायण! पद्मनाभ!।।१४।।

प्रभो भवद्दर्शनकाङ्क्षयाऽहं खिन्नोऽस्मि दीनोऽस्म्यतिदु:खितोऽस्मि।
स्वयं भवान् दर्शयतु स्वरूपं लक्ष्मीपते! केशव! रुक्मिणीश!।।१५।।

आरोग्यविद्याधनधान्यसम्पत् सन्तानसौख्यानि च भुक्तिमुक्ती।
मिलन्ति नाथस्य दयैकदृष्ट्या गोपाल! पीताम्बर! लोकपाल!।।१६।।

विद्या: समस्ता सकला मदीये मुखे समायान्तु गृहे श्रियोऽपि।
इमानि नामानि जपामि नाथ प्रभो! दयासागर! भार्गवीश!।।१७।।

प्रभो त्वदीया करुणा मिलेच्चेत् विद्या मुखाब्जे गृहमन्दिरे श्री:।
सापत्न्यभावं वसतो विहाय गोविन्द! दामोदर! माधवेश!।।१८।।

हरिरेव गतिर्हरिमेव भजे हरिणाधिकृतोऽस्मि नमो हरये।
करुणास्तु हरे: सकलं तु हरेरहमस्मि हरौ शिवमस्तु हरे!।।१९।।

हरि: पापहरो भूयाद् हरी रक्षाकरो मम।
हरी रोगहरो भूयाद् हरि: शरणमस्तु मे।।२०।।

❊❊

## ८. नम: शिवाय

नम: शिवायेति जपं करिष्ये पापं प्रभो हे हर! संहर त्वम्।
दीर्घायुरारोग्यमपीश! देहि त्वन्नाममन्त्रो मम कल्पवृक्ष:।।१।।

नम: शिवायेति जपं करिष्ये विद्यां सदर्थां प्रददातु मेधाम्।
अभ्यस्य विद्यां तव तत्त्वबोधो जायेत सम्यङ्मयि भासमान:।।२।।

नम: शिवायेति जपं करिष्ये मयि प्रसन्नास्तु सदा पराम्बा।
सैषा ममान्त:करणान्धकारं निरस्य बोधोदयमादधातु।।३।।

नम: शिवायेति जपं करिष्ये वित्तं समायातु जपप्रभावात्।
देशान्तरस्थान्यजनस्य हस्तान् मयि प्रसन्न: कमलेश्वरोऽस्तु।।४।।

नम: शिवायेति जपं करिष्ये वित्तेन चित्तप्रशमो ममास्तु।
वित्तेन चित्तं चपलं न भूयाच्चित्तेन वित्ताऽऽकलनं करोतु।।५।।

नम: शिवायेति जपं करिष्ये सांसारिकेऽस्मिन्नखिलप्रपञ्चे।
मतिं न यायान्मम वित्तभोगाद् वैराग्यबोधोऽस्तु मतौ स्वभावात्।।६।।

नम: शिवायेति जपं करिष्ये संसाररूपे तव सर्गजाले।
मोहो न भूयान्मम दृश्यभूते त्वत्पादपद्मेऽस्तु मनोऽनुरक्तम्।।७।।

नम: शिवायेति जपं करिष्ये गतिं तवाख्यातुमहं न शक्त:।
ब्रह्मर्षिदेवर्षिसुरर्षिमुख्या न केऽपि जानन्ति गतिं तवेश!।।८।।

नम: शिवायेति जपं करिष्ये सहस्रपत्रं कमलं मदीयम्।
पादासनं ते शिरसि स्थितं मे प्रभो! समायाहि निवासहेतो:।।९।।

नम: शिवायेति जपं करिष्ये सरस्वतीं तां वदने मदीये।
निवासहेतो निलये च लक्ष्मीं तुष्ट्यै सुसम्प्रेषय हे महेश।।१०।।

नम: शिवायेति जपं करिष्ये वागर्थरूपौ पितरौ समेषाम्।
वाचोऽनिरुद्धा: प्रददातु माता पिता सदर्थं हृदये चकास्तु।।११।।

नम: शिवायेति जपं करिष्ये ममत्वरूपं मनसोऽन्धकारम्।
निरस्य बोधेन समुज्ज्वलं स्यात् परोपकारार्थमुदैतु चित्तम्।।१२।।

नम: शिवायेति जपं करिष्ये मेषे मदीये प्रियराशिभूते।
घनान्धकारं हृदयान्निरस्य ज्ञानोच्चसूर्य: समुदेतु नित्यम्।।१३।।

नम: शिवायेति जपं करिष्ये शिरस्थचन्द्रस्य समुच्चयस्ते।
वृषे समायातु वृषस्वरूपमानन्दचन्द्रोदयमस्तु चित्तम्।।१४।।

नम: शिवायेति जपं करिष्ये नाहं धनुर्लग्नयुतोऽपि नाथ।
न घोटकोऽस्मीह वृषस्वरूपो वोढुं भवन्तं तु कदा लभेयम्।।१५।।

नमः शिवायेति जपं करिष्ये देशे मदीये प्रियजन्मभूमौ।
शान्तिः समायातु शिवं सदास्तु जनाः सदाचारयुता भवन्तु।।१६।।

नमः शिवायेति जपं करिष्ये न केऽपि चौराश्च शठा भवन्तु।
निरामयाः सद्व्यवहारयुक्ता भद्राणि पश्यन्तु जनाः सदैव।।१७।।

नमः शिवायेति जपं करिष्ये गावोऽस्मदीयाः पशवश्च सर्वे।
वृक्षा लता ओषधयोऽखिलाश्च भद्राणि पश्यन्तु न वैरभावान्।।१८।।

नमः शिवायेति जपं करिष्ये वर्षन्तु वर्षासु घना जलानि।
फलन्तु धान्यानि रसैर्युतानि फलानि पुष्टानि च पादपेषु।।१९।।

नमः शिवायेति जपं करिष्ये स्वस्थाः समे बालकबालिकाश्च।
विहाय वैरं प्रविधाय कार्यं पठन्तु विद्याः सफलीभवन्तु।।२०।।

नमः शिवायेति जपं करिष्ये नेपालदेशे सुखशान्तिरस्तु।
जना वनस्था नगरायिताः स्युर्ग्रामायिता वा सुखिनो भवन्तु।।२१।।

❊❊

## ९. श्रीशिवचत्वारिंशम्

(नेपालीभाषया युतम्)

जयति गणेशो मङ्गलमूर्तिः सकलमङ्गलमाप्तुम्।
लक्ष्मीकान्तो वदति– भगवन्! भवान् प्रभवतु पातुम्।।१।।

जय होस् गणेश! तिम्रो सकल मङ्गल देऊ।
लक्ष्मीकान्त भन्दछन् कि– रक्षा गर्न सक्ने होऊ।।१।।

यः सतां पालको नित्यं महेशः शङ्करः शिवः।
दयामयोऽस्तु भक्ताय यशोविद्यार्थसम्पदाम्।।२।।

सधैँ सज्जनको रक्षा गर्दछौ शिवशङ्कर।
यश, विद्या र सम्पत्ति भक्तलाई दिने गर।।२।।

यस्य भालेऽर्धचन्द्रोऽस्ति शोभते चन्द्रशेखरः।
द्वौ स्कन्धौ शोभनौ यस्य नागमालाविराजितौ।।३।।

भालमा टल्किने आधा चन्द्रले चन्द्रशेखर।
बन्यौ काँध सुहाएका नागमाला हुँदा अभ्र।।३।।

अङ्गं सुगौरं यस्यास्ति गङ्गा वहति मस्तके।
मुण्डमाला गले यस्य शरीरे भस्मलेपनम्।।४।।

शिरमा बस्दछिन् गङ्गा, अङ्गशोभा छ सुन्दर।
गलामा मुण्डमाला छ, भस्मले देह गौर छ।।४।।

यस्य व्याघ्राम्बरं वस्त्रं शोभते तनुमध्यमे।
शोभां विलोक्य मुनयो नागा अपि विमोहिताः।।५।।

धोती छ बाघको छाला, कति राम्रो सुहाउँछ।
त्यै शोभाले मुनि तथा नाग छन् अति मोहित।।५।।

करे सुशोभते यस्य त्रिशूलं निशितं बहु।
शत्रून् शीघ्रं क्षपयति, क्षमते सज्जनान् सदा।।६।।

धेरै तीखो छ त्रिशूल हातमा अति शोभित।
शत्रुलाई नाश गर्छ, साधुको बन्छ रक्षक।।६।।

गिरिराजसुता यस्य वामभागे विराजते।
महापूर्वास्ति या लक्ष्मीः काली सैषा सरस्वती।।७।।

बायाँतर्फ सुहाएकी पार्वती अति सुन्दरी।
महाकाली, महालक्ष्मी, ती हुन् महासरस्वती।।७।।

आदिशक्तिर्महामाया पार्वती पर्वतात्मजा।
समीपे शोभते यस्या नन्दिर्गणपतिः सुतः।।८।।

पार्वती हुन् महामाया, आदिशक्ति पनि उनै।
साथमा छन् सुहाएका नन्दि गणपति दुवै।।८।।

सोऽयं जगत्पालकोऽस्ति शिवो वृषभवाहनः।
यत्प्रियास्ति जगन्माता दृश्यते सिंहवाहना।।९।।

जगत्पालक हुन् शम्भु, उनी छन् वृषवाहन।
पार्वती हुन् जगन्माता, उनी छन् सिंहवाहना।।९।।

ययोः पुत्रौ तु साश्चर्यौ षडाननगजाननौ।
मयूरमूषकौ दृष्टौ विचित्रौ वाहनौ क्रमात्।।१०।।

हात्तीमुखे र छमुखे दुई पुत्र अचम्मका।
मयूर, मूषा यिनका छन् वाहन अचम्मका।।१०।।

श्यामगौरौ सुतावेतौ षडाननगजाननौ।
ययोः कान्तिं वर्णयितुं केनापीह न शक्यते।।११।।

यी दुवै श्याम, गोरा छन् षडानन, गजानन।
कसैले गर्न सक्दैन यिनको कान्ति वर्णन।।११।।

सिंहो न खादति वृषं मयूरो भुजगं न हि।
भक्ष्यभक्षकयोः प्रीतिर्दृश्यते यस्य मन्दिरे।।१२।।

मयूरले सर्प खान्न, साँढे खाँदैन सिंह यो।
भक्ष्य-भक्षकमा प्रीति शिवका घर देखियो।।१२।।

निवेदनं प्रकुर्वन्ति त्वामागत्य सुदुःखिताः।
देवास्त्वमपि तेषां तद् दुःखं वारयसि द्रुतम्।।१३।।

देवताले कुनै दुःख पाए गर्छन् निवेदन।
त्यो सुनी शिवले छिट्टै लाग्छन् दुःख हटाउन।।१३।।

यदा देवानुपाक्रामद् दनुजस्तारकासुरः।
तदा सम्मिलिता देवास्त्वां हिताय समाह्वयन्।।१४।।

सताउँदा तारकले देवता सब आत्तिए।
गुहार माग्न शिवका घर कैलासमा पुगे।।१४।।

देवानां कार्यसिद्ध्यर्थं शरण्यः करुणाकरः।
भवान् षडाननं शीघ्रं प्रैषयद् हितचिन्तकः।।१५।।

देवताको भलो गर्न पठाए शिवले पनि।
छमुखे पुत्रलाई नै उनको काम होस् भनी।।१५।।

सोऽपि गत्वाऽचिरेणैव पित्राज्ञापरिपालकः।
जघानोपद्रवन्तं तं ससैन्यं तारकासुरम्।।१६।।

आज्ञा पिताको मानेर गए चाँडै षडानन।
उपद्रो गरने दैत्य मार्दिए तारकासुर।।१६।।

यदा जालन्धरं दैत्यं जालिनं छलिनं भवान्।
अमारयत् तदा विश्वे यशस्ते बहु विस्तृतम्।।१७।।

जाली जालन्धरैलाई मार्नुभो जहिले शिव!।
त्यो वेला विश्वमा धेरै फैल्यो हजुरको यश।।१७।

राज्ञो भगीरथस्यापि तपो दृष्ट्वा सुदुष्करम्।
त्वया गङ्गाऽवतरणे प्रतिज्ञा परिपूरिता।।१८।।

राजा भगीरथजिको तपस्या देखदा ठुलो।
गङ्गा ओराल्नका लागि प्रतिज्ञा पूर्ण गर्नुभो।।१८।।

भवादृशो न दृष्टोऽन्यो देवो दानिषु सक्षमः।
यतो ह्यन्यान् विहायैव भवन्तं संस्तुवन्त्यहो!।।१९।।

दानी हजुरभैँ अर्को नदेख्दा देवता कुनै।
अरू छोडी भक्तहरू स्तुति गर्छन् हजूरकै।।१९।।

भगवन्तमनाद्यन्तं जरामरणवर्जितम्।
ब्रुवते वेदशास्त्राणि महिमा ते कियानहो!।।२०।।

अनादि, अन्तरहित, जरामरणवर्जित।
वेदशास्त्रहरू भन्छन् महिमा अति विस्तृत।।२०।।

देवासुरैः सम्मिलितैः समुद्रे मथिते सति।
विषज्वाला समुत्पन्ना व्याकुलास्ते सुरासुराः।।२१।।

मिलेर देवासुरले मथ्दा सागरबाट नि।
विषज्वाला निस्कँदा त आत्तिए देव-दैत्य नि।।२१।।

तेषां हिताय भवता पीतं हालाहलं विषम्।
तदादि नीलकण्ठस्ते ख्यातं नाम शुभावहम्।।२२।।

देवताको गर्न हित पिउनुभो महाविष।
नीलकण्ठ भयो नाम, चल्यो हजुरको यश।।२२।।

रामेश्वरं स्थापयित्वा रामचन्द्रः स्वपूजयत्।
विजित्य लङ्काराज्यं स विभीषणाय दत्तवान्।।२३।।

श्रीरामचन्द्रले रामेश्वरपूजा गरेर नै।
जिते लङ्का, राज्य दिए विभीषणजिलाई नै।।२३।।

सहस्रकमलैः पूजां राम आरब्धवाँस्तव।
रामभक्तिपरीक्षार्थं पद्म चैकं विलुम्पितम्।।२४।।

हज्जार पद्मले पूजा रामले गर्न लागदा।
रामभक्ति जाँच गर्न एक पद्म लुकाउँदा।।२४।।

त्वत्पूजाप्रतिबद्धः स एकं पद्म न दृष्टवान्।
तदा स्वं नेत्रकमलमारेभेऽर्पयितुं त्वयि।।२५।।

नदेखी रामले पद्म आफ्नै नयनपद्मले।
पूजा पूरा गर्न लागे शिवका भक्त रामले।।२५।।

विलोक्य रामचन्द्रस्य दृढभक्तिं च तादृशीम्।
भवता सुप्रसन्नेन वरं दातुं समीप्सितम्।।२६।।

देखेर रामको त्यस्तो दृढ भक्ति हजूरको।
वरदान दिने इच्छा भएथ्यो मनसायको।।२६।।

अरयः कामलोभाद्याः दुःखयन्ति सदैव माम्।
घटवासी त्वमेवासि जानासि परिमोहितम्।।२७।।

कामलोभादि शत्रुले गर्दा हैरानमा परेँ।
प्रभु स्वयम् जान्नुहुन्छ– यिनैका मोहमा परेँ।।२७।।

त्राहि मां त्वं मनोनाथ! क्रोशामि त्वां शिवङ्करम्।
कृपासिन्धुस्त्वमेवासि समुद्धर भवार्णवात्।।२८।।

हित गर्नोस्, भलो गर्नोस् भन्दै चिच्याउँदै छु म।
भवसिन्धु पार तार्नोस्, डुब्न लागिसकेँ नि म।।२८।।

हे शङ्कर! त्रिशूलेन शत्रून् शमय मे प्रभो।
ऋणरोगादिदुःखेषु निमग्नं मां समुद्धर।।२९।।

यो त्रिशूल लिई सारा शत्रुको नाश पार्नुहोस्।
ऋणरोगादि दुःखमा म डुबेँ, लौ उतार्नुहोस्।।२९।।

जननी जनिता भ्राता त्वमेवासि हितङ्कुरु।
त्वां विहाय न कोऽप्यन्यः शरणं मे शिवङ्कुरु।।३०।।

आमाबुबा अनि भाइ सबै मेरो हजुर् हुनोस्।
मेरो अर्को छैन कोही, शिव झट्टै उठाउनोस्।।३०।।

प्रभुः शिवस्त्वमेवासि स्वामी मे शरणं भव।
पूरयाशां समायाहि दुःखं हर शुभङ्कुरु।।३१।।

भलो गर्ने हजुरै हो मेरो शरण बन्नुहोस्।
दुःख हर्नोस्, भलो गर्नोस्, आउनुहोस र भर्नुहोस्।।३१।।

ददासि निर्धनाय त्वं धनं भक्ताय दुःखिने।
जनः कोऽपीह शक्नोति भवन्तं सम्परीक्षितुम्।।३२।।

गरीब, भक्त, दुःखीमा दिनुहुन्छ प्रभु धन।
यो कुरामा जाँच गर्न जोकोही पनि सक्छन।।३२।।

शं करोति भवानेव शं करोत्विह शङ्कर!।
मङ्गलानां च कर्तासि जयस्तेऽस्तु सुमङ्गल!।।३३।।

भलो गर्ने हजूरै हो, नामै शङ्कर हो नि त!
नाथ! मङ्गलका दाता हजुर्को जय होस् नि त!।।३३।।

योगिनो यतयो भक्ता नित्यं ध्यायन्ति शङ्करम्।
ऋषयो नारदाद्याश्च शारदाद्याश्च देवताः।।३४।।

नरदादि ऋषिहरू, शारदा आदि देवतै।
गर्छन् योगी र सन्न्यासी ध्यान शङ्करको सबै।।३४।।

'नमः शिवाये'ति मन्त्रं प्रजप्यापि प्रजापतिः।
महिमानं न ते वेत्ति ज्ञातुं शक्नोति कोऽपरः।।३५।।

'नमः शिवाय' यो मन्त्र जपेर विधिले पनि।
जान्दैनन् महिमा तिम्रो, अरू को जान्न सक्छ नि!।।३५।।

चत्वारिंशं पठेद् यस्तेऽनुदिनं भक्तिमान्नरः।
तस्योपरि कृपां कृत्वा प्रसीदतु न सीदतु।।३६।।

जस्ले यो चालिसा पढ्छ भक्तिसाथ हजूरको।
त्यसमाथि कृपा गर्नोस्, प्रसन्न हुनुहोस् प्रभो!।।३६।।

अधमर्णोऽप्यनुदिनं चत्वारिंशं पठेद् यदि।
ऋणाद् विमुच्य तं शम्भुरनृणं कारयत्यहो!।।३७।।

अति धेरै ऋणी जो छ त्यस्ले यो चालिसा पढोस्।
ऋणबाट गरी मुक्त अऋणी नै बनाउनोस्।।३७।।

पुत्रकामोऽप्यनुदिनं चत्वारिंशं पठेद् यदि।
शिवप्रसादरूपेण पुत्रं प्राप्नोति निश्चितम्।।३८।।

पुत्रको चाहना गर्ने मान्छे यो चालिसा पढोस्।
शिवप्रसादरूपमा राम्रो असल पुत्र होस्।।३८।।

प्रतिमासं त्रयोदश्यां कुर्यात् त्रयोदशीव्रतम्।
जुहुयात् स चतुर्दश्यां सहस्रं शिवमन्त्रतः।।३९।।

त्रयोदशी तिथि पर्ने प्रदोष व्रत गर्छ जो।
चतुर्दशीमा शिवको मन्त्रले होम गर्छ जो।।३९।।

शिवं सम्पूजयेद् भक्त्या बिल्वपत्रादिभिः सुमैः।
धूपदीपादिकं कृत्वा चत्वारिंशं पठेदपि।।४०।।

बेलपत्रादिले पूजा शिवलाई गरेपछि।
धूपदीपादि अर्पेर चालिसा यो पढेपछि।।४०।।

जन्मान्तरीयपापं च नश्येच्छम्भुप्रपूजनात्।
धनधान्यसुखं भुक्त्वा सोऽन्ते शिवपुरं व्रजेत्।।४१।।

अघिल्ला जन्मको पाप हट्छ, शम्भु खुसी हुनन्।
धनधान्य, सुखै भोगी शिवसायुज्य पाउलान्।।४१।।

फाल्गुनस्यासिते पक्षे त्रिषड्व्योमाक्षिसम्मिते।
वैक्रमेऽब्दे चतुर्दश्यां चत्वारिंशमिहालिखत्।।४२।।

त्रिसट्ठी साल फाल्गुन महिना शिवरात्रिमा।
शिवदर्शन पाएर लेखेको चालिसा गुन।।४२।।

चत्वारिंशपाठकं च कर्तारं व्रतिनं सदा।
प्रसन्नो वरदो भूयात् शङ्करः शुभदः शिवः।।४३।।

यो चालिसा पाठ गर्ने, व्रत बस्ने, बनाउने।
सबैसङ्ग खुसी होऊन् भोले! हित गराउने।।४३।।

* *

# १०. गणेशचत्वारिंशम्

(नेपालीभाषासहितम्)

श्रीगणेशो विजयते सिद्धिबुद्धिपतिश्च यः।
गौरीगिरिशयोः पुत्रः शुभलाभकरः सदा।।१।।

गौरीगिरिशका छोरा शुभलाभ दिने सधैँ।
जो सिद्धिबुद्धिपति हुन्, जय होस् ती गणेशकै।।१।।

गणेश! त्वं दुःखहर्ता विघ्नहर्ता शुभप्रदः।
शिवयोर्नन्दनोऽसि त्वं कुरुषे लोकनन्दनम्।।२।।

दुःख हर्छौ, विघ्न हर्छौ, शुभ गर्छौ गणेश! हे।
लोकलाई खुसी राख्छौ पार्वतीशिवपुत्र! हे।।२।।

त्वं देवगणनेतासि जनानां सुखदायकः।
विनायकोऽसि विश्वस्य सिद्धिबुद्धिविधायकः।।३।।

विश्वका एक नेता हौ हे देवगणनायक!।
सिद्धिबुद्धि दिने गर्छौ जनतासुखदायक!।।३।।

गजवक्त्रोऽप्येकदन्तः शुण्डनासाविराजितः।
वक्रतुण्डोऽपि सुमुखो घरदो वरदः शिवः।।४।।

हात्तीमुखे एकदन्त सुँडको नाक सुन्दर।
घर दिन्छौ, वर दिन्छौ, राम्रा छौ, वक्रतुण्ड छौ।।४।।

जगत्सुखकरं शीलं पितरौ पार्वतीश्वरौ।
षडाननोऽग्रजो यस्य धन्यो गणपतिः स्वयम्।।५।।

हे गौरीशिवका पुत्र! शील तिम्रो जगत्सुख।
सेनानी दाजु छन् तिम्रा, आफू हौ गणनायक।।५।।

त्रिपुण्ड्रं शोभते भाले त्रिशूलेन सुचिह्नितम्।
श्रोतारौ जगतां दुःखं शूर्पकर्णौ सुशोभनौ।।६।।

त्रिशूलका साथ तिम्रो भालमाथि त्रिपुण्ड्र छ।
जगत्को दुःख सुन्ने ती शूपाभैँ दुइ कान छन्।।६।।

अमूल्यरत्नखचितं मुक्तामणिविराजितम्।
शिरस्त्रं मुकुटं यस्य भक्तचिन्ताहरं शुभम्।।७।।

अमूल्य रत्नले पूर्ण मणिमुक्ता सुशोभित।
टोपी छ तिम्रो मुकुट, भक्तको पीर हर्दछ।।७।।

कुठारपाशौ करयोर्दुष्टान् दमयितुं धृतौ।
सतां पालयितुं मुद्रामोदके परयोर्धृते।।८।।

बन्चरो, पाश पक्रिन्छौ दुष्टलाई दबाउन।
लड्डु, स्वस्तिक पो लिन्छौ सन्तलाई बचाउन।।८।।

धृतयज्ञोपवीतस्य पीताम्बरधरस्य ते।
भोजनार्थं मोदकानि फलात् प्रियतराणि किम्।।९।।

पहिरेका जनै, धोती पहेँलो तिमीलाई के?।
फलभन्दा पनि मीठा लड्डु नै लाग्दछन् कि के?।।९।।

ऋद्धिसिद्धी तवोपान्ते सदा जागरिते स्थिते।
ताभ्यां सुसेवितोऽसि त्वं वाहनार्थेऽस्ति मूषकः।।१०।।

छन् तिम्रा साथमा ऋद्धि-सिद्धि जागा सधैँभरि।
गर्दछन् तिनले सेवा, तिम्रो वाहन मूषक।।१०।।

अद्भुता ते जन्मकथा विग्रहोऽनुपमस्तव।
जगत्परिक्रमेऽप्यग्रः कोऽसौ मूषकवाहनः।।११।।

तिम्रो जन्मकथा सुन्दा अचम्म छ शरीर त्यो।
पृथ्वी घुम्दा अग्र हुन्छौ, तिम्रो वाहन हो मुसो।।११।।

महिमानं वर्णयितुं शक्नुवन्ति जना न ते।
क्षमः सर्वं वर्णयितुं यदि कश्चित् कविर्भवेत्।।१२।।

कसैले पनि सक्दैनन् महिमा गर्न वर्णन।
कुनै कवि भए तिम्रो जीवनी सक्छ लेखन।।१२।।

यतो हि ते जन्म वृत्तं दृष्टं काव्यात्मकं मया।
अतः कवयितुं कोऽपि सामान्यः शक्नुयात् कथम्।।१३।।

काव्यात्मक दुवै देख्छु तिम्रो जन्म र जीवनी।
सामान्य जनले लेख्न कहाँ सक्नु विना कवि।।१३।।

आयातः कोऽपि दनुजः शिवरूपधरः पुरा।
गौरीगृहे छद्मवेषी गौरीछलनमानसः।।१४।।

गौरी छल्ने इरादाले शिवरूप लिई कुनै।
उहिले दैत्य आएथ्यो छद्मवेश धरीकनै।।१४।।

एवंविधं समायान्तं जालिकं गृहमागतम्।
ज्ञात्वा स्नानगृहे याता स्नानार्थं तत्र पार्वती।।१५।।

यसरी आउँदै गर्दा सबै जानेर पार्वती।
नुहाउन भनी स्नानागारभित्र पसिन् अनि।।१५।।

स्नानकार्ये सुसंलग्ना शरीरमलमर्दिनी।
शिवापि हस्त आयातं मलपिण्डं स्वजीवयत्।।१६।।

भिजाई जिउ बिस्तारै माड्दा मयल निस्कियो।
हातमा परियो डल्लो, त्यसलाई बचाइयो।।१६।।

पुत्ररूपधरं बालं सृजन्तीं पार्वतीं प्रति।
सोऽपि वार्ताश्चकारेत्थं– कोऽहं पुत्रोऽसि मे प्रियः।।१७।।

पुत्रको रूपमा बच्चा बनाइन् पार्वती त्यहीँ।
त्यस्ले कुरा गऱ्यो यस्तो– म को हूँ? प्रिय पुत्र हौ।।१७।।

मातः किं करवाणीह त्वदर्थं नियुनक्तु माम्।
प्रतीहारे तिष्ठ पुत्र! रक्षकः प्रहरी भव।।१८।।

आमा! म के गरुँ भन्नोस्? हजुर्को काम गर्दछु।
द्वारपाल बनी राम्रो बस पुत्र! म भन्दछु।।१८।।

एवं रक्षन् प्रतीहारे दनुजं छलमानसम्।
गौरीगृहे प्रवेशन्तं भवानेवाऽवरोधयत्।।१९।।

द्वारपाल बनी बस्दा छद्मवेश लिई अहो!।
भित्रै पस्न भनी आको दैत्यलाई त रोक्नुभो।।१९।।

क्वचिद् विघ्ने समायाते प्रतीहारस्थितो यदि।
न किञ्चिद् भयमायाति विघ्नहर्ता यतो भवान्।।२०।।

विघ्नहर्ता रहेसम्म ढोकामा सुप्रतिष्ठित।
कुनै भय हुँदै हुन्न हजुर्का भक्तलाइ त।।२०।।

बहिर्गतः समागच्छन् भवन्तं दृष्टवान् शिवः।
प्रतीहारेऽवतिष्ठन्तं कोऽसि त्वमिति पृष्टवान्।।२१।।

कतै बाहिर निस्केका शिव फर्केर आउँदा।
को हौ तिमी? भनी सोधे ढोकामा पहरा दिँदा।।२१।।

'गौरीपुत्रोऽस्म्यहं द्वारपालः पादौ न चालय।
पृष्ट्वा स्वमातरं पूर्वमागच्छामि स्थिरो भव।।२२।।

गौरीपुत्र म हुँ, द्वारपाल हुँ, अडिनोस् अनि।
आमालाई म सोधेर आउँछु, पर्खिनोस् पनि।।२२।।

इत्युक्तवति त्वद्वाक्यं समुपेक्ष्य शिवः स्वयम्।
गृहं प्रवेष्टुमारेभे युद्धायाऽग्रेसरो भवान्।।२३।।

यसो भन्दा हजुरको बेवास्ता गर्नुभो अनि।
भित्र पस्ने आँट गर्दा लड्नुभो शम्भुसँग नि!।।२३।।

जाते युद्धे त्रिशूलेन शिवस्ते शिर आच्छिनत्।
अविचार्य द्रुतं व्योम्नि शिरः पुष्पमिवोद्गतम्।।२४।।

युद्ध चल्दा त्रिशूलैले काटेथे शिवले शिर।
तत्कालै पुष्पझैँ उड्दै हरायो गगनैतिर।।२४।।

अन्तःपुरं समागत्य शिवोऽपृच्छत् शिवां प्रति।
शिवे! प्रियतमे! पुत्रं त्वं कदाऽलभथाः सति!।।२५।।

भित्र आएर शिवले सोधेछन् पार्वतीसित।
शिवा, प्रियतमा, छोरो कहिले पाइयो नि त?।।२५।।

वार्तायामुभयोर्जन्मकथां तेऽश्रावयत् शिवा।
शिवाद् युद्धे वधं ज्ञात्वा सात्यन्तं विकलाभवत्।।२६।।

दुवैमा यो कुरा चल्दा सुनाइन् जन्मको कथा।
युद्धमा मारियो भन्ने जानिन्, लाग्यो ठुलो व्यथा।।२६।।

अहो! अनर्थो भवताऽविचारेण कृतो बहुः।
अन्विष्य शिर आनीय पुत्रं मे जीवितं कुरु।।२७।।

ठूलो अनर्थ हुन गो विचारै नगरीकन।
शिर खोजेर ल्याएर दिनुहोस् पुत्रजीवन।।२७।।

संशोधनीयः स्वकृतो यद्यनर्थो मया कृतः।
शिवोऽपीत्थं विचार्यैव शिरोऽन्वेष्टुं बहिर्गतः।।२८।।

के अनर्थ गरेँ मैले, सच्याउनुपऱ्यो अब।
भन्ने बिचारी शिवजी शिर खोज्दै हिँडे तब।।२८।।

गवेषणेऽपि यत्नेन तच्छिरो नैव लब्धवान्।
एकं हस्तिशिरः प्राप्य तदादाय निवृत्तवान्।।२९।।

धेरै खोज्दा पनि भेट्न सकेनन् शिर त्यो तर।
हात्तीको शिर पाएछन्, त्यो लिई फर्किए घर।।२९।।

स्वहस्ताभ्यां शिरो धृत्वा रुण्डोपरि निधाय तत्।
प्राणप्रतिष्ठां कृतवानमृतञ्चाप्यपाययत्।।३०।।

अड्याई हातले सुस्तै मिलाए रुण्डमाथि त्यो।
प्राणप्रतिष्ठा गरियो, सुधापान गराइयो।।३०।।

विद्यां सुविपुलं बुद्धिं दत्तवान् सूनवे शिवः।
अतो भवान् विघ्नहर्ता बुद्धिदः सुखदोऽभवत्।।३१।।

विद्या, बुद्धि दिए धेरै छोरालाई स्वयम् शिव।
विघ्नहर्ता, बुद्धि-सुखदाता हुनुभयो तब।।३१।।

भवान् चन्द्रमसे शापं दत्वा तमकलङ्कयत्।
अतो भाद्रचतुर्थ्यां हि न कार्यं चन्द्रदर्शनम्।।३२।।

सरापले चन्द्रलाई गर्नुभो नि कलङ्कित।
त्यसैले भाद्र चौथीमा चन्द्रदर्शन हुन्न त!।।३२।।

परीक्षां कर्तुकामस्ते शिवः स्वसुतयोर्द्वयोः।
परिक्रमयितुं पृथ्वीमादेशमकरोदहो!।।३३।।

हजुर्को जाँच गर्नैका लागि नै शिवले पनि।
पृथ्वी घुम्न दुवै छोरालाई आज्ञा दिए अनि।।३३।।

षडाननो वाहनं स्वं मयूरमधिरूढवान्।
भवितुं प्रथमः शीघ्रं सह तेन समुद्गतः।।३४।।

मयूरमा चढी छिट्टै पैला हुन्छु भनी गुह।
त्यसलाई लिई उड्दै पुगे आकाशको तह।।३४।।

उपायान्तरमन्विष्य मौनं धृत्वातिबुद्धिमान्।
भूमौ विलिख्य 'रामे'ति परिक्रमितवान् भवान्।।३५।।

अर्कै उपाय खोजेर चूप लागेर बुद्धिले।
भूईंमा लेख्नुभो 'राम', घुम्नुभो त्यहिँ जुक्तिले।।३५।।

ततः स्वौ पितरौ भूमिराकाशादतिशायितौ।
प्रणम्य गौरीगिरिशौ परिक्रमितवान् भवान्।।३६।।

भूमि-आकाशभन्दा भन् उच्च मातापिता अनि।
प्रणाम गर्दै सजिलै घुम्नुभो हजुरै पनि।।३६।।

विलोक्य विमलं बुद्धिं भवतः पार्वतीश्वरः।
परिक्रमफलं भूमेः प्रथमं त्वामघोषयत्।।३७।।

देखेर त्यो शुद्ध बुद्धि प्रसन्न हुनुभो शिव।
पृथ्वी घुम्ने यही पैलो भनी घोषित भो फल।।३७।।

ततोऽमराणां 'प्रथमपूज्यत्वं' दत्तवान् वरम्।
गणानां नायकत्वं च गणेशो नाम दत्तवान्।।३८।।

अनि 'प्रथमपूज्यत्व' देवताहरूमा वर।
मिल्यो नि गणनाथत्व, 'गणेश' हुन गो पद।।३८।।

यस्मिन् कस्मिन् कृते कार्ये तव नाम गृणन्ति ये।
कुर्वन्ति स्मरणं तेषां निर्विघ्नं कर्म सिद्ध्यति।।३९।।

जोसुकै जनले काम जेसुकै गर्न लाग्दछ।
हजुर्को नाम सम्झेमा सहजै पूर्ण बन्दछ।।३९।।

भवान् सुमङ्गलतनुर्गजवक्त्रोऽतिसुन्दरः।
ये भवन्तं संस्मरन्ति तेषां बुद्धिर्विवर्द्धते।।४०।।

हे हात्तीमुख! राम्रा छौ, सदा मङ्गलमूर्ति छौ।
सम्झना गर्दछन् जस्ले तिन्को बुद्धि बढाउँछौ।।४०।।

वैक्रमेऽब्दे फल्गुनिके त्रिषड्व्योमाक्षिसम्मिते।
लक्ष्मीकान्तो गणेशस्य चत्वारिंशमिहालिखत्।।४१।।

दुई हज्जार त्रिसट्ठी साल फाल्गुन मास छ।
गणेश चालिसा लेख्ने हो लक्ष्मीकान्त लेखक।।४१।।

गणेशभक्ता ये नित्यं चत्वारिंशं पठन्ति चेत्।
धनधान्यं बुद्धिविद्यां गेहानन्दं भजन्ति ते।।४२।।

गणेशका भक्तहरू सधैँ यो चालिसा पढून्।
बुद्धि-विद्या-धान्य-धन-सुख-सम्पत्तिमा रमून्।।४२।।

❊❊

## ११. हरिहरप्रार्थना

शशिखण्डशिखण्डशेखरौ
शरणं मे भवतां कृपाकरौ।
वसतां मुखपद्मसद्मनोः
सुरवाणी ससुखं हरिप्रिया।।१।।

❊❊

## १२. नागप्रार्थना

सकलभुवनपाता केशवस्त्वच्छरीरे
कलयति सुखशय्यां भूषणं त्वं शिवस्य।
विषधर! कुरु रक्षां पूजकस्याहिराज!
शमय सकलरोगाँश्चर्ममुख्याननेकान्।।१।।

❊❊

## १३. सत्यसाई भगवत्प्रार्थना

(श्रीसत्यसाई भगवन्नमस्ते)

शुद्धोऽसि भक्तजनरोगनिवारकोऽसि
बुद्धोऽसि वाञ्छितफलानि स्वयं ददासि।
साईः सहस्रजनवल्लभ! दिव्यमूर्ते!
नम्रीभवानि सततं तव पादयुग्मे।।१।।

ज्ञाताऽसि सर्वजनवाग्व्यवहारवृत्ते:
कर्ताऽसि भक्तजनदु:खभयान्निवृत्ते:।
त्राताऽसि देवसदृशोऽसि मन:स्थितोऽसि
साई: स्मरामि सकलं मम हृद्गतोऽसि।।२।।

सद्विद्या: सफला भवन्तु पठिता निर्यान्तु रोगारय:
पत्नी सद्गुणशालिनी भवतु मे सत्पुत्रचन्द्रोदय:।
सोऽयं सद्धनवान् सुधीर्गुणनिधिर्विख्यातनामा कवि:
साईर्वाञ्छितभूतये प्रभवतु ज्योतिर्विदामग्रणी:।।३।।

सत्काव्यप्रणये मति: प्रभवतात् सत्कर्मधर्मे रति:
प्रीति: सत्पुरुषे भवेच्च विपुला शास्त्रोक्तमार्गे गति:।
विज्ञानं समधीतवाङ्मयसुधाशास्त्रं समुद्भाव्यताम्
ज्ञानं मे परमात्मनि प्रतिदिनं साई:! समुज्जायताम्।।४।।

भक्तिस्त्वत्पदपङ्कजे भवतु मे कल्याणकर्त्री मयि
शक्तिस्त्वद्गुणवर्णने सुरगिरा वाणी प्रसीदेन्मयि।
अज्ञानापचयोऽस्तु चेतसि तदा ज्ञानोच्चसूर्योदय:
साईस्त्वत्पदपङ्कजार्पितजने सानन्दचन्द्रोदय:।।५।।

दग्धोऽहं भवदु:खवह्निजनितं तापं सुशीतं कुरु
खिन्नोऽहं स्वशरीररोगजनितं दु:खं च शान्तं कुरु।
अन्धोऽहं समधीतशास्त्रविषयो ज्ञानायनं दर्शय
दीनोऽहं धनधान्यरत्नकनकैर्हीनोऽस्मि मां प्रेक्षय।।६।।

सूर्योदयो भवतु मे हृदयान्धकूपे
चन्द्रोदयो भवतु जीवनवाटिकासु।
तत्रस्थजीवलतिका मम पुष्पिताऽस्तु
साई: कृपा भवतु बोधफलोदयोऽस्तु।।७।।

साईर्मदीयरचनासु भवत्कृपास्तु
साईर्मदीयरचनासु सजीवतास्तु।
देशान्तरस्थितजनात् समुपैतु वित्तं
देहस्थितं मम मन: समुपैतु भक्तिम्।।८।।

साई: सुवन्तपदवी तु कनीयसी स्यात्
साईस्तिङन्तपदवी च लघीयसी स्यात्।
साई: कृदन्तपदवी न यवीयसी स्यात्
साई: समस्तपदवी न दवीयसी स्यात्।।९।।

बहुव्रीहि: स्यान्मे पुनरपि भवेत्तत्पुरुष हे-
ऽव्ययीभावो नित्यं गृहजनसमाजे भवतु मे।
द्विगु: सोऽहं द्वन्द्वो यदि भवति चेत् कर्म धरणं
समस्ते वा व्यस्ते सकलपदवीं दर्शयतु माम्।।१०।।

साईस्ते दर्शनं स्यान्मम हृदि गतयो: पादयोरद्य सद्य:
साईर्मेऽमेरिकात: कमलमणिकराद् वित्तमायातु सद्य:।
रोगा निर्यान्तु नित्यं हृदयसुखकरी शान्तिरायातु सद्य:
शक्तिं बुद्धिं कवित्वं वितरतु भगवन् दीर्घमायुश्च सद्य:।।११।।

भोगान्धानां विषमविषयो मानव: सत्यसाई:
मोहान्धानां विषमविषयो देवता सत्यसाई:।
कर्मान्धानां विषमविषय: कर्मठ: सत्यसाई:
तत्त्वज्ञानां विषमविषय: सात्त्विक: सत्यसाई:।।१२।।

शान्ताकार: कुञ्चितकेशो हसितास्य:
साईरूपो भक्तजनानां निकटस्थ:।
स्वप्ने रूपं दर्शय सत्यं तव याचे
साईतात! त्वं हर दु:खं मम शश्वत्।।१३।।

दीनेषु नित्यं हि कृपासमुद्रो
वैद्यस्त्वमेवासि सदैव रोगे।
ज्ञानप्रदाता तमसाप्लुतेषु
श्रीसत्यसाईर्! भगवन्नमस्ते।।१४।।

❊ ❊

## १४. षोडशोपचारपूजाक्रमः

आवाहनासने २ पाद्यं ३ स्नानं ४ समधुपर्ककम्।
वस्त्रं ५ यज्ञोपवीतं ६ च भूषणं ७ गन्धमिश्रितम्।।१।।

अक्षता ८ नथ पुष्पाणि ९ देशकालोचितान्यपि।
धूपं १० दीपं ११ सनैवेद्यं जलाचमनमेव १२ च।।२।।

ताम्बूलं १३ दक्षिणायुक्तं ततो नीराजनं १४ पुनः।
प्रदक्षिणानमस्कारौ १५ प्रार्थना १६ स्तुतिपूर्विका।।३।।

एवं सम्पूजयेद् देवं मन्त्रैर्वैदिकतान्त्रिकैः।
सूर्यं गणेशं दुर्गां च शिवं विष्णुं क्रमादिह।।४।।

मनोऽभिलषितान् कामान् प्राप्नोतीह न संशयः।
भुक्त्वा भोगान् सुखी भूत्वा प्रयाति परमं पदम्।।५।।

ध्यानाऽऽवाहनमासनादिविधिना पाद्यादिभिः पूजनाद्
गन्धस्रक्सुमधूपदीपसहितैर्नैवेद्यमापोऽर्पणात्।
प्रादक्षिण्यनुतिस्तुतेर्भगवतः प्रीतिर्भवेच्चेन्मयि
कृष्णे भक्तिरतं मनो मम भवेदित्यर्थये किं पुनः।।६।।

❊ ❊

## १५. पितरौ

सर्वेषां प्रणिनां सत्यं जीवितव्यमशाश्वतम्।
तेषां च मानवो देहो दृश्यते क्षणभङ्गुरः।।१।।

यथा जलेषु दृश्यन्ते बुद्बुदाः क्षणभङ्गुराः।
तथा नृदेहा जायन्ते ते नश्यन्ति क्षणादिह।।२।।

तथापि सद्भिः शास्त्रेषु पुराणेषु मुहुर्मुहुः।
'दुर्लभो मानुषो देह' इत्युक्त्या स प्रशस्यते।।३।।

प्रशंसाकारणञ्चास्य श्रूयतां यदि रोचते।
धर्मार्थकाममोक्षाणां सिद्धिर्देहादिहोच्यते।।४।।

अनित्याद् विग्रहादस्मान्नित्यं ब्रह्म सनातनम्।
लभ्यते लौकिकी सिद्धिः सत्कर्मसुयशस्करी।।५।।

प्राप्यते मानुषैर्देहैः सत्प्रयत्ने कृते सति।
इत्थं सुदुर्लभो देहः पितृभ्यां परिपोषितः।।६।।

परन्तु न वयं शक्तास्तयोः प्रणतिपूर्वकम्।
समर्था अपि सेवायां न लग्ना जातमन्यवः।।७।।

सर्वार्थसाधको देहः पितृभ्यां जनितो मुदा।
पोषितो रक्षितस्ताभ्यां कथं दद्यान्न निर्वृतिम्।।८।।

शतायुषापि पुत्रेण सेवितौ पितरौ यदि।
निर्वेशं न तयोर्याति न सेवेत स किंसुतः।।९।।

"मातरं पितरं वृद्धं भार्यां साध्वीं सुतं शिशुम्।
गुरुं विप्रं प्रपन्नं च कल्पोऽबिभ्रच्छ्वसन्मृतः।।" (१०/४५/७)

इति भागवते कृष्णो विनीतः पितरौ प्रति।
ब्रूतेऽन्यस्य तु का वार्ता पितरौ हि महत्तमौ।।१०।।

स्वबालवनितां स्वं च रक्षन्तः सन्ति किंसुताः।
दुग्धेनापि न सेव्येते पितरौ दुग्धपायिनौ।।११।।

वृद्धत्वे कीदृशौ जातौ न दृष्टौ पितरौ यदि।
आयास्यत्येव वार्द्धक्यं यत्त्वयानुभविष्यते।।१२।।

पितरौ हि प्रभोः साक्षात् स्वरूपत्वेन संस्थितौ।
दुःखितं चेत्तयोश्चित्तं कृपाप्राप्तिः कथं भवेत्।।१३।।

यस्य पित्रोः कृपादृष्टिकिरणैरुज्वलो घनः।
तस्य वर्षामृतफला भवेज्जीवनवल्लरी।।१४।।

अतो दुर्लभदेहस्योत्पादकौ पितरौ स्मर।
तव जीवनदातारौ परमात्मस्वरूपिणौ।।१५।।

संसारे त्वं मुह्यसि चेत् पितरौ स्मर कीदृशौ।
तव जन्मप्रदातारौ तथाऽऽलोकप्रदर्शकौ।।१६।।

धनिकोऽस्यथवा विद्वान् दु:खितौ पितरौ यदि।
धिक् ते धनिकतामेवं विद्वत्तां मतिहीनताम्।।१७।।

महत्त्वपूर्णे संसारे सर्वेभ्यो जीवनं महत्।
जीवनेन विना भोग्यं कस्य किञ्चित् कथं कुत:।।१८।।

सर्वाभ्यो महती विद्या विद्यायाश्च धनं महत्।
संसारेऽतीव चपलं धनादपि महन्मन:।।१९।।

जानन्ति जीवनार्थास्ते जीवनं महदित्यमुम्।
तत्कारणं न जानन्ति महाभूतानि पञ्च किम्?।।२०।।

पृथ्वी नभो वायुरापस्तेजो जीवनकारणम्।
ततोऽधिकतरं मन्ये रज:शुक्रे हि कारणम्।।२१।।

रज:शुक्रधरौ मातापितरावादिकारणम्।
सेवन्ते पितरौ ये ते जीवन्ति शरदां शतम्।।२२।।

भवाब्धिपारं तरितुमुपायं सरलं स्मर।
पितृसेवातरिं स्थित्वा शीघ्रं पारं गमिष्यसि।।२३।।

स्वयं तन्निकटं गत्वा तयो: सेवां समाचर।
तयोराशी: सुधां पीत्वा जन्मसाफल्यमाचर।।२४।।

सशोकौ पितरौ चेत्तावशोकौ कुरु सेवया।
अशोकौ पितरौ यस्य समृद्धिर्वृणुते हि तम्।।२५।।

तेन दत्तं हुतं जप्तं व्रतं तीर्थं तप: कृतम्।
देवा: सुपूजिता भक्त्या पितरौ येन सेवितौ।।२६।।

नारायणं स्वपितरं स्मर लक्ष्मीं स्वमातरम्।
लक्ष्मीनारायणौ तेन पितरौ येन सेवितौ।।२७।।

यद्वा स्वपितरं ब्रह्म तन्मायां विद्धि मातरम्।
ऐक्यभावस्तयोस्त्वं हि लोकवद् ब्रह्ममाययो:।।२८।।

साक्षात् स्वपितरं मन्ये शिवमम्बां स्वमातरम्।
तयो: प्रदक्षिणां नित्यं कर्तुमीहे गणेशवत्।।२९।।

गणेश! त्वयि शक्तिश्चेद् बुद्धिं सिद्धिञ्च देहि मे।
सुसेवार्थं स्वपित्रोर्मे स्वयमन्यद् विचार्यताम्।।३०।।

**

## १६. पितृसूक्तम्

नेपालभूपालसुशासितावनौ
दिशि प्रतीच्यां धुरकोटमण्डले।
मुनेर्भरद्वाजकुलान्ववायिनां
ग्रामो 'बडाचौर' इति प्रचारित:।।१।।

पन्थीति नामा द्विजवंशसम्भवो
विख्यातकीर्तिर्भरताभिधोऽभवत्।
यो ज्योतिषं शास्त्रमपाठयत् सदा
शिष्या: प्रशिष्या बहवस्तदाऽभवन्।।२।।

पुत्रस्तदीय: सकलार्थवेत्ता
दत्ताभिधोऽभून्निगमागमज्ञ:।
तेनैव सज्ज्योतिषशास्त्रतन्तु-
र्देशे प्रदेशे विपुलीकृताऽऽसीत्।।३।।

पौराणिकोऽयं विबुधाग्रगण्यो
धर्मप्रवक्ता नयविद् गुणज्ञ:।
ज्ञाता त्रिकालस्य फलानि वक्ता
सच्छास्त्रवेत्तापि च कर्मकर्ता।।४।।

देवीप्रसादोऽपि च दत्तपुत्रः
पौराणिकोऽभूत् सकलार्थवेत्ता।
यो ज्योतिषाध्यापनधर्मकृत्या-
न्यकारयत् सज्जनवल्लभोऽभूत्।।५।।

देवीप्रसादस्य सुतोऽपि भीम-
कान्ताभिधोऽभून्निगमागमज्ञः।
पौराणिकोऽयं विबुधान आसी-
ज्जनातिमान्यो नयविद् गुणज्ञः।।६।।

यो व्याकृतिज्योतिषकोषतर्क-
संस्कारकर्माण्यथ याज्ञिकानि।
सधर्मशास्त्रादिककर्मकृत्या-
न्यपाठयच्छात्रगणाननेकान्।।७।।

पुराणसारं प्रसमीक्ष्यपारं
सकामनिष्कामविचारभावम्।
काव्यद्वयं यो रुचिरं विलिख्य
गतः सुधर्मां कवितां प्रवक्तुम्।।८।।

ततोऽपि देवेन्द्रसभां समेत्य
काव्यद्वयं देवचरित्रचारु।
देवाँस्तथा देवगुरुं प्रदर्श्य
योऽश्रावयत् स्वां कवितां सदर्थाम्।।९।।

कृतादरस्तत्र निवेशितेषु
नैपालविद्वज्जनसंयुतेषु।
निषण्णके संस्थितवान् सुरम्ये
ह्यग्रे कृतोऽयं विबुधैर्बुधैश्च।।१०।।

तन्मुद्रितं काव्यमिहापि शिष्टं
सर्वे पठन्तु प्रभवन्तु शिष्टाः।
पुत्रा वयं लोकसभाविशिष्टा
भूयास्म भूयाज्जनको विशिष्टः।।११।।

पिताऽस्मदीयो नरलोकसार:
स कर्णधारो व्यवहारसिन्धो:।
स शिल्पकारो नवजीवनस्य
नवाऽवतार: करुणैकमूर्ते:।।१२।।

नमोऽस्तु विद्यार्थिजनप्रियाय
नमोऽस्तु विद्वज्जनवल्लभाय।
नमोऽस्तु काव्यामृतसेवकाय
नमोऽस्तु काव्यामृतदेशिकाय।।१३।।

तस्मै नम: सकलशास्त्रनिदेशकाय
तस्मै नमोऽज्ञजनतापरिबोधकाय।
तस्मै नम: सुकृतकर्मकृतव्रताय
तस्मै नम: सुखमुखात् सुखयोजकाय।।१४।।

योऽन्तस्तमोऽपहरणादवभाति सूर्य-
श्चन्द्र: सदामृतकरादिह वत्सलोऽभूत्।
नित्यं सुमङ्गलगिरा भुवि मङ्गलोऽपि
सौम्य: सदा बुधमन:सु तथाबुधेषु।।१५।।

वाचां पति: कविजनेषु गुरुर्हि छात्र-
वृन्देषु, काव्यकलनात् कविरेव साक्षात्।
पद्भ्यां शनैश्चरणतोऽपि शनैश्चर: किं
दृग्भ्यां तम: शिखिशिखो ग्रहसंहतिर्वा।।१६।।

पदवाक्यविचारविद्यया
धिषणायां विबुधाग्रगण्यते!
जनके वसति: कृता त्वया
ह्यधुना-नाथवती न दृश्यसे।।१७।।

तव निर्गमने बुधाग्रते!
चतुरा: केऽपि बुधेषु पश्चिमा:।
पदवाक्यविचारविद्यया
रहितास्ते तु कुतोऽग्रयायिन:।।१८।।

पितरि त्रिदशालयं गते
जनताऽनेकदशामुपागता।
इह धार्मिकनिर्णयादिकं
विगतं यज्ञविधिश्च निर्गतः।।१९।।

कविना सह ते स्थितिः पुरा
मम पित्रा कविते! सुखावहा।
अधुना कवितां लिखन्ति नो
खवितामेव लिखन्ति केऽप्यहो!।।२०।।

ननु शिष्यगणप्रपाठनं
पितरि स्नेहयुते गते सति।
अधुना पठनं न दृश्यते
विवदन्ते पठनार्थमागताः।।२१।।

चन्दनार्चितभालेन व्यूढोरस्केण मूर्तिना।
जानुलम्बिप्रवेष्टाभ्यां सदा स्मेरमुखेन च।।२२।।

विद्यया वाग्विलासेन कथाप्रवचनेन वा।
पूजापाठेन नित्येन श्रद्धया पितृदेवयोः।।२३।।

परिधृतेन वस्त्रेण व्यवहारेण बुद्ध्यते।
दिव एव समायातः किं चित्रं त्रिदिवृते।।२४।।

पितृक्षीरनिधेरस्मान् घृतं मिलतु सन्ततम्।
तेनैव जीवनज्योतिरस्माकं भुवि दीप्यताम्।।२५।।

व्यूढोरस्काद् विदितविपुलाज्जानुलम्बिप्रवेष्टात्
देहायत्तं प्रथितसकलैर्दूरदृष्ट्यापि नूनम्।।
भालः पूर्णेन्दुवदनरुचिश्चन्दनेनार्चितोऽस्य
धौतं वस्त्रं परिधृतशिरस्त्रं च शुक्लं सदैव।।२६।।

लक्ष्मीसूर्यचन्द्रविष्णुकृष्णाः कान्तोत्तरा वयम्।
पितृसूक्तं पठन्तोऽत्र जीव्यास्म शरदां शतम्।।२७।।

महिते पितरि श्रद्धां व्यक्तयन्तो दिवानिशम्।
सर्वे पुमर्थत्रातारो जीवन्तु शरदां शतम्।।२८।।

* *

## १७. पितृचरणस्मरणम्

भारद्वाजसगोत्रविप्रकुलजो ज्योतिर्विदामग्रगो
दत्तात्रेय इति स्वनामविदितो नेपालभूमध्यग:।
आसीन्मे प्रपितामह: कुलमणिर्नेपालपालाश्रितो
होरासागरपारग: श्रुतवतां कालत्रयोद्भाषक:।।१।।

तत्पुत्र: श्रुतिशास्त्रविद् बहुमतो देवीप्रसादोऽभवत्
सोऽयं पितृपथाश्रितो बहुजनै: सम्मानित: सादरम्।
यत्पुत्रा वसुसङ्ख्यका दिशि दिशि स्वाधीतविद्यागुणै:
सम्मान्या: कुलधर्मनीतिनिपुणा आचारवन्तोऽभवन्।।२।।

तन्मध्ये निगमागमेऽतिनिपुण: शास्त्रज्ञ एको महान्
विद्याध्यापनधर्मनिर्णयविधौ वक्ता पुराणेष्वपि।
यो रामायणभारतादिषु तथा प्रश्नोत्तरादौ श्रुतो
यज्ञे यज्ञविधौ च काव्यकलने श्रीभीमकान्त: सुधी:।।३।।

भारद्वाजकुले चरित्रधवले विद्यार्जने लक्ष्यित:।
तातो यस्य बुधाग्रणी: समभवत् श्रीभीमकान्त: कवि:।
माता चापि सतीशिरोमणिसमा श्रीनीलमायाभिधा
पुत्रोऽसौ न सुधी: कविर्न न गुणीर्लक्ष्म्यादिकान्तोऽबुध:।।४।।

यो वेदान्तादिकधर्मशास्त्रनिपुण: सत्साङ्ख्ययोगक्षमो
धर्माचाररत: पुराणकथयाऽऽत्मानं पवित्रीकृत:।
आयुर्वेदविचारक: सुकृतकृत् सत्कर्मकाण्डक्षम:
साहित्याम्बुधिपारगो बहुमत: सन्त: पिताऽऽसीद् बुध:।।५।।

यो मां व्याकृतिकोषकाव्यनिचयां शिक्षां समस्तामदात्
यो वेदान्तपुराणभारतमुखात् सम्यक् प्रबोधानदात्।
येन स्याल्लिखिता सतां सुखकरी काव्यत्रयी विश्रुता
तस्यैव स्वपितुः कवेः पदनतः शीर्ष्णा प्रणामो मम।।६।।

येनाहं सुखपाठितोऽनवरतं शब्दादिशास्त्रं ततः
साहित्यं निगमागमादिसहितं सद्धर्मशास्त्रं पुनः।
तर्कं कोषमहो! कवित्वसुलभं वेदान्तविद्यादिकं
तातं तं प्रणमामि पादयुगले श्रीभीमकान्तं गुरुम्।।७।।

येनैव प्रतिपादिता सुधिषणा सद्विद्यया भूषिता
शिक्षां दातुमलं भविष्णुरनयोऽबोधादिवैक्लव्यतः।
सद्विद्याविभवं च यत्करुणया काले समासादितं
तेनैव प्रतिपालये स्वमुदरं श्रीभीमकान्तं भजे।।८।।

भारद्वाजकुलावतंसमणिवद् योऽभूत् सतामग्रणी-
र्लोकैर्गीतगुणोऽर्थिभिः परिवृतो विद्यार्थिभिः संस्तुतः।
सर्वैर्माण्डलिकैर्बहुश्रुतजनैर्यत्पदपद्मार्चितं
तस्यैतत्पदपद्ममस्तु सुखदं भूयात् तमोहारकम्।।९।।

शुद्धान्तःकरणो बुधाग्रचरणो योऽभूत् कवीनां प्रियः
यो वेदान्तविचारणे स्थिरमना विद्वज्जनैर्वन्दितः।
यो मुक्तो गृहदारबन्धनसुखैः पुत्रादिसम्पद्धनैः
स्वान् पुत्रान् दिवि संस्थितः स जनकः पायादपायात् सदा।।१०।।

नाहं शब्दसमीक्षको न गणको योगे न योगोऽस्ति मे
तर्के कर्कशवाचने न हि रुचिः साङ्ख्ये न सङ्ख्यं मम।
नो वेदान्तविचारको न विबुधो मीमांसयाऽनाश्रितो
धर्मे नास्ति मतिर्भयादुपरतः शास्त्राब्धिकल्लोलतः।।११।।

मूढः सोऽहमतीव चञ्चलमतिः शास्त्रे न काचिद् गतिः
युक्तोऽध्यापनवृत्तिनिर्भरगतिः खादन् श्वसन् मन्दधीः।
लक्ष्मीः पूर्वपदं तदुत्तरपदं कान्तः समासात्तयोर्
लक्ष्मीकान्त इमं विदन्तु विबुधास्तेषां विधेयं जनम्।।१२।।

सोऽयं तत्प्रथमः सुतः किमपि नाधीतोऽल्पबुध्या यतः
सारासारविवेचनाक्षमगतिः सच्छास्त्रसिन्धौ भयात्।
तत्तीरे निवसन् पुनः कतिपयानाचम्य विन्दूनपि
शब्दानामुपयोजनं विहितवान् स्यात् काव्यबन्धो न वा।।१३।।

गुल्मीमण्डलमालिकाद्रितनया या निम्नगा पन्नगा
तस्याः प्राक्तटमाश्रिताऽस्ति वसतिर्ग्रामो बृहच्चत्वरः।
भारद्वाजकुलेऽमले जनिरभूत् श्रीनीलमायाङ्गजो
लक्ष्मीकान्त इतीह नामकथितः श्रीभीमकान्तात्मजः।।१४।।

यो विद्याध्ययनार्थमागत इह श्रीराजधान्यां स्वयं
शास्त्राण्यध्ययनाय संस्कृतमहाविद्यालये सङ्गतः।
तत्र श्रीगुरुभिः सहैकनियमाद् वेदान्तविद्यां तथा
साहित्यद्वितयेन सार्द्धमपठत् श्रीधर्मशास्त्रं पुनः।।१५।।

यो दैनन्दिनकर्मकर्तुमलगत् शिक्षाविकासादिमे
किञ्चित् कालमितस्तोऽभ्रमदयं केन्द्रेऽनुसन्धानके।
हित्वा तत्पदमात्मनोऽरुचितया प्राध्यापनार्थं पुनर्
विद्यापीठमवाप्तवान् त्रिभुवने विश्वाद्यविद्यालये।।१६।।

यत्काव्यं रुचिरं न दृष्टमपरैर्नाद्य प्रकाशं गतं
छन्दोऽलङ्कृतिरीतिवृत्तिभणितिध्वन्यादिभिर्नीरसम्।
आख्यानं रुचिरं न भावमधुरं नो लक्षणैः सङ्गतं
नैतिह्येन युतं न वा सदलकं नेतृप्रशंसा कृतम्।।१७।।

पित्रा सार्द्धं ह्यनुदिनमसौ यत्र विद्यार्थिभिश्च
गोभिर्युक्तं सकलमहिषीचारणं कर्मपूर्वः।
पाठं पाठं प्रणयभरितां व्याकृतिं श्लोकपूर्वं
कोषं काव्यं ससुखमरटद् यत्र शब्दार्थपूर्वम्।।१८।।

सानन्दास्ते मृदुलपवना बोधिवृक्षः समीपे
क्रीडारम्यं विषमविरहं शाद्वलं स्थानमस्ति।
बाल्यावस्था सहचरगणैर्यापिता सौष्ठवेन
संस्मर्यन्ते जनिभुविगता यत्र रम्या दिनान्ताः।।१९।।

पुत्रान् भूरिद्रविणपिटकानाप्तुकामश्चतस्रो
दारा माया कमलनयना शक्तिरन्यानुकम्पा।
उद्वाह्यैताः सकलमणीर्दारिका लब्धवत्यो
विद्यां सेवां विनयकवितां शुद्धभावां चतस्रः।।२०।।

दिष्ट्या दत्ता पतिमनुगता मातरं माञ्च हित्वा
दुःखं प्राप्तं द्रविणविरहान्नानुकूलो विधिर्मे।
धैर्यं तोषं सरलहृदयं त्यागमेवात्मपुत्रा-
नानीयाङ्कं सुखमनुभवन् जीवयन् जीवितस्तैः।।२१।।

विद्वन्मान्यो भीमकान्तोऽस्ति तातो
लक्ष्मीरूपा नीलमायाऽस्ति माता।
पत्नी माया यस्य पुत्र्यश्चतस्रो
भक्तिश्चेता भावना साधना च।।२२।।

चत्वारस्ते भ्रातरो बुद्धिमन्तः
सूर्यश्चन्द्रो विष्णुरन्त्यस्तु कृष्णः।
ये सर्वेषां प्रेमपात्रस्वरूपाः
सन्त्यस्माकं धर्मकर्माणि पान्तु।।२३।।

चरन्ति पशुपक्षिणो बुधजनास्तथा यात्रिणः
तदर्थपरिबोधकोऽप्यथ गृहाङ्गणद्यर्थकः।
स एव बृहदर्थवानिति जना बृहच्चत्वरं
गदन्ति वचनैः सदाऽभवदसौ बृहच्चत्वरः।।२४।।

बृहच्चत्वरादगतो मञ्जुगर्ते
निवासं विनिर्माय यात्रां विधत्ते।
स्थितो योऽर्भकेवार्भकैः स्वैर्वृतोऽपि
अनर्होऽस्ति भाग्यात् कथं सोऽर्हणीयः।।२५।।

विद्वत्कुले जनिमवाप्य हि वंशपूर्वा
आसन् समे व्यवहृतौ कुशलाः समर्थाः।
शास्त्रेऽनिरुद्धगतयः पितरो ममासन्
तेषां सुतोऽस्म्यति जडो न तु शास्त्रवेत्ता।।२६।।

**

## १८. सपत्नमाता

सदा मदीयास्तु सपत्नमाता मामेव पुत्रं मनुतां प्रसन्ना।
अहन्तदर्थं जलमन्नवस्त्रं यथाभिलाषं रचयानि नित्यम्।।१।।

पुत्रास्तदीयाश्च गुणाकराः स्युः शास्त्रेऽनिरुद्धा गतिरस्तु तेषाम्।
प्रेमप्रपूर्णाः परमार्थविज्ञा यद्यग्रजा मामनुजं स्मरन्तु।।२।।

मत्तोऽनुजाता यदि ते पुनर्मे ह्याज्ञापराः सन्तु सहायकाश्च।
विद्यामविद्यां च पठन्तु मत्तः कुलागतं धर्ममनुव्रजन्तु।।३।।

अतस्तदीया जननी सदैव मामेव पुत्रं प्रविचारयन्ती।
इह प्रसन्ना मुदमावहन्ती तथाऽन्यजन्मन्यपि संस्मरेत् सा।।४।।

**

## १९. मातृसूक्तिः

मातस्ते वत्सलाङ्के मम जनुरभवत् त्वत्कृपाजीवितोऽस्मि
पूतोऽहं गर्भवासादथ च तव शुचिस्तन्यपानेन वृद्धः।
माधुर्यं त्वत्पयो मे वपुषि तरलितं शक्तियुक्तोऽस्मि तेन
आनृण्यं लब्धुमीहे कथमपि भवतीं सेवमानो विनीतः।।१।।

पायं पायं पयस्ते मम सहजतया निर्गतो बाल्यकालः
नामं नामं तवाङ्के गुरुतमचरणौ प्राप्तकैशोरकालः।
कारं कारं सुविद्यार्जनकरणविधिं यौवने दूरसंस्था
प्रौढे सेवां करिष्ये प्रियतमतनयात् किं पुनर्दूरसंस्था?।।२।।

मातस्त्वं जन्मभूमिः समविपुलतरा निर्मला कोमलाऽसि
धावं धावं चतुर्दिक् क्वचिदपि पुरतस्त्वद्विधा नैव दृष्टा।
पायं पायं तवाङ्के ह्यतिसुलभपयो वातमच्छं यथेच्छं
स्मारं स्मारं प्रतिष्ठे कथमपि हि कदाचित् त्वया विस्मृतः किम्?।।३।।

लक्ष्मीरिवाऽतिनिपुणा गृहकार्यदक्षा
धर्मोपदेशकुशलाऽस्ति सरस्वतीव।
पातिव्रतेऽपि निरता सततं शचीव
नित्यं शिवार्चनपराऽस्ति च पार्वतीव।।४।।

माताऽधुनाऽशीतिवयोऽधिका या
स्नेहं ददन्ती सकलाऽङ्गजेभ्यः।
शचीव गौरीव सरस्वतीव
लक्ष्मीरवाशीषवितन्वतीव।।५।।

मातस्त्वं जन्मदात्री जलपवनधरातेज आकाश धात्री
मातस्त्वं मार्गदात्री श्रुतिनयनकराऽऽकारदात्री मम श्रीः।
मातस्त्वं प्राणदात्री जलघृतपयसान्नादिभिस्तृप्तिकर्त्री
वाग्बुद्धिप्रेममायाविनयकृतिकलाशिल्पविद्यादिदात्री।।६।।

मातृसूक्तिं पठन् वर्ते मातरं संस्मरन्निह।
सम्भावयतु मां माता जन्मभूमिगरीयसी।।७।।

* *

## २०. कृपामूर्तिः

कुक्षिक्रोडपयोधरैः सकरुणा स्नेहाऽऽत्मभावाश्रया
वात्सल्यैः परिपूरिता सनियमैर्भोज्यं प्रदात्री सदा।
वस्त्रैरङ्गसुरक्षिका सकृपया प्राणाधिका वल्लभा
रक्षाप्रीतिविवर्द्धिनी च सदयामूर्तिर्जनित्री मम।।१।।

हे मातर्ममम कर्णचक्षुरसनात्वङ्नासिकावाक्करौ
तुण्डं बुद्धिमनोयुतैरवसितैः शीर्षादिकं यद् वपुः।
देहाङ्गानि तदर्जिता सुधिषणा विद्याश्च सम्पद्धनं
सर्वं यद् यदि विद्यते त्वयि कृपामूर्तौ दरीदृश्यते।।२।।

* *

## २१. माता

माता जीवनमूलमस्ति जगतां सृष्टिं विधात्री स्वयं
माता लोचनमस्ति नूत्नरचनायाः सर्वदृष्टेरिह।
माता जीवनमौषधं हितकरं दिव्याऽस्ति सञ्जीवनी
मातुर्वै ममतामवाप्य वपुषा संवर्द्धते जीवनम्।।१।।

विद्यामूर्तिसरस्वती दरहरा माता सदा प्राणदा
प्रज्ञाचक्षुविवेकविन्दुपयसाऽऽसिञ्चत्यसौ शारदा।
माता शान्तिदयाक्षमाकरुणया वात्सल्यरत्नाकरः
माता सूज्ज्वलचेतनाऽस्ति मनसः सूत्प्रेरणं साहसम्।।२।।

नैका रूपवती तथा गुणवती वीराङ्गना नायिका
नारीरत्नमनेकमस्तु विफला: स्युस्ता विना मारतम्।
स्यान्माता निकटे न यान्ति सहसा तृष्णा पिपासा क्षुधा
स्यान्माता निकटे सुधा हितकरी मात्रा समं तिष्ठति।।३।।

माता सर्गविधौ प्रजापतिसमौदार्यं ममत्वं कृपा-
त्यागक्षान्तिदयाममत्वसहिता माधुर्यसम्मिश्रिता।
सर्वैरात्मगुणै: प्रभां वितरति स्वाभ्य: प्रजाभ्यो मुहु-
र्मातुस्त्यागबलात् स्वजीवननदीं सर्वास्तरन्ति प्रजा:।।४।।

विश्रामं न करोति मातृहृदयं देहो न सन्तिष्ठते
सन्तानस्य हिताय युध्यति सदा विघ्नैर्न दु:खीयति।
माता न: पृथिवी चराचरजगन्नित्यं बिभर्ति स्वयं
चेन्मातुर्ममता च दृङ् न मिलिते सर्वा म्रियन्ते प्रजा:।।५।।

माता धारयति प्रजा: स्वकुहरे स्वीयं धयन्ती पयो
भुक्त्वा दु:खमतीव तप्यति भृशं रक्षार्थमासां सदा।
दूरं याति न कोऽपि मातृममतां विस्मृत्य गच्छेद्यदि
मातुस्तद् हृदयं न दूरयति तं स्नेहं सदा सिञ्चति।।६।।

मातस्त्वां व्यथितुं कुरूपयितुमप्युद्यन्ति सर्वे जना
हा! दु:खं हितकृन्न कोऽपि दृशि मे स्वप्नेऽपि नेच्छन्ति ते।
पुत्रा: स्मो वयमत्र ते हितकरा कार्यं न कर्तुं क्षमा
मातर्ब्रूहि किमर्थमत्र बहुशो जाता: कुपुत्रास्तव।।७।।

प्रह्लादस्य कवे रम्या भाषायां रचिता नवा।
आमाशीर्षकसम्बद्धा कविता संस्कृतीकृता।।८।।

❊ ❊

# २२. सरस्वतीस्तोत्रम्

भवद्ध्यानाद्धाता सकलनिगमज्ञानमवदत्
भवत्स्तोत्राज्जीवः सुरगुरुरसौ वाक्पतिरभूत्।
भवत्सेवां कृत्वाऽसुरगुरुजनः सत्कविरभूत्
तथा व्यासो लोके भवदपचितेरेव सुकृती।।१।।

भवद्रूपध्यानं स्तुतिनुतिमतः पूजनमपि
तथा पाठं कुर्वेऽहरहरुषसि स्तुत्यचरिते।
शुभे! शुक्ले! मातर्वसनदशनैः शुभ्रचरितै-
र्हृदज्ञानध्वान्तं कुरु विनशनं शुक्लवसने!।।२।।

सुतस्तेऽहं मातर्निरवधिभवन्मन्त्रजपतो
भवत्सेवां कुर्वे तदपि मम मेधा क्व नु गता?
न जानेऽहं विद्यां मतिरपि न वेदान्तविषये
विलग्ना जाता मां कुरु करुणया त्वत्सुतमिव।।३।।

शिवं वा विष्णुं वा क्वचिदपि सुरज्येष्ठमपि नो
भजामि त्वामेवाहरहरुपतिष्ठे परिचयात्।
कथञ्चेत् पञ्चाब्दाद् गुरुरपि भवन्नामकथनात्
'सरस्वत्यै देव्यै नम' इति वदन् मां निरदिशत्।।४।।

तवेमं मन्त्रं मेऽसकृदपि जपादद्य विगतं
वयोऽवस्था जाता कथमनुवदामीह भवतीम्।
जरायाः सान्निध्यं स्मृतिरपि विलुप्तेव विमुखा
कथं मे साम्मुख्यं न भवसि बुधैस्त्वं परिचिता।।५।।

पत्रं पुष्पं फलमनु जलं तेऽर्पयामीह भक्त्या
स्वल्पैः शब्दैः स्तवनरचनं यत्कृतं तुष्टिहेतोः।
प्रीतिं कृत्वा मयि करुणया तुष्टिमायातु नित्यं
वाग्देवि! त्वामुपचितिविधिं स्तोत्रपाठं च कुर्वे।।६।।

वयं 'जीवेम शरदः शत'मित्यस्ति वेदवाक्।
मानुषा यदि जीवन्ति तत्पूर्णायुरिति श्रुतम्।।७।।

त्रिभागशेषे षट्षष्टिविगते वयसि स्थितः।
लक्ष्मीकान्तोऽलिखदिदं वाणीस्तोत्रं सतां मुदे।।८।।

* *

## २३. कथं कथं मे समयः प्रयातः

उत्थाय प्रातः शयनात् प्रबोध्य शृणोमि वार्तावहयन्त्रतोऽहम्।
अध्यात्मसारं वचनं तथैव नैपालकं वाऽथ विदेशभूतम्।।१।।

क्वचित् कदाचित् समुपागतं तु पश्यामि दृश्यं घटनाविशेषम्।
दूरे समीपे घटितं यथार्थं सचित्रयन्त्रे हि प्रसारितं यत्।।२।।

निवर्त्य शौचादपि धौतवस्त्रं धृत्वोत्तरीयं च जपादिकर्म।
पूजाप्रकोष्ठे प्रकरोमि पितृसन्तर्पणं देवसमर्चनं च।।३।।

ततः समुत्थाय करोमि पाठं खादामि गच्छामि पुनः पठामि।
पुराणरामायणभारतादीन् साहित्यवेदान्तमथापि धर्मम्।।४।।

जनाः समायान्ति कुरां करोमि पृच्छामि प्रश्नं च तथोत्तरामि।
जानामि किञ्चिन्न तथापि वक्ष्ये लिखामि कांश्चित् कवितादिकांश्च।।५।।

पठामि किञ्चिन्निगदामि किञ्चित् शास्त्रं तदर्थं च विचारयामि।
वेदान्तविद्योपनिषत्समेतां सत्साङ्ख्ययोगादिकशब्दविद्याम्।।६।।

क्वचिद्दिने ज्योतिषके रुचिर्मे जागर्ति पश्यामि यथाकथञ्चित्।
गीतोक्तमर्थं सुविचारयामि लिखामि किञ्चित् समयानुसारम्।।७।।

इतस्ततः कर्तुमहं न शक्तः सायन्तनं कृत्यमपि प्रकुर्वन्।
धूपं च दीपं सजपादिकं तं पाठादिकं चापि करोमि नित्यम्।।८।।

सचित्रवार्ताहरयन्त्रमेवं पश्यामि वार्तामपि संशृणोमि।
विधाय सायन्तनभोजनादि शये स्वशय्यां समयः प्रयातः।।९।।

* *

## द्वितीयोन्मेषः

# २४. अल्पज्ञता

नाहं संस्कृतभाषया स्वरसनास्वारस्य दाने क्षमः
नाहं व्याकृतिकोषकाव्यपठने तत्पाठने वा क्षमः।
नाहं कर्कशतर्कशास्त्रपठनेऽवच्छेदकाच्छादको
नो वेदान्तविचारको न निपुणो योगेऽप्ययुक्तोऽभवम्।।१।।

साङ्ख्ये सख्यमपीह नो क्वनु कदा मीमांसयाऽनाश्रितो
नो धर्माचरणे रतो न कुशलः साहित्यशास्त्राम्बुधौ।
ज्योतिःशास्त्रविचारणाक्षमगतिर्नो तान्त्रिको मान्त्रिकः
नो रामायणभारतादिकपुराणनां बुधो वाचकः।।२।।

नेपाले निवसन्नपि त्रिभुवने विश्वाद्य विद्यालये
भाषां पाठयता मयो दरदरी पूर्णीकृता चेदपि।
जाया संसृतिकारणं निगदतं शास्त्रं च लोकं स्मरन्
तद् वाञ्छापि न पूरिता सहचरीं सद्भूषणाच्छादनैः।।३।।

नो भक्तिर्न च भावनापि च मया नो साधना चेतना
विद्याबुद्धिविशेषितैः कुशलतामापादिता नैव ताः।
नो सत्काव्यसमीक्षणे च समयः सम्यङ्मया यापितः
नो वा काव्यकलाकृतौ कवितया चेतः समाकर्षितम्।।४।।

वेदज्ञोऽपि च नास्मि नोपनिषदि ज्ञानं गतिर्वापि मे
स्वच्छन्दोऽस्मि न छन्दसि प्रतिदिनं रुद्धा गतिर्लेखने।
काव्यादौ रसहीनता सगुणता नामापि न ज्ञायते
शास्त्रार्थस्य तु का कथा? बुधसभास्वल्पज्ञता वर्तते।।५।।

एवं नैकविधौ विचारविषये मेऽल्पज्ञता चेदपि
आयान्त्येव जना मदन्तिकमहो! शङ्कासमाधौ कति।
शास्त्रेष्वन्ध इवस्मि किन्तु सततं पृच्छन्ति मामेव ते
नो जाने व्यवहारदर्शनमतो देयं किमत्रोत्तरम्।।६।।

ज्ञातुं नैव हि शक्यते गहनतां शास्त्रेषु वेदेष्वपि
यात्किञ्चिनिगदामि यान्ति जनता मन्ये विचित्रं जगत्।
लोकः कोऽस्ति विलोक्यते, किमु न वा यत् तद् जगद् गच्छति?
संसारः सरतीह सम्यगिति वा नामापि किं कीदृशम्।।७।।

ये केचिद् ब्रुवते 'शिवं भज' बुधाः शैवाः पुनर्वैष्णवाः
'विष्णुं शुद्धहृदाऽनिशं भज सदा' शक्तिं हि शाक्ताः परे।
सौराः 'सूर्यमिति प्रकाशकमहो! नान्यं गणेशं परे
कल्याणं कुरु हे मनोमयगुरुः पारं नयस्वाशु माम्।।८।।

मोहक्षयो भवति यत्र यदा तदैव
'मोक्षो' भवेद् बुधजनस्य परस्य चापि।
नो चेत् तदा न हि भवेत् पठितस्य साधो-
रन्यस्य वाऽपि गतिरन्यतरा सदैव।।९।।

ज्ञानं भौतिकमध्यात्मं द्विधा लोके विभात्यपि।
अध्यात्मं मरणान्तेऽपि मरणान्तं हि भौतिकम्।।१०।।

द्विविधं भौतिकञ्चापि सैद्धान्तिकमतः परम्।
प्रयोगानुभवैर्युक्तं 'ज्ञानं भारः क्रियां विना'।।११।।

विद्यया जन्मना चेति लोके वंशो विभात्यपि।
प्रमाणपत्रसन्तानरक्षितोऽयं जरद्गवः।।१२।।

विद्यया जन्मना चेति द्विधावंशैर्न राजते।
प्रमाणपत्रसन्तानैश्छायाचित्रे विराजते।।१३।।

दीनबन्धो! कृपासिन्धो! मनो मेऽतीवचञ्चलम्।
तदादाय कथं कुर्यां स्थिरं त्वच्चारणाब्जयोः।।१४।।

अक्षिणी भ्रमरौ कृष्णौ मदीयौ बहिरुद्गतौ।
त्वदीयचरणाम्भोजचञ्चलौ गुञ्जनोत्सुकौ।।१५।।

कृपया तद्द्वयं शीघ्रं त्वत्पादकमलद्वयम्।
कुरुष्व लीनौ मनसः प्रकुरुष्व विपर्ययम्।।१६।।

अन्यथा वर्तमानोऽपि लोके लोकायतिं चरन्।
प्राप्नुयामिह सन्तोषं परत्र शरणं हरेः।।१७।।

❊ ❊

## २५. शिष्टाचारः

स्वागतं ते महाभाग! समायातश्चिरादहो!
दिवसः सार्थको जातः कृतार्थोऽस्मीह दर्शनात्।।१।।

दूराध्वना परिश्रान्त! आतपाकुलमानसः।
आस्यतामासने मित्र! सुखेनैव सुकोमले।।२।।

शीतलं सलिलं पीत्वा पिपासा चापनोद्यताम्।
क्षुधापनोदनार्थं हि यत्किञ्चिद् भुज्यतामिह।।३।।

धनान्नपशवः शान्ताः? शरीरारोग्यमस्ति किम्?
दारपुत्रगृहाण्यद्य कुशलानि किमुच्यताम्।।४।।

कथ्यतां कः समाचारः कुशलं किं कलेवरे।
मानसं परितुष्टं किं चिन्ता चेदपि गद्यताम्।।५।।

❊ ❊

## २६. साहित्यं किम्?

साहित्यं किं? सहितवचनं तच्च माधुर्ययुक्तम्
छन्दोबद्धं सरसवचनं भावपूर्णं मनोज्ञम्।
वक्तारं चाऽधिकसुखकरं लेखकं तुष्टिदातृ
श्रोतारं स्यात् श्रुतिपुटसुखाऽऽनन्दपूर्णं सदैव।।१।।

शब्दैरर्थैर्ध्वनिगुणयुतैरीतिभिर्वृत्तिभिश्च
सालङ्कारैर्ललितपदयुक् कोमलं मानसस्पृक्।
सारल्यं स्याद् व्यवहृतिकलायुक्तमिष्टार्थबोध्यं
कान्तावाग्भिस्तुलितसुपदं शिष्टभावार्थपूर्णम्।।२।।

**

## २७. काव्यम्

किं काव्यं किमकाव्यं स्यात् परिभाषा कथं भवेत्।
कविकर्म भवेत् काव्यं यद्वा काव्ये कथा भवेत्।।१।।

गद्येऽपि कथया काव्यं भवतीत्यनुशुश्रुम।
कथां विनापि पद्ये तु काव्यं कविकृतं भवेत्।।२।।

कथया तु भवेत् पद्यकाव्यं तच्छ्रुतिसुन्दरम्।
गद्ये तु कथया हीनं काव्यं न भवतीत्यतः।।३।।

"कविता छन्दसा व्यक्ता सरसा गुणसंयुता।
मनोरमा रमा तुल्या सदाऽऽनन्दा सुखावहा।।४।।

सुरम्यपदविन्यासैरलङ्कारैरनुत्तमैः।
गुणभावरसैराढ्या नारीव कविता भवेत्।।५।।

सरसं कोमलं रम्यमिहामुत्र विचारितम्।
सश्लेषं सार्थकं काव्यं लघुवृत्तानुसार्यपि।।६।।"

गीतं भवेद्वाऽपि च मुक्तकं वा
छन्दो निबद्धं यदि ते कवित्वम्।
दृष्ट्वा पठित्वा श्रवणेन पीत्वा
न मोदते कस्य मनः कवित्वे?॥७॥

❊❊

## २८. जीवनं कवित्वं च

विद्या-मुक्ताहारतुल्योपकण्ठे
श्रद्धा भक्तिः प्रार्थना नीलकण्ठे।
धन्यं गेहं क्षेत्रयुक्तं कलत्रं
प्रेम्णा युक्तं जीवनं मेऽस्तु सत्यम्॥१॥

मुक्तावलीवत् पदयोजनं स्यात्
माधुर्यमन्तःस्थरसैर्घनं स्यात्।
वाच्ये श्रुतौ तत्सरसत्वमीयात्
कवित्वमेवंविधमग्र ईयात्॥२॥

❊❊

## २९. क-वि-ता

कल्पनाया विवेकस्य तालस्यापि समन्वितिः।
आद्यक्षराणि संयोज्य 'कविता' कथ्यते बुधैः॥१॥

कवितायामिमे भावाः कल्पनीयाः प्रयत्नतः।
ततो रसा गुणा भूषा रीतयो ध्वनयस्तथा॥२॥

❊❊

## ३०. हिन्दवः के?

हिनस्ति दुर्गुणान् यो हि स वै हिन्दुः प्रकीर्तितः।
यो हीनं दूषयत्यन्तं स हिन्दुरभिधीयते।।१।।

लोभमोहमदक्रोधानानाचारादिदुर्गुणान्।
हिन्दुर्हिनस्ति तान् सर्वान् सदाचारविवर्जितान्।।२।।

हीनं हिंसादिकं कर्म दूषयन्ति सनातनाः।
सदाचारा वेदमूला धार्मिका हिन्दवः स्मृताः।।३।।

ओङ्कारमन्त्रमूलाश्च गोभक्ता देवपूजकाः।
कथ्यन्ते हिन्दवस्ते हि सदाचरणतत्पराः।।४।।

पुरातनमहर्षीणां मुनीनां गोत्रवंशजाः।
श्रुतिस्मृतिविचाराणां सदाचारपरायणाः।।५।।

सिन्धवो हिन्दवो जाता सिन्धुर्हिन्दुरिहोच्यते।
भाषायां सिन्धवः सर्वे हिन्दवः परिकीर्तिताः।।६।।

❊ ❊

## ३१. शिक्षा

साहित्यसङ्गीतकलासु हीनमज्ञानिनं बालिशबुद्धियुक्तम्।
नरार्भकं ज्ञानविवेकपूर्णं करोति शिक्षा व्यसनातिसक्तम्।।१।।

अनुद्यमं दानदयापराङ्मखं कामादिषड्वर्गजितं मलीमसम्।
धत्तूरभृङ्गादिकमद्यसेवकं करोति शिक्षा सुभगं सदाऽऽस्तिकम्।।२।।

हिंसाहत्याचौर्यकार्येऽतिलग्नान् मिथ्यादृष्टौ तात्त्विकं मन्यमानान्।
कामाल्लोभात्तत्त्वचिन्ताविहीनान् एतान् शिक्षा सद्‌गुणानादधाति।।३।।

विवर्ते विवर्णे विवर्तान् विकारान् विनिर्मथ्य निर्धूय सर्वान् विहाय।
विशिष्टं जगद्भासकं सत्यमेकं सुशिक्षा चिदानन्दबोधं करोति।।४।।

❊ ❊

## ३२. शोभा

विना ज्ञानं शोभा न हि भवति कुत्रापि विदुषः
विना ध्यानं शोभा न हि भवति साधोः क्वचिदपि।
विना मानं शोभा न हि भवति राज्ञः क्वचिदपि
विना दानं शोभा न हि भवति वित्तस्य जगति।।१।।

विना मार्गं भूमेर्न हि भवति शोभा क्वचिदपि
विना लज्जां नार्या न हि भवति शोभा क्वचिदपि।
विना शीलं पुंसो न हि भवति शोभा क्वचिदपि
विना शैलीं शोभा न हि भवति काव्यस्य जगति।।२।।

**

## ३३. भूषणम्

नरः कश्चिन्निर्गुणो वा गुणवाञ्छीलवाँस्तथा।
नारी गुणवती शीलवती कुलवती न वा।।१।।

एतद् विचारणे नान्यद् भूषणं दृश्यतां बुधैः।
उभयोर्भूषणं सम्यग् दृश्यतां चन्दनाञ्जने।।२।।

नरस्य भूषणं भाले चन्दनं शोभते यदि।
नेत्रयोरञ्जनं नार्या गुणशीलादिबोधकम्।।३।।

यद्वा तद्वा भवेदन्यद् भूषणं धनिनां परम्।
एतद् द्वयं धारयितुं निर्धनैरपि शक्यते।।४।।

अञ्जनेन विना नारी चन्दनेन विना नरः।
न शोभेते बहिः क्वापि गुणशीलयुतावपि।।५।।

विनयो विदुषां विभूषणं कुलशीले वनिताविभूषणे।
गुणबुद्धिमतां नृणां सदा पितुराज्ञाकरणं विभूषणम्।।६।।

न कदाचिदिमे गुणा बहिर्मनुजानामिह दृष्टिमागताः।
क्रमशः शुभवार्तया शनैर्मनुजान्तर्गुणसंस्तवो मिलेत्।।७।।

**

## ३४. शब्दार्थौ ब्रह्म

तत्तत्तेनाथ तस्मै तत इति क्रमशस्तस्य तस्मिन् विभक्तौ
शब्दार्थे 'ब्रह्म' बोधेऽव्ययमपि कुत इत्यादि शब्दैर्निरस्तम्।
'सोऽहं ब्रह्मास्मि' किन्तत् कथयति किमु वा 'तत् त्वमेवासि' शब्दम्?
शब्दार्थं 'ब्रह्म' बुद्ध्या सकृदपि स नरो 'ब्रह्म' बोधेऽसमर्थः।।१।।

तत्तत्तेनाथ तस्मै तत इति क्रमशस्तस्य तस्मिन् विभक्तौ
एकं द्वे वा बहूनां वचनपुरुषयोर्नैकरूपे विभक्तम्।
एकः पुत्रः पिता वा पतिरपि च गुरुर्मातुलो भागिनेय-
स्तद्वच्छब्दार्थभूतं त्रिभुवनमभितो व्यापकं ब्रह्म वेद्यम्।।२।।

तत्तत्तेनाथ तस्मै तत इति क्रमशस्तस्य तस्मिन् विभक्तौ
तत्तेतान्येकद्वित्रिर्वचनपुरुषयोरव्यये वा विभक्तम्।
पुंस्त्रीक्लीबे सुलग्नं चरमचरगतं वस्तुभूतं समस्तं
शब्दानामर्थभूतं स्वनुभवगमितं ह्यव्ययं ब्रह्म बोध्यम्।।३।।

रामो रामं च रामेण तथा रामाय तत्परम्।
रामाद्रामस्य रामे हे राम चाष्टविधो न किम्?।।४।।

विभक्तिभ्यो विभक्तेऽस्मिन् रामे सगुणता भवेत्।
सोऽहं ब्रह्म तत्त्वमसि वाऽयमात्माऽस्ति निर्गुणे।।५।।

विभक्त्युपाधौ पुरुषे यथैकस्मिन्ननेकता।
व्यवहारे स नैकोऽस्ति स एकः पारमार्थिके।।६।।

तत् तेन तस्मै तत् तस्मात् तस्य तस्मिन् विभाजिते।
एकोऽपि बहुधा भाति पितृजामातृमातुलात्।।७।।

एकः शिवो व्यापकोऽस्ति नैके जीवात्मनि स्थिते।
सूर्यबिम्बो यथा भाति नैकस्थालीजले बहु॥८॥

चर्माऽऽवृतपदस्यात्र यथा चर्माऽऽवृतास्ति भूः।
धर्माऽऽवृतं मनो यस्य तस्य धर्मावृतं जगत्॥९॥

धर्माऽऽवृतं जगद्यस्य तस्य धर्माऽऽवृतं मनः।
ब्रह्माऽऽवृतं मनो यस्य सर्वं ब्रह्माऽऽवृतं तथा॥१०॥

**

## ३५. चत्वारि धामानि

जगन्नाथो रामेश्वरो द्वारकानाथ इत्यतः।
बदर्याश्रमयुक्तानि चतुर्धामानि संस्मरेत्॥१॥

मुक्तिक्षेत्रं रुरुक्षेत्रं क्षेत्रं पाशुपतं तथा।
वराहक्षेत्रमपि च चतुर्धामानि संस्मरेत्॥२॥

सेवा शिशूनां वृद्धानामतिथीनां च सत्क्रिया।
दत्वाऽन्येभ्यो भुक्तिरिति स्त्रीणां धामानि संस्मरेत्॥३॥

**

## ३६. गृहमन्दिरम्

दीनानां यत्र सम्मानं धनं यत्रास्ति नैतिकम्।
तद् गृहं न गृहं किन्तु स्वर्गीयं विष्णुमन्दिरम्॥१॥

इदं गृहं न मेऽस्त्यत्र शिवयोः प्रेममन्दिरम्।
तत्पूजार्थं वसाम्यत्र चिन्त्यमेतन्मुहुर्मुहुः॥२॥

शारीरिके मन्दिरेऽस्मिन् शिववासो निरन्तरम्।
जीवोहं तत्कृपाकाङ्क्षी तेनाज्ञप्तो वसाम्यहम्॥३॥

कुर्यात् सम्बन्धिनां सेवामनासक्तो वसन् गृहे।
गृहासक्तो भवेद् बद्धो ह्यनासक्तो विमुच्यते।।४।।

जायापत्योः सुसम्बन्धस्त्यागार्थं हि परस्परम्।
सृष्टिसंरक्षणं कुर्वन् भोगार्थं न हि दृश्यते।।५।।

उभौ जायापती लोके दृष्टौ तरणिनाविकौ।
भवाब्धिं तरितुं नित्यं भूयास्तां सफलौ सदा।।६।।

शिवसायुज्यलाभार्थं गृहत्यागोऽपि नेष्यते।
आसक्तिः सर्वदा हेया लभ्यते चामृतं पदम्।।७।।

तद्गृहं मद्गृहं मास्तु तद्ब्रूयात् कृष्णमन्दिरम्।
सोऽहं मन्दिररक्षार्थमिति चिन्त्यं प्रयत्नतः।।८।।

❊ ❊

## ३७. कथाश्रवणम्

श्रूयते कीर्त्यते यद्यत् कथायां तत्तदाचरेत्।
आचारे व्यवहारे यत् सार्थकं तद् भवेदिह।।१।।

पौराणिकीं कथां श्रुत्वा भक्तिर्मनसि वर्द्धते।
भक्त्या शाम्यन्ति पापानि मनः शान्तिं भजेत्तथा।।२।।

निर्मलं प्रेम जागर्ति प्रभोर्मनसि सन्ततम्।
प्रभुप्रेम्णा ब्रह्मदृष्टिर्जायते प्राणिनां ध्रुवम्।।३।।

सत्कथाश्रवणादेव जीवनं परिवर्तते।
दुष्कर्माणि परित्यज्य सत्कर्माणि समाचरेत्।।४।।

सत्कथाश्रवणात् पुण्यं न काङ्क्षेत् प्राप्यते हि तत्।
दुर्वृत्तिशमनं काङ्क्षेत् मनःशुद्धिर्भवेद्यतः।।५।।

श्रूयते चेत् कथा सम्यग् जीवनं परिवर्तते।
जीवने क्रान्तिरायाति सत्कथाश्रवणादनु।।६।।

कथां श्रुत्वा नवा दृष्टिरायाति सा विवर्द्धते।
नायाति चेतना यस्य जीवनं व्यर्थतामियात्।।७।।

कुर्यात् कथायाः श्रवणं दूरीकृत्य मनोव्यथाम्।
मनो नियमनं नो चेत् श्रवणं व्यर्थतामियात्।।८।।

श्रूयते बुद्ध्यते यत्तज्जीवनेऽपि समभ्यसेत्।
कथाश्रवणमात्रेण समयो व्यपगच्छति।।९।।

* *

## ३८. जीवनलक्ष्यम्

ईश्वरोपासना नित्यमृद्धये सिद्धये न हि।
आगच्छेतामृद्धिसिद्धी कर्तव्या चित्तशुद्धये।।१।।

यादृशं तादृशं वाऽस्तु कर्म कर्तुमिहार्हसि।
प्रभुप्रसन्नतार्थं त्वं तत्कर्म प्रभवेऽर्पय।।२।।

लग्ने मनसि वाऽलग्ने कस्मिश्चिदपि कर्मणि।
प्रभुणा योजितं ज्ञात्वा कर्मसम्पादनं कुरु।।३।।

कृतेऽपि तादृशं कर्म प्रभुभक्तिर्विवर्द्धते।
गृहकार्येऽन्यकार्ये वा सन्ततं तव मानसे।।४।।

यथा धनार्जनार्थं त्वं परिश्राम्यसि सन्ततम्।
तथा स्वेदजलं हित्वाऽधिकं धर्मार्जनं कुरु।।५।।

यादृग् वाञ्छति जीवोऽयं ददातीशोऽपि तादृशम्।
अत एव सुसम्बन्ध ईशेन सह योज्यताम्।।६।।

कामना: सन्ति यादृश्यस्ता योज्या: प्रभुणा सह।
प्रभोरधीनास्ता: सन्तु निष्कामस्त्वं भवेर्लघु।।७।।

प्रभोरिच्छानुसारेण स्थितिं यामहमाप्नुयाम्।
सन्तुष्टस्तत्र भूत्वान्त उत्तमां गतिमाप्नुयाम्।।८।।

* *

## ३९. प्रेममार्ग:

उन्नतिर्भगवत्प्रेम्णा कामेन पतनं ह्यध:।
य: कामवशमायाति तस्यास्ति पतनं ध्रुवम्।।१।।

प्रेम्णा संस्मरणं कार्यं सर्वदा कृष्णपादयो:।
कृष्णसंस्मरणान्नित्यं ब्रह्म प्राप्नोति मानव:।।२।।

यदा कृष्णप्रेमरसे मनो मज्जति निर्भयम्।
तदोत्तरति जीवोऽयं कार्यमेतत् प्रयत्नत:।।३।।

सामान्यप्राणिभिर्भक्ति: कार्या कृष्णस्य सादरम्।
श्रेयस्करो भक्तिमार्गो योगमार्गस्तु दुष्कर:।।४।।

विशालं हृदयं यस्य स्नेहसिक्ते हि लोचने।
तदर्थं भगवान्नित्यमुदार: सम्प्रसीदति।।५।।

यो ब्रह्ममार्गे चलति जीव: सायुज्यमुक्तये।
शिव: प्रेम्णा समुद्धर्तुमानेतुञ्चावरोहति।।६।।

सदा वित्तानुसन्धाने भ्रमतीतस्ततो जन:।
यदि ब्रह्मानुसन्धानं कुरुते स सुखी भवेत्।।७।।

कृते शारीरिके प्रेम्णि मोह आयाति सत्वरम्।
आत्मदृष्ट्या प्रेमकृते मोहो नायाति निश्चितम्।।८।।

न कलत्रे सुते वित्ते प्रेम कुर्याद् विनश्वरे।
स्मरणात् कीर्तनाद्ध्यानात् कुर्याद् ब्रह्मणि सादरम्।।९।।

यथाऽग्नितापः क्रियते न दूरान्निकटान्न तत्।
परिवारैः सह प्रेम तथा कुर्वन्न सीदति।।१०।।

❊❊

## ४०. विषयानन्दभजनानन्दौ

प्रवृत्तिं विषयानन्दं त्यक्त्वा निवृत्तिरूपकम्।
नित्यानन्दं भजन्त्येते भजनानन्दका अहो!।।१।।

'चिया'पदार्थमप्राप्य यश्चिन्तयति लुब्धकः।
वेदान्तार्थः कथं तस्य बुद्धौ पर्यवतिष्ठते।।२।।

संसारसागरे यस्य मनो मज्जति निर्भरम्।
पारे ब्रह्मणि किं तस्य चित्तमायाति सत्वरम्।।३।।

यस्य जिह्वा रसयति मिष्टताम्बूलचर्वणे।
हरिभक्तौ कथं तस्य रसना रसयेदहो!।।४।।

यस्य भोगप्रधानं स्याज्जीवनं जीवनौषधम्।
भोग्यं प्रधानं जानाति तुच्छं ब्रह्म सनातनम्।।५।।

ब्रह्मवृक्षं समारूढास्तद्ब्रह्मफलहेतवे।
ब्रह्मज्ञानाय सन्नद्धा व्यसनाय वयं न हि।।६।।

विहाय विषयानन्दं भजनानन्दका वयम्।
भजने शान्तिरायाति विषयं को भजेदतः।।७।।

❊❊

# ४१. भागवतार्थः

अथ भागवताज्ज्ञेयं बुधैः पञ्चभिरक्षरैः।
भावो गतिर्विरागश्च तरणं मुक्तिरित्यतः।।१।।

भावो नाम विचारोऽस्ति श्रद्धाभक्तिविवर्द्धकः।
गतिस्तु बुद्धिर्या मायालीलामुक्तिप्रदायिनी।।२।।

विरागो वापि वैराग्यं यत्रेच्छारहितं मनः।
संसाराऽसारतां बुद्ध्वा स्वभावपरिवर्तनम्।।३।।

गुरूपदेशाद् ब्रह्मज्ञो यद्वा तीर्थनिषेवणात्।
शास्त्रज्ञानात् स तरति भवाब्धेरथमुक्तये।।४।।

कैश्चिज्जनैरिह प्रोक्तो नाऽयमर्थोऽस्ति वास्तवः।
श्रीमद्भागवतस्यार्थं वयमेतत् प्रकुर्महे।।५।।

अधिकृत्य कृतो ग्रन्थो भगवन्तमथापि वा।
प्रोक्तं भगवता ज्ञानं यत्तद् भागवतं स्मृतम्।।६।।

भक्ता भगवतो ज्ञेया विदुरोद्धवनारदाः।
ते वै भागवताः प्रोक्ता बोध्यं भागवतार्थकम्।।७।।

यत्तद् भागवतं प्रोक्तं बुधैरेतद् विचार्यताम्।
भगवद्भक्तियुक्तोऽपि जनो भागवतो भवेत्।।८।।

ग्रन्थे सर्गविसर्गौ च स्थानं पोषणमूतयः।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः।।९।।

वर्ण्यन्ते, प्रथमे सूतं पृच्छन्ति शौनकादयः।
वक्ति तेषां कृते सूत उपोद्घातं तदन्तरम्।।१०।।

शौनकाँस्तच्छुको वक्ता तेन व्यासाच्छ्रुतं हि यत्।
द्वितीये ज्ञानगर्भं तद् वक्ति भागवतामृतम्।।११।।

विदुरोद्धवसंवादे मैत्रेयो विदुरं प्रति।
वक्ति सर्गविसर्गौ द्वौ तत्तृतीयचतुर्थयोः।।१२।।

पञ्चमादौ शुकस्योक्तिः स्थानं पोषणमूतयः।
मन्वन्तरेशानुकथा वैराग्यबोधहेतवे।।१३।।

दशमे तु निरोधोक्तिर्मुक्तिरेकादशे ततः।
आश्रयोक्तिर्द्वादशेऽस्ति महाराजं परीक्षितम्।।१४।।

ऐहिकाऽऽमुष्मिकफलं मुक्तये सर्वसम्मतम्।
विलक्षणं भागवतं दशलक्षणलक्षितम्।।१५।।

भगवन्तं जगद्रूपं नमस्यामः सनातनम्।
येन भागवते प्रोक्तं तत्त्वज्ञानं सुधामयम्।।१६।।

**

## ४२. व्यवहारः

परमार्थः प्रयत्नेन प्राप्येत किमहो! पुनः।
व्यवहारस्तु कठिनः पारं प्राप्येत वा न वा।।१।।

त्रुटिश्चेन्मम पूजायां क्षमां दित्सति शङ्करः।
न क्षमन्ते जनाः किन्तु व्यवहारे त्रुटिर्यदि।।२।।

यः शुद्धो व्यवहारेऽस्ति प्रतिष्ठामाप्नुयात् पुमान्।
स्खलितो व्यवहारे चेदपकीर्तिमिहाप्नुयात्।।३।।

तस्मात् सत्यं व्यवहरेर्येन गौरवमाप्नुयाः।
असत्यादपकीर्तिः स्यात् कार्यं चापि विनश्यति।।४।।

स्वार्थं वर्द्धयितुं कुसीदमधिकं प्राप्तुं धनं योऽददात्
तद्वित्तैः कमलोऽभजद्धनिकतां वैदेशिकोऽभूत् पुनः।
द्रष्टा तन्निरवग्रहोऽप्यहमितो मध्यस्थ एवाऽभवं
टङ्को मामत एव टङ्कयति तद्वित्तार्थमाक्रोशति।।५।।

**

## ४३. सुखसाधनम्

चञ्चलं जलमतीव दु:खितं तन्निबद्धसरसि स्थिरं यथा।
प्राणवायुरपि चञ्चलस्तथा सोऽपि कुम्भकविधौ स्थिरो भवेत्।।१।।

यत्सुखं भवति तत्सरोजले तत्सुखं भवति वायुरोधने।
दु:खमस्ति जलचित्तयो: समं तत्सुखाय कुरु संयमं सर:।।२।।

वायुरोधनविधौ मनस्तथा सुस्थिरं भवति तज्जलं यथा।
चञ्चलं जलविनिर्गमायनात् तन्मन: पवननिर्गमायनात्।।३।।

❊❊

## ४४. दु:खहेतु:

एकोनविंशसहितेन पराक्षरेण
लोके विनिर्मितपदार्थनिरूपणेन।
मुग्धास्ति सर्वजनता सुखलिप्सयाऽत्र
जानाति नैव किमहो स हि दु:खहेतु:।।१।।

❊❊

## ४५. प्रसादग्रहणम्

यत् समर्जयते नित्यमर्पयेत् परमात्मने।
पुन: प्रसादरूपं तत्स्वीकुर्यादथ भक्षयेत्।।१।।

यतोऽस्मदुपयोगीनि वस्तूनि सकलान्यपि।
अस्मदाधारभूमिश्च तत्सर्वं परमात्मन:।।२।।

प्रभोरिच्छानुसारेण प्राप्यते यादृशी स्थिति:।
यो भवेत्तत्र सन्तुष्ट: स नित्यं लभते सुखम्।।३।।

❊❊

## ४६. विवेक:

को विवेक: कोऽविवेक: सदसद्वस्तुपण्डितै:।
निर्धारणीयोऽहरह: प्रज्ञानेत्रपुरस्कृतै:।।१।।

विवेकं कुर्वता तेन शिवभक्तिं प्रकुर्वता।
सर्वं शिवमयं ज्ञात्वा सुखभोग: सुभुज्यते।।२।।

'देही नित्योऽस्ति देहोऽयमनित्य' इति चिन्तयन्।
देही चेदप्यदेहीव प्रकुर्वन् सुखमश्नुते।।३।।

चतुरोऽपि मनुष्यस्त्वं लोके मुह्यसि वर्तयन्।
असाफल्यं यदायाति तदा चेतयसे हृदि।।४।।

संयमं पालयन्नित्यं कञ्चिन्नियमपूर्वकम्।
शिवभक्त्या चलिष्यश्चेत् सुखमाप्यस्त्वमेकल:।।५।।

मुग्धोऽसि यौवनेऽनित्ये तवाऽऽयात्येव वार्द्धकम्।
यथाऽनित्यं गतं बाल्यं सर्वं याति विचारय।।६।।

नित्यं कुर्या: सतां सङ्ग: सान्निध्यं लभसे यदि।
तेन दोषविनाश: स्याद् विवेक: समुदेति ते।।७।।

आत्मन्यदृश्येऽपि च ते दृष्टिरायाति भासिते।
दृश्यमानेऽपि जगति दृष्टिर्लुप्यति ते भृशम्।।८।।

'मायां' विपर्ययं कृत्वा 'या नास्ती'त्यवबुध्यसे।
तदात्मन: स्वरूपं तद् ब्रह्म सम्पत्स्यसे मुदा।।९।।

अत एव विवेकं त्वं कर्तुमिच्छसि चेन्नर!
साङ्ख्ययोगं विचार्यैव वेदान्तमतिमान् भव।।१०।।

❊ ❊

## ४७. प्रारब्धम्

प्रारब्धं कथ्यते तद्धि यत्कृतं पूर्वजन्मनि।
तत्प्रारब्धानुसारेण फलमत्रापि लभ्यते।।१।।

सांसारिकं सुखं दुःखं सम्पत्तिः सन्ततिर्वयः।
पूर्वसञ्चितपुण्येन लभ्यन्ते लघु वा बहु।।२।।

अस्माकं पूर्वजनुषि रचितं चलचित्रवत्।
यज्जीव्यते तदेवात्र दृश्यते चोपभुज्यते।।३।।

जीवनं साक्षिभावेन दृष्टे शान्तिर्मिलेदिह।
कर्तृभावेन दृष्टे तु दुःखमेवात्र लभ्यते।।४।।

यावच्छुल्कावधिस्तावद् दृश्यते चोपभुज्यते।
तत्समाप्तौ समुत्थानं जीवनं चलचित्रवत्।।५।।

ततस्तज्जीवनं द्रष्टुमन्य आयाति निश्चितः।
येन शुल्कः प्रदत्तो हि तेनैव परिलोक्यते।।६।।

भाग्यशुल्कं विना चित्रजीवनं न विलोक्यते।
तद् भाग्यं यत् पूर्वजनौ प्रारब्धं प्राणिभिः कृतम्।।७।।

❊❊

## ४८. पुण्यम्

पवित्रं सुन्दरं धर्म्यं हितं सत्यं सुखं शुभम्।
सुकृतं नैतिकं धर्मं पुण्यं सद्गुण उच्यते।।१।।

कर्मणा मनसा वाचा वपुषा यत् करोति तत्।
पुण्यं भवतु सर्वत्र चिन्तनीयं सदा नृभिः।।२।।

कृते परोपकारे तु पुण्यं भवति सत्वरम्।
पराऽपकारे न कृते पुण्यं तदपि संस्मृतम्।।३।।

मन:शान्तं प्रकुर्याद् यो जनो मानाऽपमानयो:।
सुखे दु:खेऽपि शान्तं चेत् तत् पुण्यमति निर्मलम्।।४।।

समवेत: समवाय: पुण्यकर्मणि यादृश:।
सम्पन्ने सति तत्कार्ये ते सर्वे पुण्यभागिन:।।५।।

क्रियते यत्र कुत्रापि पुण्यकर्म शुभावहम्।
तीर्थभूमौ कृतं स्वल्पमपि पुण्यं फलप्रदम्।।६।।

सा तीर्थभूमिर्भवति पुण्यात्मा यत्र तिष्ठति।
मन: प्रक्षालयेत् तीर्थे देहमात्रं न केवलम्।।७।।

**

## ४९. प्रकृतिभाव:

धावसि त्वं जयार्थे चेत् कं जेतुमिह वाञ्छसि।
देहेन्द्रियाणि जित्वात्र सर्वदा विजयी भव।।१।।

अर्थमर्थं जपन्तीह धावन्त्यर्थागमे जना:।
लक्षाधीशा न चासन् ते सन्त: केऽपीह पूर्वजा:।।२।।

ये सूनृतं न जानन्ति प्रलपन्त्यधिकं वच:।
ये प्रलापं न कुर्वन्ति वचो जानन्ति सूनृतम्।।३।।

एको विशालो ग्रन्थोऽस्ति संसार: सर्वसन्निधौ।
येऽटनं नैव कुर्वन्ति पृष्ठमात्रं पठन्ति ते।।४।।

प्रकृति: सर्वशास्त्राणां बोधादपि गरीयसी।
मतिमन्त: प्रकृत्या हि शास्त्रज्ञानमवाप्नुयु:।।५।।

प्रकृतिं पठतो नित्यं मानवस्यापि जीवनम्।
अनुत्तमं शास्त्रमस्ति तस्यानुभवधारणात्।।६।।

**

## ५०. सन्तोषः

यो बिभेतीश्वरान्नित्यमन्येभ्यो न बिभेति चेत्।
नेह लोके भयं तस्य मित्रन्त्यन्येऽपि सर्वदा।।१।।

आत्मवत्सर्वभूतेषु मत्वा सम्पद्विपत्सु च।
परनिन्दामात्मनिन्दां प्रशंसां न करोति चेत्।।२।।

यमराजभटैः प्रेत्य जीवन् राजभटैरिह।
सुरक्षितो भवेन्नित्यं तस्मान्निन्दां विवर्जयेत्।।३।।

प्रशंसां कर्तुमिच्छा चेदीश्वरस्य प्रशंसनम्।
सर्वदा कुरु तस्यैव प्रपञ्चे तव जीवनम्।।४।।

परनिन्दां विना तेऽद्य श्वासो न चलतीति चेत्।
सृष्टौ दोषं दर्शयित्वा कुर्वीश्वरविनिन्दनम्।।५।।

कृतघ्ना अपि जीवन्ति लोके हीश्वररक्षिते।
कृतज्ञाः सज्जना नित्यं प्रकुर्वन्ति विवेचनम्।।६।।

निर्धना अपि जीवन्ति प्राक्कर्मफलभोगिनः।
सधना अपि जीवन्ति सत्कर्मफलभोगिनः।।७।।

स्वकर्मफलभोगान् हि भुञ्जते निर्धना अपि।
स्वकर्मफलभोगान् हि भुञ्जते सधना अपि।।८।।

ये सदा कर्म कुर्वन्ति भवेयुर्निर्धनाः कथम्।
तेषां धनानि कर्माण्यकर्माणः सधनाः कथम्?।।९।।

❊ ❊

## ५१. जीवनसाफल्यम्

परमात्मप्रेमरूपा भक्तिः कार्या यतो हि सा।
मनो मलं क्षालयति कुरुते शुचिमप्यथ।।१।।

शुचौ मनसि दृश्यन्ते रागद्वेषादयो यदि।
तेषां जयार्थमपि च कुर्यादिन्द्रियसंयमम्।।२।।

विनाहङ्कारेण परान् सेवते यः स बुद्धिमान्।
अहङ्कारावृतो विद्वानपि मूर्खसमो भवेत्।।३।।

प्रतिभा दृश्यते तस्य यो नवं वस्तु वाञ्छति।
यो न कामयते किञ्चित् स वृद्ध इति चिन्तयेत्।।४।।

ये भूमावुपयुञ्जन्ति जलान्नपवनादिकान्।
तेषां कान्यपि कर्माणि स्मारयन्तु नवागतान्।।५।।

बुद्धिमन्तो भक्षयन्ति चिन्तयन्ति किमप्यथ।
न चिन्तयन्ति निर्बुद्धाः केवलं भक्षयन्ति ते।।६।।

भक्ष्यं भोज्यं भक्षणीयं करणीयं कियत्ततः।
भोजनेन विना विद्वानपि कर्तुं क्षमो न हि।।७।।

जलवस्त्रफलादीनि पृथिव्या आनयन्ति ये।
पृथिव्यामेव धावन्ति केवलं ह्युच्छ्वसन्ति ते।।८।।

तैर्न दत्ता पृथिव्यै चेत् कृतिः कीर्तिविवर्द्धिनी।
पृथिव्या इतिहासोऽपि कथं तिष्ठेद् विचार्यताम्।।९।।

समयो मूल्यवानेष सपरिश्रमजीवनम्।
यस्यास्ति तस्य साफल्यं जीवनं तेन जीवितम्।।१०।।

'यस्तु क्रियावान् पुरुषः स विद्वा'निति कथ्यते।
पुनः 'क्रियां विना ज्ञानं भार' इत्यपि दृश्यते।।११।।

जीवनं सफलं यत्र ज्ञाननिर्देशितं भवेत्।
तत्तदाऽसफलं विद्यादज्ञानचलितं यदि।।१२।।

❊ ❊

## ५२. धनार्जनम्

धनार्जनं प्रयत्नेन कुरु पापं तु मा कुरु।
सत्कर्मणि धनं देयं धनं सत्कर्मसाधनम्।।१।।

यदि त्वयाधिकं पापं क्रियते नाधिकं धनम्।
प्राप्यते तत्किमर्थं त्वं पापकर्मणि युज्यसे।।२।।

धनं गौणं जीवनेऽस्ति धनाद्धर्मार्जनं कुरु।
प्रधानं परमात्मास्ति धनं तत्प्राप्तिसाधनम्।।३।।

धनं चेदर्जितं पापकर्मणा तेन तेऽधिकम्।
धनादि नाशमायाति शान्तिर्नैवोपलभ्यते।।४।।

बहवो धनिनो दृष्टा भौतिकसुखभोगिनः।
आध्यात्मिकास्ते न सन्ति कथं शान्तिमवाप्नुयुः।।५।।

धनार्जनं स्यात् सरलं परन्तु धनिनां कृते।
सदुपयोगो बहुधा कठिनो दृश्यतेऽधुना।।६।।

भोगार्थं विष्णुसेवार्थमर्धं कृत्वोपयुज्यताम्।
अस्ति चेत् स्वार्जितं वित्तं तदा लक्ष्मीः प्रसीदति।।७।।

न लक्ष्मीर्जीवभोग्यास्ति विष्णुभोग्या धनप्रदा।
योऽर्पयेद् विष्णवे लक्ष्मीं सा तस्मै धनमर्पयेत्।।८।।

❊❊

## ५३. धनधर्मौ

परिश्रमार्जितं वित्तं यत्र लग्नं भवेन्मनः।
भवत्येतत् प्रियतरं स्वस्येव परमात्मनः।।१।।

तत्प्रियं सादरं भक्त्या योऽर्पयेद् विष्णवे धनम्।
ततस्तस्मै विष्णुरपि सद्बुद्धिं प्रददाति हि।।२।।

धनलक्ष्मी-मातरं त्वं सादरं विष्णवेऽर्पय।
ततः प्रसन्ना सा लक्ष्मीः पयस्त्वां पाययिष्यति।।३।।

यदि लक्ष्मीस्त्वया बुद्ध्या दुष्कर्मणि नियुज्यते।
तदा लक्ष्मीस्त्वां विहायान्यत्र गच्छति सत्वरम्।।४।।

यदि श्रमार्जितं वित्तं दुष्कर्मणि नियोज्यते।
तल्लक्ष्म्या अप्यवज्ञास्ति तत्र लक्ष्मीर्न तिष्ठति।।५।।

श्रेयो धनाद्धर्ममस्ति धर्मार्थे धनमर्जय।
'यतो धर्मस्ततः कृष्णो यतः कृष्णस्ततो जयः'।।६।।

तस्माद्धनार्जने यद्वा सेवाकर्मणि कस्यचित्।
कृष्णार्थं क्रियते सर्वं नित्यं कृष्णं न विस्मरेत्।।७।।

अयं देहो न मेऽस्त्यत्र तस्माद्देहार्जितं धनम्।
कथं मम भवत्येतद्? विस्मरेन्न मुहुर्मुहुः।।८।।

* *

## ५४. कामरामौ

द्वयोर्लोचनयोरेवं द्वारेषु श्रोत्रयोर्द्वयोः।
द्वारपाला नियोक्तव्याः सात्त्विकास्ते भवन्त्विति।।१।।

कामेऽप्यस्ति सुखं किन्तु रामेऽप्यस्ति सुखं परम्।
कामजन्यमनित्यं स्यादमृतं रामजन्यकम्।।२।।

सहयात्रिसमो भूत्वा कामो मित्रति वस्तुतः।
कामं शत्रुं विजानीयाद् रामं मित्रवदाचरेत्।।३।।

ईश्वरोन्मुखजीवस्य काम एवाऽवरोधकः।
यस्तं विमोक्तुमिच्छेत् स तस्मै नैवाऽवरोधकः।।४।।

विहसन्तं शिवं जीवं कामो रावयति क्षणात्।
तमेवापद्गतं रामः सदा रक्षति कीर्तनात्।।५।।

विलासस्तादृशः कार्यो यत्र रामस्य कीर्तनम्।
रमन्ते योगिनो यत्र रमन्तां तत्र भोगिनः।।६।।

यस्य बुद्धिः सुवर्णेऽस्ति स भवेद्रावणोऽप्रियः।
सुकर्मणि मतिर्यस्य स रामः कथ्यते प्रियः।।७।।

कुसङ्गः कथ्यते कामिजनैः सह समागमः।
सत्सङ्गः कथ्यते योगिजनैः सह समागमः।।८।।

बुधैः कुसङ्गस्त्यक्तव्यो मनो रसयतीत्यतः।
सत्सङ्गस्तु प्रकर्तव्यो मनो यस्माद् विरज्यते।।९।।

दासोऽस्ति प्रकृतेर्जीवस्तत्र भ्रमति दासवत्।
न प्रसीदति जीवोऽस्यां प्रकृतौ किन्तु सीदति।।१०।।

शिवोऽस्ति प्रकृतेः स्वामी ततोऽस्य वशका हि सा।
जीवः शिवे हि रमते सेव्यौ रामशिवौ ततः।।११।।

* *

# ५५. सुखदुःखे

योऽधिकं सुखभोग्यस्ति दुःखं तमनुधावति।
ततः स दुःखमाप्नोति पश्चात् सुखमवाप्नुयात्।।१।।

येषां भगवतः स्थानं शिरःसु कमलासनम्।
तेषां तत्राऽभिमानश्चेत् कथं सुखमवाप्नुयुः।।२।।

ये विस्मरन्तीश्वरस्योपकाराञ्जीवने-वने।
ते कण्टकाकीर्णभूमौ सर्वदा दुःखमाप्नुयुः।।३।।

न कुर्यादधिकं प्रेम केष्वपीशं विहाय तत्।
प्रेमाधिक्यमीश्वरे चेत् स भवेत् सर्वदा सुखी।।४।।

न कुर्यादधिकं क्रोधं मित्रैः परिजनैः सह।
क्रोधाधिक्याद् भवेद् दुःखमीश्वराय तमर्पयेत्।।५।।

त्वन्मनस्थं सुखं दुःखमीश्वराय ददासि चेत्।
तव दुःखे सुखे चापि सहायं कुरुते शिवः।।६।।

प्रेमक्रोधौ न कर्तव्यौ तावुभौ विदधज्जनः।
दुःखीभवति तस्मात् तौ द्वौ शिवायार्पयन् सुखी।।७।।

※※

## ५६. भेदाभेदौ

जीवस्यैषः शिवस्यैष भेदोऽयं शिवजीवयोः।
भेदो नाम द्वैतभावो भयमायाति भेदतः।।१।।

विनिवृत्ते भेदभावे प्राणिनां देहमन्दिरे।
शिवः समुज्वलो भाति जीवेन सह सङ्गतः।।२।।

सुखदुःखात्मको जीवो जन्ममृत्युजरान्वितः।
नित्यानन्दः शिवो ज्ञेयो जन्ममृत्युविवर्जितः।।३।।

जीवे शिवाऽद्वैतभावाद् द्वैतभावो विनश्यति।
ततोऽद्वैतब्रह्मभावः प्राणिनां जायते ध्रुवम्।।४।।

※※

## ५७. मुक्तिबन्धने

कलत्रपुत्रवित्तादौ ममेति भवबन्धनम्।
तस्मात् पुनर्जन्ममृत्यू भवतस्ते निरन्तरम्।।१।।

आवागमनचक्राभ्यां मोचनं मुक्तिरिष्यते।
भवबन्धनशैथिल्यं मुक्तिरित्यभिधीयते।।२।।

देहत्यागो नोपदिष्टो मुक्तये मुक्तिकामिनाम्।
यूयमेतद् विजानीथ मनसो नाश इष्यते।।३।।

शिवसङ्कीर्तनं कार्यं सतां सङ्गस्तदन्तरम्।
सत्कर्मणि मनो देयं न ममेति विचारकैः।।४।।

त्यागः संसूच्यते ज्ञानमार्गान्निवृत्तिरूपकात्।
समर्पणं भक्तिमार्गान्न ममेति प्रभोरिति।।५।।

क्रममुक्तिमवाप्नोति जिज्ञासुर्ज्ञानमार्गतः।
सद्योमुक्तिमवाप्नोति स्वार्पको भक्तिमार्गतः।।६।।

सकामकर्मकरणात् प्राप्नुयाद् भवबन्धनम्।
कृते कर्मणि निष्कामभावान्मुक्तिमवाप्नुयात्।।७।।

❊ ❊

## ५८. भगवद्वासः

लोभो भवेद्यत्र पुंसि तत्र पापं विवर्द्धते।
क्रोधो यस्मिन् भवेत् पुंसि तत्र मृत्युः समाप्नुयात्।।१।।

करुणा विद्यते यस्मिन् पुंसि धर्मं च विद्यते।
क्षमा तिष्ठति चेद्यत्र वासो भगवतो भवेत्।।२।।

## ५९. भिन्नता

वसत्यात्मशिवः साक्षात् प्राणिनां देहमन्दिरे।
तदभिज्ञानवान् योऽस्ति मन्दिरं परिरक्षति।।१।।

देहाऽभिज्ञानवान् योऽस्ति मन्दिरं तद् विनश्यति।
सहेते तावुभौ दुःखं ज्ञात्वैकोऽज्ञानतः परः।।२।।

(अथवा)

ज्ञानी शरीरं धरते हसित्वाऽज्ञानी शरीरं धरते रुदित्वा।
नेदं ममास्तीति विचार्य चैक इदं ममास्तीति परो विचार्य।।३।।

⁂

## ६०. गुणज्ञः

मूकानां करसङ्केतमभ्यस्तो वेत्ति नापरः।
गुणिनामुपकारित्वं गुणवान् वेत्ति नापरः।।१।।

गुणज्ञ एव जानाति गुणिनं नैव बालिशः।
परीक्षितुं सुवर्णानां जानाति निकषोपलः।।२।।

जलान्युपवने दद्यात् शनैः पुष्यन्ति वीरुधः।
कुरु यत्नं फलावाप्तौ धैर्येण सफलीभवेत्।।३।।

पठिता अपि मूर्खाश्चेत् तेषां विद्यास्ति निष्फला।
मूर्खास्त्वपठिताः सन्ति तत्राऽऽश्चर्यं कुतो भवेत्।।४।।

⁂

## ६१. परिश्रमफलम्

सुखाऽऽनन्दप्रेमवाञ्छाः परेभ्यो यदि काङ्क्षसि।
देहि प्रेमसुखानन्दान् त्वां समायान्ति तेऽन्वहम्।।१।।

म्रियन्ते गुणिनोऽपीह न जीवन्ति सदैव ते।
म्रियन्ते न गुणास्तेषां तस्मात् त्वं गुणवान् भव।।२।।

बुद्धेः सीमा समाख्याता मूर्खता तु न सीमिता।
धीमानात्मीयति परान् मूर्खः स्वीयान् परायते।।३।।

केचिज्जीवितुमिच्छन्ति मारयित्वा परानिह।
सञ्चिन्वन्त्यपि सामग्रीर्म्रियन्ते तेऽप्यहो कथम्।।४।।

यावत् परिश्रमान् कृत्वा लोका गच्छन्ति नारकम्।
कथं तदर्धमकृत्वा नाऽऽप्नुवन्त्यमरालयम्।।५।।

आम्रामृतसुवर्णानां फलानि कुसुमान्यपि।
पाटलानां न वर्षन्ति वीरुधो रोपयेदतः।।६।।

आपः सदा निम्नमुखा नीचैर्गच्छन्त्यहर्निशम्।
उपर्यानयनेच्छा चेत् कुल्यां संरचयेद् दृढाम्।।७।।

क्षेत्रमस्तीति धान्यानि न फलन्ति कदाचन।
बीजान्युप्त्वा च सिक्त्वा च प्ररोहान् रोपयेदथ।।८।।

मलं जलं चानुसारो रक्षणं पशुवानरात्।
तत आनयनं कृत्वा फलन्ति स्वपरिश्रमाः।।९।।

❊ ❊

## ६२. दुःखम्

अभोजनं बुभुक्षायां जाड्ये वस्त्रविहीनता।
आवश्यकं वस्तुजातं नो चेद् दुःखि मनो भवेत्।।१।।

आवश्यकं पूरयितुमर्थाभावोऽतिदुःखदः।
अर्थार्जनेऽतिदुःखं स्याद् दुःखमर्थव्ययेऽपि च।।२।।

जन्म दुःखं जरा दुःखं रोगो दुःखमथेप्सितम्।
मिलेन्न चेत्तदा दुःखं दुःखमप्रियसङ्गमः।।३।।

विप्रयोगः प्रियेणापि दुःखं सर्वत्र वर्तते।
नैव दृष्टं सुखं क्वापि सर्वं दुःखमयं जगत्।।४।।

क्वचिदस्ति सुखाऽऽभासो न नित्यं तत् सुखं भवेत्।
सुखं मनो यदि सुखि दुःखं मनसि दुःखिते।।५।।

❊ ❊

## ६३. पापम्

य: कुर्याद् वचसा पापं सोऽन्यजन्मनि मानव:।
अक्षमो जिह्वया वक्तुं मूको भवति निश्चितम्।।१।।

अर्थाऽदानप्रदाने च य: करोति व्यतिक्रमम्।
स्वकर्मणा स सम्भ्रान्तो भवत्यत्र परत्र च।।२।।

क्रियते यदि हस्ताभ्यां पापं स्वाभाविकं नृणाम्।
परन्तु तत् प्रविज्ञाय पश्चात्तपति मानव:।।३।।

पापं प्रकाशनीयं वै पुण्यं यत्नेन रक्षयेत्।
यतो हि पुण्यं फलति 'पापं क्षरति कीर्तनात्'।।४।।

यथा प्रकाशनाद् दीप-तैलं क्षरति तद्विधम्।
पुण्यं प्रयत्नेन गोप्यं पापं क्षरति कीर्तनात्।।५।।

यदि गोपायति पापं तन्न जानाति गोपितम्।
केनचिच्छिद्रमार्गेण बहिर्निर्गन्तुमीहते।।६।।

प्रच्छन्नेनापि पापेन निष्पापो न भवेन्नर:।
प्रकाशितेन पापेन निष्पाप: स नरो भवेत्।।७।।

कारागारायितं कृत्वा पापं रक्षति यो जन:।
कारागारायितस्तेन पाप्मना दु:खितो भवेत्।।८।।

**

## ६४. शान्ति:

ज्ञानवानथवा विद्वान् शान्तिं नैवाधिगच्छति।
भक्तिप्लावितचित्तेन शान्तिं समधिगच्छति।।१।।

यो जहाति सदा सत्यमसतां सङ्गमेन वा।
सञ्चरन्नपि सर्वत्र स शान्तिं नैव गच्छति।।२।।

देहगेहाद्यनित्येन चरन्तो नित्यसङ्गतिम्।
शान्तिं समधिगच्छन्ति सन्तः सत्यं वदन्ति चेत्।।३।।

भक्तिभावेन भरितं हृदयं यदि वर्तते।
निश्चितं द्रवितं भूयात् सन्निधिं परमात्मनः।।४।।

कोलाहलव्याकुलेऽपि विश्वे तस्यैव जीवने।
शान्तिं मिलति सर्वत्र यत्र कुत्रापि सञ्चरन्।।५।।

न शक्नोति गृहं त्यक्तुमद्यत्वे कोऽपि मानवः।
न च शान्तिसमायुक्तः स्थातुं शक्नोति तद्गृहे।।६।।

सदा सारल्यभावेन संयमेनान्वितो जनः।
समभावं प्रकुर्वाणः शान्तिं सन्तोषमाप्नुयात्।।७।।

कार्यमुच्चारणं कार्यं तेषां सम्मानमादरम्।
येषां कार्यविधिर्लोकहितार्थं प्रतिपद्यते।।८।।

आत्मकार्यसमुल्लेखं न कुर्यान्मतिमान्नरः।
आत्मश्लाघां पुकुर्वद्भिः सम्मानं नोपलभ्यते।।९।।

समृद्धिं भौतिकं प्राप्य सज्जनो नैव मुह्यति।
अन्तर्बुद्धौ समृद्धिश्चेत् सुखं तृप्तिं च विन्दति।।१०।।

यः परेषां सुखं कुर्वन् सुखमाप्नोति चेतसि।
स लोके महनीयोऽस्ति धन्यं तस्याऽस्ति जीवितम्।।११।।

❊ ❊

## ६५. वासना

भोगैस्तृप्तिर्न भवति कदाचिन्नरजीवने।
वासनावृद्धिरायाति भोक्तारमपि कर्षति।।१।।

वासना-राक्षसी दृष्टा भोक्तारं सैव खादति।
अतस्तां वासनां त्यक्त्वा शान्तिं मनसि धारय।।२।।

सुखं प्राप्तुं नरो नित्यं वासनां कुरुते यदि।
सैषा हि वासना नित्यं तं दुःखयति कामुकम्।।३।।

इन्द्रियैस्तैरनासक्तैर्भोग्यास्ते विषया इह।
न कामयेद् वासनां सा पुनर्जन्मादिकारणम्।।४।।

विवेकसंयमौ धृत्वा वासनाकामने त्यज।
विवेकसंयमाभ्यां हि ते शान्ते भवतः सदा।।५।।

* *

## ६६. सद्गतिः

यस्य पुत्रो विवेकोऽस्ति पुत्री सन्मतिरूपिणी।
तौ हि सद्गतिदातारौ किं त्वं मुह्यसि सन्ततौ।।१।।

कृते श्राद्धादिके कार्ये पुत्रः सार्थोऽस्ति नान्यथा।
पित्रोरुपस्थादुत्पन्नः कोऽभेदः पुत्रमूत्रयोः।।२।।

मांसपिण्डमयौ पुत्रीपुत्रश्चात्र समुत्थितौ।
अनाचारोत्पथौ चेत्तौ सद्गतिं ददतौ कथम्।।३।।

अतो न लभ्यते पुत्रैः सद्गतिं सत्क्रियां विना।
तस्माद्धनं तु सत्कार्ये मनो दद्यात् परात्मनि।।४।।

परोपकृतये देहो परोपकृतये धनम्।
परात्मनि मनो दत्वा श्राद्धं कुर्यान्निरन्तरम्।।५।।

श्रद्धया क्रियते यत्तत् कर्म श्राद्धं भवत्यतः।
तस्मादात्मसुखस्यार्थे श्राद्धं कुर्यास्त्वमात्मनः।।६।।

करोषि यदि सत्कर्म तेनाऽवाप्नोषि सद्गतिम्।
असद्गतिं त्वमाप्नोषि ह्यसत्कर्म करोषि चेत्।।७।।

❊❊

## ६७. त्यागः

धनसम्पत्तिदासा य उदासास्तत्तचेतसः।
सज्जनास्ते प्रभोर्दासा उदासा न भवन्त्यतः।।१।।

सज्जनानां विपत्तौ च चिन्ताधिक्यं न जायते।
सुखवैभवयुक्तेऽपि हर्षाधिक्यं न जायते।।२।।

क्षणशः कणशः कृत्वा विद्यां वित्तं समर्जयेत्।
ते उभे प्रभुसेवायां कार्यकाले समर्पयेत्।।३।।

एतत् सतामाचरणं त्वमप्येतत् समाचर।
तेषामनुकृतिं कृत्वा सदाचारी सुखी भव।।४।।

पुत्रे जाते हर्षितोऽस्ति तन्मृतेऽप्यतिहर्षितः।
हर्षितोऽस्ति न जातेऽपि सुखी भवति भक्तिमान्।।५।।

तथा वैभवसम्पन्ने दारिद्र्ये च सुखी भव।
प्रभौ प्रसन्ने सति तु दारिद्र्ये वैभवेऽपि किम्।।६।।

सदा विचिन्तयेद्धर्मानर्थान् कामान् समोक्षकान्।
अर्थान् धर्मे तथा कामान् मोक्षार्थे सन्त्यजेत् पुमान्।।७।।

❊❊

## ६८. ब्रह्मानन्दः

यस्य पापभयं नास्ति मनः सम्भ्रमतामियात्।
कुतस्तस्य भवेच्छान्तिरशान्तस्य कुतः सुखम्।।१।।

भोजने न क्षिपेदन्नं तदुच्छिष्टं भवेत्ततः।
'अन्नं ब्रह्ममयं' विद्धि तद् भुक्त्वाऽऽनन्दमाप्नुयात्।।२।।

यतो ब्रह्माऽऽनन्दमयं वेदान्ते कथ्यते भृशम्।
'अन्नं ब्रह्म' परित्यज्याऽऽनन्दलब्धिर्भवेत् कुतः।।३।।

परिग्रहसङ्ग्रहयोर्यस्य लग्नं मनोऽस्ति चेत्।
तस्य ब्रह्माऽऽनन्दलब्धिः कठिनं जायते ध्रुवम्।।४।।

परिग्रहसङ्ग्रहयोर्लग्ने मनसि गौरवात्।
निमज्जेत् तल्लघुत्वे हि ब्रह्मण्युत्प्लवते मनः।।५।।

वयं स्वल्पसुखस्यार्थे बहु पापं प्रकुर्महे।
अहो! भूरि सुखार्थे किं मनो लघु न कुर्महे।।६।।

**

## ६९. देहराज्यम्

ज्ञानेन्द्रियैः पञ्चभिश्च तथा कर्मेन्द्रियैरपि।
मनसा च धिया सूक्ष्मदेहः प्राणैश्च पञ्चभिः।।१।।

मातुः पितुः कारणतो गर्भे जीवात्मवासतः।
रसान्नानां सात्म्यभावात् स्थूलदेहोऽभिजायते।।२।।

मनो विमर्शरूपं च मनीषा निश्चयात्मिका।
राजमन्त्रिस्वरूपे ते शेषाः कर्मकरात्मकाः।।३।।

संस्कारा विविधाः सन्ति देहराज्यविकासने।
खाद्यपेयादिसहितं शिक्षामूलं निगद्यते।।४।।

शिक्षा ज्ञानात्मिकी विज्ञानात्मिकी व्यावहारिकी।
नैतिकी च प्रदातव्या देह-राज्यसमृद्धये।।५।।

नो चेद्रोगादयो बाह्यदोषा विध्वंसका अपि।
देह-राज्यविनाशस्य कारणानि भवन्त्यत:।।६।।

गृहौषधादयस्तत्र योक्तव्या आत्मरक्षका:।
धनधान्यादयोऽप्यत्राऽऽवश्यका: सुविचार्यताम्।।७।।

* *

## ७०. सामर्थ्यम्

सामर्थ्यहीनास्ते पुत्रा ये पित्रोरंशभागिन:।
वीर: स्वयं स्वं समर्ज्य परेभ्योऽपि प्रयच्छति।।१।।

अयोग्या: कूपमण्डूकाश्चिन्वन्ति परभाग्यकम्।
परदैवं न पश्यन्ति वीरा: पौरुषशालिन:।।२।।

देशाटनं प्रकुर्वन्ति मतिमन्त: पुमर्थका:।
उद्योगिन: कर्मशीला भवन्ति कर्मयोगिन:।।३।।

कर्णधारसमा: कर्मयोगिन: कर्मशीलिन:।
सुसमृद्धतटे देशतरणिं तारयन्त्यथ।।४।।

सामर्थ्यशीला: सत्पुत्रा बुद्धिमन्तो विचक्षणा:।
भाग्यवन्तश्च विद्वांसो भवन्तु कुलरक्षका:।।५।।

पुत्रेभ्यो वंशवृद्ध्यर्थं पितरो वंशरक्षका:।
सत्पुत्रान् सम्प्रयच्छन्तु कुपुत्रान् न कदाचन।।६।।

* *

# ७१. सद्गुरुः

ब्रह्माणं सृष्टिकर्तारं के जानन्ति जना इह।
गुरुरेवादर्शयन्नो गुरुर्ब्रह्मैव सर्वदा।।१।।

विष्णुं जगद्व्यापकं तं तत्सृष्टेः स्थितिकारकम्।
देवाधिदेवस्याऽस्माकं दर्शको विष्णुरेव सः।।२।।

शङ्करं सच्चिदानन्दं शिवं जीवनिरीक्षकम्।
सृष्टिसंहारकं चास्मान् दर्शयन् सद्गुरुः शिवः।।३।।

अज्ञानतिमिरे गर्ते पतमानं जनं गुरुः।
विद्यादीपेन तद् ब्रह्म दर्शयन् ब्रह्म एव सः।।४।।

सद्गुरुं श्रयते यो हि बाल्यादेवाऽतिबुद्धिमान्।
भवसिन्धुस्वरूपं स ज्ञात्वा पारं तरिष्यति।।५।।

मीना इव जले मग्नाः पतन्ति भवसागरे।
उन्नतिं के समायान्ति गुरुपादतरिं विना।।६।।

सद्गुरोश्चरणौ धृत्वा शरणं दीयतामिति।
भक्त्या नमति यस्तस्य सुस्थिरा प्रोन्नतिर्भवेत्।।७।।

यतो गुरुर्हि जानाति नान्यः कैवर्तकोऽपरः।
विष्णवीशब्रह्मणां रूपं सद्गुरुर्नो महत्तमः।।८।।

अत एव 'गुरुर्ब्रह्मा गुरुर्देवो महेश्वरः।
गुरुर्विष्णु'र्वदन्त्येते गुरुभिः शिक्षिता जनाः।।९।।

'गुरुः साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः'।
गुरुर्जगद् दर्शयेच्चेत् कथं ब्रह्म न दर्शयेत्।।१०।।

❊ ❊

## ७२. ईश्वरः

इष्टे सर्वं यः स ईश ईशितुं शीलमस्ति वा।
समस्तजगदैश्वर्यमस्ति यस्य स ईश्वरः।।१।।

सहस्रं सन्ति नामानि हीश्वरस्य तथापि सः।
एक एवास्ति सर्वेषां रक्षकः पालकः प्रभुः।।२।।

आहुर्विष्णुं शिवं केचिद् गणेशं कतिचित् परे।
रामं कृष्णं पुनः केचिदल्लाहं चेशुमन्यके।।३।।

निराकारो ब्रह्ममयः साकाराश्च शिवादयः।
सर्वाऽऽकारो जीवमयो बहुधाऽप्येक एव सः।।४।।

जीवेऽपि शिववासत्वात् शिवः सर्वात्मनीश्वरः।
त्वामन्तःस्थः शिवो वेत्ति तनौ मनसि कर्मणि।।५।।

जनाः कर्मानुसारेण दुःखानि च सुखानि च।
समाप्नुवन्ति तत् सर्वं शिव एव निरीक्षते।।६।।

उदारः प्रभुरस्माकं नास्तिकेभ्योऽपि दित्सति।
जलान्नपवनाकाशभूमितेजांसि सर्वदा।।७।।

यान् प्रयुज्य प्रभुं तेऽपि गालिं ददति निर्भरम्।
यतः कृतघ्ना अप्यत्र जीवेयुरिति काङ्क्षति।।८।।

**

## ७३. ईश्वरस्मरणम्

गृहकर्मणि संलग्नो विस्मरेन्नेश्वरं सदा।
ईश्वरस्मरणात् कर्मसाफल्ये स सुखी भवेत्।।१।।

विस्मृत्य परमात्मानं तत्कृतोपकृतं च ये।
वसन्ति दुःखिनो नित्यं कथं तेषां सुखं भवेत्।।२।।

सम्यक् सरति संसारो गच्छतीति जगत् पुनः।
लोक्यते लोक इत्युक्तः स नित्यः सम्भवेत् कथम्?।।३।।

अद्यावधि स मेऽभून्न तत् पश्चान्न भविष्यति।
इति बुद्ध्या वर्तमानस्तज्जगद् विस्मरेन्न किम्।।४।।

यदीश्वरानुसन्धानं करोषि हृदये कुरु।
बहिस्तस्यानुसन्धानाद् दुःखं भवति केवलम्।।५।।

ईश्वरो जीवरूपेण संस्थितो देहमन्दिरे।
पश्य दृष्टिं नियम्य स्वं त्वमन्तः स विलोक्यते।।६।।

जन्ममृत्योरन्तराले जीवनं परिलक्ष्यते।
तदात्मनः सार्थकं स्यादन्येषामपि तद् भवेत्।।७।।

आत्मा विराजते नित्यं सर्वमानसमन्दिरे।
द्रष्टव्यः स हि मन्तव्यो बोद्धव्योऽस्माभिरेव सः।।८।।

❊ ❊

## ७४. दिव्यजीवनम्

यस्याऽस्ति जीवनं दिव्यमिहलोके स्वकर्मभिः।
स मृतो हि परत्रापि देवलोके महीयते।।१।।

सोऽहं शिवांशकः शुद्धो न तुच्छो जीवसञ्ज्ञकः।
तन्निर्देशं पालयिता चिन्त्यमेतत् सदा नरैः।।२।।

शिवं सदा स्मरन् जीवो रक्षेत् स्वहृदये यदि।
तदा हि जीवनं तस्य मन्येऽहं सफलं भवेत्।।३।।

यः साधिकारः सफलो भवेन्निर्लोभ आस्तिकः।
सद्वृत्तं तं समुद्धर्तुमीश्वरः स्वयमाह्वयेत्।।४।।

सकलैः परिवारैर्यः शिवं प्रार्थयते गृहे।
स प्राप्नोति शिवानन्दौ तज्जन्म सफलं ध्रुवम्।।५।।

सत्कर्मणां बालकेभ्यः प्रेरणां दातुमिच्छसि।
तदर्थं नैतिकीं शिक्षां कथं विस्मर्तुमिच्छसि।।६।।

कुरु भक्तिं यौवनेऽपि वार्द्धक्ये न हि केवलम्।
अशक्तोऽन्यत् कथं कुर्यात् 'वृद्धा नारी पतिव्रता'।।७।।

परोपकारवेलायां चिन्तनीयं विशेषतः।
तस्याऽभिमानलेशोऽपि नायातु हृदये मम।।८।।

**

## ७५. तत्त्वान्वेषः

सम्यक् सरति संसारो गच्छतीति जगत् पुनः।
भुवनं भवतीत्यर्थं वेवेष्टि विष्टपं ततः।।१।।

लोक्यते लोक इत्युक्तस्तल्लोके यत्नपूर्वकम्।
किं मार्गयसि तद् व्यर्थं सत्तत्वं नैव लभ्यते।।२।।

आनन्दः सर्वजीवानां लक्ष्यमेकं प्रचक्ष्यते।
दुःखसागरमग्नानामानन्दो लभ्यते कुतः।।३।।

आनन्दो नाम सद्वस्तु दर्शनं परमात्मनः।
परमात्मा हि जीवात्मरूपस्तिष्ठति विग्रहे।।४।।

अकृत्वा दर्शनं तस्य जना भ्राम्यन्ति चान्यतः।
ज्ञानादेव भवेत्तस्य दर्शनं परमात्मनः।।५।।

परात्मनो दर्शनं न दृश्यते चेत्तथा त्वयि।
जीवात्मा तु वरीवर्ति तेन मार्गेण दृश्यते।।६।।

को जीवात्मा कथं चात्र कुत आगत्य तिष्ठति।
किमर्थं मे शरीरे स आगतः स्याद् विचारय।।७।।

दु:खमग्नो दु:खितोऽस्मि परात्मा चिन्त्यते कथम्।
इति चेद् तद् दु:खमपि कथमायाति वर्ण्यते।।८।।

दु:खमुत्पद्यते देहाद् देहश्चोदेति कर्मण:।
कर्मोत्पत्तिस्तु मनसो वासनाया मनोद्भव:।।९।।

अभिमानाद् वासनाया अभिमानोऽविवेकत:।
अज्ञानादविवेकस्योत्पत्त्या दु:खमवाप्यते।।१०।।

स्वस्वरूपं चिन्तनेनाऽज्ञानं नश्यति सत्वरम्।
नष्टेऽज्ञाने तु दु:खान्ता: सर्वे नश्यन्ति निश्चितम्।।११।।

असत्यो नाशवाँल्लोक: सत्तत्त्वं स्वात्मनि स्थितम्।
असत्ये भुवने सत्यं मार्गणाल्लभ्यते कथम्?।।१२।।

भुवने भवतीत्यर्थे ज्ञानमेतत्कृते भवेत्।
प्राणायामपरो भूत्वा मन:स्थैर्यं समाचरेत्।।१३।।

मनस्थैर्ये तु सत्तत्त्वं लोक्यते देहमन्दिरे।
यावन्न लोक्यते तावत् सर्वं वस्तु निरर्थकम्।।१४।।

कोऽहं कोऽहमिति प्रश्ने सोऽहमित्युत्तरं यदा।
नाऽऽयाति तावद् द्रष्टव्यं सत्तत्त्वमनुभूयते।।१५।।

यथा पङ्कविनिर्लिप्तं पङ्कजं चापि पङ्कजम्।
तथाऽज्ञानविनिर्लिप्तोऽज्ञानाविष्टोऽपि सज्जन:।।१६।।

दृष्ट्वापि शाद्वलं भेक: पङ्के जल्पति सर्वत:।
स्वस्वरूपं तथाऽदृष्ट्वाज्ञानी चिन्तयते सदा।।१७।।

सत्तत्त्वमात्मतत्त्वं वा परं ब्रह्मस्वरूपकम्।
आत्मज्ञानं शिवो रामो मोक्षश्चाष्टौ समार्थका:।।१८।।

❊ ❊

## ७६. ईशवासः

सर्वाञ्जीवानीशरूपान् ज्ञात्वा मधुरभाषितैः।
सद्भावेन विवेकेन सर्वदा व्यवहार्यताम्।।१।।

शिववासोऽस्ति सर्वेषु तद्देहाश्च शिवालयाः।
इति बुद्ध्या वर्तमानः शिवसान्निध्यमेष्यति।।२।।

शिवस्य विप्रयोगो हि रोगो जीवस्य दुःखदः।
औषधं तच्छान्तिकरं सर्वेषु शिवदर्शनम्।।३।।

परोपकाराय तथा शिवसान्निध्यलब्धये।
यदि पीडा भवेत्तस्य तत्फलञ्चामृतोपमम्।।४।।

सदाचारप्रियः सत्यवादी दीनसहायकः।
योऽस्ति तस्य शिवो नित्यं प्रसीदति नसीदति।।५।।

भवतां गृहमायातो भिक्षुकोऽपि शिवो भवेत्।
तस्मै जलान्नं नोच्छिष्टं देयं सद्भावमिश्रितम्।।६।।

चिन्त्यं वणिग्जनैरेतद् ग्रहीतापि शिवो भवेत्।
सद्भावेन वणिग्वृत्तिं यः कुर्यात् स सुखी भवेत्।।७।।

न केवलं मनुष्याणां देहे वसति शङ्करः।
सर्वेषां प्राणिनां देहे जीवरूपो वसत्यसौ।।८।।

❊❊

## ७७. स्वर्गः

सर्वे जनाः समिच्छन्ति स्वर्गं गन्तुमितः परम्।
किन्तु मृत्युं न वाञ्छन्ति स्वर्गस्तेषां कुतो मिलेत्।।१।।

मर्त्यलोकं समायाता जना मरणशीलिनः।
पुण्यं कर्म न कुर्वन्ति स्वर्गस्तेषां कुतो मिलेत्।।२।।

सत्कर्माणि न कुर्वन्ति चौर्यहिंसाप्रवञ्चकाः।
उपकारं न कुर्वन्ति स्वर्गस्तेषां कुतो मिलेत्।।३।।

याद्दशस्ताद्दशो वास्तु स्वर्गोऽमुत्र मिलेन्न वा।
इहैव नरकः स्वर्गो दृश्यते कर्मकर्तृभिः।।४।।

सन्ति कर्मकरा ये वै स्वस्थास्ते कर्मकारकाः।
अत्र स्वर्गं विनिर्माय स्वर्गिणः सन्तु सर्वदा।।५।।

सर्वथा सर्वदा दुःखं भवेच्चेन्नरको हि सः।
शान्तिसुखं सदाऽऽनन्दं भवेत् स्वर्गोऽयमेव हि।।६।।

⁂

## ७८. के धर्माः धार्मिकाश्च

धर्मं वदन्ति कतिचिज्जपहोमदान-
यज्ञादिकं परजनोपकृतीस्तथाऽन्ये।
संस्कारकर्म कतिचित्स्वमनः प्रियाणि
केचित्सदाचरणमात्मविचारयोगान्।।१।।

वेदादिशास्त्रगुरुणोदितकर्मकर्ता
स्वाचारसज्जनसमागमनोपकर्ता।
सत्यं वदन्ननुभवन् परदुःखमेकं
स्वात्मानुचिन्तकजनो न चलत्यधर्मम्।।२।।

⁂

## ७९. नृस्वभावः

सर्वा भूमिः सकलमपि तद् वस्तुजातं च गावः
स्वर्णं वित्तं सकलमशनं स्युर्मदीयास्तरुण्यः।
वाञ्छत्येवं करणरहितो नोद्यमश्चालसो ना
स्वायुः स्वल्पं परिमितमतिर्गर्व एकोऽस्त्यखर्वः।।१।।

कालोऽतीतः कवलिततनुर्नूतनैर्जन्म लब्धं
नित्यं पापे प्रणिहितमतिः पुण्यकर्माणि हित्वा।
शिक्षाज्ञाने न मतिरलगद् ज्ञानवृद्धोपहासात्
आत्मानं यस्तदपि नितरां स्तौति गर्वायते ना।।२।।

❊❊

## ८०. मनः

सङ्कल्पं च विकल्पं च कुरुते चञ्चलात्मकम्।
स्वयं विमर्शरूपं च मन इन्द्रियगोचरम्।।१।।

मनश्चञ्चलतामेति न स्थैर्यं लभते क्वचित्।
जप्यः कस्यापि मन्त्रश्चेन्मनः स्थैर्यकरो हि सः।।२।।

प्रविहायाऽति चाञ्चल्यं मन आयाति तत्र हि।
यत्र ध्यानं कीर्तनं स्याच्चर्चा वा परमात्मनः।।३।।

ध्रुवं तदिति विश्वस्याऽध्रुवे कुत्रापि वस्तुनि।
मनो लगति चेत्तत्र निश्चितं दुःखितं भवेत्।।४।।

दुःखमाप्नोत्यवश्यं स यस्येच्छाभरितं मनः।
मनो यस्य भवेद् रिक्तं स एव सुखमाप्नुयात्।।५।।

मनो जयति यं तेन स सदा दुःखितो भवेत्।
मनो जयति यः स्वस्य स जगद्विजयी भवेत्।।६।।

विशालं मानसं यस्य परिवारैर्वृतोऽपि सः।
न शक्नुवन्ति तं केऽपि बन्धयितुं कदाप्यहो!।।७।।

यस्याऽशुद्धं मनो नासौ रोचते परमात्मने।
मनः शुद्धं भवेद्यस्य स प्रियः परमात्मनः।।८।।

सुखार्थिभिः प्रदीयन्तामेकस्मै परमात्मने।
मनांस्यन्यत्र दत्तेषु तेषु दुःखमवाप्यते।।९।।

मन्दिरे मन्दिरे गत्वा देवान् दृष्ट्वा जना अहो!
मनस्तेभ्यो नाऽर्पयन्ति द्रव्यं पुष्पं क्षिपन्त्यहो!।।१०।।

**

## ८१. मन:शुद्धि:

अन्तर्वत्न्या: सदाचारविचारव्यवहारत:।
प्रभावो याति गर्भस्थं शिशुं सोऽपि तथा भवेत्।।१।।

दृढोपलसदाचारे सद्विचारनिकेतनम्।
दृढं भवति तत्रैव सुस्थिरं ब्रह्मचिन्तनम्।।२।।

परिग्रहसङ्ग्रहयोर्मनो विपरिवर्तते।
भक्ति: पुष्यति शुद्धिश्चेद्यस्याऽऽचारविचारयो:।।३।।

स्नानाच्छरीरशुद्धि: स्यान्मन:शुद्धिस्तु ध्यानत:।
दानाद् वैभवशुद्धि: सत्सङ्कल्पाच्छुद्धिरात्मन:।।४।।

यदि सद्वस्तुतथ्यस्य ज्ञानमाप्नोति बुद्धिमान्।
आचारे व्यवहारे तन्मन:शुद्ध्यै स योजयेत्।।५।।

मनो यस्य भवेच्छुद्धं जगत्तस्यास्ति सुन्दरम्।
मनोऽस्ति मलिनं यस्य जगत्तस्यास्त्यसुन्दरम्।।६।।

**

## ८२. ज्ञानेन्द्रियविनय:

(क) नेत्रम्– न पश्यतं बहिर्नेत्रे! पश्यतं कृष्णमन्दिरे।
लीलाविचित्रितैश्चित्रैर्मन्दिरं मन्मथायते।।१।।

मांसपिण्डमये वामलोचनावदनेऽधिकम्।
नीरसौ कुचकुम्भौ च पश्यथ: किं पुन: पुन:।।२।।

(ख) श्रोत्रम्– न शृणुतमुभौ कर्णौ परनिन्दापवादकौ।
कृष्णवंशीनिनादोऽस्ति विवरे युवयोर्द्वयो:।।३।।

सप्तस्वरयुतो नाद: श्रूयते मानसे मम।
संश्रूयन्ते स्वरा: सप्त कृष्णवंशीरवे यथा।।४।।

(ग) त्वक्– कृष्णपूजारतं भूयास्त्वगिन्द्रिय मम प्रिय!।
कराग्रयो: समायाहि पूजायां कृष्णमन्दिरे।।५।।

आनन्दो न कुचस्पर्शे संवेशेऽपि न तादृश:।
यादृश: कृष्णपूजाग्रे मूर्तिसम्मार्जने मिलेत्।।६।।

(घ) घ्राणम्– घ्राणेन्द्रिय त्वमपि मे पुर आयातु सन्ततम्।
कृष्णपूजाधूपगन्धं जिघ्रिक्षसि सखे! यदि।।७।।

मन्दिरे यादृशो गन्धो देवानां नान्यमन्दिरे।
मन्मथस्य तु यो गन्धस्तदस्मान् मन्दुरायते।।८।।

(ङ) रसनम्– रसने! चञ्चलासि त्वं परनिन्दापवादयो:।
कृष्णलीलां प्रगाय त्वं रसं धेहि विधेहि तत्।।९।।

सरसे! रसमन्वेष्टुं लिक्षे किमिव शर्कराम्।
परनिन्दापवादौ न शर्करा, शर्करा समौ।।१०।।

तत: कृष्णप्रसादेन सरसे! रसिकायसे।
यत: पुण्यं प्रसादं च गालिदानं विनाऽऽप्स्यसि।।११।।

(च) मन:– शब्दस्पर्शरूपरसगन्धेषु लोलुपान्यहो।
श्रोत्रत्वगक्षिरसनाघ्राणाश्च विषयीणि ते।।१२।।

यथाभिलषितं कर्तुं न दास्यन्तीत्यत: किमु।
तेषां सङ्गं विहाय त्वं स्थैर्यं भज मनो मम।।१३।।

'किं करोमि क्व गच्छामि कस्य सङ्गतिमाश्रये'।
इति चिन्तां मन्यसे चेच्छ्रूयतां मन्त्रणं मम।।१४।।

मनश्चञ्चलतां हित्वा प्रविश कृष्णवक्षसि।
राधयाऽपहृतं तस्य मनस्ते वासमेष्यति।।१५।।

**

## ८३. सदुत्साहः

विचारं प्रथमं कुर्यात् सद्विचारो भवेद्यदि।
सत्सङ्कल्पात् तं विचारं नयस्वाऽग्रे प्रवर्द्धय।।१।।

विचारात् प्रोन्नतं वस्तु ब्रह्माण्डे न किमप्यतः।
कुर्वतः सर्वकार्याणि विचारः समुदेतु मे।।२।।

आत्मविश्वास आयातु सङ्कल्पं स्यात् शुभङ्करम्।
भूयाज्जीवनसाफल्यमुत्साहः समुदेतु मे।।३।।

अग्रे कृत्वा समुत्साहमात्मविश्वासपूर्वकम्।
कुर्वतः शिवसङ्कल्पं सत्कार्यं सफलं भवेत्।।४।।

उत्साहात् सर्वकार्याणि सफलानि भवन्त्यतः।
उत्साहः सर्वकार्याणां बीजमस्तीति मे मतिः।।५।।

**

## ८४. कर्णधारः

यद्यस्माकं निपतनं स्यात्तदाऽऽयाति चेतना।
ततो विचारयन्तो हि गमनं साधु कुर्महे।।१।।

देश-जीवनबोद्धारोऽध्यापकाः कर्णधारकाः।
तेषां हस्ते क्षेपणी चेत्तदा देशो न मज्जति।।२।।

जनताया मतं धृत्वा यां पार्टीं रचयन्ति ये।
देश-जीवनमज्ञात्वा प्लवं न रचयन्ति ते।।३।।

देश-प्लवं प्रददत यदि जानीथ शासकाः।
अध्यापकास्तारयन्ति जन-जीवन-बोधकाः।।४।।

**

## ८५. मैत्रीभावः

यो मित्रनिन्दां कुरुते मित्रच्छिद्रं प्रकाशते।
मात्सर्यं कुरुते नित्यं तस्य मैत्री विनश्यति।।१।।

प्रत्यक्षे मित्रसम्मानं परोक्षे तु प्रशंसनम्।
कार्यकाले समुत्पन्ने कुर्यान्मित्रसहायताम्।।२।।

शंसत्यन्यगुणान् यो हि शत्रुं मित्रति सज्जनः।
कर्मणा मनसा वाचा तस्य मैत्री दृढा भवेत्।।३।।

वाचा मधुरया वक्ता जगन्मित्रं भवेत् सदा।
यो वदेत् परुषां वाणीं तं न पश्यन्ति केऽप्यहो!।।४।।

**

## ८६. राष्ट्रोन्नतिहेतुः

नारीणामुन्नतौ राष्ट्रप्रगतिरुन्नता भवेत्।
तासामवनतौ राष्ट्रमधो गच्छति निश्चितम्।।१।।

राष्ट्रोन्नतिं समानेतुं वाञ्छद्भिर्मन्त्रिभिः सदा।
विद्यां शिल्पमुभौ दत्वा नारीशिक्षा प्रसार्यताम्।।२।।

नार्यः सुशिक्षिताश्चेत्ताः सन्ततिं शिक्षयन्ति हि।
अशिक्षिता न जानन्ति कां शिक्षां प्रदिशन्ति ताः।।३।।

अतस्तासां सुसन्तानाः शिक्षितां मातरं विना।
गृहशिक्षां नाप्नुवन्ति कथं राष्ट्रोन्नतिर्भवेत्।।४।।

'प्रथमा पाठशालास्ति शिशूनां गृहमेव' यत्।
सार्थकं नाऽभविष्यच्चेन्नाऽऽप्स्यद् राष्ट्रः समुन्नतिम्।।५।।

**

## ८७. नेतृयोग्यता

राज्ये दार्शनिकाः सन्तः शासकाः सन्ति नोऽथवा।
शासका दर्शनं शास्त्रं पठन्ति यदि नान्यथा।।१।।

जनैस्तैर्दुःखतप्तैश्च शीतलत्वं न लभ्यते।
दुःखस्यान्तं भवेन्नो चेत् तदा शान्तिर्न लभ्यते।।२।।

**

## ८८. निन्दकः

यदि कश्चिन्निन्दकस्ते गालिं राति निरन्तरम्।
कृत्वा समादरं तस्य निकटे वासयेदमुम्।।१।।

तस्य वासेन को लाभ इति चिन्तां न मन्यताम्।
निर्मलीकरणात् पूर्वं निर्मलं ते भवेन्मनः।।२।।

न निन्द्यो निन्दकः सद्भिर्मातुरप्यधिको हि सः।
मलं प्राक्षालयन्माता हस्ताभ्यां जिह्वया स तु।।३।।

यमाहारं जनः कुर्यात् तमाहारं वमत्यपि।
यो गालीः प्रपठेत् सोऽपि गालीर्नित्यं वमत्यहो!।।४।।

गालिमेव विजानाति गालिं राति करोतु किम्?
स तु सद्भाववाक्यानि न जानाति वदेत् कथम्?।।५।।

**

# ८९. साहित्यनगरी

प्रसादादिगुणैर्युक्ता शृङ्गारादिरसैर्नवैः।
सुलिप्ताऽऽच्छादिता शब्दालङ्कारैरर्थमिश्रितैः।।१।।

कथानाटककाव्योपन्यासकोषनिबन्धना।
कवितागीतपटला द्वारसंलापमुक्तका।।२।।

भाषाभक्तैरिष्टिकैका योजिता सुपरीक्षिता।
भाषासाहित्यनगरी निर्मिता सुमनोरमा।।३।।

यत्र विद्या नाम रम्यं व्ययीकृत्याऽव्ययं धनम्।
सदा नित्याऽनित्यवस्तुविवेको निवसत्यतः।।४।।

संसाराऽसारतां बुद्ध्वा सारवस्तु समश्नुते।
विवेकं प्राप्य रमते शुक्लवर्णा सरस्वती।।५।।

❊ ❊

## तृतीयोन्मेषः

# ९०. वृथा गतम्

खादन्ति खेलन्ति हसन्ति नित्यं वसन्ति धावन्ति पठन्ति नैव।
जानन्ति नो वाग्व्यवहारवृत्तिं वृथा गतं जीवनमेव तेषाम्।।१।।

न वा कदाचिद् द्रविणेन हस्तं पूर्णं कुसूलाढकमेव धान्यैः।
आच्छादितं वा वसनैर्न चाङ्गं वृथा गतं जीवनमेव तेषाम्।।२।।

गेहात् परं यैर्न गतं कदाचिद् दृष्टा न देशाः परितः स्वदेशम्।
कृते कदाचिन्न च कर्मधर्मे वृथा गतं जीवनमेव तेषाम्।।३।।

काश्कीप्रदेशं न गताः कदापि काशीप्रदेशं न गताः कथञ्चित्।
स्नाता न काल्यां मलिनं शरीरं वृथा गतं जीवनमेव तेषाम्।।४।।

पतिः पशूनां न नमस्कृतो यैर्न बुद्धजन्मस्थलदर्शनं च।
श्रीजानकीजन्मधरा न दृष्टा वृथा गतं जीवनमेव तेषाम्।।५।।

पादौ न यातौ क्व च देवपीठे हस्तौ न लग्नौ शिवपूजनेऽपि।
हरेः कथायां श्रवणौ न दत्तौ वृथा गतं जीवनमेव तेषाम्।।६।।

कृतं न वेदाध्ययनं गुरोर्वा न चापि विद्यालयसेवनं यैः।
न पुस्तकागारमथापि दृष्टं वृथा गतं जीवनमेव तेषाम्।।७।

सृष्टिस्थितिसंहृतिहेतुभूतं निर्लिप्तमव्यक्तमपि स्वरूपम्।
आजीवनं तन्न विचारितं यैर्वृथा गतं जीवनमेव तेषाम्।।८।।

जनान् स्वकीयाँश्च परान् स्ववर्गान् त्वङ्कृत्य हुङ्कृत्य गुरुस्वरेण।
ये पण्डितम्मन्यतया वदन्ति वृथा गतं जीवनमेव तेषाम्।।९।।

दत्तं न वित्तं च कियत् परार्थे प्रोक्ता न वाणी च कदा कृतार्थे।
पादौ न चान्यस्य गतौ हितार्थे वृथा गतं जीवनमेव तेषाम्।।१०।।

कार्पण्यभावेन च वा छलेन कापट्यभावेन च बन्धुपीडाम्।
कुर्वन्ति ये सन्ति कुबुद्धिमन्तो वृथा गतं जीवनमेव तेषाम्।।११।।

वधूर्नवीना न विलोडिता यैर्बाहूपधाना निशि न प्रसुप्ताः।
प्रियाप्रियालापसुखं न येषां वृथा गतं जीवनमेव तेषाम्।।१२।।

वंशीरवः कोकिलवासितं वा तदर्थबोधस्तु भवेन् न वाऽपि।
आनन्दितं क्वाऽपि मनो न येषां वृथा गतं जीवनमेव तेषाम्।।१३।।

साहित्यभाषापठने विदग्धा लिखन्ति काश्चित् कविताः कथञ्चित्।
जानन्ति ते नो कविभानुभक्तं वृथा गतं जीवनमेष तेषाम्।।१४।।

विदेशयात्राकरणे सशक्ताः मलेसियाऽमेरिककोरियादौ।
काशी कुतोऽस्तीह न वेत्ति कोऽपि वृथा गतं जीवनमेव तेषाम्।।१५।।

विद्यासमुद्रान्तगताः पठित्वा विद्यामठे पाठनकार्यलग्नाः।
जानन्ति नो भारत-राममार्गं वृथा गतं जीवनमेव तेषाम्।।१६।।

कान्ता न येषां मृदुभाषिणी स्यात् वशंवदो नैव सुतोऽपि येषाम्।
आज्ञानुकूलो न च सेवकः स्यात् वृथा गतं जीवनमेव तेषाम्।।१७।।

गीतं भवेद् वाऽपि च मुक्तकं वा छन्दो निबद्धं यदि ते कवित्वम्।
दृष्ट्वा पठित्वा श्रवणेन पीत्वा न मोदते क्वापि मनोऽपि येषाम्।
वृथा गतं जीवनमेव तेषाम्।।१८।।

* *

## ९१. आकाङ्क्षा

देहो निरोगः परिपोष्यते चेत् कलत्रकाव्ये मधुरे भवेताम्।
गेहं विशालं नगरे भवेच्चेत् सुतौ सदाज्ञानुकरौ भवेताम्।।१।।

दीनं मनो मे गलितं भवेच्चेत् पूजां हरेर्भक्तियुतां विदध्याम्।
हृष्टं मनः शान्तिसुखं भवेच्चेत् कथां हरेर्भक्तियुतां पठेयम्।।२।।

शास्त्रं तदर्थश्च न बुध्यते चेत् गुरुं हि सद्भावयुतो नमेयम्।
सङ्गात् कदा कुव्यसनं भवेच्चेत् सत्सङ्गतिं केवलमर्थयेयम्।।३।।

रागो विरागो हृदये भवेच्चेत् तत्तत् प्रकारां कवितां लिखेयम्।
वादो विवादो मम जायते चेत् एकोऽप्यहं सद्विषये भवेयम्।।४।।

अर्थागमो हस्तगतो भवेच्चेत् सद्धर्मकार्येषु नियोजयेयम्।
यदा कदा मित्रसमागमश्चेत् सद्भाववाक्यैरभिवादयेयम्।।५।।

कश्चिज्जनो मन्त्रयते मया चेत् इष्टं हितं तं च सुमन्त्रयेयम्।
सखा समो भावयुतो भवेच्चेत् कुत्राप्यहं तेन युतो व्रजेयम्।।६।।

समस्थली वा विषमस्थली चेत् दृश्यं स्वदृग्भ्यां सततं पिबेयम्।
स्वदेशकं वा परदेशकं चेदैतिह्यमेकं श्रुतितः पिबेयम्।।७।।

देशाटनाद् दृश्यविलोकनाच्चेदागत्य विश्रम्य गृहे वसेयम्।
सम्मेल्य चात्मानुभवो भवेच्चेत् मदाश्रयाँस्ताननुभावयेयम्।।८।।

सुखं च दुःखं च यथागतं चेत् कालानुसारेण तथा भजेयम्।
यतो मदीयं जननं भवेच्चेत् भोक्तुं सुखं दुःखमलं भवेयम्।।९।।

**

## ९२. ग्रहसंस्तुतिः

आदित्यः सुखवर्द्धकोऽस्तु च शशी दद्याद् यशो मङ्गलो
नित्यं मङ्गलमानोतु च बुधो बुद्धिं गुरुर्गौरवम्।
शुक्रः शुक्रधनप्रदो रविसुतो भूयाद् रिपुध्वंसको
राहुर्बाहुबलं सदाऽऽनयतु मे केतुः कुलोत्कर्षताम्।।१।।

**

## ९३. ग्रहसंहतिः

भास्वत्समुज्ज्वलमुखा दिवसे प्रचण्डा
रात्रौ तु शीतलकरा शशिखण्डभाला।
सत्यं सुमङ्गलगिराऽऽकृतिसौम्यरूपा
मध्ये सदा गुरुकुचा कविवाच्यभावा।।१।।

तन्वी शनैश्चरपदा तम ईक्षणैका
भुक्ता सदा शिखिकचा मम देहलग्ना।
वक्रा न चेद् वसनवित्तसुपूजितैषा
नारी न, का? समुदिता ग्रहसंहतिर्मे।।२।।
(स्वमधिकृत्य)

योऽन्तस्तमोऽपहरणादवभाति सूर्य-
श्चन्द्रः सदामृतकरादिह वत्सलोऽभूत्।
नित्यं सुमङ्गलगिरा भुवि मङ्गलोऽपि
सौम्यः सदा बुधमनःसु तथाऽबुधेषु।।१।।

वाचां पतिः कविजनेषु गुरुर्हि छात्र-
वृन्देषु, काव्यकलनात् कविरेव साक्षात्।
पद्भ्यां शनैश्चरणतोऽपि शनैश्चरः किं
दृग्भ्यां तमः शिखिशिखो ग्रहसंहतिर्वा।।२।।
(स्वपितरमधिकृत्य)

भास्वत्कान्तिसमुज्ज्वला शिखिकचा यद्भालखण्डे शशी
वाग्भिर्मङ्गलकारिणी गुरुकुचा सौम्याऽधरोष्ठाकृतिः।
यन्मध्यं कविवाच्यभावविदितं गुह्यन्तमःकारकं
नारी न, ग्रहसंहतिर्ममकृते या मन्दभाग्या शनिः।।१।।
(स्वां मायामधिकृत्य)

भास्वत्कान्तिसमुज्ज्वलः शिखिशिखो यद् भालखण्डः शशी
वाग्भिर्मङ्गलकारको गुरुवपुः सौम्याकृतिर्मन्दगः।
यत्काव्यं कविवाच्यभावविदितं सर्वैरनन्यं मतं
कोषोऽयं कविसंसदि ग्रहगणो दृग्भ्यां तमो दृश्यते।।१।।

कोषोऽत्यन्तं विपुलजघनः स्वोदरे मन्दचेताः
सर्वार्थानां परिभवकरः कार्यजातेऽभिलेखे।
शब्दार्थानां गुणपरिचयो यस्य चात्यन्तमस्ति
काव्यं यस्याऽप्यननुकरणीयत्वमाप्नोति सद्यः।।२।।

स्वीयानन्यान् वचनरचनैर्नन्दयन् विप्रकृष्टान्
यस्तानुक्त्वा कथयति सदा त्वं प्रियो जातहार्दः।
यात्रादौ वै सहचरगणैर्गण्यते सैष नेता
यः स्वान् दारानथ च स्वसुता आत्मनः शंसतीति।।३।।

को विद्वान् कश्च मूर्खः कथयितुमधुना नैव शक्नोति कोऽपि
दाक्षिण्यं कार्यजातं किमपि च कुरुते को नु जानाति सर्वम्।
एको वाक्यप्रवीणस्तदनु परजनः शिल्पकोऽन्यो विधिज्ञः
सुव्यक्तः कोषराजः कथयति सकलान् बालिशानेव नित्यम्।।४।।

ज्ञातव्यो विविधोऽस्ति नैकविषयो धर्म्यस्तथाऽर्थोऽपि च
काम्यो वा परमार्थसञ्ज्ञक इहाऽविद्यात्मविद्यात्मकः।
सर्वं ज्ञातुमलं न कोऽपि च समुन्नद्धः समर्थो भुवि
शश्वन्मामभिषङ्गमेव कुरुतेऽसौ कोषराजः किमु?।।५।।

(कोषमधिकृत्य)

प्रदीप्त्या वा कान्त्या कमलमणिकान्त्या दिनमणिः
तथा पूर्णश्चन्द्रः सकलकलयाऽयं निशिमणिः।
कृतं भौमं स्थानं परमसुखदं मङ्गलकरं
शुभं शास्त्रागारं बुधसुखकरत्वादपि बुधः।।१।।

गुरुत्वात् सर्वेभ्यो गुरुजनहितं गौरवकरं
कृत: काव्यालाप: कविभिरिह काव्यं प्रपठितम्।
अमन्दा वा मन्दा: सकलजनता: सन्ति तमसा
शिखाभि: सर्वेषां सशिखशिखरं स्थानमभवत्।।२।।
(कमलमधिकृत्य)

काचित् सूर्यमुखोज्ज्वला शिखिकचा सा भालचन्द्रा पुन:
स्निग्धा मङ्गललोचना गुरुकुचा सौम्योष्ठबिम्बाधरा।
तन्मध्यं कविवाच्यभावविदितं गुह्यन्तम:कारकं
नारी न ग्रहसंहतिर्हि जगत: पद्भ्यां शनैश्चारिणी।।१।।
(जगदधिकृत्य)

भास्वत्कान्त्या मुकुटमणिना सूर्य एवासि कृष्ण!
चन्द्राधिक्योऽमृतकिरणवाँश्चन्द्रमौलिस्तुतोऽसि।
वाचा मोचाफलमधुरया मङ्गलस्त्वं सदाऽसि
प्रीत्या नीत्यापि च समतया सौम्यमूर्ति: समाजे।।१।।

ज्ञातोऽस्माभिर्गुरुचरितवान् गौरवादन्यतोऽपि
चारित्र्यं ते कविजनकृतं काव्यरूपं जनेषु।
मन्दात्माऽसौ प्रणमति सदा मन्दबुद्ध्या भवन्तं
यस्याऽन्तस्त्वं परिहर तमस्ते शिखी शङ्करोतु।।२।।
(जगदाधारमधिकृत्य)

* *

## ९४. सूर्यादिग्रहाणां यन्त्रनिर्माणविधि:

यन्त्रं ज्ञेयमथो बुधै: सुखकरं सूर्यादिकानां क्रमात्
पञ्चाद्यास्त्रिहता भवन्ति सफलास्तेषां हि सङ्ख्यास्तत:।
इष्टाङ्कं त्रिहतं विधाय विदुषा रक्ष्यं हि तन्मध्यमे
तत्रैकं विनियोज्य देहि प्रथमे हित्वा पुनश्चान्तिमे।।१।।

द्वौ संयोज्य वियोज्य रक्ष क्रमशस्तुर्ये तथा षष्ठके
त्रीन् संयोज्य वियोज्य तत् पुनरपि स्थाप्यं तृतीये नगे।
वेदाँस्तत्र नियोज्य तद् वसुगृहे हित्वा पुनर्लोचने
देयं तन्नवकोष्ठकेनसहितं यन्त्रं सुपूर्णं भवेत्।।२।।

**

## ९५. वंशो द्विधा

'स जातो येन जातेन याति वंशसमुन्नतिम्'।
प्रोक्ता नीतिरियं विष्णुशर्मणा च परन्तु मे।।१।।

विद्यातनयवंशौ द्वौ प्राप्तौ पितृपितामहैः।
परन्तु मत्तो विच्छिन्नौ न जातौ तावुभौ कथम्?।।२।।

विश्वविद्यालयोऽप्यत्र बहुशोऽभ्यर्थितो मया।
तेन मे पाठनाकाङ्क्षा न ज्ञाता न समर्थिता।।३।।

वश्या माया मयाऽभीक्ष्णं प्रार्थिता पुत्रलब्धये।
तयापि मे पुत्रलिप्साऽवरुद्धा नानुमोदिता।।४।।

अतो न मत्तः सञ्जातौ स्वक्षेत्रेऽप्यति शोभने।
विद्यातनयवंशौ च द्वावुभौ सुयशस्करौ।।५।।

भक्तिभावनयोपेता साधना चेतनाप्रदा।
पुत्रीकृता मया चात्र सशरीरा सुखाप्तये।।६।।

भाषाप्रपाठको भक्त्या विश्वविद्यालयेप्यहम्।
स्वभावनां पाठयामि साधनाचेतनात्मिकाम्।।७।।

सन्ति येऽपत्यवन्तश्च वृद्धत्वेऽप्यतिदुःखिताः।
तेषां सुता मया दृष्टा न दुग्धं पाययन्ति तान्।।८।।

पन्थिवंशे समृद्धेऽपि रघुवंशे यथा मम।
विच्छिन्नः पुत्रवंशोऽभूदग्निवर्णायितोऽभवम्।।९।।

या मे दुहितरः सन्ति चतस्रस्तासु निश्चितम्।
सम्भविष्यन्ति दौहित्रास्ते पठिष्यन्ति संस्कृतम्।।१०।।

विश्वविद्यालये तेषां भवन्तु निगमागमौ।
सद्गुरोः सन्निधिं प्राप्य पठन्तु निगमागमौ।।११।।

आचार्याम्बुधिमुत्तीर्णा लब्धवर्णाः प्रपाठकाः।
कथं ते पाठनाकाङ्क्षां पूरयिष्यन्ति नो मम।।१२।।

पुत्रीवंशं समाश्रित्य विद्यावंशश्चलिष्यति।
विच्छिन्ने पुत्रवंशेऽपि वाञ्छितं पूरयिष्यति।।१३।।

'वंशो द्विधा जन्मना वा विद्यया चे'ति शास्त्रवाक्।
सफला सार्थका भूयादित्यहं प्रार्थयेऽनिशम्।।१४।।

* *

## ९६. मित्रं प्रति प्रेषितपत्रम्

फणिनारायणं वन्दे सस्नेहं सादरं पुनः।
इतः पूर्वं सकुशलं कामये स्वजनैर्युतम्।।१।।

कविर्मनीषी प्रज्ञोऽपि फणिनारायणोऽसि मे।
सखा सतीर्थ्यः सम्बन्धिश्चिरादेव प्रियोऽसि च।।२।।

पितुः पत्रे प्रपठितं स्मरणं त्वत्कृतं मया।
अनित्यः सङ्गमः किन्तु नित्या हि हृदि संस्मृतिः।।३।।

दृश्यं पठनकालस्य दर्शं दर्शं चरिष्यतोः।
आवयोः स्मृतिमायान्ति ते हि नौ दिवसा गताः।।४।।

साङ्गा वेदाश्च नाऽभ्यस्ताः प्रवेशो नास्ति दर्शने।
न शक्तिर्न च नैपुण्यं काव्यशास्त्राऽवगाहने।।५।।

पूर्वजन्मार्जितैः पुण्यैः प्रतिभा नाऽर्जितोत्तमा।
अतो न मेऽस्ति वैदुष्यं कवित्वं योग्यसङ्गतिः।।६।।

श्वासोच्छ्वासादिकं कुर्वन् खादन् गच्छन्नितस्ततः।
वृत्यर्थं सञ्चरन्नेतं समयं यापयन्नहम्।।७।।

नाऽहं कविः कोविदोऽपि साहित्याम्बुधिपारगः।
पिपासुरस्मि तत्तीरे तरणं तु सुदुर्लभम्।।८।।

त्वयि संस्मरणं कर्तुं भाषायामपि शक्यते।
देववाण्यां किमर्थं चेच्छृणु दर्पान्न केवलम्।।९।।

स्मरणात् कीर्तनात् पाठादभ्यासाचरणादपि।
गिरां देवी प्रसन्ना स्यादिति हेतोर्विलिख्यते।।१०।।

तव भागवताज्ज्ञाता प्रतिभाऽस्त्युत्तमोत्तमा।
कथं लुप्तोऽसि सुप्तोऽसि प्रच्छन्नो ह्यसि साम्प्रतम्।।११।।

जीवितः सर्वकारश्चेत् त्वं भवेरभिनन्दितः।
नेपालीयैर्दलैस्त्वां वा त्वादृशं चिनुतां कथम्?।।१२।।

भवत्सुरचितं काव्यं श्रीमद्भागवतामृतम्।
राष्ट्रगौरववर्धिष्णु दृष्टं नववधूरिव।।१३।।

परन्तु कुकुले जाता न चिन्वन्ति वधूमपि।
गृहनायकभिल्लास्ते तां मुक्तामिव सिन्धुजाम्।।१४।।

आगमिष्यति कालेऽपि पत्राचारादिकं भवान्।
करिष्यति कदा काले स्वयञ्चाऽत्राऽऽगमिष्यति।।१५।।

यदाऽवकाशो भवति भवतां सङ्गमो भवेत्।
तदैव भूयो मिलितौ वसेव हीति कामये।।१६।।

❊ ❊

## ९६. विद्वान्

सन्धिः समासोऽप्यथ कारकाणि
कृत्तद्धितौ सुप्तिङिति प्रबुद्ध्य।
छन्दांसि लिङ्गानि पदानि साधु
जानाति सम्यग् भवतीह विद्वान्।।१।।

वाग्जालं वर्णनोत्कर्ष आक्षेपो वा दुराग्रहः।
शास्त्रान्तरेषु लिखितः सन्देहो लभ्यते ततः।।२।।

न सीमा पठनस्याऽस्ति ह्यपारः शास्त्रसागरः।
गीता-सप्तशती पाठान्नरो मुच्येत बन्धनात्।।३।।

**

## ९८. कविशिरोमणिलेखनाथः

शब्दैरलंकृतिचमत्कृतिभावपूर्णै-
र्द्वित्र्यर्थकैरसगुणध्वनिभिः समेतैः।
छन्दोमयैर्गतियतिक्रमरीतिभिश्च
सम्प्रस्तुतः कविशिरोमणिलेखनाथः।।१।।

ललाटोन्नतश्वेतभस्मत्रिपुण्ड्रै-
स्तथा विस्तृतैः श्मश्रुभिः केशपक्षैः।
प्रसिद्धो महर्षिः कवित्वे विशिष्टः
कवीनामयं शेखरो लेखनाथः।।२।।

श्रीलेखनाथकविरत्नकृतं विचित्रं
काव्यं महासुखकरं त्वृतुषड्विचारम्।
भाषान्तरे कठिनतामनुभूय तस्य
भावानुवादमिव देवगिरानुवक्ति।।३।।

कृतं लेखनाथेन काव्यं विचित्रं
ऋतूनामिदं वर्णनं चारुचित्रम्।
मया संस्कृतेऽनूदितं श्रद्धयैतद्
उपेयात् परेशं मदीयोपचारः।।४।।

नमोस्तु तस्मै कविशेखराय
श्रीलेखनाथाय मनीषिणेऽद्य।
येनर्तुसञ्ज्ञं परमेशरूपं
व्यधायि काव्यं रुचिरं विचित्रम्।।५।।

नाहं कविः केवलपाठकर्ता
तत्काव्यपाठेऽप्यनुरागभर्ता।
तत्संस्कृते स्यादिति भावधर्ता
तदर्थभाषाविषयानुसर्ता।।६।।

अनेन भावेन विबोधितेन
मयानुवादो विहितो यदस्ति।
तत्संस्कृतेऽस्तीह बुधाः पठन्तु
त्रुटिर्यदि स्यादपि शोधयन्तु।।७।।

**

## ९९. कविमुकुन्दशरणः

प्रियोऽयं कविः पोखराजन्मभूमेः
प्रियोऽयं सुसौहार्दसौहित्यभावात्।
प्रियोऽयं मुकुन्दस्य नाम्ना मुकुन्दः
प्रियोऽयं कवीनां स्वभावान्मुकुन्दः।।१।।

प्रियं काव्यमेतद् विचित्रं कवीनां
प्रियं प्राकृतं पोखरादर्शकानाम्।
प्रियैः प्राकृतैर्मत्स्यपुच्छाचलाद्यैः
प्रियैः प्राकृतैस्तैः सुवर्णैः फलाद्यैः।।२।।

प्रियं देशभाषाविशिष्टं सचित्रं
प्रियं वृत्तिरीत्या विशिष्टं सुचित्रम्।
प्रियं देशभक्त्या विशिष्टं विचित्रं
प्रियं संस्कृतेऽनूदितं नैव चित्रम्।।३।।

भाषोद्बोधकरो भास्वान् व्यवहारकलाधरः।
वाचा सन्मङ्गलो नित्यं सौम्यः साधुसमागमे।।४।।

गुरुर्हिच्छात्रवृन्देषु काव्योऽयं कविताकरः।
मन्दगत्या मन्द एष बहिरन्तस्तमोहरः।।५।।

शिखाधरत्वेन शिखी नायं ग्रहगणो नरः।
को विन्दतीत्थं पुरुषं? मुकुन्दः कोविदोऽस्त्ययम्।।६।।

श्रीमन्मुकुन्दशरणस्य कवेः सुजन्म
सत्यं हि सप्ततिनवाधिकवर्षपूर्वम्।
अस्मिन् दिने समभवद्गतविक्रमाऽब्दे
सोऽशीतिवर्षनिकटेऽपि च सक्रियोऽस्ति।।७।।

व्याख्यानचारुवचनामृतशिल्पकारो
वैयाकृतिकविरथाऽपि च कोषकारः।
धीरः कृतीर्विनयवान् शुभशीलमूर्ति-
र्दीर्घायुरस्तु सुखशान्तिसमृद्धयः स्युः।।८।।

❊❊

## १००. पुरुषोत्तमाय नमः

शान्ताय सत्यविभवाय सुचिन्तकाय
सौम्याय सौम्यवपुषे जनवल्लभाय।
विद्याविकाससुखिने पुरुषोत्तमाय
भक्त्या नमोऽस्तु गुरवे पुरुषोत्तमाय।।१।।

❊❊

## १०१. आचार्यः खेमराजः

आचार्यः खेमराजो हिमगिरिललितस्रग्धरायां धराया-
मायातो विद्वदग्र्यो दिशि दिशि विकिरन् माधुरीं देववाण्याः।
स्वीयैः सद्भावपूर्णैर्गुरुगरिमयुतैः शिक्षणैश्छात्रवर्गं
सन्तोष्याऽऽस्ते विपश्चित्सदसि सुविदितो द्योतमानो यशोभिः।।१।।

आचार्यः खेमराजोऽध्ययनरतमनाः शश्वदुद्दीप्तबोध-
श्छात्राणां ज्ञानवृद्ध्यै सततकृतमतिः शिक्षणैकावधानः।
सव्याख्यैर्दीपितार्थैः श्रुतिसुखवचनैः पाठयन् धीरभावै-
रुद्बुद्धां बोधलिप्सां प्रखरयति मुहुः प्रेरणाभिः शुभाभिः।।२।।

सन्दर्भं पूर्वमुक्त्वा तदनु विशदयन्नन्वयं पद्यलग्नं
भावार्थं स्पष्टरीत्या गमयति कवितावाचनात् पूर्वमेव।
सैषा शैली यदीया सबलयति रुचिं छात्रवर्गेष्वधीते-
राचार्यः खेमराजोऽजनि सुपरिचितस्तैः स्वकीयैर्विशेषैः।।३।।

नैपाल्यां बहुधाविनिर्मितकृतिस्तन्वञ्छुभां प्रेरणां
सृष्ट्वा मानवताभिधान्वितमहाकाव्यं प्रसिद्धिं गतः।
गैर्वाण्यामपि वाचि सिद्धरचनः सद्धर्मशिक्षारतः
सोऽसौ भाति बृहस्पतिः प्रवचने श्रीखेमराजो गुरुः।।४।।

नैपालकानां विदुषां वरेण्यः प्राच्यप्रतीच्योभयदर्शनज्ञः।
साहित्यवेदान्तविचक्षणोऽसौ श्रीखेमराजो जयति प्रसिद्धः।।५।।

* *

## १०२. काव्यं यशोवर्द्धकम्

नैपाल्यां गुरुखेमराजरचितं श्रेयस्करं सुन्दरं
दिव्यं मङ्गलदायकं सकरुणं शान्त्यैकलक्ष्यं शुभम्।
काव्यं मानवताभिधं श्रुतिसुखं सद्भावनोद्दीपकं
सश्रद्धं परिशीलयद्भिरभितो ज्ञानामृतं पीयते।।१।।

यत्र क्षेमपरम्परा शुभमयी यत्रार्षविद्या स्फुटा
यस्मिन् दिव्यवचांसि दिव्यपुरुषो ब्रूते शुभाकाङ्क्षया।
तस्मिन् काव्यमणौ निसर्गललिते भावप्रभावोदिता
राष्ट्रोत्थानयुता विचारलहरी श्रेयोर्थिभिर्लभ्यते।।२।।

काव्यैर्हृद्यपदान्वितैः सरसयन् प्रज्ञावतां मानसं
मिष्टैर्भक्तिरसान्वितैः प्रवचनैराह्लादयन् सन्मनः।
सेवाभावसमुज्ज्वलैः सुचरितैर्लोके शुभं शिक्षयन्
विद्वन्मण्डलमण्डितो विजयते श्रीखेमराजो गुरुः।।३।।

अधीतिबोधाचरणप्रचारणै-
र्वितत्य विद्यां विनयोपपन्नाम्।
उपासिता यः क्रमशः सुधीवरः
श्रीखेमराजो जयति प्रसिद्धः।।४।।

श्रीखेमराजगुरुरद्यदिवङ्गतोऽभूत्
नैवास्ति भूतलमिहाऽऽगतवान् प्रवासात्।
प्राध्यापकोऽभवदसौ खलु संस्कृतस्य
साहित्यशास्त्रविषयेऽप्यथा धर्मवक्ता।।५।।

**

## १०३. मन्थलीयं कविं प्रति

काव्ये व्याकरणादिकोषसहिते व्याख्याविधौ लेखने
नैपाल्यामपि सुष्ठुकाव्यरचनाशिल्पेऽथवा शिक्षणे।
शृङ्गारादिरसे विरागविषयेऽथ व्यङ्ग्यवाच्यार्थयो-
रासीत् सिद्धकविर्वयं भरतराजं तं स्मरामोऽधुना।।१।।

धन्योऽसौ साधुशीलः सुमधुरकविताकाव्यलेखे निविष्टः
मान्योऽसौ पुण्यशीलः कतिपयजनतामानसान्तःप्रविष्टः।
गण्योऽसौ लेखनीयः स्वरचितकविताकाव्ययानाधिरूढः
वन्द्योऽसौ मन्थलीयः सुरगृहकवितावाचनार्थं निगूढः।।२।।

दिवङ्गते मन्थलीये मनो मे मन्थरायते।
विरहेऽस्य विरागः किं न समीयान्मनःस्थलीम्।।३।।

श्लोकत्रयं विलिखितं सहस्राधिकलेखके।
संस्मृतिं संस्मृतौ जीव्यान्मन्थलीयः कविर्बुधः।।४।।

❊❊

## १०४. शोकोद्गार

कविर्भरतराजोऽन्यः पन्त इत्युपनामकः।
छन्दोऽनुसारी कवितालेखनेऽतीवदक्षिणः।।१।।

दोभानं जीवनीमूलं महाकाव्यं मनोरमम्।
दिनेशं च रमेशं च खण्डकाव्यं सशोकजम्।।२।।

नमस्कारश्चन्द्रहासः शैलपुत्री मनस्थितिः।
भित्रबाहिर-उर्लेको आँसु जूनकिरीत्यपि।।३।।

अनूदितैकादशिका शोभनान्या तपस्विनी।
सन्ति द्वादशकाव्यानि नेपाल्यामपि संस्कृते।।४।।

वल्लरीत्यभिधा चैका सुरम्या कवितावली।
कृत्वाऽन्यगद्यलेखाँश्च कविः सोऽसौ दिवं गतः।।५।।

सुधर्मायामिन्द्रमुखान् विबुधान् प्रगतानितः।
कुलचन्द्रादिकान् सर्वान् गतः श्रावयितुं बुधान्।।६।।

सर्वाः सुकविताः स्वीयास्तत्काव्यादीन्यपि क्रमात्।
अस्मदीयः कविः स्वर्गं गतः शोको न तद्विधः।।७।।

स जीवन् बहुभिर्दुःखैः पीडितोऽस्मात् समाजतः।
वरं शूनां भवेन्मानो कवीनां नेह तद्विधः।।८।।

❊❊

## १०५. शब्दचित्रम्

प्रह्लादः सरलः प्रसन्नवदनः साधुस्वभावान्वितो
विप्रो धर्ममतिः सदा पशुपतेर्भक्तः सुशीलः समः।
यो रम्यां कवितां लिखत्यनुदिनं जीवन्तयात्रामथ
गीतिं सारथिसञ्चयं सुमधुरं प्रत्यक्षभूतं सताम्।।१।।

काव्यं येन विनिर्मितं सुललितं 'गोसाइँकुण्डा'भिधं
नेपालीजनभाषयाविलसितं श्रीदेवदेवोन्मुखम्।
नेपालप्रकृतेरतीवमधुरं चित्रं विचित्रीकृतं
यस्याऽऽख्यानकमस्ति साधुजनताचित्तं समाह्लादकम्।।२।।

शारदा यस्य वामास्ति शोभना यद्गृहेऽनिशम्।
नन्दतः स्वाङ्कयोः प्रज्ञाप्रतिभे किमु दुर्लभम्।।३।।

प्रह्लादाय प्रवीणाय प्रियाय प्रियदृष्टये।
शब्दचित्रं समुल्लिख्य समर्पयति सन्निधिम्।।४।।

* *

## १०६. प्रयागपञ्चकम्

बालाऽऽसीद्यमुना माता जयो गङ्गासमः पिता।
उद्यत्प्रयागस्तत्पुत्रो मध्यमः शारदायताम्।।१।।

घटो यस्याग्रजः पूर्णो गङ्गाशुचिजलैः सदा।
यमुनाकेशवो भ्राता प्रयागो मध्यमायताम्।।२।।

प्रयागचन्द्र उदिते प्रमदा चन्द्रिकायताम्।
प्रणवप्रवणौ सन्ध्ये प्रशंसा तारकायताम्।।३।।

प्रमदास्ति प्रिया यस्य प्रणवप्रवणौ सुतौ।
प्रशंसा तनया यस्य स प्रयागः प्रकाशताम्।।४।।

भागीरथीसलिलसंस्कृतशुद्धभाषा-
ऽन्या श्यामवर्णयमुनासमलोकभाषा।
आचार्यसेतुमधिरोहति प्रोत्तितीर्षुः
शास्त्रार्थवारिधिमसौ जयति प्रयागः।।५।।

* *

## १०७. घटाष्टकम्

घटः पिण्डो घटः कुम्भो घटो ब्रह्माण्ड उच्यते।
घटश्चित्तं घटो देहो घटः कलश उच्यते।।१।।

घटे मांसमये पिण्डे ब्रह्माण्डेऽपि विराजते।
योऽयं स घटराजोऽस्ति घटते यदि नान्यथा।।२।।

मित्रोद्यानेऽथवा सोऽयं विश्वविद्यालये तथा।
यद्वा विद्यार्थिनां चित्तकलशे सलिलायते।।३।।

लेखनालोचने पाठाऽध्यापनाऽध्ययने सदा।
सँल्लग्नोऽनुदिनं नित्यं पुरुषो घटराजभाक्।।४।।

घटः फैकास्थले किं वा भ्राजते प्राज्ञमन्दिरे।
एतस्माद् घटराजोऽयं मञ्जुगर्ते विराजते।।५।।

किं वा मध्यस्थकर्ताऽसौ द्वयोर्घटक एकलः।
चिरं धीराञ्जीवयते शतञ्जीव्याद् घटोऽग्रजः।।६।।

घटः कुलप्रसादोऽस्ति कुलानन्दोऽभवद् घटः।
कुलद्वयमलङ्कुर्यात् कुलचन्द्रोऽपि जायताम्।।७।।

गताः षष्टिमिता वर्षा घटराजस्य जीवने।
पूर्णं वर्षशतञ्जीव्याल्लक्ष्मीकान्तोऽभिवाञ्छति।।८।।

* *

## १०८. नेनेपालः काव्यं प्रति

ऋष्यशृङ्गाश्रमस्थेन भद्रग्रामनिवासिना।
मुक्तिरामात्मजेन श्रीटीकारामविपश्चिता।।१।।

नेपालरचनैतिह्यं नेमुनेः कीर्तिवर्द्धकम्।
व्यलेखि सुन्दरं काव्यं रुचिराख्यानसंयुतम्।।२।।

❊❊

## १०९. टीकारामबुधं प्रति

प्राच्यव्याकरणस्य वाच्यविषयान्नेपालभूभागतो
लुम्बिन्यञ्चलमस्ति सर्वविदितं विद्वज्जनैराश्रितम्।
यत्राऽऽस्ते गुरुशब्दशास्त्रविषयज्ञातुर्मुनेः पाणिने-
रम्यातीव मनोरमा गिरिशिखासंस्था तपोभूरपि।।१।।

वाल्मीकेरपि चाश्रमो विलसति प्राचेतसो यः कविः
सोऽयं रामकथाशुलेखनकरः सिद्धं हि रामायणम्।
यत्रार्ज्यालयवंशविश्रुतबुधाः श्रीदेवकीनन्दना-
दन्ये विश्रुतकीर्तयः श्रुतधराः श्रीरश्मिराजादयः।।२।।

यत्र श्रीदधिरामवर्यसदृशा अध्यापका लेखका
विद्वांसः कवयोऽभवन् सुरगिरं नेपालिभाषामपि।
काव्येषु प्रणिधाय शोभनगिरा रम्याणि काव्यानि च
लोकेभ्यः सुसमर्पयद्भिरतुला कीर्तिर्बुधै रक्षिता।।३।।

'कीर्तिर्यस्य स जीवति' क्षितितले वीरो न शूरः क्वचित्
मातुर्यौवनहारिणो बहुजना जीवन्ति किं जीविताः?।
धन्यास्ते कृतबुद्धयः कतिजनाः सत्कीर्तिमन्तो भुवि
भोगाद् वा परपीडनोदरभरात् के कीर्तिमन्तोऽभवन्।।४।।

ये विद्यां ददति प्रतिक्षणमिहाज्ञानिभ्य एते बुधा-
स्ते तेषां हृदये चकासति मुदा ज्ञानोच्चसूर्या इव।
धन्यास्ते गुरवः सदा सुकृतयो विद्यार्थिवर्गेष्वहो!
ज्ञानालोकविकासिनः सहृदया जीवन्ति सत्कीर्तिभिः।।५।।

भारद्वाजकुलावतंसमणयः श्रीढुण्ढिराजादयो
यैराजीवनगण्डकीतटगतैर्विद्याप्रदानं कृतम्।
यत्पुत्रोऽप्युमनाथनामकबुधो विद्यालयेऽध्यापकः
सोऽयं प्राच्यकथासु काव्यमलिखत् श्रीगण्डकीगौरवम्।।६।।

अन्यो माधवसञ्ज्ञको बुधजनो यो देवकोटाभिधो
यत्काव्यं श्रुतिसुन्दरं विलसितं श्रीभारतीवैभवम्।
यः काव्यान्यलिखत् सुकोमलपदैः श्रीभीमकान्तः सुधी
रक्षँस्तां च परम्परां कविरसौ विद्वज्जनानां प्रियः।।७।।

यत्काव्यं जगदम्बिका प्रियकरं तद् वैभवाख्यं मधु
अन्यत् श्रीजगदीश्वरप्रियतमं तद्वैभवाख्यानकम्।
यस्याऽन्यातिमनोरमा सुललिता वैविध्यसंयोजिता
नैकाभिः कविताभिरेव भरिता पद्यावली राजते।।८।।

एनामेव परम्परां धृतवतः ख्यातः पुराणादिषु
विद्यावारिधिपारगः कविरसौ रामायणे भारते।
साङ्ख्ये योगविधौ तथात्मविषयज्ञाने च होराष्वपि
टीकारामसुधीः सुधीवरवरः सारस्वतीयः सुतः।।९।।

टीकारामबुधोऽस्त्यसौ बहुमतः प्राध्यापने लेखने
सोऽयं काव्य-कथा-समीक्षणविधौ सम्भाषणे विश्रुतः।
षट्काव्यानि विकाशितानि बहुशः सन्त्यन्यपुस्तानि च
भाषा-संस्कृति-धर्म-दर्शनमतं संस्थापयन्ति ध्रुवम्।।१०।।

प्रज्ञा यस्य विचक्षणा श्रुतवती मेधाविनी शेमुषी
वक्तव्यं परिमार्जितं श्रुतिसुखं सम्भाषणं सूनृतम्।
शिक्षाध्यक्षचरः सुसंस्कृतपदप्राग्विश्वविद्यालये
प्राज्ञः प्राज्ञसभासु विश्रुतिरभूत् प्रज्ञाप्रतिष्ठापने।।११।।

विद्यावंशमणिः सुभाषितयशा विद्याप्रदाता गुरुः
टीकारामबुधोऽस्ति यस्य कलमः काव्यादिलेखक्षमः।
वाचो यस्य सुधारसद्रवमुचो लेखाश्च सम्मार्जिताः
प्रौढं तं पथदर्शकं हितकरं मन्यामहे सादरम्।।१२।।

नेनेपालोऽश्रूपहारः सुधर्मा मङ्गलगहः।
रुरुवृत्तं तथा बुद्धस्मरणं कृतयोऽस्य षट्।।१३।।

भाषासंस्कृतिसम्बन्धिसमीक्षाभूमिकादितः।
जनश्रुत्याख्यानकानां टीकारामोऽस्ति भावकः।।१४।।

टीकारामो विबुधविदित शास्त्रवित् शेभुषीमान्
टीकारामः सकलविबुधाऽग्रेसरः पारदृश्वा।
टीकारामो बुधजनसहाय सदा कर्मकर्ता
टीकारामः सुकृतमतिमान् निर्भयो धर्मभीरुः।।१५।।

टीकारामो व्याकृतिज्ञः कृतिज्ञो टीकारामः संस्कृतिज्ञः स्मृतिज्ञः।
टीकारामः काव्यकर्ता रसज्ञः टीकारामो निस्पृहः स्पष्टवक्ता।।१६।।

टीकारामो विद्वदग्रेसरोऽस्ति टीकारामोऽध्यापकाऽग्रेसरोऽस्ति।
टीकारामो लेखकाऽग्रेसरोऽस्ति टीकारामो भावकाऽग्रेसरोऽस्ति।।१७।।

सुरलोकगतान् बुधानितः कविताः श्रावयितुं गतोऽधुना।
किमु ते च सुरा बुधोत्तमं कविताः श्रोतुमितः समाह्वयन्।।१८।।

❊ ❊

# ११०. नारायणस्मृतौ

नेपालाऽवनिमध्यभागवितताद् गुल्मीप्रदेशाङ्किताद्
रेसुङ्गाशिखरादवाग्दिशिभवं वर्वर्ति यन्मण्डलम्।
लुम्बिन्यञ्चलमध्यवर्तिशिखरप्रान्तेषु यद्विस्तृतं
अर्घा पूर्वपदान्वितोत्तरपदं खाँचीति नामाङ्कितम्।।१।।

अर्घापूर्वपदं तदुत्तरपदं खाँची द्वयं सङ्गतं
तस्मान्मण्डलपूर्वतः सुविदितो ग्रामः खिदीमः स्थितः।
अत्रागत्य मरासिनीकुलमणिर्विद्वज्जनैर्मानितो
विख्यातो दधिरामसञ्ज्ञकबुधो ह्यासीत् प्रधानो गुरुः।।२।।

तत्रत्यैव खिदीमखर्वटभवो लोकोपकारक्षमो
विद्यायां दधिरामवद् हरिहरो ह्यासीद् वदान्यो जनः।
तत्रैव द्वितयौ समानहृदयौ विद्यालयस्थापकौ
ह्येकोऽध्यापनकर्मलग्नधिषणो दानेऽधिकोऽन्योऽलगत्।।३।।

दुर्गातुल्यदयावतारजननीदुर्गाप्तनारायणो
जातो गौतमवंशदीपक इव श्रीभोजराजात्मजः।
तत्र स्थापितसंस्कृते सुविदिते विख्यातविद्यालये
बाल्यादेव वृतः सदा हरिहरेणाऽऽरक्षितः पाठितः।।४।।

शिक्षां प्राथमिकीमसौ गुरुघनश्यमाच्च टीकागुरो-
स्तद् वैयाकरणं पुनः पठितवान् श्रीटङ्कनाथादपि।
किञ्चिज्ज्योतिषकं मुहूर्तविषयं होराविभागात्मकं
सम्यग्रूपतयाऽपठद् गुरुघनश्यामाद् दयावारिधेः।।५।।

वेदं श्रीयदुनाथतोऽपठदयं काश्यां तु दामोदरात्
मीमांसामपठत् पुनर्गुरुजुनानाथात् स नारायणः।
सोऽयं पाठनकर्मसङ्गत इह स्वाधीतविद्याये
यावज्जीवमसौ स्वपाठयदिमान् ग्रामोद्भवान् बालकान्।।६।।

"श्रीरामः शरणं ममास्तु सततं रामं विना का गती
रामेणैव निर्वायते ह्यपयशो विघ्नो विपत्सागरः।
रामाय प्रवराय दाशरथये स्वस्त्यस्तु तस्मै नमः
रामात् कोऽपि महत्तमो न पुरुषः सर्वे तदीया वयम्।।७।।

रामस्यैव जगत् समग्रमभितो दृष्टं न किञ्चिन्मम
रामे तत्पदयोः समर्पितमिदं सर्वं मया स्वार्जितम्।
यो या यच्च ममेति शब्दजनकाः पुंस्त्रीनपुंवर्तिनः
सर्वं पुत्रकलत्रवित्तमपि तद् रामप्रसादादभूत्।।८।।"

इत्थं वक्ति निरन्तरं सदसि वा मार्गे गृहे वा वने
कार्यं चापि निरन्तरं प्रकुरुते श्रीरामतुष्ट्यै सदा।
सर्वं वस्तुजगत् त्वदीयमिह मे नास्त्येव किञ्चित् क्वचि-
दित्येवं कथयन् स्वकार्यविषयं नारायणः प्राकरोत्।।९।।

यो नारायणगौतमो बुधसखः सम्भाषते स्माऽऽदरं
तादृक् कोऽपि च भाषते सुमधुरं विद्याविनीतो वचः।
ब्रूवेऽहं न हि कोऽपि तत्समजनो नारायणः स्याद् यथा
सोऽयं मत्पितरं समादरदृशा दृष्टो मया मित्रति।।१०।।

विद्यादानपरायणः कथमहो! विद्यालयस्थापकः
आनीयान्यशिशून् कियान् लघुतरान् विद्यालयेऽध्यापकः।
वेदाभ्यासपरायणः पटुवटून् वेदाङ्गशिक्षाप्रदो
मूर्तौ चित्रकलास्वतीवकुशलो गीते कवित्वे पटुः।।११।।

नित्यस्नानविधिं तथा जपविधिं दैनन्दिनं योऽकरोत्
रामध्यानपरायणस्तदनु यो देवान् पितृनर्चयत्।
पाठे होमविधौ तथाऽतिथिसपर्यायां बलेर्मोचने-
प्यात्मार्थे न सदा परोपकृतये सोऽयुङ्क्त नारायणः।।१२।।

सन्तीहापि च तस्य सन्तततिती रामो हि ता रक्षति
श्रीराम: सकलार्थदानकुशल: पाताऽस्ति नारायण:।
सोऽगाद् रामपुरं विहाय सकलान् दारान् स्वपुत्रादिकान्
जीवन् लोकनुतो ममत्वरहितो नारायणोऽध्यापक:।।१३।।

आयातोऽस्ति पिता ममापि विबुधागारे तवैवान्तिकं
यत्र श्रीदधिराम आदिकवय: सन्त्येव नैपालका:।
तातं काव्यकलाकलापकुशलं श्रीभीमकान्तं कविं
पश्यन् मित्रतु तेन तत्र कविता-सम्मेलने पूर्ववत्।।१४।।

आयाता गुरुवस्तवापि च घनश्यामादयस्ते बुधा:
श्यूमानाथकविश्च माधवबुधष्टीकादिरामोऽपि च।
काशीनाथसपुष्करो गुणनिधि: श्रीकाशिराजस्तथा
सर्वे स्वर्गमयुर्धनञ्जयबुधो नीलाम्बर: शेखर:।।१५।।

सन्त्येव त्रिदशालयेऽपि कवयो लक्ष्मीप्रसादादय:
शेषास्ते कुलचन्द्रसिद्धिचरणा: श्रीलेखनाथादय:।
तानाहूय समानिदं वदतु यल्लेखं कवित्वं पुनर्
गीतं वापि विरच्यतां लघु-गुरु प्रोच्या: सुधर्मां समे।।१६।।

वक्तव्या किमु चेच्छृणोतु-मनसा सन्धार्यतां कर्मणा
कार्या सा च निगद्यतां सुवचसा 'नेपालदेशस्थिति:'।
नेतृत्वे भषका भषन्त्यनुदिनं नैपालसंसद्विधौ
तेषां कर्मसु संसदीयचरितं दृष्टं न नैपालकै:।।१७।।

एतच्चापि निगद्यतां कवितया गत्वा सुधर्मां त्वया
नेपालस्तु विखण्डितो भवति किं मा भूदिति प्रार्थ्यताम्।
एते सन्त्यधुना हि सांसदपदे लघ्वायुषो मानवा
नेपालं त्वतिदीर्घमायुषमिमे किं खण्डश: कुर्वते।।१८।।

किं स्वर्गे सुरसंसदि प्रतिनिधिर्भूत्वापि ते सांसदाः
स्वर्गस्यैव विखण्डनाय मिलिताः किं सन्ति न प्रोच्यताम्।
भूयान्नः समभीष्ट एव सततं स्वर्गः सदाऽखण्डितो
माऽभूत् खण्डित एक एव भवतादाखण्डलो रक्षतु।।१९।।

आसन् खण्डितराज्यनामबहुशो देशा अनेके पुरा
पृथ्वीभूपतिना विजित्य सकलान् नेपालदेशः कृतः।
मध्ये भारतचीनयोरधिगतो दण्डायमानः सदा
प्राचीं पश्चिमतो गतो हिमगिरेः स्वर्मस्तकस्यान्तिकम्।।२०।।

का भाषा त्रिदशालये कथयतां तां बोधयामो न वा
का वा संस्कृति-सभ्यता गदतु तां जानन्ति देवा न वा।
अस्माभिः सुरभाषया विलिखितं पत्रं ध्रुवं बुध्यते
ह्यस्मत् संस्कृति-सभ्यता दिवि भवेदाशास्महे निश्चयम्।।२१।।

ब्रूमः किं कति सन्ति दुःखविधयो नाऽऽयाति पेयं जलं
पाकार्थे न समिन्धनं च मधुरं नोपस्करं लभ्यते।
नेपालो न समुज्ज्वलोऽस्त्यविरतं दोषासु सौदामिनी
नाऽऽयातीह न वर्षणं च गिरिजां-विश्वेश्वरं ब्रूहि तत्।।२२।।

भारद्वाजसगोत्रविप्रकुलजो ज्योतिर्विदामग्रगो
दत्तात्रेय इति स्वनामविदितो नेपालभूमध्यगः।
आसीन्मे प्रपितामहः कुलमणिर्नेपालपालाश्रितो
होरासागरपारगः श्रुतवतां कालत्रयोद्भासकः।।२३।।

तत्पुत्रः श्रुतिशास्त्रविद् बहुमतो देवीप्रसादोऽभवत्
सोऽयं पितृपथाश्रितो बहुजनैः सम्मानितः सादरम्।
यत्पुत्रा वसुसङ्ख्यका दिशिदिशि स्वाधीतविद्यागुणैः
सम्मान्याः कुलधर्मनीतिनिपुणा आचारवन्तोऽभवन्।।२४।।

तन्मध्यो निगमागमेऽतिनिपुणः शास्त्रज्ञ एको महान्
विद्याध्यापनधर्मनिर्णयविधौ वक्ता पुराणेष्वपि।
यो रामायणभारतादिषु तथा प्रश्नोत्तरादौ श्रुतो
यज्ञे यज्ञविधौ च काव्यकलने श्रीभीमकान्तः कविः।।२५।।

भारद्वाजकुलावतंसमणिवद् योऽभूत् सतामग्रणी-
र्लोकैर्गीतगुणोऽर्थिभिः परिवृतो विद्यार्थिभिः संस्तुतः।
सर्वैर्माण्डलिकैर्बहुश्रुतजनैर्यत्पादपद्मार्चितं
सोऽगाद् देवसभामितः स्वकवितापारायणार्थं पुनः।।२६।।

भारद्वाजकुले चरित्रधवले विद्यार्जने लक्ष्यितः
ख्यातो यस्य बुधाग्रणीः समभवत् श्रीभीमकान्तः पिता।
माता चापि सतीशिरोमणिसमा श्रीनीलमायाभिधा
पुत्रोऽसौ न सुधीः कविर्न न गुणीर्लक्ष्म्यादिकान्तोऽबुधः।।२७।।

मूढः सोऽयमतीव चञ्चलमतिः शास्त्रे न काचिद् गति-
र्युक्तोऽध्यापनवृत्तिनिर्भरगतिः खादन् श्वसन् मन्दधीः।
लक्ष्मीः पूर्वपदं तदुत्तरपदं कान्तः समासात्तयोर्
लक्ष्मीकान्त इमं विदन्तु विबुधास्तेषां विधेयं जनम्।।२८।।

यो विद्याध्ययनार्थमागत इह श्रीराजधान्यां स्वयं
ज्ञातुं शास्त्रचयं स संस्कृतमहाविद्यालये सङ्गतः।
तत्र श्रीगुरुभिः सहैकनियमाद् वेदान्तविद्यां तथा
साहित्यद्वितयं समं पठितवान् श्रीधर्मशास्त्रं पुनः।।२९।।

नाऽयं शब्दसमीक्षको न गणको योगेऽप्ययुक्तो जन-
स्तर्के कर्कशवाचने न हि रुचिः साङ्ख्ये न सख्यं क्वचित्।
नो वेदान्तविचारको न विबुधो मीमांसनेऽप्यक्षमो
धर्मे नास्ति गतिर्भयादुपरतः शास्त्राब्धिकल्लोलतः।।३०।।

यो दैनन्दिनकर्म कर्तुमलगत्शिक्षाविकासादिमे
किञ्चित्कालमितस्तोऽभ्रमदयं केन्द्रेऽनुसन्धानके।
हित्वा तत्पदमात्मनोऽरुचितया प्राध्यापनार्थं पुनर्
विद्यापीठमवाप्तवान् त्रिभुवने विश्वाद्यविद्यालये।।३१।।

यत्काव्यं रुचिरं न दृष्टमपरैर्नाद्य प्रकाशं गतं
छन्दोऽलङ्कृतिरीतिवृत्तिभणितिध्वन्यादिभिर्नीरसम्।
आख्यानं रुचिरं न भावमधुरं नो लक्षणैः सङ्गतं
नैतिह्येन युतं न वा सदलकं नेतृप्रशंसान्वितम्।।३२।।

गुल्मीमण्डलमालिकाद्रितनया या निम्नगा पन्नगा
तस्याः प्राक्तटमाश्रितास्ति वसितग्र्रामो बृहच्चत्वरः।
भारद्वाजकुलेऽमले जनिरभूत् श्रीनीलमायाङ्गजो
लक्ष्मीकान्त इतीह नामकथितः श्रीभीमकान्तात्मजः।।३३।।

याताऽऽयातं सहृदयजना यात्रिणः कुर्वतेऽत्र
अज्ञा विद्या विषमविरहे शाद्वले सञ्चरन्ति।
ग्राम्याः पान्थाः शकुनपशवश्चत्वरं कामयन्ते
बाला वृद्धा युवतियुवकाश्चत्वरेऽस्मिन् रमन्ते।।३४।।

गुल्मीक्षेत्रे सुमिलितबृहच्चत्वरे खर्बटेऽपि
प्राच्यां कूले विबुधविदितं पन्नगानिम्नगायाः।
गोभिर्युक्तं पथि विलसितं दारुपर्णादिलभ्यं
जन्मस्थानं सुखयति 'बडाचौर' इत्यस्मदीयम्।।३५।।

पित्रा सार्द्धं ह्यनुदिनमसौ यत्र विद्यार्थिभिश्च
गोभिर्युक्तं सकलमहिषीचारणं कर्मपूर्वः।
पाठं पाठं प्रणयभरितां व्याकृतिं श्लोकपूर्वं
कोषं काव्यं ससुखमरटद् यत्र शब्दार्थपूर्वम्।।३६।।

सानन्दास्ते मृदुलपवना बोधिवृक्ष: समीपे
क्रीडारम्यं विषमविरहं शाद्वलं स्थानमस्ति।
बाल्यावस्था सहचरगणैर्यापिता सौष्ठवेन
संस्मर्यन्ते जनिभुविगता यत्र रम्या दिनान्ता:।।३७।।

जन्मस्थानादपि समगमत् मञ्जुगर्ते स्ववृत्तिं
कुर्वन्नास्ते विषयविमुखो स्वं निवासं विहाय।
कारं कारं परिणतवया वृद्धताया: समीपं
यातोऽकर्मण्य इव विगतं जीवनं जीवतोऽपि।।३८।।

यो नारायणरूपराममभजद् भक्त: स नारायण:
सेवां यो जनताजनार्दनमिह स्वार्थं विहायाऽकरोत्।
सोऽस्माद् रामपुरं ततोऽधिकतरां सेवार्थमस्तङ्गतो
रामेणैव नियोजित: पुनरसौ सेवार्थमायाति किम्?।।३९।।

"वारं वारमहं लभेय जननं सेवार्थमत्रैव च"
इत्युक्त्वा त्रिदिवं गतो यदि न वा रामाश्रयं धाम तत्।
सेवार्थं हि ध्रुवं स्वकीयविषे मन्ये स आयास्यति
तस्यैव स्मृतयेऽलिखत् स्मृतिमिमां लक्ष्म्यादिकान्तो जन:।।४०।।

षट्पुत्रा भुवि सन्ति तस्य विदुष: प्रज्ञा सुतैकाऽभवत्
तन्मध्ये तुलसी सखाऽस्ति स इमं लेखार्थमत्राऽऽदिशत्।
दूरस्थस्य न वेत्ति तस्य विषयान् के सन्ति रुच्या न वा
दृष्ट्वा लेखमिमं बुधा: प्रशमिता भूयासुरित्यर्थनाम्।।४१।।

प्राध्यापयन् सम्प्रति मञ्जुगर्ते चरन्न जानात्यपि शास्त्रमर्थम्।
सतां बुधानां गुणगायकोऽयं लक्ष्म्यादिकान्तो जन एष वक्ति।।४२।।

❊ ❊

# १११. दैवज्ञं प्रति

हे दैवज्ञ! भवान् यथा स्मितमुखः सम्भाषते भाषितं
प्रत्यक्षं न हि केवलं सुमधुरं लेखे कवित्वे वचः।
गत्वाऽपि त्रिदिवं न विस्मरतु तच्छक्रस्य गोष्ठीषु च
नेपालीकविमण्डलीष्वभिमुखो ब्रूयात् कवित्वं मुहुः।।१।।

वक्तव्यं किमु चेच्छृणोतु मनसा सन्धार्यतां कर्मणा
कार्यं तच्च निगद्यतां सुवचसा 'नेपालदेशस्थितिः'।
नेतृत्वे भषका भषन्त्यनुदिनं नैपालके संसदि
तेषां कर्मषु संसदीयचरितं दृष्टं न नैपालकैः।।२।।

किं स्वर्गे सुरसंसदि प्रतिनिधिर्भूत्वापि ते सांसदाः
स्वर्गस्यैव विखण्डनाय मिलिताः किं सन्ति न प्रोच्यताम्।
भूयान्नः समभीष्ट एव सततं स्वर्गः सदाऽखण्डितः
माऽभूत् खण्डित एक एव भवतादाखण्डलो रक्षतु।।३।।

एतच्चापि निगद्यतां कवितया गत्वा सुधर्मां त्वया
नेपालस्तु विखण्डितो भवति किं मा भूदिति प्रार्थ्यताम्।
एते सन्त्यधुना हि सांसदपदे लघ्वायुषो मानवा
नेपालं त्वतिदीर्घमायुषमिमे किं खण्डशः कुर्वते।।४।।

आसन् खण्डितराज्यनामबहुशो देशा अनेके पुरा
पृथ्वीभूपतिना विजित्य सकलान् नेपालदेशः कृतः।
मध्ये भारतचीनयोरधिगतो दण्डायमानः सदा
प्राचीं पश्चिमतो गतो हिमगिरेः स्वर्मस्तकस्यान्तिकम्।।५।।

सन्त्येव त्रिदशालयेऽपि कवयो लक्ष्मीप्रसादादयः
शेषास्ते कुलचन्द्रसिद्धिचरणास्ते बालकृष्णादयः।
तानाहूय समानिदं वदतु यल्लेखं कवित्वं पुनर्
गीतं वापि विलिख्यतां लघु-गुरु प्रोच्याः सुधर्मां समे।।६।।

नेपालो न समुज्ज्वलोऽस्त्यविरतं दोषासु सौदामिनी
नायातीह न वर्षणं च गिरिजां-विश्वेश्वरं प्रोच्यताम्।
ब्रूम: किं कति सन्ति दु:खविधयो नायाति पेयं जलं
पाकार्थे न समिन्धनं च मधुरं नोपस्करं लभ्यते।।७।।

किं स्वर्गे सुरसद्मनि प्रमिलति स्वादिष्टमिष्टं मधु
दध्यन्नं घृतशर्करादिसहितं सव्यञ्जनं पायसम्।
स्यात् किं तत्र भवेन्न वास्ति कृशरं सर्पिष्टमं स्वर्णिमं
भोक्तुं तत्र मिलेन्न वाऽत्र भवता भुक्तं यथेष्टं पुरा।।८।।

किं स्वर्गे सरसानि सन्ति यदि ते खाद्यानि पेयानि च
भोक्तुं तत्र मिलेन्न वा सुमधुराण्यागत्य को वा वदेत्?
मिष्टान्नानि समोदकानि सरसान्यत्रैव भुक्तानि किं
दैवज्ञ! त्वमुदीरययाञ्चत्र भवता भोगा न भुक्ता: किमु?।।९।।

हे दैवज्ञ! भवानिहाऽपरजनैर्दृष्ट: स्मिताऽस्यो मुहु:
कौशेयं परिधानमस्ति मसृणं दृष्ट्या सुचारु प्रियम्।
पीनत्वादपि ते शरीरनिचयो ज्ञाता गतिर्दूरत:
किं स्वर्गे परिचीयते वदतु तद्वेश: शरीरं कथम्?।।१०।।

का भाषा त्रिदशालये कथयतां तां बोधयामो न वा
का वा संस्कृति-सभ्यता गदतु तां जानीमहे किं न वा।
अस्माभि: सुरभाषया विलिखितं पत्रं ध्रुवं स्मर्यते
अस्मत्संस्कृति-सभ्यता दिवि भवेदाशास्महे निश्चयम्।।११।।

वदनस्मितकोकिलस्वरोऽप्यनुभूतं तव चारुदर्शनम्।
कविताकथने विशेषतो मधुवाक् तत्र कथं वितिष्ठसे।।१२।।

वपुष:स्थितिरस्ति कीदृशी मधुरं तेऽस्ति वचो न वा वद।
हसितं वदनं भवेन्न वा वद सर्वां त्रिदशालयस्थितिम्।।१३।।

इह ते कवितासु माधुरीरसभावा गुणरीतिवृत्तय:।
पठने श्रवणे समीक्षणे ह्यनुभूता: सकलैर्विशेषत:।।१४।।

वद किं त्रिदशालयेऽपि ते रचनायां कवितासु माधुरीम्।
कथयन्ति समीक्षकाः किमु पदलालित्यविधावलङ्कृतौ।।१५।।

कवयः सुरलोकवासिनो नयपालादपि पूर्वमागताः।
नवका भरतादयोऽपि ते कवितायां प्रवदन्ति कीदृशम्।।१६।।

कविताारचनापटुर्मम जनको दार्शनिको महाकविः।
इह पुत्रकलत्रबान्धवान् प्रविहायाऽऽगतवान् दिवं पुरा।।१७।।

दिवि शक्रसभासु पश्यतु कविमञ्चेषु विराजते ध्रुवम्।
क्रमशः कविमण्डलाग्रतः कवितां श्रावयति शृणोतु ताम्।।१८।।

अधिकं न मया निवेद्यते भवतः संस्मरणं विधीयते।
स्वयमेव विशेषविद् भवान् सशुभाऽऽशीर्वचनं वितीर्यते।।१९।।

शुभनाम कृतिश्च कर्म वै भुवि यावत् प्रथते शुभं यशः।
भवतात् तव तावदेव हि सुरलोके वसतिः सुरैः समम्।।२०।।

विबुधा दिवि शीलिनः सदा प्रथयन्तेऽपि च शीलिनं जनम्।
त्रिदिवे तव यावदेव हि समयः शीलयुतस्त्वमप्यभूः।।२१।।

उपकारपरो गुणी भव हितवन्तं हितकारको भव।
सुखदुःखसमः सदा भव परमापत्सु न दुःखितो भव।।२२।।

श्रुतवृत्तयुतः सदा भव न तु लोभेऽतिविमोहितो भव।
परमर्मवचांसि ब्रूहि नो मितवाक् कोकिलकूजितो भव।।२३।।

त्वमितो गतवान् दिवं प्रति कथये त्वां सुलभः सुधारसः।
अमरैरपि नैव लभ्यते भुवि तक्रं सुलभं सुधासमम्।।२४।।

परिवारजनाः सुधादयो भवतः संस्मरणं प्रकुर्वते।
अधुना तव विप्रयोगतो मधुरं भोज्यमपीह जह्यते।।२५।।

इह पुत्रकलत्रबान्धवाः कुशलाः सन्ति समे निवेदये।
कुशलं भवतोऽभिकामये ललितं पत्रमितोऽपि लिख्यताम्।।२६।।

कथनीयमतीव विद्यते त्वयि सर्वं लिखितुं न शक्यते।
यदि ते भुवि चागमो भवेत् परिचेतुं न मयाऽत्र शक्यते।।२७।।

सुरलोकगतेऽपि भुज्यते कृतकर्माणि शुभानि सन्ति चेत्।
यदि तेषु समापितेषु तु नरलोकागमनं विनिश्चितम्।।२८।।

अत एव मया तु साम्प्रतं स्वमनोभाव इहैव लिख्यते।
भवतः कृतपुण्यसञ्चय उपभोगात् क्षयमेति चेत्तदा।।२९।।

पुनरन्यजनावितस्ततो न हि गच्छेरधिकं किमुच्यते।
कविताकथनार्थमेव हि हिमवद्देशमिमं न विस्मर।।३०।।

तव संस्मरणाय शक्यते लिखितुं यद्यपि मातृभाषया।
किमु संस्कृतपद्यबन्धनादिति चेत्तच्छृणुतां न दर्पतः।।३१।।

स्मरणादपि नामकीर्तनात् पठनात् पत्रविशेषलेखनात्।
अनुकूलयितुं स्वभारतीं विहितोऽभ्यास इहापि ते स्मृतौ।।३२।।

ननु पत्रमिदं कुतः कथं समुपायादपि लेखकोऽस्ति कः?
इति चेत्तव मानसेऽधुना तव संस्मर्तुमिह प्रबन्धनम्।।३३।।

ननु पत्रिकया किमर्थ्यते खलु चिन्ता न विधीयतां त्वया।
दुरितापचयो भवेन्न वा सुकृतस्योपचयो भवेन्न किम्?।।३४।।

तव धर्मपथानुवर्तिनं तव विद्यार्थिजनप्रबोधकम्।
स्मर कान्तपदानुवर्तिनं खलु लक्ष्मीपदमादिसञ्ज्ञकम्।।३५।।

त्रुटितं क्वचिदस्ति चेन्मम क्षमतामित्यपि नार्थये यतः।
अपराधवतोऽपि बालकान् गृहयन्ते हि शुभाशया जनाः।।३६।।

श्रावयामि तव गोत्रसम्भवान् तान् कलत्रसुतवर्गभूषणान्।
शोचनं न कुरुताऽत्र देहवान् बीजवृक्षफलबीजरूपमैत्।।३७।।

गच्छतीति जगदित्यतः पुनर् लोक्यते य इति लोकशब्दितः।
सम्यगेष सरतीति सैव हि संसृतिर्बुधजनैर्निगद्यते।।३८।।

मासपक्षदिनरात्रिभेदतः काल एष पुनरेति गच्छति।
शैशवाद्युवकभावमागतो वृद्धतां समुपयाति बालकः।।३९।।

शोचनीयमिह संसृतौ किमु? सैष दृष्टिपथमैति गच्छति।
जीर्णवस्त्रमिव देहवानितः पुत्रपौत्रतनुभावमागतः।।४०।।

लिलिखिषति भवाँश्चेत् पत्रमेकं ममापि
चरणकथनसङ्ख्या प्रोच्यते श्रूयतां ताम्।
स्मरशरवसुरामाष्टौचतुर्भूर्नवाब्धिर्
वसुनवमितसङ्ख्या वामतो योजनीया।।४१।।

**

# ११२. वैयाकरणस्वरूपम्

कवितानिकषग्रावावैयाकरणदर्शिनी।
पायान्मा मापयोधारावहाजीवनगण्डकी।।१।।

भीमकान्तपदद्वन्द्वं मङ्गलं दधता हृदि।
वैयाकरणनेपालशब्दचित्रं विलिख्यते।।२।।

देवर्षेर्विदुषः पौत्रो बलभद्रसुतः सुधीः।
विष्णुमायाकुक्षिजातः शास्त्रमूर्तिस्तपोधनः।।३।।

नेत्रैकनवभूम्यब्दे(१९१२)शुचौ शुचिरभूदिह।
वैयाकरणनेपालो नेपालकुलशेखरः।।४।।

लम्बमानौ भुजौ यस्य ललाटं तेजसाप्लुतम्।
लम्बकर्णो गण्डशोभो नयने कमलायिते।।५।।

शुकनासः स्मेरमुखो दन्तपङ्क्त्या समुज्ज्वलः।
मयूरपिच्छसदृशः केशवेषमनोहरः।।६।।

शब्दशास्त्रादिशास्त्राणि सम्यगध्येतुमुत्सुकः।
गृहं विहाय विद्यार्थी काशीमधिगतस्ततः।।७।।

यत्र स्वच्छजला गङ्गा काश्यामुत्तरवाहिनी।
विश्वनाथाऽधिवसती रक्षिता चान्नपूर्णया।।८।।

(काशी काशीति काशीति त्रिवारं यः पठेन्नरः।
क्वापि देशे प्रवासेऽपि काशीवासफलं लभेत्।।

वाराणसीति काशीति काशी वाराणसी पुनः।
यत्र यत्र स्मरेत् सत्यं काशीवासफलं मिलेत्।।

महादेव महादेव महादेवेति वादिनम्।
वत्सं गौरिव गौरीशो धावन्तमनुधावति।।

महादेव महादेव महादेवेति वादिनम्।
एकेन मुक्तिमाप्नोति द्वाभ्यां शम्भुर्ऋणी भवेत्।।)

काश्या इदृग् विशेषोऽस्ति महिमा शास्त्रदर्शितः।
पुराणेषु विशेषेण दृश्यते पठ्यते बुधैः।।९।।

सर्वविद्याराजधानीं विद्वद्भिः परिसेविताम्।
काशीं स्थित्वा पठन् कोऽपि जनो विद्यानिधिर्भवेत्।।१०।।

जिज्ञासुरतिमेधावी काशीं पठितुमाश्रितः।
वैयाकरणनेपालोऽधीत्य विद्यां समागतः।।११।।

पीनवक्षा दृढस्कन्धो ललाटतिलकाङ्कितः।
श्वेतोष्णीषशिरोबद्धः सदा बद्धशिखाधरः।।१२।।

शुक्लकञ्चुकसंवीतः शुक्लाम्बरधरः परः।
रक्ताधरोऽपि वचसि सदा सत्यधरोऽपरः।।१३।।

कस्यचिन्नाश्रितो धीमान् सदा परजनाश्रयः।
शुक्लवेषधरोऽपीह करशास्त्रधरः सदा।।१४।।

विषयेष्वप्यनासक्तः सक्तः स्नानजपादिषु।
दानमानक्रियासक्तः पितृसन्तर्पणक्रियः।।१५।।

विष्णुमायाभक्तिरतः शशिशेखरपूजकः।
बलभद्रं बलभद्रानुजध्यानपरायणः।।१६।।

सदाऽशिवक्रियाऽसक्तः सदा शिवक्रियापरः।
सदाऽमधुरवाग्हीनः सदा मधुरवाक्प्रियः।।१७।।

पठने पाठने रक्तो नित्यं शास्त्रकलाप्रियः।
धर्मशास्त्रेषु निष्णातो वैयाकरणसञ्ज्ञकः।।१८।।

तर्ककर्कशवागीशः साङ्ख्ययोगविचक्षणः।
वेदान्तेऽतीव दुर्दान्तः सदा मीमांसने रतः।।१९।।

अनासक्तः कामिनीषु कविताकामिनीप्रियः।
रामायणादिकाव्यस्यानुगाता कविताकरः।।२०।।

व्यञ्जनाऽऽस्वादनिपुणो व्यञ्जनकल्पलेखकः।
नोच्छिष्टसेवी सततं व्यासोच्छिष्टानुरञ्जकः।।२१।।

गणेश-गीता-गायत्री-गो-गोविन्द-गुरुप्रियः।
पुराणपुरुषस्यापि नित्यसेवाकरो बुधः।।२२।।

शास्त्रतन्मयचष्टोऽपि वेदान्तेऽतीव सक्रियः।
प्रोक्तेषु विषयेष्वेव मन्यमानः सुखं सुधीः।।२३।।

धर्मकार्येषु संलग्नो धर्मशास्त्रसुचिन्तकः।
सत्य-धर्म-न्याय-विद्या-विवेकसमधिष्ठितः।।२४।।

श्लाघ्या धन्याश्च ते धर्मे समयं यापयन्ति ये।
विषयेषु रमन्ते ये विफलाः क्षणिकेषु ते।।२५।।

आशापाशशतैर्बद्धास्ते सन्ति सुखिनोऽपि ये।
दुःखीयति मनस्तेषां मन्यन्ते सुखिनो न ते।।२६।।

मनस्वी धर्मनीतिज्ञः परेषामुपकारकः।
सदाचारकरः सत्यवक्ता साधुजनप्रियः।।२७।।

आयुर्वेदविशेषज्ञो वनौषधिसुरक्षकः।
लतानां फलपुष्पाणामश्वत्थकुशरोपकः।।२८।।

अश्वानाञ्च गजानाञ्च महिषीणां गवामपि।
सेवालक्षणविज्ञाता शालिहोत्रविचारवित्।।२९।।

धर्मे युधिष्ठिर इवाऽऽत्मबले भीमसेनवत्।
लक्ष्ये दृढोऽर्जुन इव क्रियासु नकुलोपमः।।३०।।

विद्याकलासु निपुणः सहदेवसमः कविः।
पाण्डवानां पञ्चकस्य वैयाकरण एकलः।।३१।।

पादसंवाहनं कृत्वा तं सेवन्ते स्म जम्बुकाः।
भषन्तो भषका दृष्ट्वा पलायन्ते स्म दूरतः।।३२।।

(पितृसम्पत्तिभोक्तारः प्रायशो न यशोधनाः।
नरोत्तमास्तु ते ज्ञेया ये पित्राधिक्यदर्शिनः।।

उपार्जितं हि पित्रा ये नाशयन्ति यशः श्रुतम्।
धनं निधनमेवास्तु तेषां दुर्वृत्तचेतसाम्।।)

इत्थं विचार्य स बुधो मध्यदेशं गतो गृहात्।
वर्षजातं यापयित्वा भूमिमर्जितवान् स्वयम्।।३३।।

स्वपौरुषाद् बुद्धिबलात् प्रभावादपि गैरवम्।
वर्द्धयित्वा बुधश्चक्रे महतीं श्रियमात्मनः।।३४।।

प्रतिपत्तिथिमारभ्य ह्यमावास्यावधिं क्रमात्।
दिवसे दिवसे दानव्रतपूजादिकाः कृताः।।३५।।

तेन दत्तं हुतं जप्तं व्रतं तीर्थं तपः कृतम्।
देवाः सुपूजिता भक्त्या सेवासम्मानना कृता।।३६।।

(तिष्ठता गच्छता वापि स्वपता जाग्रता तथा।
शयानेनोपविष्टेन जप्यो नारायणः सदा।।

द्वादशाक्षरमन्त्रेण वासुदेवात्मकेन च।
ध्यायँश्चतुर्भुजं विष्णुं जप्त्वा सिद्धिं न को गतः।।)

इत्थं मनसि सन्धाय भक्तिर्भगवतः कृता।
जपो ध्यानं चिन्तनं च भजनं यजनं मुहुः।।३७।।

विष्णुं कृष्णं हृषीकेशं वासुदेवात्मकादिकम्।
मुकुन्दं परमानन्दं गोविन्दं मधुसूदनम्।।३८।।

रामं रमेशं राजेन्द्रं राघवं रघुनन्दनम्।
राजीवलोचनं रम्यं राणाङ्गणविचक्षणम्।।३९।।

हरिं हरं महेशानं त्रिपुरारिं शिवं शुभम्।
शक्तिं शिवां वा गायत्रीं भारतीं भुवनेश्वरीम्।।४०।।

कमलां कोमलां लक्ष्मीं ललितां ललिताक्षरैः।
गणेशानं भास्करं वा पञ्चायतनदैवतम्।।४१।।

प्रणवादिचतुर्थ्यन्तं नामोच्चारणमादधे।
विष्ण्वीशब्रह्मणो रूपमोङ्कारोऽस्ति त्रिदैवतम्।।४२।।

अवनादोमिति ख्यातं तारणात् तारकः स्मृतः।
परं पदं यः प्रणयेत् ततः प्रणवः ईरितः।।४३।।

ओमित्येकाक्षरं ब्रह्म नामभिः सह यो जपेत्।
इह भुक्तिं भजेद् विद्वानितो मुक्तिमवाप्नुयात्।।४४।।

इत्थं हरिहरादीनां जप्त्वा नामान्यहर्निशम्।
एतयोः संस्तुतिं रम्यां कुरुते स्म बुधोत्तमः।।४५।।

स कीदृशीं स्तुतिं चक्रे श्रूयतां प्रोच्यतेऽधुना।
वैयाकरणनेपालप्रोक्ता हरिहरस्तुतिः।।४६।।

(हरिहरस्तुतिः)

अच्युतः केशवो देवकीनन्दनः
शङ्करस्त्र्यम्बकः पार्वतीवल्लभः।
वामनः श्रीधरश्चन्द्रमौलिः शिवो
माधवोमाधवौ रक्षतां मे वपुः।।४७।।

चक्रपाणिर्मुकुन्दो गदाधारकः
शूलपाणिर्गिरीशो मृडानीपतिः।
वासुदेवो हरिर्विश्वनाथो हरो
माधवोमाधवौ रक्षतां मे गृहम्।।४८।।

पद्मनाभो मुरारिर्यदूनां पति-
र्मध्वरिस्तत्पदं नीलकण्ठो मृडः।
चन्द्रचूडः पुरारिः पशूनां पति-
र्माधवोमाधवौ रक्षतां मे धनम्।।४९।।

राघवो रावणारिर्हनूमत्सखः
कृत्तिवासा भवो भर्ग ईशः स्वभूः।
बालकृष्णः सदाऽऽनन्दसंवर्द्धनो
माधवोमाधवौ रक्षतां वैभवम्।।५०।।

जानकीवल्लभो गोपिकावल्लभः।
शम्भुराद्यः स्मरारिः पिनाकीश्वरः।
केशिहा कंशकृत् पूतनाघातको
माधवोमाधवौ रक्षतां जीवनम्।।५१।।

दीनबन्धू रमानाथ एकः प्रभु-
र्नागमाली वृषो देवदेवो विभुः।
वंशिकावादको भक्तसंरक्षको
माधवोमाधवौ रक्षतां सन्ततीः।।५२।।

सर्वदृक् सर्वभुक् सर्वकर्ता भवान्
सर्वगः सर्वदो योगिनां योगदः।
सर्वसंहारकः सर्वगोप्ता भवान्
माधवोमाधवौ रक्षतां दुःखतः।।५३।।

विष्णुरूपः सदा भक्तकामार्थदो
भीमरूपः सदा भक्तरक्षाकरः।
मोहमायाकरौ जन्ममृत्योः परौ
माधवोमाधवौ रक्षतां सर्वतः।।५४।।

य एनां कण्ठगां कुर्यान्नामसप्ततिमालिकाम्।
माधवोमाधवौ स्यातां तस्य रक्षाकरौ सदा।।५५।।

जनैर्न कैश्चिदप्युक्तः शैवो वैष्णव इत्यपि।
शाक्तो वा शक्त इत्युक्तः सदा शक्तियुतस्ततः।।५६।।

अकर्ताऽशुभकर्माणां कर्ता-कर्मविचारकः।
करणेषु न लग्नोऽपि नित्यं करणचिन्तकः।।५७।।

सम्प्रदायविहीनोऽपि सोऽभवत् सम्प्रदानकः।
अपादानादिशून्योऽपि सोऽपादानप्रदर्शकः।।५८।।

सम्बन्धे नैव संलग्नः सम्बन्धस्य विचारकः।
धावन्न सोऽधिकरणे सदाऽधिकरणे रतः।।५९।।

सम्बोधनेऽप्यनासक्तः शास्त्रसम्बोधनक्षमः।
समासकारकः कृत्-तद्-हितः सर्वविचारकः।।६०।।

निग्रहानुग्रहौ यस्य वाचि सन्तिठतोऽनिशम्।
शुभाशिषि च शापेऽपि समर्थः सर्वकर्मसु।।६१।।

धार्मिकव्यवहाराणां सदाचारप्रवर्तिनाम्।
शिष्टैराचरितानां वा कुलाचारनिषेवितान्।।६२।।

हितोपदेशको ज्ञातीन् बन्धूनपि समाश्रितान्।
साधवः सुमहात्मानः परोपकृतिशीलिनः।।६३।।

हितोपदेशानारेभे स्वाग्रस्थानागताञ्जनान्।
वैयाकरणनेपालः पण्डितोऽन्यस्य का कुरा?।।६४।।

(हितोपदेशाः)

हितोपदेशान् शृणुत मत्तो विद्यार्थिनो जनाः।
स्त्रियो गृहस्थाः श्रोतारः सर्वेषां हितकारकान्।।६५।।

सत्सङ्गतिः सदा कार्या सम्पूज्याः पितृमातरः।
सम्मान्यास्ते सदा सन्ति गुरुब्राह्मणसाधवः।।६६।।

संरक्षणीयाः सततं स्त्रियो वृद्धाः सबालकाः।
गोसेवा सर्वदा कार्या गुरोराज्ञां विधीयताम्।।६७।।

हीनानां सङ्गतिस्त्याज्या बुद्धिर्हीना भवेदतः।
समैः सह समाना स्यादुत्तमैरुत्तमा भवेत्।।६८।।

सत्यं ब्रूयात् प्रियं ब्रूयात् स्वधर्मज्ञात् पुरोहितात्।
पुरो हितं संशृणुयात् सदाचारनिषेवितात्।।६९।।

गृहेऽतिथिः सदा मान्यः पूज्यो भवति भोजयेत्।
भिक्षादानेन वा तस्मै दद्यात् सम्मानमादरम्।।७०।।

क्वचित् पितर आयान्ति पर्वामासङ्क्रमे दिने।
निराशास्ते निवर्तेयुश्चेदनिष्टफलं मिलेत्।।७१।।

पित्रोराशौचमेकाब्दं भवेन्मातुस्तदर्धकम्।
स्वपत्न्याश्चेत् त्रिभिर्मासैराशौचं स्नानतो व्रजेत्।।७२।।

भ्रातुः पुत्रस्य वाऽशौचं त्रिभिः पक्षैर्विशुद्ध्यति।
सपिण्डगोत्रबन्धूनां दशाहेन विशुद्ध्यति।।७३।।

सूतकेऽपि दशाहानां दशाहेन विशुद्ध्यति।
दूरस्थानां तु बन्धूनां भवेच्छुद्धिस्त्रिभिर्दिनैः।।७४।।

आशौचे नैव कुर्वीत काम्यं तीर्थं व्रतं शुभम्।
देवपूजादिकं कर्म न कार्यं मन्दिरेष्वपि।।७५।।

दानं देयं यथाशक्ति कार्यं तीर्थं व्रतं तपः।
क्वचित् तीर्थे महात्मानो मिलिष्यन्ति दयालवः।।७६।।

ते युष्मानुपदेक्ष्यन्ति यदीश्वरकृपा भवेत्।
तेषां तदुपदेशेन मतौ भक्तिरुदेति वः।।७७।।

स एक एवाऽस्मद्धाता विधाता जगतोऽस्य च।
पाता न तं विहायाऽन्यः सुखदाता स एव हि।।७८।।

स्वामी स एवान्तर्यामी दाताऽमुत्रापि निर्वृतेः।
निर्वाणस्याऽपि मोक्षस्य स भूयात् शरणं हि नः।।७९।।

सम्यक् सरति संसारो लोकोऽयं लोक्यते ततः।
गच्छतीदं जगदिति जानीयात् स्वप्नसन्निभम्।।८०।।

ब्रह्ममायाप्रपञ्चोऽयं नश्वरो जलविन्दुवत्।
भूयाद् ब्रह्मणि कूटस्थे युष्माकं सुस्थिरा मतिः।।८१।।

पापादेव कलौ जन्म पापं पुण्येन सङ्क्षयेत्।
ईशभक्त्या भवेत् पुण्यं पुण्येनेशं प्रतोषयेत्।।८२।।

इत्युक्त्वा विररामासौ वैयाकरणपण्डितः।
मितवादी महात्माऽऽसीत् प्रलम्बं नैव शोभनम्।।८३।।

न जानन्ति स्म मायार्थं श्रोतारः सैष पण्डितः।
स्फुटीकृत्य तदर्थं च तत्रैवं समबोधयत्।।८४।।

मायां विपर्ययं कृत्वा यामारूपमदर्शयत्।
वर्णद्वयं पृथक् कृत्य या सा नास्तीत्यबोधयत्।।८५।।

स्वयं ज्योतिषशास्त्रज्ञस्त्रिकालफलवाचकः।
जन्मपत्रादिकं दृष्ट्वा फलादेशेन रञ्जकः।।८६।।

धार्मिकान् नैतिकानेवं सदाचारप्रचोदकान्।
हितोपदेशान् मधुरान् वेदान्तार्थप्रबोधकान्।।८७।।

स्वाग्रस्थिताञ्जनानेवं बुधानः समबोधयत्।
दिङ्लामण्डलमध्यस्थषडानन्दसखः सुधीः।।८८।।

अशिक्षया जगत् सर्वमन्धमस्ति विचारणात्।
शिक्षाप्रदो गुरुरभूत् कविः काव्यविलेखनात्।।८९।।

सौम्यः सौम्यगुणोपेतो मङ्गलो मधुवाचनात्।
सूर्यचन्द्रसमोऽप्येषः कठोरैः शीतलैर्गुणैः।।९०।।

शनैश्चरन्तं तं दृष्ट्वा जनैरुक्तः शनैश्चरः।
तदा तमश्चिन्तितोऽभूत् क्व मे वासो भवेदिति।।९१।।

स्थानं न दृष्ट्वा कुत्रापि नयनान्तर्गतोऽभवत्।
शिखी विचार्य स्वस्थानमूर्ध्वं शिरसि निर्गतः।।९२।।

तत एवाऽभवत् सद्यः शिखी सोऽयं न संशयः।
तदैकत्रोदिता भूमौ नवानां ग्रहसंहतिः।।९३।।

नवग्रहाणामेकत्र राशिः क्वापि न दृश्यते।
वैयाकरणनेपालो नरो न ग्रहसंहतिः।।९४।।

वीरः शूरो न विक्रान्तः 'कीर्तिर्यस्य स जीवति'।
सोऽयं धीर उदैदत्राऽकाशेऽप्यस्तं गतोऽधुना।।९५।।

श्रीविक्रमार्कनृपतेर्नवागाङ्कैकवत्सरे(१९७९)।
मिथिलायां पुण्यभूमौ भुवं त्यक्त्वा दिवं ययौ।।९६।।

इतो गतोऽपि शक्रस्य सभायां विबुधाग्रणीः।
नयपालबुधाग्रोऽभूत् किष्किन्धाकाण्डवाचनात्।।९७।।

कीदृशानि व्यञ्जनानि भुञ्जते नयपालिनः।
श्रुत्वा व्यञ्जनकल्पान्ते सुधर्मा विस्मिताऽभवत्।।९८।।

धन्या माता विष्णुमाया बलभद्रः पिता तथा।
एतयोरात्मजो धन्यो वैयाकरणकोविदः॥९९॥

प्रदोषे गच्छतां क्वापि दोषा आयान्ति सम्मुखे।
सम्मार्जनीयाः प्रत्यूषे दोषज्ञाः शोधयन्त्विमान्॥१००॥

(विनयोपसंहृती)

विद्वत्संस्मरणं कर्तुं भाषायामपि शक्यते।
तत्किमर्थं संस्कृते चेदिति शृणुत विस्तरम्॥१०१॥

न हि विद्याभिमानेन संस्कृते लिखति क्वचित्।
अनुकूलयितुं वाणीं संस्कृते यत्नवानयम्॥१०२॥

स्मरणात् कीर्तनात् पाठात् प्रश्नात् पत्रादिलेखनात्।
अभ्यासाचरणाद् भूयादनुकूला सरस्वती॥१०३॥

नेपालावनिमण्डलस्य पुरतः सिक्तेलकूटे सतो
नेपालाभिधकोविदस्य वसतिं कार्यं स्वभावं ततः।
सद्वैयाकरणस्य तस्य विदुषो ज्ञात्वा चरित्रं कियत्
नप्तुर्ज्ञानमणेर्बुधादभिमतो लेखो व्यलेखीदृशः॥१०४॥

नाऽयं शब्दसमीक्षको न गणको योगेऽप्ययुक्तो जन-
स्तर्के कर्कशवाचने न हि रुचिः साङ्ख्ये न सख्यं क्वचित्।
नो वेदान्तविचारको न विबुधो मीमांसनेऽप्यक्षमो
धर्मे नास्ति गतिर्भयादुपरतः शास्त्राब्धिकल्लोलतः॥१०५॥

लक्ष्मीः पूर्वपदं तदुत्तरपदं कान्तः समासात्तयोर्
लक्ष्मीकान्त इमं विदन्तु विबुधास्तेनैव तच्छ्रद्धया।
सद्विद्वद्गुणकीर्तनं विदधतं लज्जा कुतस्तं व्रजेत्?
वैदुष्यं समभीप्सतीत्यनुदिनं विद्वद्गुणोल्लेखनात्॥१०६॥

गुल्मीमण्डलमालिकाद्रितनया या निम्नगा पन्नगा
तस्याः प्राक्तटमाश्रिताऽस्ति वसतिर्ग्रामो बृहच्चत्वरः।
भारद्वाजकुलेऽमले जनिरभूत् श्रीनीलमायाङ्गजो
लक्ष्मीकान्त इतीह नाम कथितं श्रीभीमकान्तात्मजः॥१०७॥

प्राध्यापन् सम्प्रति मञ्जुगर्ते चरन्न जानात्यपि शास्त्रमर्थम्।
सतां बुधानां गुणगायकोऽयमितस्ततस्तिष्ठति वक्ति याति।।१०८।।

**

## ११३. जगदम्बिकावैभवकाव्यसार:

प्रथमसर्गे– ध्रुवसन्धेः सुतप्राप्तिर्वने सिंहाक्रमस्तथा।
युधाजिद् वीरसेनौ द्वौ दौहित्रार्थं समागतौ।।१।।

द्वितीयसर्गे– युधाजितो भयं ज्ञात्वा तद्राज्ञी मन्त्रिणा सह।
मनोरमा पुत्रयुता भरद्वाजाश्रमं गता।।२।।

तृतीयसर्गे– राज्ये शत्रुजितं न्यस्य भरद्वाजाश्रमं गतः।
सुदर्शनमाक्रमितुं युधाजिन्मुनिभर्त्सितः।।३।।

चतुर्थसर्गे– सुदर्शनो निर्भयोऽभूद् विनिवृत्ते युधाजिति।
देव्या मन्त्रं प्रजप्यासौ वयस्कोऽभूद् गुणाकरः।।४।।

पञ्चमसर्गे– कन्या द्विजोक्तमाकर्ण्य परिज्ञाय सुदर्शनम्।
देव्या निर्देशनाद् वव्रे राजा चिन्तातुरोऽभवत्।।५।।

षष्ठसर्गे– स्वेष्टः शशिकला प्राह- वरो मेऽस्तु सुदर्शनः।
स चान्येऽपि समायाताः काशीं तस्याः स्वयंवरे।।६।।

सप्तमसर्गे– युधाजिद्वचनं श्रुत्वा राजानः पुनरब्रुवन्।
सुबाहुना चोत्तरितं पुत्रीच्छाऽस्ति सुदर्शने।।७।।

अष्टमसर्गे– ततः शशिकला राज्ञा 'त्वमायाहि स्वयंवरे'।
इत्युक्त्वा पुनराहूता तत्तया खण्डितं हठात्।।८।।

नवमसर्गे– गृहान्तरे समाहूय राजपुत्रं सुदर्शनम्।
पुत्रीहठेन राजापि तस्मै तां विधिनाऽर्पयत्।।९।।

दशमसर्गे– मार्गं रुद्ध्वा युध्यमानौ युधाजिच्छत्रुजिद्रिपू।
तावुभौ निहतौ देव्या सुबाहुस्तां नतोऽस्तवीत्।।१०।।

एकादशसर्गे– सुदर्शनोऽपि नत्वा तामस्तवीद् भक्तिसंयुतः।
स्वाराज्यं प्राप्य सन्तुष्टोऽनुभूतिं श्रावयन् गतः।।११।।

द्वादशसर्गे– निर्माय मन्दिरं देव्या गत्वाऽयोध्यां सुदर्शनः।
सपत्नीकोऽपूजयत्तां सुबाहुश्च तथाऽकरोत्।।१२।।

**

## ११४. जगदीश्वरवैभवकाव्यसारः

प्रथमसर्गे– स्वयम्भुवमनोः पुत्र एक उत्तानपादभूत्।
सुनीत्यां तत्सुतो जातो ध्रुवो बाल्ये वनं गतः।।१।।

द्वितीयसर्गे– वने नारदनिर्देशाद् ध्रुवो विष्णोस्तपोऽकरोत्।
तत्तेजोभिः पीडितास्ते सुरा विष्णुं प्रपेदिरे।।२।।

तृतीयसर्गे– विष्णुं स्वाऽग्रे समायातं ध्रुवो दृष्ट्वाऽस्तवीद् बहु।
वरेणाच्छन्दयद् विष्णुर्ध्रुवः पश्चादतप्यत।।३।।

चतुर्थसर्गे– राज्ये ध्रुवोदयो जातो जनता सुखमन्वभूत्।
वैराग्येणोत्तानपादस्तपोवनमगात्ततः।।४।।

पञ्चमसर्गे– मृगयार्थं वनं यातो भ्राता यैर्निहतो रणे।
यक्षैः सह कुबेरस्य ध्रुवो युद्धमयुध्यत।।५।।

षष्ठसर्गे– स्वर्यातोऽपि मनुः स्वायम्भुवोऽत्राऽगतवान् पुनः।
वैभवख्यापनाद् विष्णोर्ध्रुवं युद्धान्निवारयत्।।६।।

सप्तमसर्गे– मायामात्रं जगत्सर्वं राज्यं मेऽपीति चिन्तयन्।
पुत्रं दत्वा तपस्यन् स वैष्णवाभ्यां विलोकितः।।७।।

अष्टमसर्गे– प्रशंसितो ध्रुवस्ताभ्यां व्योमयानेऽधिरोहितः।
स्वर्यातो मृत्युमारूढो भक्तो ध्रुवपदं गतः।।८।।

**

## ११५. हिरण्याक्षो हिरण्यकशिपुश्च

धनं सुवर्णञ्च विभूषणञ्च हिरण्यनाम्ना कथितं सुधीभिः।
यस्याक्षिणी द्वे सततं हिरण्ये ज्ञेयो हिरण्याक्ष इति प्रदुष्टः।।१।।

हिरण्यमेव यस्यास्ति शय्याभोजनवस्त्रकम्।
हिरण्यपूर्वं कशिपुं विद्वांसस्तं प्रचक्षते।।२।।

**

## ११६. रावणः कंसश्च

लोकान् सर्वान् रावयति येन 'रावण' उच्यते।
परपीडाकरो योऽस्ति सोऽपि 'रावण' उच्यते।।१।।

हर्षप्रसन्नताऽऽनन्दाः 'कं' शब्दार्थविवक्षिताः।
'षोऽन्तकर्मणि' धातोः 'सः' कंसोऽस्ति सुखनाशकः।।२।।

अस्ति प्राप्तिश्च द्वे भार्ये तयोः कंसः पतिः कथम्।
अस्तिं प्राप्तिमुभौ रक्षन् कन्दो भवितुमर्हति।।३।।

**

## ११७. गीतासारः

पक्षद्वयेऽपि समरे समुपस्थितां तां
सेनां विहाय पुरतः प्रगतौ हि कृष्णौ।
कृष्णस्तदैव कथयन्नति खिन्नचित्तो
'हे वीर कृष्ण समरे न भवामि सुस्थः।।१।।

वाञ्छामि नैव विभवं न सुखं न राज्यं
युद्धे न कञ्चिदपि हन्मि किमद्य पापम्।'
कृष्णस्य वाक्यमधिगम्य जगाद कृष्णः
कृष्णं विचार्य सहसा समबोधयन् सः।।२।।

'क्लैब्यं विहाय कुरु साहसमात्मबुद्ध्या
नद्धो भवाऽत्र समरे न भयं त्वयि स्यात्।
युद्धाय निश्चितमना त्यज खिन्नचित्तं
युद्धं विहाय विगतेऽपयशस्त्वयि स्यात्'।।३।।

कृष्णोऽपि कृष्णवचनं श्रुतवान् समस्तं
यत् कर्मबोधविरतादिविभक्तमस्ति।
अद्वैतमेव सकलं न हि किञ्चिदन्यत्
कर्तव्यमार्गगमनं करणीयमस्ति।।४।।

⁕ ⁕

## ११८. पौराणिकं निर्देशनम्

उषःकाले समुत्थाय कर्तव्यं ध्येयचिन्तनम्।
स्वेष्टधर्मं स्वकर्तव्यं स्वाचारो ध्येयमुच्यते।।१।।

प्रातः पठनशीलस्य विद्या शीघ्रमुपस्थिता।
विद्यया ज्ञानमायाति बुद्धिर्ज्ञानेन वर्द्धते।।२।।

प्रातःस्नानं प्रकर्तव्यं भ्रमणं शक्तितोऽन्वहम्।
देहशुद्धिर्भवेत्तेन स्वमायुश्च प्रवर्द्धते।।३।।

जपं कुर्याद् यथाशक्ति ब्रह्मयज्ञं तदन्तरम्।
पितृणां तर्पणं कुर्यात् पूजां पाठादिकं चरेत्।।४।।

प्राणाग्निहोत्रं कर्तव्यं भोजनाग्रे विशेषतः।
सात्त्विकं भोजनं कुर्यात् सत्त्वशुद्धिर्भवेत्ततः।।५।।

सात्त्विकी बुद्धिरायाति सत्त्वशुद्ध्याऽन्यथा न हि।
स्वास्थ्यलाभोऽपि भवति तस्मादेतद् विचार्यताम्।।६।।

प्रथमं वेदविद्यायाः स्वशाखाध्ययनं चरेत्।
पठनीयान्यशाखापि यथाशक्ति यथामति।।७।।

वेदाङ्गानि धर्मशास्त्रं नीतिशास्त्रं समभ्यसेत्।
सेतिहासपुराणानि वेदान्ते योजयेन्मतिम्।।८।।

यत्कर्म क्रियते लोके व्यवहारे तथाऽऽचरेत्।
अनासक्तमतिर्भूत्वा व्यवहारान् समाचरेत्।।९।।

क्रियन्ते यानि कर्माणि दानधर्मादिकान्यपि।
गृहस्थान्यशनादीनि स्वर्पयेत् परमात्मने।।१०।।

व्यापकः प्रभुरीशोऽस्ति कालः कर्ता स एव हि।
तस्यैव वशमापन्नः सोऽहमस्मीति चिन्तयेत्।।११।।

जनानन्यान् प्राणिनश्च समदृष्ट्या विलोकयेत्।
आत्मवत् सुखदुःखानि तेषां तादृशमाचरेत्।।१२।।

हिंसाक्रोधलोभमोहमदमात्सर्यसञ्ज्ञकान्।
दुर्गुणान् सन्त्यजेद्धीमान् दुर्गुणैर्दुःखमाप्यते।।१३।।

अहिंसां सत्यवचनं त्यागं दानं दयालुताम्।
अलोभं विनयं प्रेम वर्द्धयेत् सुखदान् गुणान्।।१४।।

देवदानवगन्धर्वयक्षराक्षसकिन्नराः।
पुराणेषु प्रपठ्यन्ते तेभ्यो निर्देशनं त्विदम्।।१५।।

ममतां वासनां हित्वा धर्मशालां स्मरन् गृहम्।
गृहेऽपि कुर्वन् कर्माणि चरेदतिथिवन्मुदा।।१६।।

**

## ११९. शिवाम्बुनोर्महत्त्वम्

यथा तृणाद्यौषधिभिः समागतं
गोमूत्रमस्मत्कृतये महौषधम्।
तथा घृताद्यौषधिमिश्रितं यत्
शिवाम्बुपानं च महौषधं स्यात्।।१।।

स्वदेहशक्तिप्रभवं रसायनं
शिवङ्करं रोगहरं शिवाम्बु यत्।
स्वस्याऽन्नपानप्रभवान् विकारान्
रोगान् हरत्यस्य कियन्महत्त्वम्।।२।।

**

## १२०. निवेदनम्

नेपाले हिन्दुराष्ट्रेऽस्मिन् विश्वविद्यालयान्मुदा।
हिन्दूनां धर्मशास्त्रीये संस्कारविषये मया।।१।।

महेन्द्रवृत्तिं सम्प्राप्य शोधकार्ये विशेषतः।
व्रतबन्धविवाहौ द्वौ संस्कारौ सुविचारितौ।।२।।

नवाग्निव्योमनेत्राब्दाद् वैक्रमीयान्निरन्तरम्।
वर्षाणां त्रितयेनैतत् सत्कार्यं परिपूरितम्।।३।।

वेदाश्च साङ्गा नाभ्यस्ताः प्रवेशो नास्ति दर्शने।
न शक्तिर्न च नैपुण्यं काव्यशास्त्रावगाहने।।४।।

शब्दशास्त्रं न जानामि तर्कशास्त्रं न रोचते।
वेदान्तज्ञोऽपि नैवास्मि मीमांसा न विचार्यते।।५।।

न चाहं धर्ममर्मज्ञो ज्योतिर्ज्योतिर्ददाति नो।
योगोऽप्ययोगो भवति साङ्ख्यं सख्यं करोति नो।।६।।

साहित्यमहितं मेऽस्ति छन्दो भवति बन्धनम्।
अज्ञानादर्थशास्त्रस्याऽनर्थो भवति सन्ततम्।।७।।

पूर्वजन्मार्जितैः पुण्यैः प्रतिभा नार्जितोत्तमा।
अतो न मेऽस्ति वैदुष्यमन्तेवास्यऽस्मि केवलम्।।८।।

यद्यत्र बहवो दोषाः सन्ति तन्मत्प्रमादतः।
गुणा मिलन्ति चेत् केचित् तद् गुरूणां प्रसादतः।।९।।

आदर्शभूतौ पितरौ धर्मसंस्कारसंस्कृते:।
ममाऽऽस्तां लिखितो ग्रन्थस्तयोरेवानुकम्पया।।१०।।

विषयेऽस्मिन् मां सदैवाऽऽभवतां प्रेरणाप्रदौ।
अतस्तयोश्चरणयोरिमं ग्रन्थं समर्पये।।११।।

नीलमायाभीमकान्तौ जननीजनकौ मम।
लक्ष्मीनारायणसमौ रक्षतामन्वहं हि माम्।।१२।।

सस्नेहौ करुणापूर्णौ पितरौ तौ मुदा मयि।
शुभाशिषौ कामयेतां भूमे: स्वर्गाच्च सर्वदा।।१३।।

सन्त: प्रसन्ना: स्युरस्मिन् गुणै: कैरपि तद् वरम्।
अन्ये परिहसेयुश्चेत्तेन मे किं भवेदलम्।।१४।।

नि:सुखे जीवलोकेऽस्मिन् प्रीतियोग: सुदुर्लभ:।
यस्य कस्यापि मोदश्चेज्जायेत सफल: श्रम:।।१५।।
(विद्यावारिधिशोधग्रन्थसन्दर्भे लिखिता)

❊❊

## १२१. प्रकाशकीयम्

देवीभक्तिकथामृतं प्रथमतो विद्वद्भिरास्वादितं
सत्काव्यं जगदीश्वराश्रितमिदं व्यासप्रणीतं पुरा।
यस्यैवं द्वितयं स्वरूपमपि सम्मुद्र्य प्रकाश्याधुना
विद्वन्मानसमोदकं सविनयं प्रस्तौमि दिव्यं मधु।।१।।
(पितृकृतजगदम्बिकावैभवमहाकाव्ये प्रकाशितम्)

❊❊

# १२२. प्रकाशकीयम्

गुल्मीमण्डलमण्डितेऽत्र धुरकोटान्तर्गते खर्वटे
वाग्ला पूर्वपदे तदुत्तर 'बडाचौरे' वसन् पूर्वजः।
विद्वान् ज्योतिषधर्मशास्त्रनिपुणः ख्यातः पुराणादिषु
दत्तात्रेय इति स्वकर्मकुशलः सिद्धोऽभवद् भूसुरः॥१॥

तत्पुत्रः श्रुतिशास्त्रविद् बहुमतो देवीप्रसादोऽभवत्
तत्पुत्रोऽपि च धर्मवित् कविवरः श्रीभीमकान्ताभिधः।
धीमान् कर्कशतर्कयोगपदयुक् शास्त्रज्ञ एको महान्
अन्तेवासिजनान् मुदा सुरगिरा सम्भावयन् सम्मतः॥२॥

शाब्दव्याकरणे सुधीःपुनरहो ज्योतिर्विदामग्रणीः
मीमांसा स्मृतिसाङ्ख्यतर्ककणभुग्वाचां विवादेऽग्रणीः।
यज्ञे यज्ञविधौ जनैर्बहुमतो दक्षोऽस्ति तत्कर्मसु
मन्त्रज्ञोऽपि च तन्त्रयन्त्रविधिवित् तेषां प्रयोगादिषु॥३॥

देवीभागवते कथाप्रवचने प्रश्नोत्तरे पाठने
श्रीमद्भागवते तथोपनिषदां शङ्कासमाधानयोः।
यो रामायणभारतादिषु तथा ख्यातः पुराणेष्वपि
धर्माचाररतोऽस्ति नीतिनिपुणः श्रीभीमकान्तः कविः॥४॥

आयुर्वेदविचारसारचतुरः शान्तिप्रदो रोगिणां
योऽर्थज्ञो निगमागमेषु निपुणो धीरः कविर्विश्रुतः।
यो भक्तो जगदीश्वरे सममतिर्देवीपदाब्जे रतो
येन स्याल्लिखितं सतां सुखकरं काव्यद्वयं विश्रुतम्॥५॥

तस्याऽऽचारविचारजीवनविधौ क्षेत्रादिकर्मस्वपि
यद्वाऽध्यात्मपथेऽपि भौतिकपथे वृत्यर्थचिन्तासु च।
यस्मिँस्तस्य कवेर्गृहव्यवहतौ स्थानादिकस्यापि च
यद्वा ज्ञानपथस्य वाग्व्यवहतौ पत्राणि मित्रेष्वपि॥६॥

एषा पद्यमयी कृतिः कृतिविदामग्रे पितुः प्रस्तुता
भाषायामपि संस्कृते विरचिता विद्वज्जनानन्ददा।
दृश्यन्ते कविता अनेकविषया पुत्रे कलत्रेष्वपि
विद्वद्भिः सुविचार्यतां कृतिरियं या शब्दचित्रं पितुः।।७।।

काव्यकर्ताऽऽलोकधर्ताऽज्ञानहर्ता विचारवान्।
'कविर्मनीषी परिभूः स्वयम्भू'रिति कथ्यते।।८।।

एष विद्वान् कविर्ज्ञानी सञ्चरन्नपि वर्त्मनि।
सत्कृतः सादरं लोकैः पादयोर्नतिपूर्वकम्।।९।।

तेनैव लिखिता ह्येषा विविधा पद्यमालिका।
सुरम्या विदुषामग्रे दर्शिता सौरभान्विता।।१०।।

कोमलं कठिनं रम्यमिहामुत्र विचारितम्।
सश्लेषं सार्थकं काव्यं राजवृत्तानुसारि तत्।।११।।

सुरम्यपदविन्यासैरलङ्कारैरनुत्तमैः।
गुणभावरसैराढ्या नारीव कविता पितुः।।१२।।

विदुषा काव्यमर्मज्ञवेणीमाधवशर्मणा।
समीक्षा लिखिताऽस्तीह सर्वभावप्रकाशिका।।१३।।

एतदर्थं धन्यवादान् प्रदद्मो भूरिशोऽधुना।
कृतकृत्या वयं प्रीता वेणीमाधवधीमते।।१४।।

लोकोऽयं गुणसङ्घोऽस्ति दृश्यन्ते ते गुणा न हि।
दोषे दृष्टिर्निपतति सैषा दोषानुगामिनी।।१५।।

निःसुखे जीवलोकेऽस्मिन् प्रीतियोगः सुदुर्लभः।
केषाञ्चिन्न विनोदश्चेदस्माकं को निवारयेत्।।१६।।

तथापि केचिद् विद्वांसः परदोषानुकीर्तने।
रमन्ते चेद् वयं तेभ्यो नमस्कुर्मो मुहुर्मुहुः।।१७।।

नगवाणाभ्रनयनमिते वैक्रमवत्सरे।
शुचौ मासे पूर्णिमायां सम्मुद्र्य रविवासरे।।१८।।

लक्ष्मीसूर्यचन्द्रविष्णुकृष्णैः कान्तोत्तरैः सुतैः।
प्रकाशकैः पितृकृता कृतिरेषा प्रकाशिता।।१९।।

(पितृविरचितविविधपद्यावल्यां प्रकाशकीयमिति शीर्षके प्रकाशितम्)

**

## १२३. अनुवादकीयम्

योगिस्वात्मारामकृता हठयोगप्रदीपिका।
विद्यते योगविज्ञानान्वेषिणां दीपिका यथा।।१।।

अनया संस्कृते सन्ति हठयोगादिकाः क्रियाः।
राजयोगादिपर्यन्तमिति जानन्तु पाठकाः।।२।।

सर्वभूतशरीरस्थो जीवरूपेण यः शिवः।
स एव तत्परं ब्रह्म ज्ञातव्यं योगिभिः सदा।।३।।

चित्तवृत्तिनिरोधाद् वा समत्वात् कर्मकौशलात्।
युक्ताहारविहाराद् वा ब्रह्म जानाति निष्कलम्।।४।।

शब्दब्रह्मस्वरूपाच्च नादोपासनयोगतः।
दर्शनाच्छ्रवणाद्ध्यानाद् ब्रह्म प्राप्नोति निर्मलम्।।५।।

ज्योतिर्बोधात् पदार्थानां बोधाद् वापि विशेषतः।
पञ्चविंशतितत्वानां बोधाद् ब्रह्माधिगच्छति।।६।।

नवधा भक्तियोगाद् वा ह्यहं ब्रह्मास्मि मन्त्रतः।
जपाद्यागात् तथा होमाद् त्यागाद् ब्रह्माधिगच्छति।।७।।

स्वधर्माचरणात् सत्यात् स्वकर्तव्यस्य पालनात्।
परोपकारात् सन्तोषात् तत्त्वबोधः प्रजायते।।८।।

अपाप्मना सर्वदृष्ट्या ब्रह्मदृष्ट्याऽथवा पुनः।
साधकः समभावेन ब्रह्म सम्पद्यते ध्रुवम्।।९।।

आत्माधिष्ठानभूतस्य सर्वव्यापकरूपिणः।
देवस्याऽभ्यर्चनान्नित्यं ब्रह्म सम्पद्यते यतः।।१०।।

यथा सर्वोच्चशिखरं गच्छन्ति कुशला जनाः।
भिन्नैर्मार्गैरपि तथा ब्रह्माऽवाप्नोति निश्चलम्।।११।।

स्वधर्मशास्त्रे कथितं याज्ञवल्क्यमहर्षिणा।
'अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्'।।१२।।

लुम्बिन्यञ्चलमध्यस्थे गुल्मीमण्डलमण्डिते।
ग्रामे 'वाग्लाबडाचौरे' जातः पन्थिकुले तथा।।१३।।

प्रसन्नात्मा सुधीर्देवीप्रसादो मत्पितामहः।
भीमकान्तः सुतस्तस्य पिता मे काव्यलेखकः।।१४।।

लक्ष्मीकान्तस्तत्सुतोऽहं नगरे काष्ठमण्डपे।
विद्यापीठे पाठयामि भाषाव्याकरणादिकम्।।१५।।

श्रीगुरुं पितरं नत्वा स्वात्मारामं च योगिनम्।
तद्ग्रन्थभावमाश्रित्य भाषार्थो लिखितो मया।।१६।।

अस्याऽर्थस्योपयोगित्वमधुनास्तीति जानता।
मयाऽऽरब्धोऽनुवदितुं पूरितोऽत्र प्रकाशितः।।१७।।

उपयोगं विधायास्य जना लाभमवाप्नुयुः।
इत्यहं कामये शश्वद् ब्रह्ममार्गाधिरोहिणः।।१८।।

ग्रन्थस्याऽस्य पुरोवाक्यं हठयोगस्य संस्तवः।
दुर्गाप्रसादगुरुभिर्लिखितो ग्रन्थपोषकः।।१९।।

एतदर्थं कृतार्थोऽस्मि पुरोवाक्यस्य लेखकान्।
गुरून् धन्यान् वदँस्तेभ्यः साधुवादान् समर्पये।।२०।।

बहुना किमिहोक्तेनाऽनुवादे मां प्रयोजकः।
स्वर्गस्थो मत्पिताप्यत्र प्रसीदतु न सीदतु।।२१।।

भवदीयमिदं वस्तु भवते स्वर्पयेऽधुना।
भवत्पूजाप्रसादेन सफलोऽयं परिश्रमः।।२२।।
(हठयोगप्रदीपिकायां प्रकाशितम्)

* *

## १२४. अनुवादकीयम्

श्रीलेखनाथलिखितं काव्यं षड्तुवर्णनम्।
प्रकृतेर्वार्षिकं दिव्यं शब्दचित्रं प्रदर्शितम्।।१।।

ऋतुविचारनामेदं काव्यं कथमनूदितम्।
कवेः श्रीलेखनाथस्य कीदृशं सुविचार्यताम्।।२।।

रङ्गरेखादिभिन्नेन पुष्परूपेण केनचित्।
तदन्तर्ज्योतिषा काव्यं यथाप्रज्ञमनूदितम्।।३।।

कविर्मनीषी परिभूःस्वयम्भूरिति कथ्यते।
कवेः काव्यं समालोक्य यथापूर्वमकल्पयत्।।४।।

सुकोमलं चारुचित्रं साधुशब्दार्थसंयुतम्।
ऋतुकाव्यं चिरञ्जीव्यात् संस्कृते समनूदितम्।।५।।

कोमलागं चारुचित्रं शुक्लजीवनवाहकम्।
सुवर्णं सन्मुदे भूयात् काव्यमृतुविचारकम्।।६।।

भक्तिभावनयोपेतं साधनाचेतनाप्रदम्।
मायाच्छन्नं जगत् सर्वं लक्ष्मीकान्त इहासृजत्।।७।।

विकलाऽवयवाऽशुद्धा निर्गुणा विरसाऽस्फुटा।
नालङ्कृतापि मोदाय भूयात् प्रकृति-बालिका।।८।।

पदविन्यासचपला निर्मलोपलभूषिता।
हिमोत्पन्ना बालिकैषा भूयात् सागरगामिनी।।९।।

लुम्बिन्यञ्चलमध्यस्थे गुल्मीमण्डलमण्डिते।
ग्रामे 'वाग्ला-बडाचौरे' जातः कविजनप्रियः।।१०।।

मञ्जुगर्ते वसन्नेष लक्ष्मीकान्तो धरासुरः।
लेखनाथीयकाव्यस्यानुवादमकरोदिह।।११।।

नाऽयं कविः कोविदोऽपि केवलोऽस्यानुवादकः।
सतां तुष्टिरनेन स्यान्मनसैवं विचारयन्।।१२।।

तथापि केचिद् विद्वांसः परदोषानुकीर्तने।
रमन्ते चेद् भृशं तेभ्यो नमस्कारं करोत्ययम्।।१३।।

'पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामी'ति वचस्तव।।१४।।

यदि सत्यं मनोनाथ! वचःपुष्पकृतां मम।
भक्त्या मालां स्वीकरोतु त्वद्वाचा पूजनं तव।।१५।।

रसवाणाभ्रनयनमिते वैक्रमवत्सरे।
श्रीपञ्चम्यां समारभ्य फाल्गुन्यां सुसमापितः।।१६।।

देवीप्रसादतनयो बुधभीमकान्त-
स्तस्यात्मजेन कवितारुचिमानसेन।
नित्यं बुधैरभिहितेन जनेन लक्ष्मी-
कान्तेन मुग्धहृदयेन कृतोऽनुवादः।।१७।।

श्रीमन्मुकुन्दशरणस्य कवेर्बुधस्य
यत्नः प्रकाशनकृते प्रतिबद्धभूतः।
तेनैव संस्कृतपदान्वितरूपदृष्टं
श्रीलेखनाथकृतषड्तुकाव्यपुष्पम्।।१८।।
(ऋतुविचारः सानुवादः इत्यस्मिन् पुस्तके प्रकाशितम्)

❊ ❊

# १२५. अनुवादकीयम्

मुकुन्दशरणेनोक्ता कृतिः 'प्राकृतपोखरा'।
पोखराप्रकृतेर्दिव्यं शब्दचित्रं प्रदर्शितम्।।१।।

सौन्दर्यं परमं ब्रह्म तन्मायामोहितं जगत्।
सौन्दर्यप्रणयादेव यथाप्रज्ञमनूदितम्।।२।।

'कविर्मनीषी परिभूः स्वयम्भू'रिति कथ्यते।
कवेः काव्यं समालोक्य यथापूर्वमकल्पयत्।।३।।

भक्तिभावनयोपेता साधनाचेतनाप्रदा।
मायाच्छन्ना हि जगती लक्ष्मीकान्तेन सर्जिता।।४।।

विकलाऽवयवाऽशुद्धा निर्गुणा विरसाऽस्फुटा।
नालङ्कृतापि मोदाय भूयात् प्रकृतिबालिका।।५।।

पदविन्यासचपला निर्मलोपलभूषिता।
हिमोत्पन्ना सागरगा शुक्ला प्रकृतिबालिका।।६।।

कोमलाङ्गी चारुचित्रा शुक्लजीवनवाहिनी।
सुस्वना सन्मुदे जीव्यात् 'पोखरा'कृतिबालिका।।७।।

लुम्बिन्यञ्चलमध्यस्थगुल्मीमण्डलमण्डिते।
ग्रामे 'वाग्ला-बडाचौरे' जातः कविजनप्रियः।।८।।

मञ्जुगर्ते वसन्नेष लक्ष्मीकान्तो धरासुरः।
एतत्प्राकृतकाव्यस्यानुवादमकरोदिह।।९।।

तथापि केचिद् विद्वांसः परदोषानुकीर्तने।
रमन्ते चेद् भृशं तेभ्यो नमस्कारं करोत्ययम्।।१०।।

नगबाणाभ्रनयनमिते वैक्रमवत्सरे।
आरभ्य माधवे मासि ग्रीष्मावधि समापितः।।११।।

नाहं कविः कोविदोऽपि केवलो स्यानुवादकः।
सतां तुष्टिरनेन स्यान्मनसैवं विचारयन्।।१२।।

न हि विद्याभिमानेनाऽनुवादो विहितोऽधुना।
गुरोरनुग्रहेणैव वागर्थप्रतिपत्तये।।१३।।

स्मरणात् कीर्तनात् पाठादभ्यासाचरणादपि।
वाग्देव्या विहिता पूजा सा देवी मयि तुष्यतु।।१४।।

अर्घोदकं नैव दत्तं निर्झरास्ते निरन्तरम्।
कुसुमावचयो नैव फलपुष्पसमन्विते।।१५।।

श्रीखण्डचन्दनं नात्र पङ्किला प्रकृतिस्तव।
कार्पासवर्तिर्न कृता प्रदीपस्तव भास्करः।।१६।।

नैवेद्यं नास्ति ते किञ्चिद् वाचोपचरितामिह।
भवद्वाग्भिः कृतां पूजां वाग्देवि स्वीकुरुष्व मे।।१७।।

नीराजनं न विहितं ज्योतिश्चान्द्रमसं त्वयि।
रिक्तहस्तो नमाम्यद्य कृपापाङ्गेन पश्य माम्।।१८।।

देवीप्रसादतनयो बुधभीमकान्त-
स्तस्यात्मजेन कवितारुचिमानसेन।
नित्यं बुधैरभिहितेन जनेन लक्ष्मी-
कान्तेन मुग्धहृदयेन कृतोऽनुवादः।।१९।।

**

## १२६. नमो वाचः

नमो वाचो वक्तुमिच्छुः सभाग्रे समुपोत्थितः।
नमः सभापतिभ्यश्च सभाभ्यश्च नमो नमः।।१।।

नमः सभाऽऽयोजकेभ्यः सभासद्भ्यो नमो नमः।
विद्वद्भ्यो लेखकेभ्यश्च मनीषिभ्यो नमो नमः।।२।।

सपित्रे ससुतायैव वेदव्यासाय धीमते।
धर्मशास्त्रपुराणानां कर्त्रे वक्त्रे नमो नमः।।३।।

महाभारतमाख्यानं योऽलिखत् सुन्दरं बृहत्।
लेखकाय नमस्तस्मै वेदव्यासविपश्चिते।।४।।

गद्यपद्यमयं काव्यं चम्पूशब्देन शब्दितम्।
योऽलिखज्जनभाषायां मुकुन्दाय नमो नमः।।५।।

स्वाङ्के बाल्यादक्षराणि योऽशिक्षयदलेखयत्।
दुर्गादत्तो यं मुकुन्दं तस्मै श्रीगुरवे नमः।।६।।

मुकुं(मोक्षं) ददाति महतो भारवत्त्वाच्च संस्कृतात्।
नयपालजनेभ्योऽत्र मुकुन्दस्तेन कीर्तितः।।७।।

नम उत्साहदातृभ्य सहितृभ्यो नमो नमः।
नमष्टङ्कनकर्तृभ्यः शोधकेभ्यो नमो नमः।।८।।

नमः सम्मतिदातृभ्यः सहायेभ्यो नमो नमः।
नमोऽनसूयकर्तृभ्यो मित्रयुभ्यो नमो नमः।।९।।

मुद्रणे धनदातृभ्यो मुद्रकेभ्यो नमो नमः।
श्रोतृभ्यः पाठकेभ्यश्च महिलाभ्यो नमो नमः।।१०।।

समाचारप्रदातृभ्यश्चित्रकृद्भ्यो नमो नमः।
कर्तृभ्यः कारयितृभ्यः सर्वेभ्योऽद्य नमो नमः।।११।।

ते वन्द्यास्ते हि सत्कार्याः कर्तव्या सङ्गतिर्हि तैः।
आसनानि प्रदेयानि श्रोतव्यानि वचांसि च।।१२।।

तीर्थीकुर्वन्ति तीर्थानि कर्माणि सुकृतानि च।
सच्छास्त्राणि च वाक्यानि ते धन्याः सुकृता जनाः।।१३।।

परकार्यं दोषदृष्ट्या ये पश्यन्ति जना भुवि।
स्वयं किञ्चिन्न कुर्वन्ति तेभ्योऽप्यत्र नमो नमः।।१४।।

हे मुकुन्द! त्वया भक्तिर्गोविन्दस्य कृता बहु।
रामायणे भारतेऽपि चम्पूकाव्यविलेखनात्।।१५।।

जयक्षेमशुभस्वस्तिसाधुकल्याणमङ्गलाः।
शिवशान्तियशःकान्तिशब्दार्था विलसन्तु ते।।१६।।

आयुरारोग्यसन्तोषसुखहर्षसमृद्धयः।
वर्द्धन्तां, नाशमायान्तु रोगा दुःखानि शत्रवः।।१७।।

माया मायां वर्द्धयतां शारदा शारदायताम्।
प्रतिभा वृद्धिमायातु लेखं लिखतु लेखनी।।१८।।

**

## १२७. धन्यतमं वदामि

अधीतवेदोऽस्ति मुकुन्द शर्मा वेदस्य रूपान्तरणे समर्थः।
भाषाऽपि रम्या मधुरा मनोज्ञा सारल्यपूर्णा ललिता रसाला।।१।।

विद्वान् पिता यस्य बुधाग्र आसीत् पुराणधर्मादिसुनीतिविज्ञः।
तदन्तिके यः पठितो हि बाल्यात् साहित्यसङ्गीतकलारसज्ञः।।२।।

यो दक्षिणोऽतीव कुशाग्रबुद्धिर्निबन्धकाव्यादिसमीक्षणेऽपि।
दत्ताऽवधानोऽस्ति सुशिक्षणेऽपि काव्यादिलेखेऽपि विचारशीलः।।३।।

येनैव काव्यानि कथाश्रितानि पुरातनानीह सुगुम्फितानि।
कवित्वमेवंविधमस्ति भव्यं वेदानुवादोऽस्य भवेत् प्रमाणम्।।४।।

गुणज्ञ एषोऽस्ति रसज्ञ एषः सन्नीतिकाव्यादिकलेखकोऽस्ति।
कथासु नाट्येषु निबन्धनेषु समीक्षणे हंस इवाऽस्ति दक्षः।।५।।

माधुर्यपूर्णानि सुखश्रुतानि पदानि दिव्यानि वचांसि यस्य।
शिष्टा च सभ्या च सगौरवा च सन्त्येव सौम्याः कविता लसन्ति।।६।।

पठन्तु जानन्तु कवित्वमस्य बुधाः प्रपश्यन्तु गुणैकदृष्ट्या।
वेदस्य मन्त्रा बहवः प्रमाणं तदर्थबोधे हि विचारशीलाः।।७।।

सम्मानितोऽस्तीह पुरस्कृतोऽस्ति सम्भाषणे वाचनशिक्षणेऽपि।
सतां समाजे कविगोष्ठिमध्ये बुधै रसज्ञैर्बहुमानितोऽस्ति।।८।।

जानाम्यहं चाऽस्य कवेः कवित्वं प्रज्ञां श्रुतं नैतिकभावबोधम्।
सहर्षमस्मै वितरामि चाद्य शुभाशयं धन्यतमं वदामि।।९।।
(कवेः शुक्लयजुर्वेदस्य नेपालीभावानुवादपुस्तके प्रकाशिता)

❊ ❊

## १२८. शुभाऽऽशंसा

आवां स्थितौ कपिलवस्तुमण्डले
तौलीहवायां पठनार्थमागतौ।
तत्राऽस्ति तौलेश्वरनाथसंस्कृतः
पाठालयो नाऽन्यतमेन तूलितः।।१।।

अस्मात् सगोत्रजो बन्धुर्विद्यार्थी पुरुषोत्तमः।
पठनार्थं समायातः सतीर्थ्यः प्रतिभायुतः।।२।।

पठन् विद्यार्थिकालात् स मेधावी विनयान्वितः।
पञ्चाशद्वर्षपर्यन्तं नाऽभूत् तेन समागमः।।३।।

नेपाले हि मयाऽधीतं कृतं प्राध्यापनं ततः।
त्रिभुवनविश्वविद्यालयेऽत्र काष्ठमण्डपे।।४।।

यतः सोऽगाद् भारते हि पठनार्थं ततः पुनः।
महाविद्यालये तत्राऽध्यापयद् बहुवत्सरम्।।५।।

पन्थति वा पन्थयति धातोः 'पथि गतौ' भवेत्।
तदस्य सार्थकं रूपं पुरुषोत्तमपन्थिनः।।६।।

दूरस्थाद् गुर्जरप्रान्तान् महानगरवर्तिनः।
महाविद्यालयात् सेवानिवृत्तः स इहागतः।।७।।

पञ्चाशद्वर्षपूर्वस्य तस्याऽभूत् सङ्गमोऽधुना।
सतीर्थ्यस्य सगोत्रस्य ह्यावां मुमुदितौ भृशम्।।८।।

साम्प्रतं लिखिता तेन पुस्तिका लघुरूपिणी।
संस्कृते रचितश्लोकनिबद्धा शोभना कृतिः।।९।।

इच्छाशक्तिज्ञानशक्तिक्रियाशक्तेरियं कृतिः।
क्वचित् पदार्थविज्ञानं शक्तित्रयसमन्वितम्।।१०।।

ग्रामान्तर-वनस्थानि नदीनां तटवर्तिनि।
लोके जनैः प्रयुक्तानि सूक्तिरूपाणि कानिचित्।।११।।

कलयन् सूक्तिरत्नानि चाऽऽख्यानसहितान्यपि।
पुरुषोत्तमलेखन्या विस्तृतानि कृतानि च।।१२।।

पाठकेभ्यो रोचनानि सम्भवेयुर्न संशयः।
इति बुद्ध्या समालोच्य स्थापितानि नवान्यहो!।।१३।।

अधुनाऽहं शुभाऽऽशंसां कृतेः कृतिकरस्य च।
समुन्नतिं शतायुश्च कामयानो निरामयम्।।१४।।

शीघ्रं प्रकाशमायातु कृतिरेषा शुभावहा।
पुरुषोत्तमसंयोगः सर्वैः कलयतादिह।।१५।।

शब्दशास्त्रं न जानामि ललितैः पदविस्तरैः।
साहित्यं सरसं नैव कलयामि मनोहरम्।।१६।।

भीमकान्तस्य पुत्रोऽहं 'लक्ष्मीकान्त'पदाक्षरैः।
जनाः परिचयं प्राप्ताः शास्त्रज्ञानान्न केवलम्।।१७।।

शक्यते जनभाषायां 'शुभाऽऽशंसा'पदावलिम्।
लिखितुं नैव लिखितं संस्कृते किमु चेच्छृणु।।१८।।

पठनादपि पाठनादिह क्व च पत्रादिषु वाक्यलेखनात्।
क्व च संस्कृतवाक्ययोजनात् सुरवाक् तुष्यतु मेऽभिलिप्सया।।१९।।

लिखिता शुभकामना मया न च विद्वद्विषयाऽभिमानतः।
न च शास्त्रसमुद्रगाहनात् विनयादेव सखे! न दर्पतः।।२०।।

गुल्मीमण्डलमध्यवर्तिधुरकोट्ग्रामान्तरस्थावुभौ।
लक्ष्मीकान्तपदाभिधोऽपि पुरुषाणामुत्तमश्चानुजः।
श्रीतौलेश्वरनाथसंस्कृतपदैः पूर्वेऽत्र पाठालये
एकस्मात् कुलवंशतो जनिरभूत् तत्राऽवयोः सङ्गमः।।२१।।

**

## १२९. श्रद्धा-शब्द-पुष्पाणि २०६४

कौमारात्साधुशीलः पठितुमनुगतो यौवने प्राप्तविद्यः
संलग्नो लोकतन्त्रे प्रतिनिधिसमितौ लोकनिर्वाचितोऽभूत्।
शिक्षासेतुप्रियोऽसौ रसमितशरदो बन्धितः सर्वकारैः
स्वं राष्ट्रं मोक्तुमिच्छन्ननुदिनमलगत् क्रूरतन्त्रेण रुद्धम्।।१।।

यो राष्ट्रीयां सभायां पुनरपि गतवान् देशमुन्नेतुमिच्छन्
गृह्यां चिन्तां विहाय प्रमुदितमनसा लेखने योऽनुलग्नः।
योऽन्येषां बन्धमुक्त्यै प्रतिदिनमलगत् क्वापि साऽऽडम्बरो न
वृद्धे रोगैर्वृतः स्वां प्रकृतिमुपगतः सैष नीलाम्बरोऽभूत्।।२।।

सन्तुष्टोऽस्ति सदैव राजनयिकीं वृत्तिं चरिष्णुःस्वयम्
नेपाले जनतन्त्रमाधुनिकतामानेतुमिच्छुर्भ्रमन्।
कारागारमुपेत्य राष्ट्रियसभारूढः स नीलाम्बरः
विद्वानेष कविश्च नीतिनिपुणो भूयः सुधर्मां गतः।।३।।

**

# १३०. प्रशस्तिशेखर:

श्रीमद्भागवतामृतं प्रथमतो विद्वद्भिरासादितं
सत्काव्यं जगदीश्वराऽऽश्रितमिदं व्यासप्रणीतं पुरा।
तस्यैतज्जनभाषया विलिखितं श्रीशेखरेणाऽधुना
सङ्क्षिप्तं सुखबोधकं हितकरं जानन्तु सर्वे जना:।।१।।

तातभ्राता हसितवदनो वाक्पटुर्मृष्टकण्ठो
लोकान्नित्यं जयति यशसा शास्त्रमार्गानुलग्न:।
नैपालानां प्रखरविदुषां शेखर: सञ्ज्ञयापि
तेनोन्नीता शुकमुखकथास्रग्धराऽऽलोकभाषा।।२।।

विलिख्य भगवत्कथां सरलभावभाषां धरन्
विचिन्त्य कवितां मितां मधुरमिष्टतामावहन्।
हसन् स कलया युत: सरसवार्तया विश्रुत:
कथं भवतु नीरसो रसिकशेखर: शेखर:।।३।।

अधीतिबोधाचरणप्रचारणैर्विभक्ति विद्यां विनयोपपादिताम्।
श्रीशेखरोऽसौ जनकानुजो मम सुधीवराणामिह शेखरायित:।।४।।

यो मध्यदेशं समवाप्य सुन्दरं विद्याप्रदानेन विशुद्धमानस:।
शुकप्रणीतागमबोधकारकस्तं नौमि पितृव्यमशेषशेखरम्।।५।।

सुधीरसौ शेखरनाथपन्थी योऽध्यापयन्मामुपदेशशास्त्रम्।
काव्यं कवित्वं च, दिवङ्गतोऽयं भुञ्जीत भोगान् ससुखं प्रसन्न:।।६।।

* *

# १३१. प्रशस्तिप्रसूनम्

पुराणे प्रसिद्ध: स्वयं विष्णुरेषस्तथैवादिकाव्येऽपि रामस्वरूप:।
अयं कृष्णनाम्ना महाभारतादौ गृहीतावतारो जगद्रक्षणाय।।१।।

अयं स्वर्गलोकेऽपि मर्त्यादिलोके परित्राणकर्ता समेषां प्रपूज्य:।
अनेकै: स्वरूपैस्तथा नामरूपैर्हरि: सत्यनारायण: सुध्युपास्य:।।२।।

सुद्ध्युपास्यो हरि: सत्यनारायणो मध्वरि: कीर्तित: सैव नारायण:।
रुद्र-धात्रंशरूप: स नारायणो मत्स्यकूर्मादय: सैष नारायण:।।३।।

रामकृष्णादयश्चैष नारायणो भक्तहृद्रञ्जक: सैष नारायण:।
बुद्धिविद्याप्रदश्चैष नारायणो रश्मिराजस्तुत: सैष नारायण:।।४।।

भक्तिभाजां सदा भुक्तिदं मुक्तिदं भूतिदं कीर्तिदं सर्वसम्पत्करम्।
रश्मिराजप्रणीतं हि काव्यं नवं पठ्यतां गीयतां मङ्गलं लभ्यताम्।।५।।

सत्यनारायणीया नवैषा कृति: सत्यनारायणप्रीतये योऽलिखत्।
रश्मिराजो बुध: सत्कवि: कीर्तित: संस्कृते वाङ्मये सद्बुधानां गणे।।६।।

लेखकोऽध्यापक: कर्मकाण्डक्षम: व्याकृतिज्ञ: सदा शास्त्रवादी जन:।
एष सामाजिकोऽर्ज्यालयानां कुले रश्मिमाली कवी रश्मिराजोऽभवत्।।७।।

ते धन्या: पुण्यवन्तश्च कीर्तिमन्तो बुधा भुवि।
येषां काव्ये स्थिता विष्णोरुज्ज्वला कीर्तिकौमुदी।।८।।

जगन्नाथो रङ्गनाथश्चक्रपाणिरमी बुधा:।
पित्राद्या: स्वर्गता यस्य रश्मिराजो बुधाग्रणी:।।९।।

मङ्गलायतनं देवोऽनेन काव्येऽत्र कीर्तित:।
यतो दिव्यं पदं प्राप्तं रश्मिराजेन चाञ्जसा।।१०।।

सुधर्मामेष चाध्यास्ते काव्यं प्रथयितुं स्वकम्।
तत्र चेतोनाथदेवराजादीनां पुरो दिवि।।११।।

सुधर्मायां प्रस्तुतस्य रश्मिराजस्य साम्प्रतम्।
देवराज: प्रकुरुते मार्जनं पाणिपादयो:।।१२।।

नारायणात् परं नान्यत् किमपीह विचारणम्।
नारायणो हि सर्वेषां ध्येयो ज्ञेय: परायणम्।।१३।।

सत्यनारायणकथा लोके यावच्चलिष्यति।
नीराजनं लक्षवर्त्या तावच्चेतो विधास्यति।।१४।।

स्वदन्तां सुधियः सत्यनारायणकथामृतम्।
सरसं सुकृतं सद्यश्चेहामुत्र फलप्रदम्।।१५।।

* *

## १३२. कवितावरोऽयम्

(कुलचन्द्रस्मृतौ)

प्राप्ताशिषश्च शिवयोः परिपूजनान्ते
काशीं समेत्य सुपठन् कुलचन्द्रशर्मा।
लोकद्वयेऽपि शुभदं शुभकर्म कर्तुं
सख्यं कृतं कवितया गुरुलब्धविद्यः।।१।।

मित्रैर्जनैः सह गतः कवितां वरीतुं
पाणिग्रहे परिचयं समदाद् जनोऽन्यः।
किं किं ततः समभवत् कविताऽकरोत् किं
को निर्णयः समभवत् समये समीते।।२।।

छिनत्ति शब्दान् सरसान् भिनत्ति शब्दज्ञ एषोऽपि च नीरसोऽस्ति।
मुहुर्मुहू रुक्षदान् प्रयुङ्क्ते तर्कज्ञ एषोऽपि च कर्कशोऽस्ति।।३।।

मीमांसकज्ञोऽपि न रोचते मे जहामि धर्मज्ञमिमं सुदूरात्।
सज्ज्योतिषं छान्दसमुद्विजेऽहं वृणोमि काव्यज्ञमिमं सहर्षम्।।४।।

सौन्दर्यशास्त्रं त्रिविधं लयं यो छन्दः सतालं विविनक्ति धीरः।
तौर्यत्रिकं नाट्यमिदं प्रयुङ्क्ते तेनैव साकं रमते मनो मे।।५।।

सर्वज्ञ एषः कवितारसज्ञो विचारशीलः प्रतिभाति मेऽद्य।
इतीरयित्वा कविता वृणीते काव्यज्ञमेनं कुलचन्द्रवर्यम्।।६।।

सोऽयं वरो गलितकुन्तलकेशपाशा-
लङ्कारमाल्यरहिता महितां वराकीम्।
मामुद्धरेच्च विरसां सरसां प्रकुर्यात्
नानाविचित्रकृतमण्डनमावहेत् किम्।।७।।

सोऽयं वर: प्रियतमां नववस्त्रयुक्तां
लोलालकां कनकमाल्यसमेतवक्षाम्।
सिन्दूरविन्दुपरिशोभितभालभागां
संस्कारयेदपि न किं जुषते पुनर्माम्।।८।।

सोऽयं वरो विपुलसद्मनिरत्नदीप-
मालाललामपटलाधिकपाटलायाम्।
प्रस्तौति मां सरससज्जनसेवितायां
लज्जावनम्रनयनामिह किं सभायाम्।।९।।

दृष्ट्वैव मां प्रणयिनीं मृगशावकाक्षीं
पीयूषपूर्णकुचकुम्भयुगं धरन्तीम्।
आभूषणध्वनिगुणां रसभावपूर्णां
संसेवते करमुपैतु वरो ममाऽस्तु।।१०।।

एतादृशीमलसहंसगतिं सुवर्णां
लोलामशोकनवपल्लवरक्तहस्ताम्।
शृङ्गारनाटकरसोत्तमपानपात्रीं
शुक्ल: कवि: करमुपैतु वरो ममाऽस्तु।।११।।

आयाहि शुक्लकविते! निकटे मदीये
पूर्णेन्दुसुन्दरमुखं तव लोक्यते यत्।
आभूषणै रसगुणैरिहशीलवृत्तै:
प्रस्तौमि रञ्जनकरं तव रूपमेतत्।।१२।।

आयाहि मे सुकविते कलमे निवासं
कृत्वाऽथ मत्सहचरी भव शुक्लरूपे!
त्वं मे मनोऽन्तरगता भव भाववाहा
त्वां प्रापयामि सरसां सुकृतां समाजे।।१३।।

त्वां चारुचन्द्रवदनां कमलायताक्षीं
सत्यां कृतिं भुवनसुन्दरभक्तिभावाम्।
रामाश्रितामपि च कृष्णकथानुरूपां
त्वां प्रापये सुकृतिनां कृतिनां समाजे।।१४।।

भद्रेऽनवद्यकविते! मुखरा न भूयाः
सत्सेविते! सदसि ते स्थितिमुन्नयामि।
त्वन्माध्यमेन मधुरं मथुराधिनाथं
सत्सेवनं प्रकुरुते कवितावरोऽयम्।।१५।।

भागीरथीसदृशसंस्कृतकाव्यवाणी
नीलालकेव यमुनानयपालवाणी।
सारस्वतं कविवरं कुलचन्द्रमेतुं
स्नातुं मनोऽभिलषतीह प्रयागमेतुम्।।१६।।

कालिदासभवभूतिसुबन्धुवाणभट्टकवितेव मनोज्ञा।
रीतिवृत्तिसहिता गुणभावालङ्कृता सुमधुरा सरसापि।।१७।।

शास्त्रधर्मकुशला कुलचन्द्रशर्मकर्मजनिता कवितेयम्।
सम्यगत्र पठने मन एतत् वाञ्छतीति न तथाप्यनुभूतम्।।१८।।

❊❊

## १३३. वन्दनायुगलम्

(नेपालीभाषानूदितम्)

कुलचन्द्र! त्वमाकाशे पूर्णचन्द्र इवोदिते।
सर्वेऽपि कवयो मन्दास्तारा इव चकासते।।१।।

दुर्बलेनापि देहेन वाचा मधुरया कथम्?
कविवीरानधःकर्तुं समर्थः कीदृशं बलम्?।।२।।

प्रज्ञा श्रुतवती मेधाशालिनी प्रतिभा तव।
आस्तामेते बलं ते हि कवितारचनात्मिके।।३।।

संस्कृते शुद्धकविताः शुक्लभावसमन्विताः।
रसमाधुर्यसम्पूर्णा रीतिवृत्तिरलङ्कृताः।।४।।

नेपाल्यामपि सरसाः सरला भावबोधिनीः।
क्षमोऽसि कविताः कर्तुं कुलचन्द्राय ते नमः।।५।।

भाषा-संस्कृति-संस्कार-मर्यादा-कुलधर्मसु।
उच्चस्तरीयाः कविताः सन्ति तुभ्यं नमो नमः।।६।।

पदवैभवमाधुर्यरीतिवृत्तिगुणेषु च।
रसालङ्कारभरिताः कवितास्ते नमो नमः।।७।।

न कोऽपि दृश्यतेऽन्योऽत्र तव वाग्वैभवैः समः।
गुणिने महनीयाय कुलचन्द्राय ते नमः।।८।।

व्याख्या-विस्तार-सारांश-कवितारचनादिषु।
आयुर्वेदविधिज्ञोऽसि कुलचन्द्राय ते नमः।।९।।

रामायणं भागवतं लक्ष्यीकृत्य त्वया कृतम्।
'वन्दना युगलम्' काव्यकर्त्रे तुभ्यं नमस्कृतम्।।१०।।

---

(कुलमा चन्द्रमाजस्ता कुलचन्द्र उदाउँदा।
सारा कविहरू तारातुल्य छन् पिल्पिलाउँदा।।१।।

थियौ शरीरका दुब्ला-पातला, अति निर्बल।
पछार्‍यौ 'कवि हुँ भन्नेलाई' तिम्रो थियो बल।।२।।

प्रज्ञा श्रुतवती मेधाशालिनी प्रतिभा थियो।
त्यसैले कविता राम्रा लेख्न सक्ने कला दियो।।३।।

लेख्यौ संस्कृतमा शुद्ध कविता शुक्ल भावका।
अलङ्कार-चमत्कार-रस-माधुर्यपूर्णका।।४।।

नेपाली रसिला राम्रा सजिला कविता तमः।
मनबाट हटाएर स्वच्छ पार्छन् नमो नमः।।५।।

भाषा-संस्कृति-मर्यादा-संस्कार-कुलधर्ममा।
उच्च छन् कविता तिम्रा तिमीलाई नमो नमः।।६।।

रीति वृत्ति र माधुर्य पदको योजना पनि।
अलङ्कार गुणोत्कर्ष मिलेका छन् नमो नमः।।७।।

पदसंयोजना गर्ने तिमीजस्तो यहाँ छ को?
धनी अतुल्य गुणका तिमीलाई नमो नमः।।८।।

व्याख्या विस्तार सारांश कविता रचनादि र
आयुर्वेद विधिज्ञाता तिमी हौ, गर्दछौँ नमः।।९।।

श्रीरामायणलाई र श्रीभागवत 'वन्दना-।
युगलम्' कविता लेख्ने तिमीलाई छ वन्दना।।१०।।)
(कुलचन्द्रस्मृतिपुरस्कारद्वारा पुरस्कृता कविता)

❊ ❊

## १३४. अमरकोशभूमिकायाम्

वरोऽयं शब्दकोशोऽस्ति नामलिङ्गानुशासनात्।
विद्वद्वरामरसिंहनेपालकविनिर्मितः।।१।।

विदुषामरसिंहेन पूर्वं काण्डत्रयं कृतम्।
ततश्चतुर्थकाण्डं तु कुलचन्द्रेण निर्मितम्।।२।।

कुलचन्द्रकृता टीका नेपालीभाषयाऽऽवृता।
मुद्रणे समशोधीयं लक्ष्मीकान्तेन धीमता।।३।।

जिज्ञासूनां पाठकानां छात्राणां चोपकारकम्।
भूयाद् विद्यावर्द्धनार्थं नामलिङ्गानुशासनम्।।४।।

रामाश्रम्या टीकया भूषितोऽयं
रम्यः कोषो नामलिङ्गानुशास्ता।
नैपालीयः कोविदश्चामरोऽपि
कोषेणानेनैव वर्वर्ति लोके।।५।।

कोषञ्चेमं मुद्रणार्थेऽनुलग्नो
विक्रेताऽसौ रत्नभण्डारनामा।
मह्यं प्रादात् सादरं शोधकाय
दृष्ट्वा चैनं नूत्नसंशोधनार्थम्।।६।।

❊❊

## १३५. विवाहविषयः

बुधजनो विवहेन्न कदाप्यथ
विवहते विवहेदसगोत्रिकाम्।
स न पुनर्विवहेत् प्रकरोति चे-
दभिनवां विवहेदनुकूलिकाम्।।१।।

❊❊

## १३६. प्रवृत्तिनिवृत्ती

सम्भवेद्रूपलावण्यं रमण्याः सुमनोरमम्।
मनोरमा रमातुल्या सा रमा रमते(ऽ)चिरम्।।१।।

भालेन शशिनं, वाचा कोकिलं, नयनैर्मृगीम्।
कीरं नासिकया धत्ते सा प्रियं रमते(ऽ)चिरम्।।२।।

शिखिनं कुन्तलैर्धत्ते कण्ठे शङ्खोऽतिशोभते।
कर्णयोः कुण्डलौ रम्यौ सा रमा रमते(ऽ)चिरम्।।३।।

शोभमानकरा रम्या सर्वा रेखा विराजते।
पीनौ पयोधरौ यस्याः सा रमा रमते(ऽ)चिरम्।।४।।

कुन्दकुड्मलदन्ताग्रा गौराङ्गी सस्मितानना।
आज्ञापरा वाङ्मधुरा सा प्रियं रमते(ऽ)चिरम्।।५।।

पतिसेवापरा नित्यं पतिकार्यसमुत्सुका।
तुष्टे तुष्टा तथा कष्टे दुःखिनी रमते(ऽ)चिरम्।।६।।

यस्याः कोमलगात्राणि वदनं कमलायते।
कोकिला वचसा, गत्या हंसी चेद् रमते प्रियम्।।७।।

सुशीला सरसा श्यामा न-वा-पी-न-पयोधरा।
भूयाद् वसुमती रामा काष्ठमण्डपभूरिव।।८।।

निर्गतं रूपलावण्यं लास्यभङ्गो विनिर्गतः।
सा रमा सरमा जाता कथं सा रमते(ऽ)चिरम्।।९।।

भाले न शोभते चन्द्रो वाचा काको जितो यया।
स्थूलाधराऽवभ्रटा चेत् कथं सा रमते प्रियम्।।१०।।

खर्वदेहाऽखर्ववाचा लघुनेत्रा सरोमिका।
समुन्नतोत्तरोष्ठा च सा कथं रमते(ऽ)चिरम्।।११।।

विरूपा चपलाऽतीव दृश्यते वानरीसमा।
आकृत्या च प्रकृत्या च कथं सा रमते(ऽ)चिरम्।।१२।।

काली करालवदना कर्कशाऽप्रियवादिनी।
आज्ञाऽवमानिनी क्रूरा कथं सा रमते प्रियम्।।१३।।

पतिसेवासु विमुखा छिद्रान्वेषणतत्परा।
वावदूकाऽतिपिशुना कथं सा रमते प्रियम्।।१४।।

यस्या रुक्षाणि गात्राणि कर्कशानि वचांसि चेत्।
विरूपा राक्षसीतुल्या नैव सा रमते प्रियम्।।१५।।

दु:शीला नीरसा रुक्षाऽन-वा-पी-न-पयोधरा।
कान्ताकान्तेव दुर्योज्या मा भूत् कान्तारभूरिव।।१६।।

* *

## १३७. यथा राजा तथा प्रजा

दुष्टे राज्ञि क्व प्रजानां सुखं स्यात्
चौरा दुष्टा भ्रष्टमुख्या भवन्ति।
दीना: खिन्ना: क्लिष्टतां यान्ति शिष्टा:
हृष्टास्तुष्टा: पुष्टतां यान्ति दुष्टा:।।१।।

* *

## १३८. प्रजातन्त्रम्

लोका लोकाँल्लोकहेतोर्विविच्य
नेतॄन् यान् वै संसदि प्रेषयन्ति।
नेतारस्ते चायनं लोकवर्त्म
कृत्वा नीतीर्नागरान्निर्दिशन्ति।।१।।

निर्लोभास्ते नेतृवर्गा भवेयु-
र्लोभाद्देशं निश्चितं पातयन्ति।
लोभाविष्टान्नेतृवर्गानवश्यं
लोका: सर्वाँल्लोकयित्वा त्यजन्ति।।२।।

* *

## १३९. राजानं ज्ञानेन्द्रं प्रति

'नैपालानां दलानां सहमतिमधिकृत्यैव राजा करोतु
नेपाले शासनं स्वं विपुलयतु सदा धर्मरक्षां करोतु।
वेदानां ब्राह्मणानां भवतु सुखकरो लोकरक्षाकरोऽस्तु
भूयाद् राजानुकूलो मम वचसि दयादृष्टिविश्वासकोऽस्तु।।१।।

नो चेद् राजा ममाज्ञामपनयति वृथैवास्ति मत्वा हठेन
तद् वंश्यानामनिष्टं भवति च जनता याति सत्तां क्रमेण।
तस्माद् राजाभिमानं परिहरतु निजं लोकतन्त्राधिपोऽस्तु
गत्वा संस्मारितोऽसौ स्वयमपि सुकृतं येन गन्ता तथास्तु'।।२।।

वारं वारमनेकपद्यरचनैः संस्मारितो भूपतिः
किञ्चिन्नैव शृणोति मत्सुवचनं तस्मान्न तस्योन्नतिः।
भूदेवानवमानयेद्यदि नृपः सन्मन्त्रदाँस्तद्धितान्
तं नैवोदयमादिशन्ति पितरो देवाः क्षमन्ते न हि।।३।।

❊ ❊

## १४०. मुग्धताहेतुः

स्तुत्या प्रसीदन्ति सदा महाजनाः
प्रभूतवित्तेन वणिग्जनाऽधमाः।
जपैः प्रसीदन्ति च देवतोत्तमा
भूताः पिशाचा बलिभिर्निशाचराः।।१।।

एकोनविंशयुतविंशतमाक्षराभ्यां
शब्दार्थयोर्न सकलं जगदस्ति मुग्धम्।
मायामहापुरुषनिर्मितपादपस्य
पुष्पे फले सुमनसोऽप्यभवन् विमुग्धाः।।२।।

❊ ❊

## १४१. नृत्यम्

प्रह्लादो गीतकर्ता नटवरसदृशः कोषराजोऽभिनेता।
दुर्गा वाद्यप्रवीणः स्मितमुखवचसा नर्तकोऽस्ति प्रयागः।।
लक्ष्मीकान्तश्च वंशीकृतललितरवस्तालिकस्तोयराजः।
टङ्कष्टङ्कारकर्ता मुनिजनविहितं दृश्यतां नृत्यमेतत्।।१।।

❊ ❊

## १४२. स्वयंवरनिमन्त्रणा (टङ्केश्वरार्थम्)

श्रीविक्रमार्कान्नृपतेः प्रसिद्धे खषण्णभोलोचनसम्मितेऽब्दे।
मासे शुचौ शुक्लतिथौ चतुर्थ्यां प्रातः सुलग्ने गुरुवासरे च॥१॥

अद्य प्रशान्ताय वराय सम्यक् स्वयंवरामन्त्रणमस्तु मेऽपि।
पुत्रीमनो येन जितं सहर्षं वरः स आयातु स्वयंवरार्थम्॥२॥

पुत्री मदीयास्ति प्रभाऽभिधा या शिक्षावयःशीलगुणैः प्रशान्तम्।
मनोवचःकर्मभिरावृणीते प्रशान्त! आयातु स्वयं वरार्थम्॥३॥

स्वयंवरोऽस्या भविता तदर्थं वरार्थिनीं मे तनयां समालाम्।
सोऽयं भवानेव वधूं वरीतुं स्वयं समायातु स्वयंवरार्थम्॥४॥

विचिन्तयन्तीं वरमेव कन्यकां सम्प्रार्थयन्तीं नितरां स्वयंवरम्।
सोऽयं वरोऽद्यैव भवान् गृहे मम स्वयं समायातु स्वयंवरार्थम्॥५॥

* *

## १४३. स्वयंवरामन्त्रणम् (कोषराजकृते)

श्रीविक्रमार्कान्नृपतेः प्रसिद्धाद् भूषण्णभोलोचनसम्मितेऽब्दे।
राधे चतुर्थी सितपक्षयुक्ता कीटे सुलग्ने भृगुवासरेऽस्याम्॥१॥

वराय तुभ्यं विनयाय सम्यक् स्वयंवरामन्त्रणमर्पयावः।
जितं त्वया तद्धृदयं सहर्षं तस्मात्त्वमायाहि स्वयंवरार्थम्॥२॥

सरोजिनी शीलवती सुपुत्री शिक्षा-वयः-शील-गुणैर्युतं त्वाम्।
मनो-वचः-कर्मभिरावृणीते तस्मात्त्वमायाहि स्वयं वरार्थम्॥३॥

स्वयंवरोऽस्या भविता तदर्थं वरार्थिनीं नौ तनयां समालाम्।
सोऽयं भवानेव वधूं वरीतुं स्वयं समायातु स्वयंवरार्थम्॥४॥

विचिन्तयन्तीं वरमेव कन्यां सम्प्रार्थयन्तीं सुतरां स्वयंवरम्।
सोऽयं वरस्तत्र विवाहमण्डपे स्वयं समायातु स्वयंवरार्थम्॥५॥

* *

## १४४. स्वयंवरामन्त्रणपत्रम् (कोषराजकृते)

आजीवाब्धिमुपागतं विकसताद् रम्यं सरोजं चिरम्
उत्फुल्लोऽपि सरोज एष लसतां प्राप्नोतु कादम्बिनीम्।
उद्वाहेऽद्य वधूवरौ विलसतां गौरीश्वरौ रक्षताम्
आजीवं पतिमानसाम्बुदमयी कादम्बिनी वर्षताम्।।१।।

श्रीविक्रमार्कान्नृपतेरतीताद् द्विषण्णभोलोचनसम्मितेऽब्दे।
मासे शुचौ यन्नवमे दिनाङ्के मेषे सुलग्ने गुरुवासरेऽस्मिन्।।२।।

पक्षेऽसिते रात्रिगते द्वितीयातिथौ शुभर्क्षे मकरस्थचन्द्रे।
विवाहकार्यक्रमपूर्ववर्तिस्वयंवरामन्त्रणमर्पयावः।।३।।

तुभ्यं सरोजाय वराय सम्यक् स्वयंवरामन्त्रणमर्पयावः।
जितं त्वया तद्धृदयं सहर्षं भवान् समायातु स्वयं वरार्थम्।।४।।

कादम्बिनी शीलवती सुपुत्री शिक्षावयःशीलगुणैर्भवन्तम्।
मनोवचःकर्मभिरावृणीते भवान् समायातु स्वयं वरार्थम्।।५।।

स्वयंवरोऽस्या भविता त्वदर्थं वरार्थिनीं नौ तनयां समालाम्।
सोऽयं भवानेव वधूं वरीतुं स्वयं समायातु स्वयंवरार्थम्।।६।।

विचिन्तयन्तीं वरमेव कन्यां समार्थयन्तीं सुतरां स्वयंवरम्।
सोऽयं वरस्तत्र विवाहमण्डपे स्वयं समायातु स्वयंवरार्थम्।।७।।

❊ ❊

## १४५. स्वयंवरामन्त्रणपत्रम् (दिनेशस्य कृते)

श्रीविक्रमार्कान्नृपतेः प्रसिद्धात् त्रिषण्णभोलोचनसम्मितेऽब्दे।
राधे शनौ शुक्लतिथौ नवम्यां दिने त्रयोविंशतिगे मघायाम्।।१।।

वृषे सुलग्नोदयगे मुहूर्ते षडष्टयोर्वादनमन्तराले।
सिंहस्थिते चन्द्रमसि प्रभाते स्वयंवरामन्त्रणमर्पयामः।।२।।

कन्या सुजाता शुभनामधेया गौरी समा या महिमोद्भवाऽऽस्ते।
शिवाभिषेकाय वराय तुभ्यं स्वेष्टार्पयीप्सुर्वरमालिकां, सा।।३।।

विद्यावय:शीलगुणैरुपेता समानशीलं वरमर्थयन्ती।
स्वयंवरोऽस्या भविता तदर्थं स्वयं समायातु स्वयंवरार्थम्।।४।।

* *

## १४६. स्वयंवरामन्त्रणपत्रम् (धीमन्तस्य कृते)

कन्याऽस्मदीया कुलशीलशिक्षारूपैरुपेता गुणगौरवायिता।
दुर्गाभिधा तद्गुणमादधाना वरो महानन्दमहेश्वरायित:।।१।।

श्रीविक्रमार्कान्नृपतेरतीतात् त्रिषण्णभोलोचनसम्मितेऽब्दे।
पक्षे सिते सोमदिने तपस्ये गौरीतिथौ वृश्चिकलग्न आगते।।२।।

विवाहभव्योत्सवकर्मपूर्वके वधूवरेच्छावरणे विधित्सिते।
सोऽयं वर: स्वीयसमस्तबन्धुभि: स्वयं समायातु स्वयंवरेऽत्र हि।।३।।

भव्ये विवाहे शुभवेषरोचनौ परस्परालोकनलोललोचनौ।
वधूवरौ प्रेमपरीतलोचनौ गौरीश्वरौ पालयतां चिरन्तनौ।।४।।

* *

## १४७. आमन्त्रणम्

संस्कारा विविधा: सन्ति श्रुतिस्मृत्यनुमोदिता:।
तेषामाचरणं धर्मो ब्राह्मणानां विशेषत:।।१।।

धराषडभ्रनयनमिते वैक्रमवत्सरे।
वैशाखे व्रतबन्धस्य लग्नेऽष्टादशके दिने।।२।।

भ्रातुर्मे सूर्यकान्तस्य पुत्रो गौरवनामक:।
तस्योपनयनं कर्म करणीयं सगौरवम्।।३।।

आशीर्वाचः प्रदातव्या स्ववर्गैरिति बोधयन्।
एतदामन्त्रणं पत्रं भवतेऽर्पयतेऽधुना।।४।।

❊ ❊

## १४८. कन्यार्थिनः प्रति प्रश्नः

के यूयं विगतस्पृहा इव किमु विश्रामलक्षा इव
अस्माकं किमपि प्रदानमनसो नेतुं किमप्यागताः?।
कार्यञ्चापि निगद्यतामथ वयं कर्तुं समर्था यदि
इष्टं किञ्चिदपीह वस्तु भवतां दद्मो वयं कथ्यताम्।।१।।

❊ ❊

## १४९. आमन्त्रणपत्रे मुद्रणार्थम्

भारद्वाजकुलोद्भवा गुणवती भक्तिः सुशीला वधूः
आत्रेयोऽस्ति विनोदनामविदितः श्रीमान् सुशीलो वरः।
उद्वाहेऽत्र वधूवरौ विलसतां तावाशिषौ प्राप्नुताम्
गौरीशाववतां सुखं वितनुतामायुः शतञ्जीवताम्।।१।।

इष्ट्वा देवान् सुकृतविभवाँस्तैरवाप्ताशिषौ द्वौ
भक्तिः कन्या वरगुणयुतोऽसौ विनोदः कुमारः।
गौरी पूर्णेन्दुवदनरुचिः शीलसौजन्यसिन्धुः
पायान्नित्यं नववरवधूद्वन्द्वमेतच्च शम्भुः।।२।।

भक्तिः सुशीला सगुणा सुशिक्षिता
गङ्गा विनोदाब्धिमुपैतुमीप्सिता।
वधूवराभ्यां भवतां शुभाशिष
उद्यत्प्रयागे यमुनागिरायताम्।।३।।

अस्मद्भक्त्यैकगङ्गाया विनोदोदधिसङ्गमे।
यमुनाशारदायन्तां प्रयागे वः शुभाशिषः।।४।।

❊ ❊

## १५०. स्वयंवरामन्त्रणपत्रम्

अज्ञातसृष्टिस्थितिरूपकाय सर्वात्मभावाय मनोभवाय।
नमोऽस्तु देवाय वधूवरार्थं शक्त्यै विभूत्यै वरमर्थयामः।।१।।

भक्तिः सुरूपा सगुणा रमेव शिक्षावयःशीलविनीतभावा।
गेहेऽस्मदीयेऽस्ति वधूर्नवीना वरं रमाकान्तमभीप्सतीव।।२।।

श्रीविक्रमार्कान्नृपतेरतीतात् त्रिषण्णभोलोचनसम्मितेऽब्दे।
मासे शुचौ शुक्लतिथौ दशम्यां सिंहे सुलग्ने गुरुवासरेऽत्र।।३।।

अतस्तदर्थं भविता समाजः श्रीमद्रमाकान्तविनोदनाम्ने।
शिक्षावयःशीलगुणैर्युताय स्वयंवरामन्त्रणमर्पयामः।।४।।

भक्तिः स्वयं शीलवती सुपुत्री शिक्षावयःशीलगुणैर्भवन्तम्।
मनोवचःकर्मभिरावृणीते तस्माद् भवानेतु स्वयं वरार्थम्।।५।।

स्वयंवरोऽस्या भविता तदर्थं वरार्थिनीं यां धृतहस्तमालाम्।
स्वयं वरः स्वात्मवधूं वरीतुं स्वयं समायातु स्वयंवरार्थम्।।६।।

विचिन्तयन्तीं वरमेव कन्यां सम्प्रार्थयन्तीं सदृशं वरार्थम्।
स्वयंवरोऽस्तीह विवाहयज्ञे स्वयं समायातु स्वयंवरार्थम्।।७।।

शिवस्य गौरीव वधूर्नवीना शचीव शक्रस्य समानभावा।
लक्ष्मीरिवाऽऽस्तां पुरुषोत्तमस्य सिद्धिर्गणेशस्य यथा तथास्तु।।८।।

**

## १५१. विवाहे वरस्वागतम्

कनकरजतचित्रवेदिकायां
परिकृतरत्नविचित्रवीथिकायाम्।
समुपयातु वरः स्वयं सभायां
सुरुचिरजालगवाक्षशोभितायाम्।।१।।

कनकवलयहारिभूषिताङ्गं
सुरवरसममात्मजनाग्रशोभम्।
दिवसकरकरप्रभं ज्वलन्तं
कनकनिभं नरवरमानयध्वम्।।२।।

**

## १५२. पुत्रीविवाहस्मृतौ

भक्त्याः पाणिग्रहणसमयाद् द्वादशाब्दा व्यतीताः
मन्ये दुःखं किमपि न हि तां तद्धिता सुव्यवस्था।
द्वौ सन्तत्यौ करयुगभवौ सर्वकारीयसेवा-
मासाते द्वौ स्वगृहमभितो दम्पती लग्नचित्तौ।।१।।

एवं नव्यं गृहमपि तयोः शान्तिसौख्ये सहायौ
वासस्थानं गिरिशगिरिजामन्दिरप्रान्तमस्ति।
सख्यौ स्यातामनुचरसमौ शान्तिसौख्ये सदैव
स्यातामेतौ मुदितहृदयौ चाऽयतौ शम्भुभक्त्या।।२।।

आषाढमासस्य चतुर्दशे गते
पाणिग्रहोऽभूदिह भावनायाः।
नवानि वर्षाणि गतानि चाद्य
जाता सपुत्रा ससुखा सभर्तृका।।३।।

भूयाद् भविष्येऽपि सुखं सदैव
सन्तानसौख्यं च समृद्धिमेवम्।
देहो निरोगो भवताच्छतायुः
पुत्री सहर्षा ससुखा सभर्तृका।।४।।

**

## १५३. पूजा नित्या

पुष्पाणि भ्रमरैः फलानि शकुनैस्तोयानि मीनैरपि
भुज्यन्तेऽविरतं सदा तदपि ते तुष्टा न दृष्टाः क्वचित्।
ये देवानिह पूजयन्ति सततं पुष्पैः फलैश्चाक्षतै-
र्धूपैर्दीपसमन्वितैर्गृहभवैर्नैवेद्ययुक्तैर्जलैः।।१।।

ये नित्यं कुसुमादिभिः सनियमैर्भक्त्याश्च सम्पूजिताः
सन्तुष्टाः प्रभवन्ति भावभरिता देवा हि तेऽस्मत्कृते
इत्थं चापि न कुर्वते यदि जना वाच्यं तदर्थं किमु?
भ्रातः पूजय तान् सदाऽर्पय मनस्त्वं वैभवं प्राप्नुयाः।।२।।

यथाऽस्मद् भोजनं नित्यं सुभोज्यैरुपचर्यते।
तथा पूजाऽपि देवानां नित्यं कुर्यादतन्द्रितः।।३।।

* *

## १५४. का विद्या?

का विद्या कवितां विनेति गदता पुंसा न किं चिन्तितं
साहित्ये सुकुमारशब्दचयनं पाण्डित्यदिग्दर्शनम्।
नीतिं धार्मिकमान्यतादिविनयं प्रौढिप्रसादादिकं
सालङ्काररसान्वितं ध्वनिचमत्कारं दरीदृश्यते।।१।।

का विद्या कवितां विनेति वदता पुंसाऽप्ययं निश्चितः
तस्य प्रस्तुतलेखकस्य कविता सर्वात्मना कीदृशी?।
छन्दोव्याकरणादि काव्यमहिमाप्रौढिप्रकर्षं न वा
साहित्यं रसभावसान्वयपदाऽलङ्कारविच्छित्तिकम्।।२।।

का विद्या कवितां विनेति वदता पुंसाऽप्यसौ लक्ष्यितः
कोऽयं काव्यकरः पुमान् स्वविषयं जानाति सम्यङ् न वा।
सत्तत्त्वं किमिहाऽसति प्रतिकृतौ तस्य स्थितिः स्यात् कथम्
नष्टे वापि जरां गते प्रतिकृतौ कुत्रास्ति गम्यं सतः।।३।।

मोहक्षयो भवति यत्र यदा तदैव
'मोक्षो' भवेद् बुधजनस्य परस्य चापि।
नो चेत् तदा न हि भवेत् पठितस्य साधो-
रन्यस्य वापि गतिरन्यतरा सदैव।।४।।

ज्ञानं भौतिकमध्यात्मं द्विधा लोके विभात्यपि।
अध्यात्मं मरणान्तेऽपि मरणान्तं हि भौतिकम्।।५।।

द्विविधं भौतिकञ्चापि सैद्धान्तिकमतः परम्।
प्रयोगानुभवैर्युक्तं ज्ञानं भारः क्रियां विना।।६।।

विद्यया जन्मना चेति लोके वंशो विभात्यपि।
प्रमाणपत्रसन्तानरहिक्षतोऽयं जरद्गवः।।७।।

विद्यया जन्मना चेति द्विधा वंशैर्न राजते।
प्रमाणपत्रसन्तानैश्छायाचित्रे विराजते।।८।।

दीनबन्धो! कृपासिन्धो! मनो मेऽतीव चञ्चलम्।
तदादाय कथं कुर्यां स्थिरं त्वच्चरणाब्जयोः।।९।।

अक्षिणी भ्रमरौ कृष्णौ मदीयौ बहिरुद्गतौ।
त्वदीयचरणाम्भोजचञ्चलौ गुञ्जनोत्सुकौ।।१०।।

कृपया तद् द्वयं शीघ्रं त्वत्पादकमलद्वये।
कुरुष्व लीनौ मनसः प्रकुरुष्व विपर्ययम्।।११।।

अन्यथा वर्तमानोऽपि लोके लोकायतिं चरन्।
प्राप्नुयामिह सन्तोषं परत्र शरणं हरेः।।१२।।

❋❋

## १५५. गृहस्थगीता

किं वैभवमिति प्रश्ने ह्यातिथ्यं गृहवैभवम्।
का प्रतिष्ठेति चेत् प्रेमवर्द्धनं गृहवर्द्धनम्।।१।।

का शोभा चेति प्रश्ने तु व्यवस्था गृहशोभिनी।
समाधानं सदाकाले गृहशान्तिकरं सुखम्।।२।।

सदाचारो गृहस्थस्य सुवासो भक्तिवर्द्धकः।
एतादृशे गृहे नित्यं प्रभोर्वासो भवेत् सदा।।३।।

अपव्ययो न कर्तव्य ऋणं चेत्ते विचारय।
पापं भवति चेत्तर्हि न कर्तव्यं समर्जनम्।।४।।

क्लेशो भवति चेदन्यान् दुर्वाच्यं न वदेदिह।
रोगश्चेद् भोजनं चिन्त्यं पथ्याहारं समाचरेत्।।५।।

चिन्ता भवति चेत्तर्हि जीवितुं नैव शक्यते।
दशप्रश्नसमाधानात् सुखी भवति जीवनम्।।६।।

गृहे गृहस्थगीतेयं कण्ठमालेव धार्यताम्।
धृत्वा कर्माणि कुर्वीत गार्हस्थ्यसुखवर्द्धिनी।।७।।

गृहस्थितोऽपि सुजनो धर्मकर्मादिचिन्तनम्।
कुर्यात् कोऽहमिहा यातः कुतो गम्यं कदा पुनः।।८।।

❊❊

## १५६. जीवनदर्शनम्

किं जीवनं दर्शनमुच्यतेऽत्र
विलिख्यते जीवनदर्शनं किम्।
यज्जीव्यते तत् प्रथितं न जीवैः
किं जीवनं तन्मनुजा इदानीम्।।१।।

निश्वासप्रश्वासगतागताभ्यां
भस्त्रेव किं जीवनमत्र साधु।
किं लोचनोन्मेषनिमेषमात्रं
तज्जीवनं सार्थकमस्ति किं वा।।२।।

किं वा मुखादथ परानथवा स्वकीयान्
गालिं प्रदाय नरजीवनमस्ति सार्थम्।
किं वा पयोदधिघृतोदकव्यञ्जनादि-
खाद्यैर्युतं स्वमुदरं? न हि जीवनं तत्।।३।।

किं वा कलत्रसुतवित्तसुरक्षणादि-
कार्ये कृते भवति जीवनमत्र सार्थम्।
यद् वा स्वपादयुगले परिचालिते किं
तज्जीवनं न भवतीह मतं ममास्ति।।४।।

सत्योदका शीलतटानुलग्ना
नदीव यत्सिञ्चति जीवमन्यम्।
तज्जीवनं जीवनमुच्यते यत्
प्रेम्णा तटस्थानपि जीवयच्चेत्।।५।।

किं दर्शनं दृष्टिरथेह लोचने
त्वग्-रक्तमिश्रे न पदार्थबोधके।
तद्दर्शनं मेऽस्तु विचारबोधक-
मलब्धलाभादथ लब्धरक्षकम्।।६।।

यज्जन्मना नैव धृतं पुटञ्चेत्
कथं नु गोपायति वित्तमद्य।
लोभात् परस्यापि धनं गृहीत्वा
स्वयं विनश्यन् कथमत्र रक्षेत्।।७।।

न स्वापवादो न परापवादो
नात्मप्रशंसा न परप्रशंसा।
मानापमानावपि नेप्सितौ ता-
वभावलाभावपि नेक्षितौ चेत्।।८।।

मिष्टं न मिष्टं च मयाऽत्र भोज्यं
रम्यं न रम्यं च मयेह धार्यम्।
वासः कुटी वा सदनं सभा वा
गुहा भवेद् वा वसनाय मेऽस्तु।।९।।

यद्यन्मिलेद् भाग्यवशात्तथा तन्
मिलेन्न वाभाग्यवशात्तथापि।
भक्ष्यं च भोग्यं ग्रहणीयमद्य
निर्लोभ एवास्तु ममात्मदर्शनम्।।१०।।

❊ ❊

## १५७. तीर्थयात्रासंस्मरणम्

कामाक्षी कामरूपा कनकमणिमयी सिद्धपीठे वसन्ती
भक्तोऽहं दूरदेशात्तव पदनिकटे दर्शनार्थं समीतः।
देहि त्वं दर्शनं मे मम हृदि गतयोः पादयोस्त्वां प्रपन्नो
वाग्देवी दिव्यरूपा मम हृदयगतां कामनां पूरयाशु।।१।।

नेपालादागतोऽहं बहुजनसहितः कोलकातानगर्यां
गङ्गायाः सागरे सङ्गमसरसि कृतस्नानकार्यान्निवृत्तः।।
स्वान् पितॄँस्तर्पयत्वा तदनु च कपिलस्याश्रमं दृष्टवाँस्तं
यं गत्वा गङ्गया स्वान् सगरनृपसुतान् मोचयामास राजा।।२।।

नेपालदागतोऽहं बहुजनसहितस्तज्जगन्नाथपुर्यां
स्नात्वाम्भोधौ पवित्रे शुचिवसनधृतः पूर्वजाँस्तर्पयित्वा।
पिण्डान् दत्वा सश्रद्धान् सविधिकुशतिलान् सादरं मत्पितृभ्यो
भुक्त्वा प्रेम्णा प्रसादं सकलजनयुतो लोकनाथं नतोऽस्मि।।३।।

नेपालादागतोऽहं बहुजनसहितो रामनाथं दिदृक्षु-
र्मीनाक्षीं सुन्दरेशं मधुरइनगरे सस्मितं दृष्टपूर्वः।
संयातो दक्षिणस्यां सकलजनयुतो यानमारुह्य कल्ये
स्नात्वाम्भोधौ दिनान्ते शुचिवसनधृतो रामनाथं नतोऽस्मि।।४।।

नेपालादागतोऽहं बहुजनसहितः पद्मनाभं दिदृक्षुः
पूर्वं कन्याकुमारीमुदधिपरिसरे स्नानपूर्वं प्रणम्य।
स्थित्वा रात्रौ ततोऽन्यद्दिवसमुपगतः केरलप्रान्तवर्ति-
श्रीदेवं पद्मनाभं प्रमुदितमनसा सादरं सन्नतोऽस्मि॥५॥

नेपालादागतोऽहं बहुजनसहितः पुट्टपर्तीनगर्यां
द्रष्टुं तं देवरूपं सकलजननुतं सत्यसाईस्वरूपम्।
प्रातः कन्याकुमारीनगरपरिसराद्रेलयानेन यातः
प्राप्तोऽन्यस्मिन्दिनादौ सकलजनयुतः साईदेवं नतोऽस्मि॥६॥

प्रशान्तिनिलयाद्गताः शिरडिसिद्धपीठस्थले
निवासभवने स्थिता उषसि तत्समाधिस्थले।
चतुष्पथविनिर्मिते विविधगोपुरैः संयुते
विशालशुभमन्दिरे नियमतः प्रविष्टा वयम्॥७॥

प्रभोश्चरितमद्भुतं श्रवण उत्सुकाः सादरं
भवद्भजनपूजने नमनदर्शने संस्थिताः।
गता वयमतः परं शनिजनुस्थले नासिके
शिवस्य शुभमन्दिरे नमनदर्शनार्थं ततः॥८॥

गत्वा गोदावरीतीरं दण्डकारण्यनिर्मितम्।
नासिकं पत्तनं प्राप्य दृष्टो रामाश्रमोऽपि च॥९॥

गोरक्षनाथादारभ्य तीर्थयात्रां समागताः।
स्वानां गृहं समायाताः षड्विंशतिदिनान्तरे॥१०॥

* *

## १५८. तीर्थयात्राप्रसङ्गः (२०७५)

यात्रायां समुपस्थितोऽद्य दिवसात् क्षेमङ्करं वाहनं
मार्गो मङ्गलकारको भवतु मे सर्वाः प्रसन्ना दिशः।
यात्रायां पवनोऽनुकूलगतिमान् स्वच्छं मनः स्यान्मम
विघ्ना यान्तु सुदूरतः प्रतिदिशं श्रीमान् गणेशोऽवतु॥१॥

अद्याहं भरतं पुरीं जिगमिषुः स्याद् वाहनं मङ्गलं
यात्रायां पवनोऽनुकूलगतिमान् रक्षत्वसौ वाहनम्।
सर्वाः सन्तु दिशोऽनुकूलपवना रक्षन्तु सर्वानिह
तत्राहं निवसामि मित्रभवने श्रीमान् गणेशोऽवतु।।२।।

सभासद्भिर्जनैश्चित्रवनमाकारितोऽप्यहं
कालीगण्डकिसाहित्यपरिषदाऽभिनन्दितः।।३

विगते दिवसे गैँडाकोटे फणिगृहे वसन्।
तीर्थयात्रां जिगमिषुर्गन्ता बुटवलं प्रति।।४।।

अद्य चित्रवनादेव बुद्धवल्लीं समागतः।
माया मातृगृहे वासो मायया सह सङ्गतः।।५।।

अद्य बुटवलस्थोऽहं श्वस्तने गन्तुमुत्सुकः।
पश्चिमायां दिशि हरिद्वारं गन्ताऽस्मि यानतः।।६।।

बुटवलान्नगरात् समुपागतः धनगढीनगरेऽद्यतने दिने।
धनगढीं निवसन् शिवजीगृहे मम निवासमभूत् ससुखेन हि।।७।।

धनगढीनगराद् गतवानहमिह महेन्द्रपुरीं समुपागतः।
पुनरितोऽपि च भारतदेशिकं जिगमिषुर्हरिपूर्वकपत्तनम्।।८।।

हरिद्वारे पुण्यतीर्थे गङ्गायाः पश्चिमे तटे।
तीर्थश्राद्धं सुविहितं गङ्गायां स्नानपूर्वकम्।।९।।

श्वस्तने दिवसे प्रातरावां गच्छाव यानतः।
उत्तराखण्डयात्रायां सुहृद्भिः सह सङ्गतौ।।१०।।

यामुनोत्तरयात्रायामद्य निष्क्रम्यते मया।
सहैव सहधर्मिण्या मायापुर्या हि मायया।।११।।

यामुनोत्तरयात्रायां देहरादूनदर्शनात्।
मन्सुरीपर्वते दृष्टं चित्रं सुन्दरपत्तनम्।।१२।।

ह्यस्तने यामुने तीर्थे विहिते स्नानतर्पणे।
ततो हि यमुनादेव्या कृते दर्शनपूजने।।१३।।

गाङ्गे तीर्थे समायातावावां मध्यन्दिने रवौ।
पितृसन्तर्पणं कृत्वा गङ्गाया दर्शनं कृतम्।।१४।।

अद्य तूत्तरकाशीतः केदारं प्रति निर्गतौ।
यावद्दिनमभूद् यात्रां वसयानात् समागतौ।।१५।।

उत्तरकाशीनगरात् केदारनाथयात्रार्थमायातौ।
दुर्गममार्गादधुना यानादुड्डीय सम्प्राप्तौ।।१६।।

कृतवन्तौ दर्शनमस्य केदारनाथस्य कृपयाऽद्य।
पुनरागतावावां हेलियानेन मार्गेणैव।।१७।।

केदाराद् गतवन्तावावां बदरिकाश्रमे सन्ध्यायाम्।
प्रातरेव शनौ दिने कृतं तर्पणं तीर्थश्राद्धम्।।१८।।

कृतमत्र दर्शनं सुन्दरमन्दिरे बदरीशस्य विष्णोः।
भगवतः कृपासिन्धोः कृपयास्यैव नाहं शक्तः।।१९।।

प्रत्यावर्त्य हरिद्वारे शान्तिकुञ्जे दिनत्रयम्।
आवां वसन्तौ साऽनन्दं हरिद्वारान्निवतर्तितौ।।२०।।

ततस्तु रेलयानेन मथुरां प्रतिनिर्गतौ।
गायत्रीमन्दिरे तत्र वसन्तौ दिनपञ्चकम्।।२१।।

मथुरानगरीमेत्य रङ्गनाथादिमन्दिरम्।
गोवर्द्धनं जन्मभूमिं बाँकेविहारिमन्दिरम्।।२२।।

ततश्च द्वारकाधीशं मयुनामतिसुन्दरीम्।
दृष्टवन्तौ मुदा युक्तावावां मुमुदितौ भृशम्।।२३।।

लक्ष्मीश्वरो मिश्र इति नामा निवृत्तशिक्षकः।
नेपालीयोऽत्र वसति स सहायोऽभवन्मम।।२४।।

चतुर्विंशे दिने ह्यावां रेलयानेन निर्गतौ।
आरभ्य मथुरां प्रातर्गोरक्षपुरमागतौ।।२५।।

गोरक्षपुरतोऽप्येवं सुनौली पत्तनान्तगौ।
आवां वसाधियानेन नेपाले सम्प्रवेशितौ।।२६।।

ततो बुटवलक्षेत्रे विश्रम्यावां दिनत्रयम्।
विंशाष्टौ दिवसे सुस्थौ काष्ठमण्डपमागतौ।।२७।।

सहायिका मे गृहिणी मायास्त्येव तया सह।
तीर्थाऽभिगमनं कृत्वा पुनरागतवान् गृहम्।।२८।।

**

## १५९. दुःखं पञ्चविधम्

दुःखं भवेत् पञ्चविधं न चान्यत्
रोगो हि तेषां प्रथमः समेषाम्।
ततस्तु स्वेष्टस्य वियोग एव
दुःखस्य हेतुस्त्रितया तु हानिः।।१।।

तुर्योऽपमानोऽपि च दुःखहेतु-
रज्ञानमप्यस्ति च दुःखहेतुः।
ज्ञानं भवेत् तद्विषये न तेषां
दुःखं यदि स्यादपि चाल्पकालम्।।२।।

रोगादनेकाद् भवतीह दुःखं
राज्ञः प्रजा वा धनिनो बुधाँश्च।
ततो हि दुःखं स्वजनाद् वियोगो
ह्यपूरणीयं भवतीह सत्यम्।।३।।

हानिर्यदि स्यात् स्वधनस्य किं वा
गृहस्य भूमेरपि गोधनस्य।
हर्षक्षयं तत् प्रकरोति नित्यं
तदेव दुःखं भवतीह सर्वान्।।४।।

दातुं न शक्नोषि परस्य मानं
तथापि शान्तो भव हेऽनुज! त्वम्।
यतोऽपमानोऽपि च दुःखहेतुः
परान् न दुःखीयति साधुशीलः।।५।।

दुःखं भवेत् पञ्चविधं हि तेषा-
मज्ञानमेवाऽस्ति विशेषदुःखम्।
ज्ञानं भवेत् तद् विषयस्य किञ्चिद्
दुःखं न किञ्चिद् भवतीह चिन्त्यम्।।६।।
(रोग, वियोग, नोक्सान, अपमान, अज्ञान)

शताधिकानि क्षतविक्षतानि दिनद्वयेऽस्मिन्निह जीवनेऽपि।
उद्विग्नचित्तेऽपि जरच्छरीरे प्रतर्जयन्तः परिपन्थिनः किम्।।७।।

* *

## १६०. जन्मोत्सवार्थे

भो भो मदीया अनुजा सवंशजा
जन्मोत्सवं कर्तुमनाः कदाप्यहो!।
सौरेण चान्द्रेण यदा मिलेद्दिनं
जन्मोत्सवं तद्दिनमेव कारयेत्।।१।।

यतो हि मज्जन्मदिनस्य वर्षे
सौरस्य चान्द्रस्य सुयोग आसीत्।
जन्मोत्सवो मे परजन्मनो दिने
न स्यात् कदापीह गतेऽपि लोकात्।।२।।

श्रीविक्रमार्कान्नृपतेरतीताद्
वर्षे वसुव्योमखनेत्रनाम्नि।
शुक्रे गतेऽष्टादशके च काम-
तिथौ जनिर्दुःखविधायिकाभूत्।।३।।

* *

## १६१. प्राप्तोपहारः

श्रीवैक्रमीये खरसे खनेत्रेऽब्दके नभे मासि दिनेऽष्टमे यत्।
गुरौ प्रभाते च गृहे स्वकीयेऽकरोत् समाह्वानमहो! किमर्थम्।।१।।

मत्प्रेरणार्थं कवितादिलेखे प्रादात् प्रयागो लघुपुस्तिके द्वे।
अतस्तदर्थं मिलतामवश्यं प्रोद्दिष्टयागस्य फलं सदर्थम्।।२।।

⁕⁕

## १६२. समस्यापूर्तयः

रूपं शीलं कौशलं सुन्दरं स्यात् शोभा भाषा शेमुषी चापि रम्या।
कारुण्येन प्लाविता प्रेमपूर्णा लक्ष्मीरूपा गेहलक्ष्मीः कदाचित्।।१।।

अन्नं वस्त्रं भूषणादीनि सर्वं सौख्यं सख्यं स्नेहभावं च पुंसः।
वित्तं चित्तं प्राप्य तस्मै विचित्रं तुष्टा नारी सेकपात्रं ददाति।।२।।

मञ्जूषायां सम्पदस्तस्य पुंसो वीर्यं भावं स्वस्य गर्भे निधाय।
भुक्त्वा पीत्वा जातकाय प्रियाय तुष्टा नारी दुग्धपात्रं ददाति।।३।।

पुंसोऽभाग्यान्निर्धनो दुःखितश्चेद् विद्याबुद्धौ न्यूनता शक्तिहीनः।
सौम्यं रूपं नास्ति वित्तं च तस्मै रुष्टा नारी गालिमात्रं ददाति।।४।।

दुष्टः सङ्गो रूपशोभाविहीनो कृष्णो व्यङ्गो दीनवक्त्रो भवेच्चेत्।
प्रज्ञा-शीलं-सूनृता नैव वाणी रुष्टा नारी रोचते नैव तस्मै।।५।।

गेहं कुसूलाढकपूर्णमस्तु प्रियानुकूला वशवर्तिपुत्रौ।
धनागमोऽपि प्रतिमासमस्तु तज्जीवनं जीवनमस्तु सत्यम्।।६।।

⁕⁕

# १६३. अर्ज्याल-वंशावलिः

अथातो मूलपुरुषाद् यथामति सविस्तरम्।
करोम्यमरभूमिस्थमातृवंशस्य वर्णनम्।।१।।

वृद्धेभ्यो दीर्घजीविभ्यो मनीषिभ्यो मुहुर्मुहुः।
यथाश्रुतं तथैवात्र लिख्यते वंशपादपः।।२।।

प्रथितो भारतो देश आर्यावर्ते विराजते।
जयपूर्वं पुरं यत्र जपाकुसुमसन्निभम्।।३।।

एतस्मान्नगरादिस्मास्थान एवागतः पुरा।
अत्रिवंशोद्भवो विप्रो भट्ट इत्युपनामकः।।४।।

यावत्षोडशसोपानमिस्मायां वसतिर्ह्यभूत्।
त्रयोदशैव भट्टाख्या राजानश्चाभवँस्त्रयः।।५।।

उदयः सूदयो रायी देवदत्ताभिधोऽपरः।
वत्सश्रीवत्सराजान्तावुभौ द्वौ देवनन्दकौ।।६।।

हरिरामो हरिदत्तः कृष्णरामाभिधास्त्रयः।
चावानृसिंहौ, राजान्ताश्चावाकुशाविष्णुदासाः।।७।।

नृसिंहस्यात्मजो ह्येकः पौंदी ग्रामं समागतः।
पौड्यालया वा पौड्यालाः पौडेलाख्यास्तदङ्गजाः।।८।।

विराजन्ते यत्र कुत्र ह्यात्रेयकुलसम्भवाः।
अतः पौड्यालयार्ज्यालौ सगोत्रीयौ सवंशजौ।।९।।

चावाकुशाविष्णुदासास्त्रयो राज्यप्रशासकाः।
अतस्त्रयाणामेतेषां राजान्तं नाम दृश्यते।।१०।।

विष्णुदासात्मजो विद्वानर्ज्यालाख्यः प्रभाकरः।
राज्यभारं परित्यज्य शक्तिसिंहाय दत्तवान्।।११।।

अर्जै ग्रामं समागत्य वसतिं कृतवाँस्ततः।
अस्य पुत्रास्त्रयो हंसः सुमन्तः श्रीपतिस्तथा।।१२।।

हंसस्तु स्वेच्छया पूर्वं 'खिलुङ्' जनपदं गतः।
खिलुङ् जनपदो ह्येष स्याङ्जान्तरगतोऽधुना।।१३।।

ग्रामेऽस्मिन्नेव वास्तव्यौ शाहवंशस्य पूर्वजौ।
'खाञ्चामिचे'ति नामानौ भ्रातरौ खाणवंशजौ।।१४।।

आस्तां, तयोः पुरोधास्तु ह्यभूवन् हंसवंशजाः।
ततः कास्कीस्थलं जित्वा शाहोऽभूत् कुलमण्डनः।।१५।।

अस्य वंशे यशोवर्म लम्जुङ् जनपदं गतः।
यशोवर्मस्य पुत्रोऽस्ति द्रव्यशाहः प्रतापवान्।।१६।।

योऽसौ जित्वाऽन्यराजानं गोरक्षाधिपतिर्ह्यभूत्।
गोरक्षस्य शिलान्यासं सुदृढं कृतवान् हि यः।।१७।।

अस्य नारायणो धीमान् गुरुरासीत् सहायकः।
अर्ज्यालकुलसम्भूतः सोप्यासीद्धंसवंशजः।।१८।।

राज्ञो वंशोद्भवा जाता नेपालस्य प्रशासकाः।
गुरोर्वंशोद्भवाः काष्ठमण्डपादिस्थलं गताः।।१९।।

पौरोहित्यादिकं कृत्वा वर्तन्ते ह्यधुनापि ते।
अर्याला अथवार्ज्याला दृश्यन्ते हंसवंशजाः।।२०।।

अर्जै ग्राममलङ्कृत्य सुमन्तश्चाऽसृजत् प्रजाः।
ग्रामे हीस्मादिके सन्ति सुमन्तस्यैव वंशजाः।।२१।।

कनिष्ठः श्रीपतिस्त्वेकोऽमरभूमिं समागतः।
भूपस्यामरनाथस्य गुरुस्थानमलङ्कृतः।।२२।।

अस्यैव राज्ञो राज्यस्य ग्रामं ग्रामं पृथक् पृथक्।
व्याप्ताः सन्ततयोऽस्यैव श्रीपतेर्विदुषोऽधुना।।२३।।

श्रीपतेर्विदुषोऽस्यैव ज्येष्ठवंशपरम्परा।
उट्टङ्किता नाममात्रं यास्ति विद्वत्परम्परा।।२४।।

चिन्ता चूडा योगिदासो मटुको जनमेजयः।
देवकीनन्दनस्तस्माज्जातौ पुत्रावुभौ बुधौ।।२५।।

रत्नेश्वरश्चक्रपाणिरुभौ भिन्नौ ततः परम्।
ग्रामान्तरगतश्चक्रस्तस्य ज्येष्ठपरम्परा।।२६।।

रङ्गनाथो जगन्नाथो रश्मिराजस्ततोऽप्यगात्।
मध्यदेशं समासीनो रक्षयन् स्वपरम्पराम्।।२७।।

देवराजो विष्णुराजस्तत आलोक इत्यपि।
रत्नेश्वरात् कञ्जरोऽस्ति लक्ष्मीनारायणस्ततः।।२८।।

डिल्लीराजः खेमराजो योगराजश्च पण्डितः।
ततोऽस्ति वासुदेवश्चामरभूम्यां समाश्रितः।।२९।।

वासुदेवसुतो बालो रमेशोऽप्यधुनाभवत्।
कूटस्थान्मूलपुरुषाद् द्वात्रिंशत्पुरुषाः स्थिताः।।३०।।

अर्ज्यालवंशवृक्षस्य शाखाः सन्ति ह्यनेकधाः।
प्रभाकराज्ज्येष्ठवंशाल्लिखिता तत्परम्परा।।३१।।

अष्टाविंशतिसोपाने सुधीः श्रुतधराभिधः।
मम प्रमातामहोऽस्ति लक्ष्मीनारायणात्मजः।।३२।।

डिल्लीराजस्ततः खेमराजो मातामहोऽस्ति मे।
तत्सुता नीलमायास्ति जननी मे गरीयसी।।३३।।

❊ ❊

## १६४. पित्रोः स्थितिं प्राप्नुम

सत्यं पुत्रकलत्रबान्धवसुखं धान्यादिसम्पद्युतं
गोष्ठे गोमहिषादयः सुखकरा गेहेऽनुकूला जनाः।
शास्त्राभ्यासमतिः सभाजितगतिः सन्तोषितं हृत्तलं
मानं स्यादधमर्णरोगरहितं स्वर्गायते भूतलम्।।१।।

पित्रोर्जन्म महीतले द्विजकुले वासो बृहच्चत्वरे
विद्यावैभववित्तमानवगणैः सम्मानितौ सादरम्।
पुत्राः स्मो वयमेव शास्त्रपठने लग्नास्तदाज्ञापरा
मात्रोश्चापि सुखं सदा हितकरं सुस्पष्टमालोकितम्।।२।।

आसीत् पुत्रलकत्रबान्धवसुखं धान्यादिसम्पद्युतं
गोष्ठे गोमहिषादयो हितकरा गेहेऽनुकूला जनाः।
शास्त्राभ्यासमतिः सभाजितगतिर्मानं मनस्तोषितं
पित्रोर्जीवनमित्थमेव विदितं नित्यं तयोरीप्सितम्।।३।।

यद्यत् पितृजनैः शुभं सुचरितं भूयात् तयोराशिषो
विद्यावैभववित्तमानवगणैर्भूयास्म एवंविधाः।
शास्त्राभ्यासमतिः सभाजितगर्तिमानं सुतुष्टं मनो
ह्यस्मज्जीवनमेवमस्तु सुतरामेषास्मदीयार्थना।।४।।

**

## १६५. शब्दार्थविचारः

शब्दार्थानां सीमितानां विचारः क्रियतेऽधुना।
शेषाणामपि शब्दानामर्थो ज्ञेयो बुधैरिह।।१।।

केचिच्छब्दा अनेकार्थाः सन्ति सन्तु तथाप्यमी।
दृश्यन्ते भिन्नरूपार्था उल्लिख्यन्ते क्रमादिह।।२।।

केचिच्छब्दाः स्वकीयार्थं हित्वान्यार्थं दिशन्त्यलम्।
केचिच्छब्दाः सीमितार्थं विहाय व्यापकार्थकाः।।३।।

प्रवीणकुशलौ शब्दौ नेह मूलार्थवाचकौ।
अन्यार्थवाचकौ दृष्टौ हित्वा स्वीयार्थकाविमौ।।४।।

'नारी' न अरिरित्यर्थे स्त्रीत्वे स्त्रीवाचकोऽभवत्।
व्यापकार्थं विहायासौ सीमितार्थप्रबोधकः।।५।।

'हस्' धातोर्हसतीत्यर्थे हसो हंस इतीरितः।
अत्र वर्णागमो जातोऽनुस्वाराधिकदर्शनात्।।६।।

'हिंस'धातोश्च हिंसार्थे हिंसः सिंहोऽभवत् पुनः।
अत्र वर्णद्वयोर्दृष्टः परस्परविपर्ययः।।७।।

पश्यादेशेन दृश्धातोः पश्यकः शब्दनिर्मितः।
स एव कश्यपो जात आद्यन्तवर्णव्यत्ययात्।।८।।

कान्त्यर्थाद् वशधातोश्च वशशब्दो भवत्ययम्।
तस्य वर्णव्यत्ययतः शवः शब्दोऽस्ति निष्क्रियः।।९।।

शब्देऽस्मिन्निदमाश्चर्यं शक्तिरिकाररूपतः।
अग्रे समायाति ततः शिवः शक्तियुतोऽभवत्।।१०।।

लोकान् कलयतीत्यर्थे कालः समयवाचकः।
कालोऽयं मेचकार्थेऽपि लोकैर्बहु निगद्यते।।११।।

'रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि'।
इत्यर्थे भाषितो रामः परमार्थप्रबोधकः।।१२।।

लोकैर्मनोरञ्जनार्थे नृत्यसङ्गीतकर्मणि।
प्रयुज्यते सैष रामो भिन्नार्थे चित्तरञ्जने।।१३।।

पुरो हितं यः करोति स सर्वेषां पुरोहितः।
निन्दितार्थेऽधुना सर्वैरुच्यते स पुरोहितः।।१४।।

न तद्विषयवेत्तारं पौरोहित्ये निमन्त्रितम्।
अज्ञातकुलशीलं च लोको वदति पण्डितम्।।१५।।

पश्य पण्डितशब्दार्थः क्व गतः क्वास्ति पण्डितः।
अपण्डितेन लोकेन क्व तदर्थः प्रयुज्यते।।१६।।

प्राध्यापकाः सन्त्यनेके विविधार्थप्रबोधकाः।
न ते प्राध्यापकं शब्दं रचयन्ति सधातुकम्।।१७।।

गुकारस्त्वन्धकारः स्यादुकारस्तन्निरोधकः।
अधुना गुरुशब्देन बोध्यते यानचालकः।।१८।।

क्वायं शब्दो गुरुरिति क्व तदर्थोऽर्थवेत्तरि।
लोकोऽयं लोक्यते चित्रं यथा गच्छति तज्जगत्।।१९।।

वदन्तीहाधुना केचिदमुकोऽस्ति भयङ्करः।
भयप्रदर्शको नास्ति किन्तु सोऽस्ति 'मनोहरः'।।२०।।

अहो! मनोहरार्थेऽपि प्रयुक्तोऽत्र भयङ्करः।
सैषा प्रवृत्तिर्लोकस्य ह्यर्थो ज्ञेयः प्रसङ्गतः।।२१।।

गच्छतीति जगत् प्रोक्तं लोक्यते लोक ईरितः।
सम्यक् सरति संसारो व्याप्तं यद् विश्वमुच्यते।।२२।।

**

## १६६. पद्मा-कल्कि-धाम

श्रीमद्भागवतं सनारदमथो ब्रह्माण्डमन्यत्तथा
आचार्यप्रवरः सदा हरिहरः पाठं करोति भृशम्।
शैवं वामनसञ्ज्ञकं गदति बद्रीवल्लभः पण्डितः
मार्कण्डेयवराहकौ प्रपठति ह्यन्यो हरिर्भूसुरः।।१।।

आचार्यो विष्णुराजः प्रपठति सततं वायुमेकं पुराणं
तद्वद् दुर्गाप्रसादः परिपठति मुदा मत्स्यकूर्मे पुराणे।
लक्ष्मीकान्तश्च नित्यं प्रवदति ससुखं पद्ममेकं पुराणं
टीकानन्दो भविष्यं कथयति तदनु ब्रह्मवैवर्तमन्यत्।।२।।

रुद्रो होता च विष्णुं प्रपठति नितरां प्रेमनारायणोऽसौ
गोमा माता सुरक्षां कथयति मधुरां वाचमागामिनीं च।
दुर्गादिव्याः प्रतिष्ठां कथमपि कुरुते राष्ट्रकल्याणहेतोः
नेपाले कल्किधाम प्रचलति सुतरां यज्ञरूपेण सम्यक्।।३।।

नयनर्तुनभोनेत्रविगते विक्रमाब्दके।
अष्टादशपुराणानां पाठोऽभूत् काष्ठमण्डपे।।४।।

* *

## १६७. गोविन्दोऽवतु

गोसेवां कुरुते सदा सहचरैरग्रे गवां तिष्ठति
गोभिः सार्धमुपैति यो वनमिदं भीतेर्भृशं त्रायति।
भाण्डाद् यो दधिदुग्धतक्रनवनीतञ्चादिकं खादति
गोर्वत्सान् तरसा निकृष्य सहसा स्तन्यं गवां चूषति।।१।।

गोविन्दोऽवतु मामुपेत्य निकटं गोपालकोऽहं यतो
गोसेवां प्रकरोम्यहं प्रतिदिनं तुष्टा न गौर्मां प्रति।
गोर्वत्सायितमस्मि मामपि गवां स्तन्यं ददातु प्रियं
गोक्षीरं न ददासि चेदपि सदा मां गोचराद् रक्षतु।।२।।

* *

## १६८. धन्या गुरवः

लोहं च लोके प्रकरोति स्वर्णं
मणी रसेन्द्रोऽपि च नात्मतुल्यम्।
एको गुरुर्मन्दतमं स्वशिष्यं
ज्ञानं प्रदायाऽऽत्मसमं करोति।।१।।

हरेर्हराद्ब्रह्मण एत उच्चै-
स्तमा गरीयांस इमे हि लोके।
सच्छास्त्रसारान् सदसद्विचारान्
दिशन्ति मान्या गुरवो हि धन्या:।।२।।

❊❊

## १६९. ग्राम्यस्थिति:

गोपाला: सन्ति गोभिर्विपिनमधिगता उत्पथा वानरा वा
केचित् कृष्यादिकर्मानुसमयसरणा दारुघासार्थमन्ये।
पाठार्थं यान्ति बाला अइउकखगघान् मद्यमांसार्थमेके
यत्रानन्तादय: स्युर्गुरुतमपदवीं प्रापितास्तत्र किं स्यात्।।१।।

❊❊

## १७०. 'नारी' शब्दार्थ:

'नारी' शब्द: किमु विरचितस्तस्य कोऽर्थो विचार्य:
गेहे मातु: पितुरथ पुन: पत्युरार्यस्य तस्या:।
श्वश्वो: पुत्रस्य च परिजनस्यापि कस्यापि सैषा
या नैवारि: कथमपि कदा स्त्रीत्वरूपं हि नारी।।१।।

❊❊

## १७१. जायास्मृतौ

आतिथ्यं सुरपूजनं प्रकुरुते सम्मार्जयन्ती गृहं
मायां सैव ददाति सर्वसुखदां कारुण्यसम्मिश्रिताम्।
जाया वक्ति वच: प्रियं सुमधुरं सौजन्यसंयोजितं
यात्येवं गृहिणीपदं च गृहिणं चाऽऽनन्दयन्ती भृशम्।।१।।

जाया मित्रति पुत्रति स्वविषयं गेहं च गोपालति
मालिन्ये सति वस्त्रके रजकति रुग्णे पतौ वैद्यति।
भोज्यं पाचकति स्वभोजनविधौ सर्वेषु मातायति
गेहं रक्षकति स्वयं सुखयते दुःखेष्वनुद्विग्नति।।२।।

**

## १७२. समालिङ्गनम्

वर्षार्थमन्वीक्षति सत्यमेव शैलं समालिङ्गति मेघमाला।
रसार्थमन्वीक्षति नित्यमेव पुष्पं समालिङ्गति भृङ्गमाला।।१।।

विहाय भूमिं सलिले विहर्तुं सरोवरं वाञ्छति हंसमाला।
वर्षारसार्थं किमु वा विहर्तुं शैलं च पुष्पं च सरोवरं च।।२।।

विहाय सर्वानपि मातृगेहं पतिं समालिङ्गति सानुबाला।
अहोऽधुना सर्वसुखं विहाय धनं समालिङ्गति मर्त्यमाला।।३।।

**

## १७३. यात्रावसरे स्मरणीयम्

आपः सन्तु शिवाः सुनिर्मलदिशः सर्वे शुभाः खेचराः
सर्वेषां हृदि सौमनस्यमधिकं क्षेमङ्करं वाहनम्।
यात्रायां पवनोऽनुकूलगतिमान् पन्था शिवः स्यान्मम
विघ्ना नैव भवन्तु सिद्ध्यतु सदाभीष्टं सुखं लभ्यताम्।।१।।

**

## १७४. संस्कृतं स्याज्जने जने

पठने पाठने प्रश्ने वार्तालापे तथोत्तरे।
वदन्तु संस्कृतं सर्वे गुरुशिष्या निरन्तरम्।।१।।

आहारे व्यवहारे च मार्गे याने विशेषतः।
कार्यालये तथा क्षेत्रे संस्कृतं व्यवहार्यताम्।।२।।

मातुः संरक्षणं कार्यं मातृभाषाऽस्ति संस्कृतम्।
कार्यकारणरूपेण सर्वेषामस्ति संस्कृतम्।।३।।

देशे देशे तथा क्षेत्रे प्रदेशे मण्डलेऽपि च।
ग्रामे ग्रामे गृहे लोके संस्कृतं स्याज्जने जने।।४।।

वदाम संस्कृतं सर्वे लज्जां त्यक्त्वा निरन्तरम्।
शुद्धं वा स्यादशुद्धं वा शोधनीयमनन्तरम्।।५।।

**

## १७५. काशीहिन्दूविश्वविद्यायः

देशभक्तो मालवीयो बुधो मदनमोहनः।
काशीहिन्दूविश्वविद्यालयो येन प्रतिष्ठितः।।१।।

यत्र संस्कृतविद्यायाः ससभागारनिर्मितः।
धर्मविज्ञानसङ्कायो विपुलः सुष्ठु राजते।।२।।

पुराणन्यायमीमांसाधर्मशास्त्रसमन्विताः।
साङ्गा वेदाः प्रपाठ्यन्त अनध्यायविवर्जिताः।।३।।

अत्राऽऽधुनिकविद्याया देशदेशान्तरीयकाः।
भाषासाहित्यकक्षाश्च चलन्ति विबुधैर्वृताः।।४।।

हिन्दीनेपालीभाषायामनुसन्धानसंयुतैः।
पुरातत्त्वेतिहासैश्च भाषाविज्ञानदर्शनैः।।५।।

नेपालपीठञ्चात्रैवाऽनुसन्धानसहायकम्।
प्राध्यापका विराजन्ते तस्मिन्नेपालयोजिताः।।६।।

एवं भौतिकविज्ञानं जीवविज्ञानमादिकम्।
आयुर्वैदिकविज्ञानं चिकित्साशास्त्रमेव च।।७।।

प्रबन्धशास्त्रं वाणिज्यं नीतिशास्त्रं ससैन्यकम्।
तौर्यत्रिकं ससङ्गीताऽभिनयादिकलात्मकम्।।८।।

अन्यः प्रयोविज्ञाने चाभियान्त्रिकसङ्कुलः।
रसायनं भूमिगर्भं सस्यविज्ञानपूर्वकम्।।९।।

तथोपवनसम्भारः पशुपालनपूर्वकम्।
क्रीडाव्यायामतरणतालशालाः सुनिर्मिताः।।१०।।

महिलानां समुन्नत्यै शिल्पशास्त्रसुयोजिताः।
महाविद्यालयाः सन्ति छात्रावाससमन्विताः।।११।।

विद्योन्नत्यै पाठकानामनुसन्धानयोजकः।
सर्वग्रन्थालयोऽस्तीह सर्वेषां सुसहायकः।।१२।।

सर्वविद्यानिधानस्य विश्वनाथस्य मन्दिरम्।
रराजतेऽतीव रम्यं चत्वरोपवनान्वितम्।।१३।।

बहवो हिन्दवो भक्त्या हिन्दुस्थानकृतालयाः।
देशान्तरीया अपि च काश्यामायान्ति सादरम्।।१४।।

वाहनानि चलन्तीहाऽध्वगा आयान्ति यान्ति च।
मन्दिरे विश्वनाथस्य विश्वेशं प्रणमन्ति च।।१५।।

सम्मुखे राजते यस्य गोपुरं सुमनोरमम्।
गमाऽऽगमौ प्रकुर्वन्ति नरा यानानि सन्ततम्।।१६।।

भवने मालवीयस्य गीताप्रवचनान्यपि।
सञ्चाल्यन्ते बुधैः सुष्ठु काव्यालापाश्च सन्ततम्।।१७।।

मध्ये विशाला शालास्ति चत्वरोपवनान्विता।
मुख्यः कार्यालयश्चैष द्विमुखो राजतेतराम्।।१८।।

धनागारं तन्निकटे यत्राऽऽस्ते जनसङ्कुलम्।
दानादाने विधीयेतेऽनुदिनं धनरक्षकैः।।१९।।

सुशीतायतनं चान्यत् सुसाङ्ख्यं भवनं बृहत्।
मध्ये राराजते सर्वैः सौविध्यमनुभूयते।।२०।।

प्राध्यापकानां वासार्थमतिथीनां विशेषतः।
आवासनिलयाः सन्ति सुरम्याः पादपान्विताः।।२१।।

तिथौ वसन्तपञ्चम्यां छात्रावासकृताश्रयाः।
आराधनं सरस्वत्याः प्रकुर्वन्ति तदुत्सवे।।२२।।

पूजनात् पठनाद्ध्यानात् स्मरणान्नामकीर्तनात्।
वाग्देवता प्रसन्ना स्यादिति हेतुस्तदुच्यते।।२३।।

मासे भाद्रपदे कृष्णे पक्षेऽष्टम्यां तिथौ पुनः।
कृष्णजन्मोत्सवं सम्यक् कृष्णलीला अपि क्रमात्।।२४।।

त्रिवेणीसङ्कुले छात्राः सन्नद्धा नृत्यकर्मसु।
कृष्णलीलानुकुर्वत्यो दर्शयन्ति जनानपि।।२५।।

'यत्र योगेश्वरः कृष्णो भूतिः श्रीर्विजयो मतिः'।
गीतायाः सारसर्वस्वं संस्मरन्त्यः परस्परम्।।२६।।

अमायामपि कार्तिक्यां महालक्ष्म्याः प्रपूजनम्।
सोल्लासं ताः प्रकुर्वन्ति प्रदीपावलिभिर्युतम्।।२७।।

सन्तु कल्याणमारोग्यं शुभानि सुखसम्पदः।
बुद्धिर्विकाशमायातु देहि मे श्रेय ईप्सितम्।।२८।।

इति बुद्ध्या प्रार्थयन्ति पूजयन्ति सभक्तिकम्।
श्रद्धान्विता नमस्यन्ति दीपराजिं समे जनाः।।२९।।

चतुष्पथैर्युता मार्गा बहुशः सन्ति विस्तृताः।
चत्वरैः शाद्वलैर्युक्ताः परितः पादपैर्वृताः।।३०।।

सन्तीह बहुशः शाला बहवः स्वस्तिका अपि।
विवाहाद्युपयोगीनि बृहन्ति चत्वराण्यपि।।३१।।

रात्रौ विशेषरूपेण विवाहानां व्यवस्थितिः।
वाद्यादीनि वादयन्तो जना विवाहकर्मसु।।३२।।

छात्राश्छात्राः प्रपश्यन्तो धावमाना द्विचक्रिकाम्।
गमाऽऽगमौ प्रकुर्वन्तो दृश्यन्ते सर्वतो दिशि।।३३।।

धनिकान् स्वान् मन्यमानाः समारूढास्त्रिचक्रिकाम्।
चालकभ्यो विनीतेभ्यो दृश्यन्ते ददतः पणान्।।३४।।

ससङ्गीतं वेणुगीतं क्वचिन्मृदङ्गवादनम्।
अभिनयाश्च कुत्रापि दृश्यन्ते गीतवेश्मनि।।३५।।

दृश्यन्ते शर्करादुग्धमिश्रितं सवनौषधम्।
उष्णमुष्णं जलमपि पिबन्तो विपणि स्थिताः।।३६।।

क्वचित् सभा सभागारे क्वचिद् विपुलभाषणम्।
दारिद्र्योन्मूलनार्थं हि दृश्यते श्रूयते क्वचित्।।३७।।

पर्णानां सञ्चयं कृत्वा दुःखदग्धाः चतुष्पथे।
जीविकार्थं च दृश्यन्ते नरा नार्य इहैव हि।।३८।।

भोजनालयमागत्य मिष्ठान्नानि यथेप्सितम्।
भुक्त्वा परस्परं केचिन्निर्गच्छन्ति यथेप्सितम्।।३९।।

केचित् स्वीयां समादाय समारुह्य द्विचक्रिकाम्।
इतस्ततो दर्शयन्तो विहरन्ति यथेच्छया।।४०।।

केचिद् विकारान् सन्त्यज्य चाग्रे धावन्ति सत्वरम्।
चलन्ति कारमारुह्य कारागारायिता हि ते।।४१।।

केचित् स्वाकारमागुण्ठ्य शिरोवेष्टितवस्त्रकाः।
हास्यपात्रसमा भूत्वा चलन्तीह चतुष्पथे।।४२।।

सुदूरादुपचारार्थं चिकित्सालयमागताः।
प्रतीक्षमाणा दृश्यन्त अनाथा दुर्बला अपि।।४३।।

केचित्तु सहयोगार्थं याचमाना धनान्यपि।
हस्तौ प्रसार्य धनिकान् केवलं दर्शयन्ति हि।।४४।।

केचिन्मान्यपदस्थेभ्यो गालिं ददति सत्वरम्।
काशीहिन्दूविश्वविद्यालयस्थेभ्यो विहेतुकम्।।४५।।

सम्मानार्हान् ज्ञानवृद्धान् धीमतो विदुषो जनान्।
गालीयन्त्यवमानन्ति मन्दा नीचाः कुबुद्धयः।।४६।।

काशीहिन्दूविश्वविद्यालये मान्याऽवमानिनः।
दृश्यन्ते पठिता मूर्खा नैचिच्चत्रं कलौ युगे।।४७।।

प्राध्यापकानां सन्तत्यः पाठने सन्ति वञ्चिताः।
विश्वविद्यालयद्वारं तदर्थे पिहितं किल।।४८।।

काशीहिन्दूविश्वविद्यालयो नाम्नास्ति केवलम्।
छात्रैरविद्याः पठ्यन्ते विद्याः पुस्तकमाश्रिताः।।४९।।

विश्वविद्यालयश्चिह्नं दृश्यते नामपट्टके।
एकं हि वाक्यं तत्रास्ति 'विद्ययाऽमृतमश्नुते'।।५०।।

**

## १७६. श्रीशौ सदा रक्षताम्

लक्ष्मि! त्वं वद किं करोमि रजनी मन्दं समायात्यहो!
सन्ध्येयं रजनी न सम्प्रति मनुं जप्त्वा सुरानर्चय।
एवं तत्तु करोमि ब्रूहि सकलं पश्चात् किमन्यत् पुनर्
भुक्त्वा भोजनमौषधानि पयसा शय्यां समासादय।।१।।

शय्यायामहमेकलः प्रियतमे! निद्रां कुतः प्राप्नुयां
ब्रूहि त्वं हि तदौषधं सुवदने! मा चिन्त्यतां माधव!
निद्राऽऽगच्छति ते यदौषधरसात् साकं मयास्त्येव तत्
त्वां दित्सामि शनैरिति प्रवदतौ श्रीशौ सदा रक्षताम्।।२।।

**

## १७७. अभिनन्दनपत्रम्

(भारतीयपरराष्ट्रमन्त्रिणं सुषमास्वराजं प्रति)

सुषमे! सुषमान्वितस्थलाखिलदेशस्तव भारतोऽस्त्यपि।
अधुना नयपालसंस्थिताखिललोकास्तव दृष्टिगोचरम्।।१।।

करवाम तवाभिनन्दनं सुषमे! स्वागतमत्र कुर्महे।
तव दर्शनतः स्मिता वयं तव दृष्ट्या वयमत्र हर्षिताः।।२।।

कुरुतात् तव पूजनादिना हिमवद्देशशभवः शिवः शिवम्।
तव बुद्धिविकासमाप्नुयात् सुषमा नीतिगतिः सदाऽस्तु ते।।३।।

तव बुद्धिविदग्धयाऽधुना वयमाशाभरिता भवेम किम्?
नयपालभवामपि स्थिरा महिलानां गतिरुन्नता भवेत्।।४।।

तव वर्त्मनि वर्ततां शिवं तव देशेऽपि च वर्ततां शिवम्।
तव नीतिगतिः सुखावहा नयपालेऽपि च वर्ततां शिवम्।।५।।

इह भारतवर्षगौरवं तव नीतौ समुपैतु वैभवम्।
सह सङ्गतिरस्तु चावयोः सहभावं करवाम चावयोः।।६।।

परराष्ट्रगतिज्ञता तव नितरामस्तु सदा सुखास्पदा।
तव कर्मणि वर्ततां शिवं वयमीहामह अत्र साम्प्रतम्।।७।।

अधुना सहभावमाश्रिताः सहधर्माचरणान्विता वयम्।
किमितो 'विगता न हिन्दुता प्रभवे'दित्यपि काङ्क्षिणो वयम्।।८।।

सुषमे! सुषमार्थवचिके! तव नाम्नैव सदर्थमाप्यते।
चरितेन धियाऽधुनाऽपि ते इह गार्गीस्मृतिरागता न किम्?।।९।।

**

## १७८. उन्नतिकारणानि

सूनृतां प्रवदेद् वाणीं श्रमं कुर्यान्निरन्तरम्।
सत्यवादी भवेद्धीमान् मधु व्यवहरेत् परैः।।१।।

विषये लालसो न स्याद् बाधायां न पराङ्मुखः।
त्यागशीलो भवेद् यो हि स समुन्नतिमाप्नुयात्।।२।।

समुन्नतिरभीष्टा चेत् कुरु कर्माणि कानिचित्।
नीत्वा तवायुषः खण्डमद्य सूर्योऽस्तमेष्यति।।३।।

पित्रोरनुज्ञामादाय कार्ये गच्छति यो जनः
सफलं तस्य कार्यं स्यात् तयोराशीःप्रभावतः।।४।।

**

## १७९. परिचयपङ्क्तयः

नेपालदेशान्तरमध्यवर्ती गुल्मीति नाम्ना प्रथितोऽस्ति भागः।
आस्ते तदन्तर्धुरकोटनाम्नि राज्ये बृहच्चत्वरनामधेयः।।१।।

ग्रामो 'बडाचौर' इति प्रसिद्धो रम्यो बृहच्चत्वरभूषितोऽस्ति।
मार्गोऽस्ति पूर्वापरलम्बमानः। सुखेन वासो विहितो जनैश्च।।२।।

देवीप्रसादस्य सुता अनेकेऽभवन् प्रसिद्धा वसुसङ्ख्यकास्ते।
त्रयस्तु तेषामपि लब्धविद्याः शास्त्रीति सञ्ज्ञापदभूषिताश्च।।३।।

एकस्त्रयणामपि भीमकान्तः शास्त्री महाकाव्यकारः कविश्च।
पौराणिकोऽभूद् विबुधान आसीत् सन्नीति विज्ञोऽप्य भवच्च दक्षः।।४।।

जातो बडाचौर इति प्रसिद्धस्थले भरद्वाजमुनेः कुले सः।
श्रीभीमकान्तः प्रथितः पिताऽस्ति श्रीनीलमायाङ्गभवो य एकः।।५।।

लक्ष्म्यादिकान्तोत्तरशब्दसञ्ज्ञः शास्त्रं तदर्थं च न वेत्ति किञ्चित्।
नेपालदेशस्य हि मञ्जुगर्ते श्वसन् वसन् सञ्चरति स्वगेहे।।६।।

वाणाष्टरामाष्टचतुःशशाङ्कनवाब्धिवस्वङ्कमितप्रयोगे।
वामाऽभिलेखेऽस्ति यदङ्कसङ्ख्यासंलापयन्त्रेण चरन् स आस्ते।।७।।

नवाङ्कनेत्रद्वितयाक्षिचन्द्रवाणर्तुशैलाष्टमितप्रयोगे।
वामाऽभिलेखेऽस्ति यदङ्कसङ्ख्यासंलापयन्त्रेण स भारते स्यात्।।८।।

दुःखी सदैवास्ति सुखी क्वचिन्न स निर्धनोऽस्तीह धनी क्वचिन्न।
कलत्रपुत्रादिसुखं न तस्य ह्यकिञ्चनोऽस्तीह न बन्धुसौख्यम्।।९।।

न तेन काव्यं रचितं सुरम्यं विद्वन्मनोहारिसुसंस्कृतं च।
न रीतिवृत्तिर्न गुणान् ध्वनींश्च छन्दांस्यलङ्कारविधीन्न वेत्ति।।१०।।

न शक्तिरस्याऽस्ति बलं कुतोऽस्तु विद्या न चाप्यऽस्ति कुतः कवित्वम्।
वृत्तिर्न दृष्टाऽस्य कुतः प्रवृत्तिर्न पौरुषोऽस्त्यस्य धनं कुतोऽस्तु।।११।।

लेखा यदीया जनभाषयाऽपि ह्यनेकधाः सन्ति न सङ्गृहीताः।
काव्यं कवित्वं च कृतं कथञ्चित् प्रकाशमायाति परं कथञ्चित्।।१२।।

येनाऽनुवादो विहितोऽस्ति पूर्वं काव्यद्वयस्याऽमर भाषयाऽपि।
स्वतन्त्रकाव्यानि कृतानि किन्तु बुधैर्न दृष्टानि यतोऽप्रकाशात्।।१३।।

प्राध्यापन् सम्प्रति मञ्जुगर्ते विद्यालये विश्वपदादिलग्ने।
आस्ते निवासे स्वकदारिकाभिर्दाराभिरेकः स जरद्गवोऽभूत्।।१४।।

भ्राता यदीयोस्ति च सूर्यकान्तः स चार्थशास्त्रप्रतिबोधितोऽपि।
स्वकार्यदक्षोऽस्ति स सर्वकारपदप्रतिष्ठोऽस्ति च नीतिविज्ञः।।१५।।

तस्यानुजोऽप्यस्ति स चन्द्रकान्तः समानशीलव्यसनानुलग्नः।
गुल्मीस्थले मध्यपथस्थिते तद् रेसुङ्गपीठप्रमुखोऽभवत् यः।।१६।।

अस्याऽनुजोऽप्यस्ति च विष्णुकान्तः स चापि रेसुङ्गपुरीसमीपे।
रेसुङ्गविद्यामठसंश्रितोऽस्ति प्राध्यापयन् सम्प्रति वर्तमानः।।१७।।

अन्याऽनुजोऽप्यस्ति स कृष्णकान्तः स चाधुनाऽमेरिकदेशसंस्थे।
विद्यालये विश्वपदादिलग्ने गवेषणे कर्मणि सम्प्रवृत्तः।।१८।।

तिस्रोऽनुजाः शान्तविचारशीला ज्येष्ठा, द्वितीया विजयास्ति कान्ता।
ताभ्यां कनिष्ठा कमला तृतीया शान्ता च कान्ता च वचोऽभिरामाः।।१९।।

गङ्गाभिधा यस्य सपत्नमाता यासीत् समेषां प्रियमातृरूपा।
स्नेहेन सर्वानभिसेचयन्ती तेभ्यो ममत्वं हि सदार्पयन्ती।।२०।।

ममैव पुत्रा इति चिन्तयन्ती नित्यं सुतेभ्यो ममतां प्रदात्री।
साधुस्वभावा सरला स्मितास्या नितान्तसापत्न्यविहीन भावा।।२१।।

यस्याः प्राच्यां पश्चिमायामुदीच्यां विभ्राजन्ते दक्षिणस्यामनेकाः।
मालातुल्याः शैलमाला विचित्रास्तत्रासन्नोपत्यका जन्मभूमिः।।२२।।

आरात्तस्याः पन्नगा नामरूपा स्रोतोभूता गण्डकीं धावमाना।
कौटिल्येन प्राग्दिशं या वहन्ती ग्रामस्यान्ते शोभते शैलपुत्री।।२३।।

आरात्तस्या दारुपर्णादिलभ्या वन्या भूमिः शाद्वलं क्षेत्रमास्ते।
ग्रामस्थानां गेहलक्ष्मीजनानां लभ्येते ते शान्तिसौख्ये सदैव।।२४।।

प्राच्यामास्ते पन्नगास्तटिन्याः सुष्ठु ग्रामोऽसौ बृहच्चत्वरोऽस्ति।
तस्मिन् ग्रामे यस्य गेहं विशालं गेहादग्रे तस्य वाटी विशाला।।२५।।

वाट्या अग्रे शाद्वलं चत्वरं च बोधिवृक्षो राजते चत्वरेऽत्र।
पूर्वापूर्वो विद्यते यत्र मार्गो याताऽऽयातं कुर्वते मानुषाश्च।।२६।।

श्रान्ताः क्लान्ता ये समायान्ति तेभ्यश्छायां दत्वा सख्यभावं करोति।
तत्रागत्य स्पर्शनः स्पर्शनेन पान्थान् नित्यं शक्तियुक्तान् करोति।।२७।।

तत्रापूर्वं पन्नगाक्रोडभूतं धान्यक्षेत्रं राजते राजियुक्तम्।
यस्मिन् क्षेत्रे कर्षकाणां सुखेन वप्या प्राप्या श्यामला सस्यसम्पत्।।२८।।

अश्वत्थोऽयं स्वामितुल्यः समेषां ग्रामस्थानां कर्षकाणां हितेऽस्ति।
कुल्याऽऽनीतं पन्नगाया जलं च युक्तं युक्तं सेचनार्थं प्रवक्ति।।२९।।

सोऽयं ग्रामः 'पण्डितग्राम' नामा तत्र भ्राजन् पण्डितानां समाजः।
तेषां मध्ये मध्यमः पण्डितो यो भीमः कान्तो भीमकान्तो हि नाम्ना।।३०।।

धन्या मान्या भीमकान्तस्य पत्नी नामाऽप्यस्या नीलमाया कनिष्ठा।
लक्ष्मीकान्तो जात आभ्यामिहैव तस्माद् गेहं मन्यते मामकीनम्।।३१।।

एतन्मदीयं न परं ममाऽस्ति चैतत्वदीयं न परं तवाऽस्ति।
बुध्यानया ये चलिता भवेयुस्तेषां सुखं स्यात् परतो न दुःखम्।।३२।।

सर्वं मदीयं न परस्य किञ्चित् धरामि खादाम्यहमेव सर्वम्।
स्वामी समेषामहमेव नान्यो यस्यास्ति बुद्धिर्न सुखं हि तस्य।।३३।।

* *

## १८०. तत् सत्

विश्वस्मिन् विषयोपभोगरचनं माधुर्यमास्वादितं
मन्यन्ते तदुपासकैरहरहस्त्यक्तुं न शक्ता वयम्।
यत् प्राप्ते सति तिक्ततामनुभवन् स्वादूनि मिष्टान्यपि
तत् सर्वं हि सुभोजनादिकसुखं तिक्तायते जीवने।।१।।

पुत्रोऽपुत्र इवाधुना समजनश्चोपेक्षते शत्रुवत्
गेहं चापि वनायते सुमनसां दाराश्च कारायते।
मिष्टान्नं विषमायते स्वमुदरं रिक्तेऽपि पूर्णायते
तत् सत् तत्त्वमुदीक्षतां सफलतां सम्प्राप्नुयाज्जीवने।।२।।

प्राप्तं मानवजन्म दुर्लभतरं विप्रत्वमेवं ततः
सद्विद्याविनयादिकं च सुलभां सत्सङ्गतिं चाधुना।
सोपानोपगतैरिहैव सुजनैस्तापत्रयान्मुक्तये-
द्रागेवेत्थमिदं विचारणपरैस्तत् सत् समावीक्षताम्।।३।।

अर्वाचीना बुधमुनिजना यद्धि सर्गे वदन्ति
तत्त्वं मिश्रं प्रकृतिपुरुषे सच्चिदानन्दरूपम्।
नान्यत् किञ्चित् तव-ममकृते श्रेयसोऽपूर्ववर्त्म
तत् सत् तत्त्वं जगदपरकं चेतसा चिन्तयाम।।४।।

कल्पे कल्पे जगति बहुधा नूतनं लोक्यते यत्
तत् प्राचीनं प्रकृतिनियमात् पुण्यपापात् परं यत्।
जीवानां यन्मनसि नियतं प्रेरकं कार्यकाले
तत् सत् तत्त्वं परमपरकं चिन्तनीयं न चान्यत्।।५।।

विश्वानुशासनं यन्त्रमिव तत् सत्त्वमस्ति यत्।
हीयते क्षीयते नैव तत् सत् तत्त्वमुदीक्षताम्।।६।।

ज्ञानविज्ञानसंयुक्तं जगत्कल्याणकारणम्।
श्रेयसः प्रेयसो हेतुभूतं तत् सद् विचिन्त्यताम्।।७।।

तेजस्तिमिरयोः पुण्यपापयोः सुखदुःखयोः।
यद् हेतुभूतं सत् तत्त्वं तत् सत् तत्त्वमुपास्यताम्।।८।।

यदा मनसि जायेत नराणां तत्प्रकाशतः।
वसुधैव कुटुम्बं स्यात् तत् सत् तत्त्वमवेक्ष्यताम्।।९।।

शान्तिमात्यन्तिकीं प्राप्तुं नान्यः पन्था मिलेत् क्वचित्।
यत् त्यक्त्वा सुसमृद्ध्यापि तत् सत् तत्त्वमपेक्ष्यताम्।।१०।।

मृत्योरमृतमाप्त्यर्थं ज्योतिश्च तमसोरपि।
लक्ष्यत्वेनाभिपश्यन्ति यत् तत् सत् तत्त्वमुच्यते।।११।।

महान्तः सज्जनाः सर्वे जीवमात्रोद्दिधीर्षवः।
उपदेशं कुर्वते स्म यत् तत् सत् तत्त्वमाप्यताम्।।१२।।

तत् सद् ब्रुवन्ति ये सन्तस्तत् सद्ध्यायन्ति नित्यशः।
जपन्ति ये तत्सदेव तत् सदश्नुवते ध्रुवम्।।१३।।

येन जन्मान्तरीयेन तत्त्वेन प्रेरिता वयम्।
इह जन्मन्यपि न किं तत् सत् तत्त्वमुपास्महे।।१४।।

पृथ्वीजलाग्निपवनानिलतत्त्वभूतं
देहादिकं न चिरमेति विनाशमैति।
सत्तत्त्वमस्ति परमं ह्यविनाशिरूपं
तत् सत् तदेव हि वयं प्रविचारयाम।।१५।।

तत् सद् ब्रह्मेति विज्ञा विबुधमुनिजनाः सच्चिदानन्दरूपं
तत् सद् ध्यायन्ति ये ते जगदिदमखिलं मन्वतेऽनात्मरूपम्।
यत् किञ्चिद् दृश्यते तत् त्वमहमिति जगन्नाशमभ्येति सत्यं
तत् सत् तत्त्वं विचार्य प्रमुदितमनसो मानसे किं न दध्मः।।१६।।

**

## १८१. सम्भवन्तु

सदा सत्कर्मसद्धर्मसज्जनादिषु सङ्गमः।
सत्काव्यं सत्कथा भक्तिरीश्वरे सम्भवन्तु मे।।१।।

सद्विद्याः सफलाः सन्तु स्फुरन्तु कविता मयि।
पितरः प्रीतिमापन्ना भ्रातरः सम्भवन्तु मे।।२।।

नगेर निलयो रम्यो नित्यमर्थागमो भवेत्।
पत्नीप्रसादः सततं सन्तत्यः सम्भवन्तु मे।।३।।

पुत्रपौत्रादिकाः सन्तु पित्रोराज्ञानुकारिणः।
ता जामात्रनुकारिण्यः पुत्र्योऽपि सम्भवन्तु मे।।४।।

**

## १८२. कृष्णं वन्दे मनश्चौरम्

व्रजे वसन्तं नवनीतचौरं व्रजाङ्गनानां च दुकूलचौरम्।
अनेकजन्मार्जितपापचौरं चौराऽग्रगण्यं पुरुषं नमामि।।१।।

गोपीजनानां मनसोऽपि चौरः सखीजनानां च मनोऽतिचौरः।
गोपाङ्गनानां च मनः स चौरो ह्यचूचुरत् कृष्णमनस्तु राधा।।२।।

धनं न भूमिं न गृहं न यानं भोज्यं न पानं न सुखं न दुःखम्।
रूपं न देहं न भवान् समेत्य चोर्यात् सदा कृष्ण! मनो मदीयम्।।३।।

ज्ञानं न शिल्पं न गुणं न धर्मं जायां न मायां न सुतं सुतां न।
जलं न चान्नं स भवान् समेत्य चोर्यात् सदा कृष्ण! मनो मदीयम्।।४।।

कृष्णश्चोरयते सत्यं नवनीतं मनो दधि।
नवनीतं यशोदाया गोपीनां दध्यचूचुरत्।।५।।

राधायास्तु मनः कृष्णोऽचूचुरत् सत्यमेव ह।
मदीयमपि चोर्यात् स मनः कृष्णो बहिःस्थितम्।।६।।

* *

## १८३. उपसंहारः

हर्तुकामोऽसि दुःखानि भोक्तुकामः सुखानि चेत्।
तितीर्षुरसि संसारान्मुमुक्षुरसि बन्धनात्।।१।।

संसाराऽसारविज्ञानं बुध्वा व्यवहरेरिह।
यथा लब्धेषु सन्तुष्य पठ जीवनदर्शनम्।।२।।

जीवनं जीव्यते किञ्चिद् दर्शनं दृश्यते क्वचित्।
जीव्यते दृश्यते नैवं विना जीवनदर्शनम्।।३।।

शक्यते द्रष्टुमत्रापि धर्मो जीवनदर्शने।
प्राप्यते पठिते कश्चिदर्थो जीवनदर्शने।।४।।

निरीक्षिते सकामेन कामोऽपि समवाप्यते।
आलोकिते वीतरागैर्मोक्षोऽपीहैव लभ्यते।।५।।

लक्ष्मीकान्तकृतं यो हि पठेज्जीवनदर्शनम्।
लक्ष्मीकान्तः सदा तं तु कुर्यात् पूर्णमनोरथम्।।६।।

लक्ष्मीकान्तो ब्रह्मरूपस्तन्मायार्द्धाङ्गरूपिणी।
ताभ्यां नित्यानित्यवस्तुविवेकं लभतेऽत्र सः।।७।।

परत्रापि स संसाराऽसारवस्तु प्रपश्यति।
जिह्वाग्रे तस्य वसति शुक्लवर्णा सरस्वती।।८।।

पञ्चसप्तव्योमनेत्रमिते वैक्रमवत्सरे।
भाद्रमासेऽसिते पक्षे कृष्णजन्माष्टमीतिथौ।।९।।

स्वस्याऽष्टौषण्मिते वर्षे लेखनीपरिनिर्मितः।
रविवारे पद्यबन्धः समाप्तिमगमल्लघु।।१०।।

अस्पष्टान् बहुलालापान् रुदितान् बालभाषितान्।
कृपाकटाक्षविक्षेपं कुर्वन्त्वत्रापि साधवः।।११।।

मनोभावाऽऽवर्तनेन द्विरुक्तिर्दृश्यते क्वचित्।
प्रयत्नाल्लोकनेऽपीह दुरुक्तिस्तु न दृश्यते।।१२।।

मनोभावान् प्रकटयन् नाम्ना जीवनदर्शनम्।
पद्यबन्धो ममाप्येष मुरारिपदयोरियात्।।१३।।

प्रमादाद् भ्रमाद् वा क्वचिद् दृष्टिदोषात्
त्रुटिश्चेदिहाऽऽलोक्यते साधुभिः सा।
विचार्यैव संशोध्य मां सूचयन्तु
दयावन्त एनं जनं बोधयन्तु।।१४।।

❊ ❊

## चतुर्थोन्मेषः

# १८४. स्वपरिचयः

गण्डक्याः पश्चिमायां विलसति जनिभूः पन्नगानिम्नगायाः
प्राक्कूले संश्रितं तद् वसनमपि 'बडाचौर' इत्यस्ति रम्यम्।
माताश्री नीलमाया गुरुसदृशगुरुर्भीमकान्तः पिताश्रीः
लक्ष्मीकान्तं च नाम प्रवदति जनता विप्रवंशेऽभिजातम्।।१।।

शिक्षां पूर्वामपूर्वामलभत जनकात् स्वाङ्क आदाय बाल्ये
शिक्षार्थं योऽगमत् स्वं पितरमपि विहायैव कञ्चित् प्रवासम्।
आ बाल्यादद्य यावत् प्रपठितुमनसो यस्य वासः प्रवासे
जातो नावर्तितो यः कथमपि जनिभूर्विस्मृता नैव तेन।।२।।

यो विद्यां वेत्तुमैच्छद् गुरुजनसविधेः सादरं नैव शक्तो
यो विद्याऽध्यापनार्थं सततमभिलषञ्जीवनीं स्वामनैषीत्।
यो वक्तुं न क्षमोऽभूद् बुधजननिकटे शुद्धवार्ताः कदाचिन्-
नाभूवँस्तस्य काव्यं श्रुतिसुखमधुरं सुष्ठुवृत्तानि बन्धाः।।३।।

यद्भ्राता सूर्यकान्तस्तदनु च मितवाक् चन्द्रकान्तः परोऽपि
मध्यस्थो विष्णुकान्तो व्यवहृतिकुशलः कृष्णकान्तस्तदन्यः।
कुर्वन्तो योग्यकर्मप्रणिहितमतयो गौरवं रक्षयन्तः
स्वे स्वे कार्ये नियुक्ता निकटपरिवृताः सन्ति पित्रोश्च भक्ताः।।४।।

तिस्रोऽनुजाः शान्तमनास्ति शान्ता ज्येष्ठा, द्वितीया विजयास्ति कान्ता।
ताभ्यां कनिष्ठा कमला तृतीया शान्ता च कान्ता च वचोऽभिरामाः।।५।।

गङ्गाभिधा यस्य सपत्नमाता याऽसीत् समेषां प्रियमातृरूपा।
स्नेहेन सर्वानभिषेचयन्ती तेभ्यो ममत्वं हि सदार्पयन्ती।।६।।

ममैव पुत्रा इति चिन्तयन्ती नित्यं सुतेभ्यो ममतां प्रदात्री।
साधुस्वभावा सरला स्मितास्या नितान्तसापत्न्यविहीनचित्ता।।७।।

यस्याः प्राच्यां पश्चिमायामुदीच्यां विभ्राजन्ते दक्षिणस्यामनेकाः।
मालातुल्याः शैलमाला विचित्रास्तत्रासन्नोपत्यका जन्मभूमिः।।८।।

आरात्तस्याः पन्नगा नामरूपा स्रोतोभूता गण्डकीं धावमाना।
कौटिल्येन प्राग्दिशं या वहन्ती ग्रामस्यान्ते शोभते शैलपुत्री।।९।।

आरात्तस्या दारुपर्णादिलभ्या वन्या भूमिः शाद्वलं क्षेत्रमास्ते।
ग्रामस्थानां गेहलक्ष्मीजनानां लभ्येते ते शान्तिसौख्ये सदैव।।१०।।

प्राच्यामास्ते पन्नगायास्तटिन्याः सुष्ठु ग्रामोऽयं 'बडाचौर' नामा।
तस्मिन् ग्रामे तस्य गेहं विशालं गेहादग्रे तस्य वाटी विशाला।।११।।

वाट्या अग्रे शाद्वलं चत्वरं च बोधिवृक्षो राजते चत्वरेऽत्र।
पूर्वाऽपूर्वो विद्यते यत्र मार्गो याताऽऽयातं कुर्वते मानुषाश्च।।१२।।

श्रान्ताः क्लान्ता ये समायान्ति तेभ्यश्छायां दत्वा सख्यभावं करोति।
तत्रागत्य स्पर्शनः स्पर्शनेन पान्थान्नित्यं शक्तियुक्तान् करोति।।१३।।

तत्रापूर्वं पन्नगाक्रोडभूतं धान्यक्षेत्रं राजते राजियुक्तम्।
यस्मिन् क्षेत्रे कर्षकाणां सुखेन वप्या प्राप्या श्यामला सस्यसम्पत्।।१४।।

अश्वत्थोऽयं स्वामितुल्यः समेषां ग्रामस्थानां कर्षकाणां हितेऽस्ति।
कुल्याऽऽनीतं पन्नगाया जलं च युक्तं युक्तं सेचनार्थं प्रवक्ति।।१५।।

सोऽयं ग्रामः 'पण्डितग्राम' नामा तत्र भ्राजन् पण्डितानां समाजः।
तेषां मध्ये मध्यमः पण्डितो यो भीमः कान्तो भीमकान्तो हि नाम्ना।।१६।।

धन्या मान्या भीमकान्तस्य पत्नी नामाऽप्यस्या नीलमाया कनिष्ठा।
लक्ष्मीकान्तो जात आभ्यामिहैव तस्माद् गेहं मन्यते मामकीनम्।।१७।।

पित्रा सार्द्धं ह्यनुदिनमसौ यत्र विद्यार्थिभिश्च
गोभिर्युक्तं सकलमहिषीचारणं कर्मपूर्वः।
पाठं पाठं प्रणयभरितां व्याकृतिं सूत्रपूर्वं
कोषं काव्यं ससुखमरटद् यत्र शब्दार्थपूर्वम्।।१८।।

सानन्दास्ते मृदुलपवना बोधिवृक्षः समीपे
क्रीडारम्यं विषमविरहं शाद्वलं स्थानमस्ति।
बाल्यावस्था सहचरगणैर्यापिता सौष्ठवेन
संस्मर्यन्ते जनिभुविगता यत्र रम्या दिनान्ताः।।१९।।

वसुव्योमखनेत्राब्दे वैक्रमे ज्येष्ठमासके।
जनिर्लब्धाऽश्विनक्षत्रात् संस्कृतो नामसंस्कृतौ।।२०।।

रसभूव्योमनेत्राब्दे पिता माघे हि तं हितम्।
कृतोपनयनं पुत्रं वेदवेदाङ्गमादिशत्।।२१।।

शब्दादिशास्त्राणि पितुःसकाशात् पुण्यप्रसादाद् युवराजतोऽपि।
श्रीपूर्णचन्द्राच्च हरिप्रसादाद् गङ्गाधराद्योऽधिगतो विशेषम्।।२२।।

साहित्यशास्त्राणि पितुःसकाशात् श्रीशेषराजादपि खेमराजात्।
काव्यप्रबन्धान् हरिदेवमिश्रात् सम्प्राप्तवान् यः सुरलोकवाचोः।।२३।।

धर्मादिशास्त्राणि पितुःसकाशात् श्रीदीर्घराजात् शिवराजतोऽपि।
दुर्गाप्रसादाच्च गुरोः सकाशादधीतवान् धर्मविवेकमन्यत्।।२४।।

यदाऽनुसन्धानरतो जनोऽयं सुबुद्धिपूर्वादनुसागराच्च।
विचारितौ वैदिकलौकिकौ द्वौ विवाहबन्धौ स्मृतिसम्मतौ च।।२५।।

टीकारामाल्लब्धचेताः कथञ्चित् कांश्चित् कांश्चित् काव्यबन्धानबध्नात्।
यस्मिन् सोऽयं लेखपाठानुलग्नः पूर्वोक्तानां सद्गुरूणां प्रसादात्।।२६।।

अन्ये प्रपाठकाश्चैवं पितृव्यः शेखरस्तथा।
अनिरुद्धोऽथ गोविन्दस्त्रिवेणीदेवराजकः।।२७।।

रामेश्वरोऽथ गोपालो विश्वनाथो गदाधरः।
राधाकृष्णस्तीर्थराजो रामचन्द्रः प्रपाठकाः।।२८।।

चूडामणिर्वल्लभोऽपि भाषाविज्ञानशिक्षकौ।
हिमांशुरेको नियतो दृश्यकाव्यप्रपाठने।।२९।।

ठाकुरः श्रव्यकाव्ये च वासुदेवः समीक्षणे।
निर्देशकः शोधकार्ये दयारामो विशेषतः।।३०।।

ताराप्रसादप्रमुखा ये-मे कक्षाप्रयोजकाः।
भाषासाहित्यशिक्षायां गुरवस्तस्य योजकाः।।३१।।

गृहाङ्गणे पाठशाला यस्याऽऽसीद् बाल्यकालतः।
पूर्वे वयस्येव येन पठितं पितृसन्निधौ।।३२।।

पाणिनीयानि सूत्राणि रटितान्यपि चाऽसकृत्।
प्रयोगे विप्रयोगोऽभून्नशुद्धो न परिष्कृतः।।३३।।

पठितेऽमरकोषेऽपि नार्थं जानाति मन्दधीः।
हितोपदेशमुद्धोष्य न हितो नोपदेशकः।।३४।।

पठितेऽमरकोषेऽपि शब्दकोषे दरिद्रता।
दृश्यते नाधुना दृष्टं कवित्वं व्यञ्जनार्थकम्।।३५।।

पञ्चतन्त्रं गृहीत्वापि स्वतन्त्रो नाऽधुनाऽभवत्।
तन्त्रमेकं न जानाति पञ्चतन्त्रेषु का कथा।।३६।।

स्वच्छन्दोऽभूत् सदैवार्थे स्वकीये कृत्यकर्मणि।
छन्दःशास्त्रमधीत्यापि स्वच्छन्दः कवितासु न।।३७।।

लघुत्रयीं समालोक्य वचो यस्य न सूनृतम्।
बृहत्त्रयीमधीत्यापि प्रौढतां नाप्तवानथ।।३८।।

भट्टिकाव्यमधीत्यापि योऽव्याकरणपण्डितः।
इतिहासमधीयानो नैव जानाति भारतम्।।३९।।

धर्मशास्त्रमधीत्यापि बुद्धिर्यस्य न धार्मिकी।
वेदान्तलग्नस्वान्तोऽपि वेदान्तविमुखोऽभवत्।।४०।।

दृष्ट्वापि फलितग्रन्थान् द्वितीया फलिता न हि।
श्रुत्वापि च पुराणानि प्रपञ्चविमुखो न हि।।४१।।

धनयोगे लोकितेऽपि धनयोगो न लोकितः।
मैत्रीसम्बन्धयोगेऽपि प्रबन्धो नाऽधुनाभवत्।।४२।।

पञ्चविंशतितत्त्वज्ञा गुरवस्ते दिवौकसः।
षड्विंशतिः पिता यस्य स जनः सप्तविंशतिः।।४३।।

दन्तपङ्क्तिसमैः शुक्लैर्विद्याज्योत्स्नासमुज्ज्वलैः।
गुरुभिः शिक्षितो वक्ति रसनेव सुरक्षितः।।४४।।

तथा नाधीतविद्योऽयं यथाऽऽसन् गुरवो हि ते।
यत्किञ्चित् कर्तुमर्होऽद्य तद् गुरूणां प्रसादतः।।४५।।

श्रीलेखनाथकविरत्नकृतं विचित्रं
काव्यं महासुखकरं त्वृतुषड्विचारम्।
भाषान्तरे कठिनतामनुभूय तस्य
भावानुवादमिव देवगिराऽवदद् यः।।४६।।

काव्यं मुकुन्दशरणीयमिदं सुचारु
यत् पोखराप्रकृतिवर्णनशब्दचित्रम्।
भाषान्तरे कठिनतामनुभूय तस्य
भावानुवादमिव देवगिराऽवदद् यः।।४७।।

वेदान्तवेद्यजनको हठयोगमार्गे
ग्रन्थः प्रदीप इव योगिभिरादृतो यः।
तस्याऽनुवादमकरोज्जनभाषया च
तन्मार्गिणामुपकृतिं विदधातु शश्वत्।।४८।।

भाषायामथ साहित्यविकासविषये पुनः।
गोरखापत्रपूर्वार्द्धं योगदानं समीक्षितम्।।४९।।

तथा च सरलं जन्मपत्रस्य फलमीक्षणम्।
भाषायामलिखत् पद्ये सरलं लघु पुस्तकम्।।५०।।

स्ववंशवृक्षमन्विष्य वंशशाखाश्च दर्शयन्।
सगोत्रान् वंशवृक्षस्थान् योऽलिखद् वंशदर्शनम्।।५१।।

लघुकाव्यं सारस्वतवैभवं योऽलिखत्ततः।
काव्यं लक्ष्मीवैभवञ्च यो लक्ष्मीकृपयाऽलिखत्।।५२।।

बहुभिः शीर्षकैर्युक्तं चतुःसोपानसंयुतम्।
यथामति यथाज्ञानं कृतं जीवनदर्शनम्।।५३।।

कृतौ च कृतिकारे च लेखा विलिखिताः कति।
तेषां सङ्कलनं चैकं 'चन्दनाक्षतपुष्पकम्'।।५४।।

तस्य दैनन्दिनं कर्म किं किमस्तीत्यपि स्वयम्।
विलिख्य सर्वं स्वं वृत्तं प्रख्यापयितुमिच्छति।।५५।।

प्रातःकाले समुत्थाय करणीयं विचार्य च।
भूमिं देवान् पितृदेवान् भास्करं प्रणमत्ययम्।।५६।।

अशक्तोऽयमनासक्तो देहशौचादनन्तरम्।
दन्तधावनगण्डूषं कृत्वा स्नाति स चान्वहम्।।५७।।

धौतवस्त्रं समाधाय सूर्यायाऽर्घ्यं निवेदयन्।
ततो जपति गायत्रीं करोति गुरुवन्दनम्।।५८।।

पितृसन्तर्पणं कृत्वा पञ्चायतनपूजनम्।
ततः सरस्वतीं लक्ष्मीं गणेशं स्तौति सन्ततम्।।५९।।

महाभारतमाख्यानं यद्वा भागवतं भवेत्।
योगवासिष्ठमथवाऽधीते रामायणादिकान्।।६०।।

वेदोपनिषदभ्यासं कुरुते सततोत्थितः।
स्मृतिं पुराणं वा नीतिं पठत्यनुदिनं स्वयम्।।६१।।

इदमेवाऽऽह्निकं कर्म कृत्वाऽध्यापनलेखनम्।
करोति कवितां काञ्चिल्लेखं वापि निबन्धनम्।।६२।।

एतदर्थं ग्रन्थपाठं स्वाधीतविषये भृशम्।
करोति सततं लक्ष्मीकान्त एष धरासुरः।।६३।।

सन्ति यस्य बुधाः केचित् सतीर्थ्याः सुहृदोऽपि च।
प्राध्यापका लेखकाश्च कवयः सुखिनः स्थिताः।।६४।।

फणिनारायणश्चैकः कविरध्यापकोऽभवत्।
प्राध्यापकः केशवस्तु ससुखं मोदतेऽनिशम्।।६५।।

नेमः प्रेमप्रपूर्णोऽस्ति मण्डलाधीशतामगात्।
रत्नाकरः पत्रकारो यमलामण्डलान्तरे।।६६।।

चूडामणिवासुदेवौ सखायौ टेकमाधवौ।
विश्वविद्यालयान्तःस्थावुभौ प्राध्यापकौ बुधौ।।६७।।

जगन्नाथहृषीकेशौ द्वौ सखायौ ततःपरम्।
पीठप्रमुखाधिकृतौ पदासीनौ प्रपाठकौ।।६८।।

प्राध्यापकस्तोयराजः पुराणानां प्रवाचकः।
धनञ्जयोऽस्ति धनिको मध्यदेशे प्रपाठकः।।६९।।

प्राध्यापको रमेशोऽस्ति गुठीसंस्थानरक्षकः।
हरिबोलस्त्वधिकृतः सतीर्थ्याः सहकर्मिणः।।७०।।

एको मन्त्रिपदं प्राप्तः सखा नरहरिः पुनः।
लेखको राजनीतिज्ञः कथं ते संस्मरन्तु तम्।।७१।।

निःसुखे जीवलोकेऽस्मिन् प्रीतियोगः सुदुर्लभः।
संस्मृत्य सुहृदः कश्चित् प्रीतियोगो न तस्य किम्?।।७२।।

आषाढे रामवेदाभ्रनेत्राब्दे वैक्रमीयके।
मित्रेण फणिनाप्येष पत्रेणैकेन संस्मृतः।।७३।।

जिज्ञासा यदि केषाञ्चित्तस्य पत्रस्य दर्शने।
प्रस्तुतं परिशिष्टेऽपि १ ततस्तदपि दृश्यते।।७४।।

जयतुसंस्कृतमिति ख्यातया संस्थया पुनः।
ऋतुविचारकाव्यस्याऽनुवादार्थं कथञ्चन।।७५।।

वेदषड्व्योमनयनमिते वैक्रमवत्सरे।
आषाढे स पुरस्कारसहितोऽप्यभिनन्दितः।।७६।।

जिज्ञासा यदि केषाञ्चित्तस्य पत्रस्य दर्शने।
परिशिष्टे२ प्रस्तुतं तत्तत एव विलोक्यते।।७७।।

यस्य देशान्तरे यात्रा नैवाभूद् बहुकालिकी।
हिन्दुस्तानं बङ्गभूमिं स्थायीभूमिमवाप्तवान्।।७८।।

यः खरामाभ्रनयने वैक्रमे माघमासके।
वाराणसीमधिगतः शास्त्रार्थविषये पुनः।।७९।।

वाणरामाभ्रनयने वैक्रमे भाद्रमासके।
बङ्गभूमिमधिगतः शिक्षामध्येतुमुत्सुकः।।८०।।

ततःस्थायीभूमिमधिगतवान् शैक्षिके विधौ।
अनुसन्धानमुद्दिश्य ह्यनुसन्धित्सुरुद्यतः।।८१।।

शिक्षाविकासश्च तथा ह्यनुसन्धानकेन्द्रतः।
अनौपचारिकीं शिक्षां चलितां द्रष्टुमुत्सुकः।।८२।।

आषाढमासे विधिवत् वसुरामखलोचने।
परिणीता द्वितीयापि माया मायेव लौकिकी।।८३।।

भावनासहितां भक्तिं साधनां चेतनायुताम्।
समुत्पाद्यापि सा माया द्वितीया फलिता न हि।।८४।।

लक्ष्मीकान्तसुता: सन्ति चतस्त्र: संसृतीक्षणा:।
भक्तिभावनयोपेता: साधनाचेतनात्मिका:।।८५।।

गौडिवैदर्भिपाञ्चालिलाटिवद्भिन्नवृत्तय:।
अभिधालक्षणाभ्यां ता व्यञ्जनामतिवृत्तय:।।८६।।

श्लेषप्रसादसमतामाधुर्यगुणबोधिका:।
किं वोपमारूपकार्थाऽलङ्कारोत्प्रेक्षबोधिका:।।८७।।

यद्वा निर्गुणयोपेता: सन्ति सत्त्वरजस्तमा:।
किं वा चेतनया युक्ता ओङ्कारार्थप्रबोधिका:।।८८।।

यतो हि मायया सार्धं तेन प्रकटितास्तत:।
माया विरहिताश्चेत्ता भवतापविमोक्षका:।।८९।।

व्योमवाणखनेत्रे च वैक्रमेऽब्दे शुचौ पुन:।
स्वमातापितरौ नीत्वा तीर्थक्षेत्रे प्रसिद्धके।।९०।।

गुजरातप्रदेशस्थां हिन्दुस्थानस्य पश्चिमाम्।
द्वारकां गतवान् भ्रात्रा कृष्णदर्शन उत्सुक:।।९१।।

ततो गृहं परावृत्य वेदवाणखलोचने।
वैक्रमेऽब्दे पुनस्तीर्थे चोत्तराखण्डपर्वते।।९२।।

स्नानार्थं यामुनं तीर्थं गाङ्गं च गतवाँस्तत:।
केदारनाथं गतवान् दर्शनार्थं पुनस्तत:।।९३।।

दर्शनार्थं भगवतो गतो बदरिकाश्रमम्।
परावृत्य गृहे मातापितरौ परिसेवितौ।।९४।।

वसुवाणखनेत्रे तु वैक्रमे स्वर्गत: पिता।
आश्विनस्याऽधिके शुक्ले द्वितीयायां कुजे दिने।।९५।।

तदौर्ध्वदेहिकं कर्म सम्पाद्य समयान्तरे।
सभ्रातृक: प्रयागेऽपि पिण्डदानमिहाकरोत्।।९६।।

ततो गयामुपगतस्तीर्थश्राद्धविधानतः।
फल्गुतीर्थे पिण्डदानं कृतं विष्णुपदेऽपि च।।९७।।

वाराणसीमुपागत्य गङ्गातीरे विधानतः।
तीर्थश्राद्धं च सम्पाद्य पितृपिण्डाः समर्पिताः।।९८।।

ततोऽन्यतीर्थेषु गतो बहुभिः स्वजनैरसौ।
गोरक्षनाथादारभ्य प्राग्ज्योतिषपुरे गतः।।९९।।

ब्रह्मपुत्रनदे स्नात्वा पितृन् सन्तर्प्य सादरम्।
दर्शनार्थं तत्र गत उमानन्दस्य मन्दिरे।।१००।।

ततोऽन्यस्मिन् दिने प्रातः कामाक्षीं कामरूपिणीम्।
दृष्ट्वा प्रणम्य शिरसा रेलयानेन निर्गतः।।१०१।।

ततो गङ्गासागरेऽपि स्नात्वा सन्तर्पणं कृतम्।
जगन्नाथपुरीं गत्वा स्नात्वा सन्तर्पणं कृतम्।।१०२।।

तीर्थश्राद्धं च विहितं जगन्नाथस्य दर्शनम्।
अतः परं मधुरइपुर्यां सुन्दरमन्दिरे।।१०३।।

मीनाक्ष्याः सुन्दरेशस्य दर्शनं कृतवानसौ।
ततो गत्वा सेतुबन्धे रामनाथस्य दर्शनम्।।१०४।।

गत्वा कन्याकुमारीं च विहितं स्नानदर्शनम्।
अतःपरं केरलेऽपि पद्मनाभस्य दर्शनम्।।१०५।।

कृत्वा शचीन्द्रेशमपि दर्शनं विहितं ततः।
प्रशान्तिनिलयं प्राप्य साईरामस्य दर्शनम्।।१०६।।

विहितं शिरडीपीठे समाधेरपि दर्शनम्।
इतोऽपि नासिकं गत्वा तत्र गोदावरी तटे।।१०७।।

दर्शनं विहितं सम्यग्ग्रामस्यापि शिवस्य च।
दण्डकारण्यविपिनस्थितः पञ्चवटीपदैः।।१०८।।

विदितश्चाश्रमस्तस्य दृष्टो रामस्य सुन्दरः।
इतः प्रतीचीं गतवान् त्र्यम्बकेश्वरमन्दिरे।।१०९।।

दर्शनं विहितं ज्योतिर्लिङ्गस्यापि विशेषतः।
अन्तर्देशीययात्रा तु विहिता मण्डलान्तरे।।११०।।

इलामं च पाँचथरं झापां च सिरहामपि।
सिन्धूलीं चोदयपुरं धनुषां रसुवामपि।।१११।।

धादिङ्गं वै चित्रवनं गोरखां तनहूँमपि।
पोखरां स्याङ्जां वापि परासीमपि पालपाम्।।११२।।

रुपन्देहीं तौलिहवां दाङ्गं प्यूठानमध्यगात्।
बाँकेबझाङ्गौ च ततः परीक्षापरिचालने।।११३।।

गुल्मीं स्वमण्डलं चापि विश्वविद्यालयाद् गतः।
भ्रमणानुभवं कञ्चित् प्राप्तवानयमद्भुतम्।।११४।।

मोहदत्तसुता माया द्वितीया प्रथमः स्वयम्।
चतस्रो दारिकाः सन्ति लक्ष्मीकान्तस्य वल्लभाः।।११५।।

भक्तिभावनयोपेता साधना चेतनाप्रदा।
यासां मनोविनोदार्थमेतज्जीवनदर्शनम्।।११६।।

कवीन् भारविमाघादीन् कठोरपदयोजकान्।
अजातदन्तबालानामिक्षुदण्डरसानिव।।११७।।

पयस्यगाधे ग्रीष्मर्तावालोडयितुमक्षमाः।
तादृक्षा मन्दमतयः किं जानन्तु स्थलेचराः।।११८।।

कवयः कालिदासाद्याः सरलार्थनिवेदिनः।
सरसाः संस्कृते सन्ति मधुराः काव्यजीविनः।।११९।।

तेषामनुसृतिं कुर्वन् मनोभावनिवेदकः।
कविर्नायं तटस्नायी गगने चटकोपमः।।१२०।।

कण्टकैर्वल्कलैर्हीनं तस्य जीवनदर्शनम्।
पर्वतीयं हितं पथ्यं बालानां कट्फलं यथा।।१२१।।

संस्थितः कुत आगत्यैकलो भूदेवपादपः।
गहनोच्चस्थितोऽप्यत्राऽसहायः सरलो यथा।।१२२।।

न बद्धमूलः शाखाभिर्न घनो न च वंशजैः।
सङ्गतः सरसो नैव सरलः पादपो यथा।।१२३।।

त्वक्सारवद् घनो नास्ति वंशीव मधुरो न हि।
अश्वत्थ इव नो शाखी सरसो न रसालवत्।।१२४।।

न विस्तीर्णानि पर्णानि फलानि मधुराणि नो।
सरलः पादप इव लक्ष्मीकान्तो विलोक्यते।।१२५।।

शब्दमात्रान्न भेतव्यं किं शब्देन भवेदिह।
नार्थोऽन्तर्विद्यते तस्य बहिरेवास्ति वल्कलम्।।१२६।।

नित्यं तृष्णार्जनं यस्याऽन्वहं लोभेन मित्रता।
दानं परुषवाग् यस्य त्यागो मूत्रपुरीषयोः।।१२७।।

क्वचित् किञ्चित् कुतश्चिद् किं किं मिलेदिति लिप्सया।
पश्यन्नितस्ततो धावन् वृत्यर्थं श्वेव जीवितः।।१२८।।

न हि धर्मपिता मातादया मधुरवाक्प्रिया।
सत्यपुत्रः साधुपुत्री तीर्थस्नानानि बान्धवाः।।१२९।।

पठन्नेष न जानाति शृण्वन्नपि न बुद्ध्यति।
स्खलत्पदः स्वयं पश्यन् संस्तवो मन्दमेधसः।।१३०।।

स्वपित्रोः सेवया किं वा श्रीगुरोः सेवयाथवा।
भारतीसेवया यद्वा भवेत्तीर्थनिषेवणात्।।१३१।।

पितृदेवार्चनाद्वापि पूर्वपुण्यफलोदयात्।
किं वा भवेन्महालक्ष्मीस्तुतिभक्तिफलोदयात्।।१३२।।

'काश्यां वासोऽथ सत्सङ्गो गङ्गाम्भः शिवदर्शनम्'।
तेनाऽवाप्तान्युत्तरार्धे द्वितयाऽब्दनिषेवणम्।।१३३।।

गङ्गा प्रवहमाणास्ति काश्यामुत्तरवाहिनी।
विश्वनाथपुरी तत्र धनुषाकृतिशोभना।।१३४।।

विश्वनाथोऽनाथनाथो राजते चान्नपूर्णया।
सर्वविद्याराजधानी काशी धन्यतमास्त्यहो!।।१३५।।

प्रातरेवाधिगच्छन्ति गङ्गायां धर्मभीरवः।
तत्र स्नानादिकं कृत्वा समागच्छन्ति भक्तितः।।१३६।।

पङ्क्तिबद्धा भवन्त्येते शिवदर्शनतत्पराः।
प्रसन्नमनसः सर्वे कुर्वते शिवदर्शनम्।।१३७।।

धृत्वा प्रसादपुष्पाणि समायान्ति स्वकर्मसु।
प्राप्तावकाशा वृद्धास्तु कुर्वते साधुसङ्गतिम्।।१३८।।

इयं काशीपुरी धन्या गङ्गया या पवित्रिता।
रक्षिता विश्वनाथेन पालिता चान्नपूर्णया।।१३९।।

(काशी काशीति काशीति त्रिवारं यः पठेन्नरः।
क्वापि देशप्रवासोऽपि काशीवासफलं मिलेत्।।

महादेव महादेव महादेवेति वादिनम्।
वत्सं गौरिव गौरीशो धावन्तमनुधावति।।

महादेव महादेव महादेवेति वादिनम्।
एकेन मुक्तिमाप्नोति द्वाभ्यां शम्भुर्ऋणी भवेत्।।

वाराणसीति काशीति काशी वाराणसी पुनः।
यत्र यत्र स्मरेत् सत्यं काशीवासफलं मिलेत्।।)

श्रुतं पुराणे कुत्रापि सत्यमेतद् ब्रवीम्यहम्।
अत्राऽनाथोऽपि नाथेन विश्वनाथेन पाल्यते।।१४०।।

काश्यां हिन्दूविश्वविद्यालये नेपालपीठके।
वसन्ननुभवन्नेतन्महत्त्वं विनिवेदितम्।।१४१।।

भीमकान्ताय शान्ताय दान्ताय प्रियवादिने।
लक्ष्मीवतेऽर्थशीलाय नमस्तस्मै विपश्चिते।।१४२।।

स्वभावोन्नतशीलं यं श्वभावपरिवर्जितम्।
सोऽभिनन्दति तं सन्तं निनंसति नमस्यति।।१४३।।

नमो विद्याविनीताय परेषामुपकारिणे।
जिताहङ्काररोषाय धर्मशीलविपश्चिते।।१४४।।

नम उन्नतभावाय नमः स्तिमितचेतसे।
सूनृतप्रत्ययौ यस्य नमस्तस्मै विपश्चिते।।१४५।।

यस्त्वहिंसाक्रोधदयाशुचिसत्यमलोभनम्।
भगवत्याः सपर्यार्थं पुष्पाणि चिनुते सदा।।१४६।।

भाषायामिह दीनायां कथां दीनानुसारिणीम्।
को दीनः शृणुयादेतां भिन्ना हि जगतो रुचिः।।१४७।।

आदर्शभूतौ पितरौ धर्मसंस्कारसंस्कृतेः।
लिखितं गोष्पदं पुस्तं तयोरेवानुकम्पया।।१४८।।

विषयेऽस्मिन् मां सदैवाऽभवतां प्रेरणाप्रदौ।
अतस्तयोश्चरणयोरिदं पुस्तं समर्पये।।१४९।।

नीलमायाभीमकान्तौ वल्लभौ पितरौ मम।
लक्ष्मीनारायणसमौ रक्षतामन्वहं हि माम्।।१५०।।

सस्नेहौ करुणापूर्णौ पितरौ तौ मुदा मयि।
शुभाशिषौ कामयेतां भूमेः स्वर्गाच्च सर्वदा।।१५१।।

सन्तः प्रसन्नाः स्युरस्मिन् गुणैः कैरपि तद् वरम्।
अन्ये परिहसेयुश्चेत् तेन मे किं भवेदलम्।।१५२।।

निःसुखे जीवलोकेऽस्मिन् प्रीतियोगः सुदुर्लभः।
यस्य कस्यापि मोदश्चेजायेत सफलः श्रमः।।१५३।।

न जानाति तर्कं न जानाति साङ्ख्यं
न वा योगशास्त्रेण योगः कदाचित्।
न मीमांसया रुच्यते मांसहीनो
ह्यदान्तो न वेदान्तसख्यं करोति।।१५४।।

न नीतौ च मैत्री कृता वा कदाचिन्-
न वा सेतिहासे पुराणे सुदृष्टिः।
कवित्वे सुखित्वं कदाचिन्न जातः
कवीनां कृतौ सख्यभावं करोति।।१५५।।

न धान्यं धनं नार्जिता तेन विद्या
न वा सुन्दरं मन्दिरं मन्दुरा च।
न कान्ता सदा तोषिता काञ्चनेन
गृहे सौख्यहीनोऽपि सख्यं करोति।।१५६।।

न भक्तिर्न शक्तिर्न वा मित्रसङ्गो
न धर्मः कृतो वित्तमैत्री न तस्य।
न पुत्रस्य दृष्टं मुखं बान्धवैः स्वै-
र्विहीनो जनो जीविताशां करोति।।१५७।।

विद्वन्मान्यो भीमकान्तोऽस्ति तातो
लक्ष्मीरूपा नीलमायास्ति माता।
पत्नी माया यस्य पुत्र्यश्चतस्रो
भक्तिश्वेता भावना साधना च।।१५८।।

चत्वारस्ते भ्रातरो बुद्धिमन्तः
सूर्यश्चन्द्रो विष्णुरन्त्यस्तु कृष्णः।
ये सर्वेषां प्रेमपात्रस्वरूपाः
सन्त्यस्माकं धर्मकर्माणि पान्तु।।१५९।।

नेपाले प्राग्विश्वविद्यालयान्त-
विंशत्यष्टौ वर्षमध्यापयित्वा।
काश्यां हिन्दूविश्वविद्यालये यो
शोधच्छात्राध्यापनार्थं नियुक्त:।।१६०।।

शिक्षामन्त्रागारनिर्देशतोऽसौ
काश्यां हिन्दूविश्वविद्यालयाप्त:।
काश्यां स्थित्वाऽध्यापनार्थं प्रवृत्त:
स्वीयानन्यान् छात्रवर्गाननेकान्।।१६१।।

काश्यां हिन्दूविश्वविद्यालयान्त-
र्नैपालाख्यं पीठमास्तेऽधुनायम्।
स्वीयैर्लक्ष्मीकान्त इत्येव नाम्ना-
ऽऽख्यातो ज्ञातो नैव जानाति शास्त्रम्।।१६२।।

लक्ष्मीकान्तो विद्यते मन्दबुद्धि:
शास्त्राभ्यासे यस्य बुद्धिर्न लग्ना।
लेखान् लेखे लेखनी मूकतुल्या
शस्त्रार्थे वाऽनूदयेचाप्यशक्ता।।१६३।।

वेदान्तादिकदर्शनेषु निपुण: साङ्गश्रुतौ पारग:
यो रामायण-भारतादिक-पुराणानां बुधो वाचक:।
साहित्याम्बुधिपारग: सुकृतकृत् सन्त: स्वतातोऽभवत्
स्वाचारान्वितवेषभूषिततनु: श्रीभीमकान्तो गुरु:।।१६४।।

सद्धर्मस्योपदेष्टा स्वयमपि सुकृती तत्कुलालङ्कृति: सन्
विद्वानेष प्रवक्ता रुचिरपदकवि: शास्त्रवित् काव्यकर्ता।
योऽन्येषां चोपकर्ता ग्रहफलकथनादायुरारोग्यवेत्ता
लोकै: सम्मानितोऽसौ विनयनयविधेर्मूर्तिकल्पो विपश्चित्।।१६५।।

भारद्वाजकुलावतंसमणिवद् योऽभूत् सतामग्रणीः
लोकैर्गीतगुणोऽर्थिभिः परिवृतो विद्यार्थिभिः संस्तुतः।
सर्वैर्माण्डलिकैर्बहुश्रुतजनैर्यत्पादपद्मार्चितम्
तस्यैतत् पदपद्ममस्तु सुखदं भूयात्तमोहारकम्।।१६६।।

शुद्धान्तःकरणो बुधाग्रचरणो योऽभूत् कवीनां प्रियः
यो वेदान्तविचारणे स्थिरमना विद्वज्जनैर्वन्दितः।
यो मुक्तो गृहदारबन्धनसुखैः पुत्रादिसम्पद्धनैः
स्वं पुत्रं दिवि संस्थितः स जनकः पायादपायात् सदा।।१६७।।

सोऽयं तत्प्रथमः सुतः किमपि नाधीतोऽल्पबुद्ध्या यतः
सारासारविवेचनाक्षमगतिः सच्छास्त्रसिन्धौ भयात्।
तत्तीरे निवसन् पुनः कतिपयानाचम्य बिन्दूनपि
शब्दानामुपयोजनं विहितवान् स्यात् काव्यबन्धो न वा।।१६८।।

गुल्मीमण्डलमालिकाद्रितनया या निम्नगा पन्नगा
तस्याः प्राक्तटमाश्रितास्ति वसतिर्ग्रामो बृहच्च्वत्वरः।
भारद्वाजकुलेऽमले जनिरभूत् श्रीनीलमायाङ्गजो
लक्ष्मीकान्त इतीह नामकथितः श्रीभीमकान्तात्मजः।।१६९।।

परिचयशतकाधिकसंयुतम्
परिचयसकलं विबुधस्मृतम्।
परिचयनिचयं प्रपठेज्जनः
परिचयविभवं लभते मनः।।१७०।।

परिचयोपचयोपसमीक्षितो
नियमतो यमतो यदि पठ्यते।
परिजनोऽरिजनोऽपि विमुह्यते
परमया रमयापि स सेव्यते।।१७१।।

❊❊

# नम्रनिवेदनम्

साहित्यं सुकुमारशब्दचयनान्नाविष्कृतं लेखने
वेदान्तादिकदर्शने न हि क्वचिन्नैपुण्यमासादितम्।
धर्मे किन्तु क्वचित् कथं कथमहो! चञ्चुप्रवेशः कृतो
जानात्येष किमीह वक्ति जनता मैवं तथात्वं न मे।।१।।

नैव सन्त्युपमोत्प्रेक्षाः सूक्तयो हृदयङ्गमाः।
अनुप्रासादयश्चार्थालङ्कारा गुणवृत्तयः।।२।।

ये मण्डयन्ति शतशः काव्यं चेतो हरन्ति च।
वाचने श्रवणेऽपीह मधुधारा वहन्त्यपि।।३।।

न क्वापि तत्पुरुषोऽव्ययीभावः कृतो न हि।
बहुब्रीहिः कथं भूयाद् द्वन्द्वोऽपीह कुतो भवेत्।।४।।

केवलं मानसोत्साहात् क्रियते कर्मधारणम्।
विना येन कथं जीवो जीवतीह निरन्तरम्।।५।।

लक्ष्म्यादिकान्तेन मयाऽधुनाऽत्र
पितुः प्रसादात् स्वगुरोः प्रसादात्।
या काव्यमाला ग्रथिता प्रयत्नान्
मनोविनोदार्थमियं सतां स्यात्।।६।।

ये मार्गं विचरन्ति तेषु सहसा कश्चित् कदाचित् क्वचित्
औत्सुक्यात् भ्रमतोऽपि दृष्टिविरहात् भ्रश्यन्ति मार्गान्न किम्?
तं दृष्ट्वापि सविभ्रमं विपथगं पश्यन्ति ते केऽबलाः?
तेषां नाम कथं ब्रवीमि? सुजना आशूद्धरन्त्येव हि।।७।।

❊ ❊

# लक्ष्मीवैभवम्

(काव्यम्)

# लक्ष्मीवैभवम्

(काव्यम्)

श्रीरूपां स्वां प्रणम्यादौ मातरं पितरं गुरुम्।
विष्णुरूपं वैभवार्थं लक्ष्मीवैभवमारभे।।१।।

लोके लक्ष्मीरलक्ष्मीश्च द्विविधाऽऽलोक्यते रमा।
लक्ष्मीकान्तः प्रियो यस्यास्तां लक्ष्मीमधुना स्तुवे।।२।।

कलभोपमितं यस्य शुभलाभकरं मुखम्।
कल्याणनिधये तस्मै गणाधिपतये नमः।।३।।

महालक्ष्मीसिद्धलक्ष्मीप्रियोऽसौ गणनायकः।
शुभदः सुखदो भूयाद् घरदो वरदायकः।।४।।

वैकुण्ठे वैष्णवीविष्णू वसन्तौ वरिवस्यया।
अनुकूलयितुं पूजा स्तुतिर्नुतिरिहोच्यते।।५।।

ईषद्धास्यप्रसन्नास्ये रम्ये सुस्थिरयौवने!
सर्वसम्पत्प्रदात्रीं त्वां महालक्ष्मीं भजे शुभाम्।।५।।

प्रचोदयान्महालक्ष्मीर्धनसम्प्राप्तयेऽधनम्।
परस्वरहितं न्याय्यमात्मलोकहितार्थकम्।।६।।

धर्मार्थं धर्मवृद्ध्यर्थं सुखार्थं सुखवृद्धये।
नीतिशास्त्रे निगदितं 'धनाद्धर्मं ततः सुखम्'।।७।।

स्वीकरोतु महालक्ष्मीः पूजां ते विष्णुवल्लभे!।
उपचारविहीनस्य मानसीं किङ्करस्य मे।।८।।

सहस्रदलपद्मस्य कर्णिकावासिनीं मम।
करपद्मनिवासार्थे प्रार्थयामि स्थिरा भव।।९।।

प्रतप्तकाञ्चननिभे रत्नभूषणभूषिते।
त्वद्वासेन प्रियं मेऽपि करपद्मं सुशोभताम्।।१०।।

निर्मलं शीतलं स्वच्छं जलं लक्ष्मि! समर्पये।
पादप्रक्षालनार्थाय पाद्यं ते प्रतिगृह्यताम्।।११।।

अर्घ्यं पुनरिदं तेऽस्तु जलधाराजलं मम।
इदमाचमनीयं स्यादिदं पञ्चामृतं तव।।१२।।

एतत् शुद्धं जलं तेऽहं गण्डूषार्थं समर्पये।
वस्त्रयज्ञोपवीतार्थे करमन्यं निवेदये।।१३।।

गन्धो मन्मुखवासोऽस्तु त्वदर्थं परिकल्पये।
यदन्नं गृह्यते हस्ते ह्यक्षतार्थं निवेदये।।१४।।

पुष्पं तु मच्छिरोऽन्तस्थं सहस्रदलपङ्कजम्।
तुभ्यं समर्पये लक्ष्म्यै नम्रीभूतः पुनः पुनः।।१५।।

जठरानलतप्तेन मया धूपो निवेदितः।
हृदि प्रकाशितं ज्योतिस्त्वदर्थं परिकल्पितम्।।१६।।

चपले! चञ्चले! लक्ष्मि! तेऽनुकूलं गृहाण मे।
मनः समर्पये तुभ्यं त्वत्स्वभावानुसारि यत्।।१७।।

जपोऽस्तु वार्ताविषयो गतिरस्तु प्रदक्षिणा।
कुर्वन्नितस्ततः पूजां भोजनं ते समर्पणम्।।१८।।

सामग्र्याऽऽनयनं पूजानिमित्तं भवतु प्रिये।
मातर्मे भवनं भूयात् तव पूजनमन्दिरम्।।१९।।

मद्गृहस्थानि भाण्डानि वस्त्राण्याऽऽभरणानि च।
नानोपहाररूपाणि त्वदर्थं विनिवेदये।।२०।।

मयाऽर्जितानि वित्तानि स्वर्णरत्नानि यानि च।
त्वदर्थं दक्षिणारूपं यत्तत् सर्वं समर्पये।।२१।।

पक्वान्नं प्रथमं लक्ष्मि! नैवेद्यत्वेन गृह्यते।
यत् किञ्चिदर्पये तुभ्यं प्रसादत्वेन भुज्यते।।२२।।

प्रकृत्यां फलपुष्पाणि तव सन्त्यपि चञ्चले!।
नैव तेषु ममत्वं मे प्रसादत्वेन भुज्यते।।२३।।

ततः करौ मुखं प्रोक्ष्य ह्यासनं ते प्रशोधये।
ततः कर्म करिष्ये यन्नमस्कारप्रदक्षिणम्।।२४।।

इयं मे मानसी पूजा गृह्यतां परमेश्वरि!।
विनम्रः प्रार्थनामेतां स्वीकरोतु पठामि याम्।।२५।।

प्रपन्नस्ते प्रपदयोः पादाङ्गुष्ठमणिद्युतिः।
कुर्याल्ललाटलावण्यं लक्ष्मीकान्तसुलक्षणम्।।२६।।

त्वत्पादकमलं लक्ष्मि! शिरःस्थकमलेन मे।
योज्यं योग्यं भवेन्मातः पादपद्मं ददातु ते।।२७।।

करपद्मद्वयं योज्यं दण्डवत्प्रणतस्य मे।
पादपद्मद्वयं देयं कृपया किं त्वया न मे?।।२८।।

त्वत्पादकमले देवि! योज्यं योग्यं भवेन्न वा।
परिच्छेदकरं तेऽस्तु भूयाच्चरणपङ्कजम्।।२९।।

त्वत्पादकमलं लक्ष्मि! कीदृक्षं नानुमीयते।
परिच्छेदकरं मेऽस्तु सहस्रदलपङ्कजम्।।३०।।

त्वत्पादपद्मयुगले दृश्येते फलिते इव।
दशाङ्गुल्यः फलानीव फलन्तु मम मानसे।।३१।।

लक्ष्मि! ते पादलग्नाभ्यां नूपुराभ्यां सुशिञ्जितौ।
रक्तालक्तकरागेण रञ्जितौ सुनखप्रभौ।।३२।।

पादौ मे हृदयान्तःस्थौ ध्वनिमत्कविताकरौ।
भूयास्तां कामयेऽनेकगुच्छकौ नूपुराविव।।३३।।

मातर्जङ्घान्तरालस्थे न दृष्टे तव जानुनी।
नित्यं पत्युः प्रणमनान्मन्ये कीणायिते उभे।।३४।।

न दृष्टावम्बरान्तस्थावुभावूरू तथाप्यमू।
उपमानानुसन्धेयौ मन्ये करिकरायितौ।।३५।।

अथवा कदलीस्तम्भतुल्यौ किं वा तयो रुचिम्।
न शक्नोमि ख्यापयितुं प्रमाणमनुमीयते।।३६।।

कवोष्णौ कोमलौ स्निग्धौ मृणालनलिकारुचौ।
मोचास्तम्भे करिकरे किं तयोरुपमा भवेत्?।।३७।।

मया विचार्यते ह्येतद् द्वयं नैवोपमीयते।
सुशीतः कदलीस्तम्भो रुक्षः करिकरोऽप्रभः।।३८।।

अथवोभावूरू यौ ते ह्यन्योन्याकारशोभिनौ।
भवेद् वामो दक्षिणवद् दक्षिणो वामवद् भवेत्।।३९।।

मातः करिकराकारं तवोरुयुगलं भवेत्।
याभ्यामन्तः समुद्रोऽस्ति जगतामादिकारणम्।।४०।।

अथर्वशीर्षे कथितमन्तःसमुद्रसंस्थितम्।
वराङ्गमप्सु ते मातर्बहिरेव मनोहरम्।।४१।।

महर्घस्वर्णरत्नादिमणिमुक्ताविराजितम्।
दामधामकटिर्भूयात् वरदाऽभयदा शुभा।।४२।।

या ते सुमेखलालग्नकटिः शाटीविभूषिता।
लक्ष्मीलज्जाकामशक्तिरनयैव सुगोपिता।।४३।।

नितम्बबिम्बं ते लक्ष्मि! पृष्ठतोऽपि सुशोभते।
यदि पीनं न चेत्तद्धि कुचभारं कथं वहेत्।।४४।।

गभीरा दक्षिणावर्ता नाभिस्ते तनुमध्यमे।
मारस्तत्रैव रमतामेतदर्थं गुहायिता।।४५।।

नाभेरुपर्यधो मातरङ्गं ते वस्त्रवेष्टितम्।
दृष्ट्वाऽनङ्गः कथं यातु स नाभौ कुण्डलायितः।।४६।।

कुचमध्यगता रेखामार्गमार्गणतत्परः।
उपर्यनङ्गस्तदधो रोमावलिविराजितः।।४७।।

कामवेलानुसन्धित्सुरवेलामपि चोदितः।
ताभ्यां मार्गद्वयाभ्यां स आरोहत्यवरोहति।।४८।।

कृशे! त्वदुदरञ्चैवं वलित्रयविराजितम्।
तेनानुमीयते देवि! त्रिलोकी स्वोदरीकृता।।४९।।

'आनन्दः कर्दमः श्रीदश्चिक्लीत इति विश्रुताः'।
पुंत्रास्ते मेऽग्रजाः सन्तु कनिष्ठोऽहं तव प्रियः।।५०।।

सुगौलौ कन्दुकाकारौ दृढोपलसमौ कुचौ।
कामदेवाऽस्त्रतुल्यौ ते जगत्त्रयवशीकरौ।।५१।।

उरोजौ तेऽतिपुष्टौ द्वौ पयोभरितपीवरौ।
बहिरेव प्रतीयेते तुष्टिपुष्टिकराविति।।५२।।

पयःपीयूषमास्वाद्य ह्येकस्ते द्राविडः शिशुः।
अपराजेयतामाप्तस्तद्धि सारस्वतामृतम्।।५३।।

'रसो वै स' इति ख्यातं तव काव्याऽमृतं पयः।
मादृक्षाणां तृषार्तानां त्वं प्रस्नुतपयोधरा।।५४।।

मातस्त्वत्कुचकुम्भौ द्वौ काव्यामृतपयोधरौ।
स्तनन्धयोऽहं मधुरं पयः पाययतु स्वकम्।।५५।।

तव स्तन्यमहं मन्ये धन्यं सारस्वतं रसम्।
आयुरारोग्यमैश्वर्यधनविद्याकवित्वदम्।।५६।।

अग्रजा मे प्रसिद्धास्ते चतुराः कारणान्तरम्।
शृणु मातस्तव स्तन्यामृतपानादनन्तरम्।।५७।।

कोऽभिजानातु ते दुग्धामृतं सारस्वतं रसम्।
स्वप्नेऽपि यः पिबेत् सत्यं कमनीयकविर्भवेत्।।५८।।

पाययित्वा तव स्तन्यं रसं दुग्धामृतं मधु।
सारस्वतं सुसन्तानं कमनीयकविं कुरु।।५९।।

हरितां चोलिमाधाय मातस्त्वं चतुरास्यहो!।
हरिप्रियाहमिति किं प्रख्यापयसि भूतले।।६०।।

पीताम्बरधरं शान्तं शशिवर्णं चतुर्भुजम्।
शङ्खचक्रगदापद्मवनमालाविभूषितम्।।६१।।

प्रसन्नवदनं विष्णुं भर्तारं तेऽतिसुन्दरम्।
अभिजानामि पितरं संसारस्थितिपालकम्।।६२।।

जानुलम्बिप्रवेष्टौ ते कोमलौ सुमनोहरौ।
करपद्मस्थितावग्रे स्थले कमलनालिकौ।।६३।।

वरमुद्रां घटं पूर्णं धारयन्तौ निरन्तरम्।
मादृशां वरदौ स्यातां भाग्यरेखाविराजितौ।।६४।।

प्रवेष्टावपरौ मातः सरसीरुहभूषितौ।
रक्षणीयौ शिरसि मे धनविद्यायशस्करौ।।६५।।

यतस्ते करयोः स्निग्धाः सुस्पष्टाः सुविराजिताः।
धनविद्यायशोदात्र्यो रेखाः सन्ति सुनिर्मलाः।।६६।।

सुवर्णरचिता गोला मणिमुक्ताविभूषिताः।
द्युतिमन्तः सुवलया मणिबन्धविराजिताः।।६७।।

नैकाः करद्वये लग्नास्तैः सङ्गीतकरध्वनिः।
भूयाद् भवत्या ध्वनिमत्कविताकारको मयि।।६८।।

करशाखापल्लवैस्तत् करपद्मचतुष्टयम्।
फलितं किमहो! मातर्ममाभीष्टफलानि किम्।।६९।।

तिस्रो रेखा विराजन्ते ग्रीवायां तेऽतिशोभनाः।
सत्त्वं रजस्तम इति गुणाः श्लेषादयोऽपि वा।।७०।।

यद्वा कण्ठे सुशोभन्ते तिस्रो रेखाः सुमङ्गलाः।
छन्दांसि रीतयस्तिस्रो वृत्तयो वा चकाशते।।७१।।

सममर्द्धसमं तद्वद् विषमं त्रिविधं ततः।
त्रीणिच्छन्दांसि राजन्ते स्यन्दन्तेऽपि च कण्ठतः।।७२।।

गौडिवैदर्भिपाञ्चालिरीतयोऽप्यथ वृत्तयः।
अभिधालक्षणार्थान्या व्यञ्जनार्थप्रदायिकाः।।७३।।

तथैव कण्ठे ते मुक्ताहारमालाः सुशोभिताः।
मयानुमीयते सत्यमलङ्कारविशेषकाः।।७४।।

स्वच्छस्फटिकसङ्काशं त्वन्मुखादर्शवृन्तवत्।
त्वत्पित्रा लालितं रम्यं चिबुकं ते समुज्ज्वलम्।।७५।।

त्वन्मुखाम्भोजमुकुरं पश्यता विष्णुनाऽपि तत्।
गृहीत्वाऽऽत्ममुखच्छाया दृष्टा ते मुखदर्पणे।।७६।।

तवोष्ठबिम्बयुगलं सन्ध्यारुणिमराजितम्।
स्यातां विद्रुमवल्लीनां फले बिम्बफले न किम्?।।७७।।

तवोष्ठमुकुले दृष्टे पक्वबिम्बफले इव।
ते फले विवृते दन्तफलान्तर्बीजमालिके!।।७८।।

अहो! सुदति! ते दन्ताः कुन्दकुड्मलतूलिताः।
किमु ते दाडिमीबीजा अन्योदाहरणं भवेत्।।७९।।

त्वन्मुखाम्भोजमिलितैर्द्वात्रिंशद्दन्तपङ्क्तिभिः।
त्वद्विद्यासकलज्योत्स्नाप्रकाशनसमुज्ज्वलैः।।८०।।

अष्टादशानां विद्यानां चतुर्गुणकलान्वितैः।
अधीतिबोधाचरणप्रचारणपुरस्थितैः।।८१।।

द्विसप्ततिसहस्रैस्ते देहस्थैर्नाडिभिः समैः।
मातस्तेऽरुणिताऽऽरक्ता रसना वक्ति शिक्षिता।।८२।।

षडङ्गमिलितान् वेदान् ह्युपवेदाँस्ततः क्रमात्।
पुराणन्यायमीमांसाधर्मशास्त्रादिकानिह।।८३।।

त्वन्नासान्तःस्थिते नाड्यौ चन्द्रसूर्यात्मिके उभे।
ईडा च पिङ्गला चेति सुषुम्णा मध्यगा ततः।।८४।।

मुख्या विद्या त्रयी ज्ञेया मादृक्षैरल्पबुद्धिभिः।
यतस्ते नासिकाद्वाभ्यां ज्ञानोच्छ्वासः प्रचाल्यते।।८५।।

मातस्ते नासिकावंशपताकेव सुशोभते।
यदग्रजडितस्वर्णे कुन्दकुड्मलवन्मणिः।।८६।।

स्वच्छे सुकोमले पुष्टे गण्डनिर्मलदर्पणे।
रात्रौ ताटङ्कबिम्बानि भान्ति तेषां प्रकाशने।।८७।।

गण्डच्छायात्मबिम्बास्ते कर्णयोरवतंसकाः।
श्लेषप्रसादसमतामाधुर्यादिगुणाः किमु।।८८।।

स्वच्छे प्रस्फुटिते मातर्दृष्टं ते वदनाम्बुजे।
रसाऽऽस्वादे सुसंश्लिष्टद्विरेफनयनद्वयम्।।८९।।

सौन्दर्यजलसम्पूर्णे सूत्प्लवन्तौ झषौ यथा।
मुखाम्बुजतडागे ते चञ्चलं नयनद्वयम्।।९०।।

यथा विष्णोर्भालचन्द्रः सदा चन्दनचर्चितः।
तथा ते नयनद्वन्द्वं सदैवाञ्जनभूषितम्।।९१।।

तव लोलालकापाङ्गमेघमाले प्रवर्षताम्।
वर्द्धन्तामायुरारोग्यधनवैभववीरुधः।।९२।।

अपाङ्गद्वयवाणेन लक्ष्यं कर्णद्वयं भिदन्।
नासिकाग्रे वसन् मारः परिमोहयते जगत्।।९३।।

हरनेत्रहराङ्गायानङ्गाय प्रभविष्णुना।
विष्णुना नासिकाग्रस्ते दत्तो वसति नासिकाम्।।९४।।

अतः स मोहनं विष्णुं परिमोहयते न हि।
त्वन्मायामोहितं विश्वं मारो मोहयते सदा।।९५।।

मातर्ललाटलावण्यद्युतिस्ते गगनायते।
तन्मध्ये तिलको रम्यो भाति चन्द्रायितस्तव।।९६।।

भातु ते तिलकश्चन्द्रचन्द्रिका मम मानसे।
जाड्यान्धकारान् हरतु यतो ज्ञानं प्रकाशताम्।।९७।।

तव सीमन्तसिन्दूरोल्लसिता वदनाम्बुजे।
सौन्दर्यलहरी नित्यं गृहे वर्द्धयतां श्रियम्।।९८।।

मातस्ते कुञ्चिताः केशा घनश्यामाः परं ततः।
दयाम्बुभरिता मेघा वर्षयन्तो यथा जलम्।।९९।।

यद्वा पर्वतरूपं ते केशमेघधरं शिरः।
ईरिणे मानसक्षेत्रे वर्षतान्मे घनामृतम्।।१००।।

धाराधरा यथा विद्युत्प्रकाशाः सन्ति भूरिशः।
शिरोभूषणचन्द्रस्य कलामणिमरीचयः।।१०१।।

मेघश्रीतस्करं तेऽस्ति शिरःकुन्तलसंवृतम्।
कुञ्चितेभ्यः कुन्तलेभ्यः प्रवर्षतु धनामृतम्।।१०२।।

अथवा केशवेशस्ते मुखपद्मं धरन् भृशम्।
काव्यमुक्ताहारमेकमुपकण्ठं ददातु मे।।१०३।।

चन्द्रश्रीतस्करं तेऽस्ति मुखमत्यन्तमुज्ज्वलम्।
मीनश्रीतस्करे लोले लोचने इति कल्प्यते।।१०४।।

कुन्दश्रीतस्करेयं किं दशनद्युतिरुज्ज्वला।
बिम्बश्रीतस्करो रक्तोऽधरोऽरुणिमरागधृक्।।१०५।।

त्वमरालाऽसि केशेषु मरालवदनायिते।
प्रकृतौ सरलाऽसि त्वमीषद्धास्ययुता मुखे।।१०६।।

बिल्वश्रीतस्करौ गोलौ दृढोपलसमौ कुचौ।
मृणालश्रीतस्करौ ते मसृणौ कोमलौ भुजौ।।१०७।।

शिरीषकोमला चित्ते दृषद्रूपा कुचेऽप्यऽसि।
त्वं मध्यमेऽतीव तन्वी जघने पृथुलाप्यऽसि।।१०८।।

रम्भाश्रीतस्करावूरू मन्दोष्णौ वामदक्षिणौ।
कनकश्रीसमं सर्वं वपुस्ते सुमनोरमम्।।१०९।।

किमत्र चित्रं ते लक्ष्मि! देहकान्तिर्विशेषतः।
तस्कराणां समूहेन लक्ष्यिता किमु लक्ष्यते।।११०।।

त्वत्पादपादपतले दशाङ्गुलिफलान्यलम्।
दशेन्द्रियाणां तृप्त्यर्थं फलितानीव सन्तु मे।।१११।।

फलेषु तेषु विन्यस्तनखद्युतिसमुज्ज्वलः।
प्रकाशो मन्मनोऽन्तस्थं तमो हरतु सत्वरम्।।११२।।

कृपाकटाक्षविन्यस्तभक्तानाश्वर्थसम्पदः।
दृष्टिर्ददाति ते मह्यं प्रवर्षतु धनामृतम्।।११३।।

यद्वा करौ ते सरलौ शिरीषकुसुमायितौ।
आशिषो भूरिशो दत्तां मानसेष्टावधारकौ।।११४।।

यतस्त्वत्करयो रम्या भाग्यरेखा विराजिता।
तयोः स्पर्शनमात्रान्मे भाग्यं फलतु सर्वथा।।११५।।

विष्णोस्त्वमरुणादेवी करुणावरुणालया।
देहि मे करुणाविन्दून् पादाभ्यां ते नमो नमः।।११६।।

तव नामगुणाख्याने वाणी लगतु सर्वदा।
मूर्तिसम्मार्जनादौ ते करौ यातां सदा मम।।११७।।

पादयोस्ते शिरो मेऽस्तु विनतं तत्समुन्नतिः।
त्वत्प्रसादादिह स्यान्मे महालक्ष्मीः प्रसीदतु।।११८।।

त्वत्पादपद्मलग्नानि यानि चूर्णानि सन्त्यहो!।
दुःखाक्षराणि लुम्पन्तु निटिलस्थानि तानि मे।।११९।।

आपद्घनतमो भान्तु ज्योतीरूपाणि तानि मे।
अभीप्सितार्थान् ददतु वरदा अक्षताश्च ते।।१२०।।

दुःखाब्धिसन्तितीर्षूणां सेतवः पादरेणवः।
प्रभवन्तु मदर्थं ते तारणेऽनर्थशोधने।।१२१।।

त्वं वीरलक्ष्मीर्विजयलक्ष्मीश्च त्वमुदीर्यसे।
धनलक्ष्मीर्धान्यलक्ष्मीस्त्वमेव समुदीर्यसे।।१२२।।

ऐश्वर्यलक्ष्मीः सन्तानलक्ष्मीस्त्वां ब्रुवते जनाः।
गजलक्ष्मीरादिलक्ष्मीरेवं त्वमसि चाष्टधा।।१२३।।

शक्यते यदि ते द्रष्टुं मुखं ते कमलायितम्।
सुखाकरं सुखं प्रोच्यं कथं तत् प्रोच्यते मुखम्।।१२४।।

शं करं सुखमित्युक्तं युक्तं समुचितं भवेत्।
विधात्रा सुखमित्युक्ते विपर्यासो लिपेः किमु?।।१२५।।

ये तवोपासका लक्ष्मि! दृश्यन्ते सुखिनः सदा।
ऐश्वर्यशालिनो हृष्टाः समृद्धा धनसम्पदैः।।१२६।।

व्यग्रा व्यङ्गा विरूपा ये रहिता धनसम्पदैः।
मत्ताः प्रमत्ताः कुटिलास्तैर्न त्वं समुपासिता।।१२७।।

त्वत्सङ्गत्या देवदेवो विष्णुर्गरुडवाहनः।
शङ्खचक्रगदापद्मसहितो जगदीश्वरः।।१२८।।

पीताम्बरधरः शान्तो वनमालाविभूषितः।
ईषद्धास्यप्रसन्नास्यः सान्निध्यात्तव तत्फलम्।।१२९।।

शेषशायी सर्वमान्यो विश्वरूपो जगत्पतिः।
तथापि न प्रमत्तोऽस्ति तव सन्निधिकारणात्।।१३०।।

तद्भक्त्याऽविचलासि त्वं पादसंवाहनादिभिः।
सुखिनं कुरुषे नित्यं न त्वं त्यजसि तद् गृहम्।।१३१।।

अस्थिरा वर्तसेऽन्यत्र न ते भक्ता यतो हि ते।
कुर्वते ते न मर्यादामुपयोगं च सत्क्रियाम्।।१३२।।

भक्ता भगवतो ये स्युर्मर्यादापालकाश्च ये।
त्वद्भक्तियुक्ता ये सन्तस्तद्घरे स्यात्तव स्थितिः।।१३३।।

लक्ष्मीः पातु चतुर्दिक्षु पद्मा पातु विदिक्षु माम्।
आकाशे वैष्णवी पातु वाराही पात्वधः स्थिता।।१३४।।

विष्णुमाया शिरः पातु ललाटं श्रीर्हरिप्रिया।
कमला लोचने पातु रमा मे रमतां गृहे।।१३५।।

मुखश्रीस्ते मुखं पातु मुखं पद्मायतां मम।
रसनां सरसां कुर्यात्तव स्तन्यामृतं मम।।१३६।।

ग्रीवां पातु जगद्धात्री श्रोत्रे पातु रसेश्वरी।
क्षीरसागरकन्या मे करौ पातु सुलोचना।।१३७।।

वक्षः पातु जगन्माता उदरं विष्णुवल्लभा।
कटिं मे ललिता पातु गुह्यं मे लोकनन्दिनी।।१३८।।

ऊरू सुरेश्वरी पातु जानुनी जगदीश्वरी।
पादौ पातु महालक्ष्मीः प्रपदे कमलासना।।१३९।।

बुद्धिं मे बुद्धिदा पातु प्रतिभां प्रतिभावती।
कवितां सकला पातु परितः परमेश्वरी।।१४०।।

व्यवहारान् सदा पातु संसारार्णवतारिणी।
धनं धनेश्वरी पातु विद्यां पातु सरस्वती।।१४१।।

वरदा वरदा भूयाः सर्वदा सर्वदाऽनिशम्।
शारदा शारदाम्भोजवदना वदने वस।।१४२।।

श्लेषप्रसादसमतामाधुर्यगुणशालिनीम्।
जिह्वाग्रे कवितां कुर्यात् शारदा शरदां शतम्।।१४३।।

वाग्देवी पातु वाक्यानि गद्य-पद्यमयानि मे।
सर्वदोमाधवः पातु श्लेषार्थानपि रातु मे।।१४४।।

अलङ्करोत्वलङ्कारैरुपमारूपकादिभिः।
गुणैश्च सगुणं कुर्यात् काव्यं मे सुरभारती।।१४५।।

रसैश्च सरसं कुर्याद् दुर्गा ध्वनयतु ध्वनिम्।
छन्दोभिर्विविधै रूपैः शं कुर्यादिह शङ्करी।।१४६।।

तुष्टिपुष्टिप्रदात्री मे खाद्यपेयानि रक्षतात्।
गृहं गृहेश्वरी पातु कार्यं पातु यशस्विनी।।१४७।।

इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिस्वरूपिणी।
इच्छाशक्तिं ज्ञानशक्तिं क्रियाशक्तिं प्रवर्द्धयेत्।।१४८।।

रोगादिभ्यः सदा पातु सुप्रसन्नस्वरूपिणी।
कामलोभादिशत्रुभ्यः पातु विश्वेश्वरी सदा।।१४९।।

नारायणपरा नित्यं मम दुःखं व्यपोहतु।
शत्रुभ्यः सुखदा पातु सर्वभूतहितार्थिनी।।१५०।।

सदाचारान् सदा पातु माता त्रैलोक्यपावनी।
सर्वदा सर्वदा कुर्यात् सन्निधिं सन्निधिं मम।।१५१।।

सदा क्षेमकरी पातु पृष्ठतश्चाग्रतोऽपि माम्।
सम्पूर्णं जीवनं पातु जगदानन्दकारिणी।।१५२।।

त्वद्भक्तानां महालक्ष्मि! नाऽकाले मरणं भवेत्।
आधिव्याधिविनाशश्च तेषां ते कृपयाऽनिशम्।।१५३।।

स्वर्गलक्ष्मी राजलक्ष्मीर्गेहलक्ष्मीरिमाः शुभाः।
भवन्तु सुखदाः सर्वा अनुकूला ग्रहा अपि।।१५४।।

रविः शशी कुजः सौम्यो जीवः शुक्रः शनिस्तमः।
केतुना सहिताः सर्वे ग्रहाः कुर्वन्तु मङ्गलम्।।१५५।।

आदित्यः सुखदो भूयाच्चन्द्रः सर्वार्थसाधकः।
मङ्गलो मङ्गलं कुर्यात् बुधो बुद्धिं ददातु मे।।१५६।।

वाक्सिद्धिं वाक्पतिर्दद्यात् काव्यः काव्यं प्रसाधयेत्।
शनिः शत्रुहरो भूयात् राहुर्दद्याद् बलं मयि।।१५७।।

सर्वविघ्नहरो भूत्वा केतुः कार्याणि साधयेत्।
महागणपतिर्भूयात् सिद्धिबुद्धिप्रदायकः।।१५८।।

मङ्गला पिङ्गला धान्या भ्रामरी भद्रिका तथा।
उल्का सिद्धा सङ्कटा च त्वं लोकानां दशा असि।।१५९।।

मङ्गला मङ्गलार्थे त्वं धान्यार्थे धान्यका भव।
भद्रिका भद्रकार्यार्थे सिद्धा भव सदैव मे।।१६०।।

द्वाभ्यां चतुर्भिर्द्वाभ्यां च चतुर्भिः पञ्चभिः सदा।
इज्यसे जप्यसे लक्ष्मीरिह सप्तदशाक्षरैः।।१६१।।

वषडाऽऽश्रावय यजाऽस्तु श्रौषड् ये यजामहे।
तव प्रीतिकरैर्मन्त्रैः पञ्चभिः स्तौमि सर्वदा।।१६२।।

तव यन्त्रं विनिर्माय पञ्चविंशतिकोष्ठकम्।
पञ्चविंशतिकोष्ठेषु लिखेन्मध्ये त्रयोदश।।१६३।।

न्यूनं कृत्वा षट् तदग्रे लिखेद्युक्तं ततः परम्।
अष्टौ न्यूनमधो देयं तद्युक्तमुपरि न्यसेत्।।१६४।।

नैर्ऋत्ये सप्तहीनं स्यादीशाने तद्युतिर्भवेत्।
हीनमेकादशाग्नेये वायव्ये तद्युतिर्भवेत्।।१६५।।

मध्योपरि लिखेत् तुर्यहीनं युक्तमधो लिखेत्।
देयं त्रियुक्तमाग्नेये वायव्ये तु त्रिहीनकम्।।१६६।।

ऐशान्ये नवयुक्तं स्यान्नैर्ऋत्ये नवहीनकम्।
आग्नेये पञ्चहीनं स्याद् वायव्ये पञ्चयुक्तकम्।।१६७।।

नैऋत्ये चैकहीनं स्यादैशान्ये चैकयुक्तकम्।
उदीच्यां द्वादशहीनं युक्तं द्वादश दक्षिणे।।१६८।।

देयं द्वियुक्तमाग्नेये वायव्ये तु द्विहीनकम्।
ईशाने दशहीनं स्यान्नैऋत्ये दशयुक्तकम्।।१६९।।

पञ्चविंशतिकोष्ठेषु सङ्ख्याताः पञ्चविंशतिः।
तिर्यगूर्ध्वं योजितेऽपि पञ्चषष्टिः प्रजायते।।१७०।।

महालक्ष्मीयन्त्रमेतत् पञ्चविंशतिकोष्ठकम्।
दीपावल्यां विलिख्यैनं सम्पूज्यं धनधान्यदम्।।१७१।।

त्वन्मन्त्रजापकं तद्वत् त्वद्यन्त्रधारकं प्रति।
रुष्टा मा भूर्महालक्ष्मीस्तस्मै वितर सम्पदः।।१७२।।

त्रिपदानि प्रसिद्धानि सम्पदापद्विपत्तयः।
द्विपदे हर मल्लक्ष्मि! पदमेकं ददातु मे।।१७३।।

त्वत्पदं हे महालक्ष्मि! विपदामपदं मम।
त्वत्पदध्यानलीनस्य तद् भूयात् सम्पदां पदम्।।१७४।।

अहो! 'नुज'पदस्याग्रे दृष्टौ द्वावक्षरौ द-मौ।
एकेन दनुजो जातोऽपरेण मनुजोऽभवत्।।१७५।।

मकारो मधु माधुर्यं माया मुनिमनो मतः।
मनुजोऽहमपाङ्गात्ते न दृष्टः केन हेतुना।।१७६।।

दयादाक्षिण्यदानैश्च दकार: सार्थको न किम्।
त्वदासनपदाल्लक्ष्मि! मनुजो दनुज: कथम्।।१७७।।

दयादाक्षिण्यदानानि त्वदासनपदाय वै।
ददातु मानसं तस्य करोतु परिवर्तनम्।।१७८।।

यदि न स्यात् स मनुजस्तस्यान्त:स्थं भयावहम्।
त्वदासनप्रतिष्ठार्थं दनुजत्वं प्रणाशय।।१७९।।

महालक्ष्मि! सिद्धलक्ष्मि! मम त्वं दक्षिणा भव।
यदि त्वं दक्षिणा भूया: क: किमुत्पाटयेन्मम।।१८०।।

ब्रह्मा दीर्घायुषं कुर्याद् विष्णुर्विपुलसम्पदम्।
हरो रक्षति गात्राणि लक्ष्मीर्यस्याऽस्ति दक्षिणा।।१८१।।

यदि मे दक्षिणा लक्ष्मीर्गेहं नाकति सर्वदा।
द्वेषी मित्रति मां नारीसङ्गमोऽपि विमोक्षति।।१८२।।

गर्वितोऽपि प्रवणति राजा दासति सर्वथा।
पातकं च सुकृतति मृत्युर्वैद्यति मां प्रति।।१३८।।

विषयार्था: सुखायन्तेऽनर्थोऽप्यर्थायते मम।
कारागारा गृहायन्ते नारी सारायते न किम्?।।१८४।।

त्वत्कृपारहितस्याऽद्य विषयोऽपि विषायते।
कारागारायते नारी अर्थोऽनर्थायतेऽधुना।।१८५।।

मया विरहितेनाऽतो मया माऽभ्यर्थिताधिकम्।
शृणु मेऽभ्यर्थनां सत्यां पात्रं प्रकुरु मामित:।।१८६।।

त्वां विष्णुवल्लभां वन्दे सारदां शारदां प्रियाम्।
भवभीतेरिहत्रस्तं पातु मां शरणागतम्।।१८७।।

या लक्ष्मीर्गृहमायाता सर्वदा कुरुते सुखम्।
याऽलक्ष्मीर्गृहमायाताऽसर्वदा कुरुतेऽसुखम्।।१८८।।

आयाता तं विधत्ते सा सुखिनं सम्पदां पदम्।
नायाता तं विधत्ते सा दु:खिनं विपदां पदम्।।१८९।।

यत्पदं पठ्यते लक्ष्मि! तत्पदं सार्थकं भवेत्।
त्वत्पदार्थे कृते वाचा तद् भूयात् सम्पदां पदम्।।१९०।।

यत्र यत्र मनो मे स्यात् तत्र तत्र श्रियं धरेत्।
यत्र यत्र शिरो मे स्यात् तत्र लक्ष्मीपदं नमेत्।।१९१।।

यत्र यत्र पदं गच्छेद् यत्र वासो भवेन्मम।
तत्र श्रीर्विजयो भूतिर्भवेदिति समर्थये।।१९२।।

---

लाभो वसन्ततिलके न हिमागमेऽपि
भावो न कोऽपि शरदि स्फुरति त्वदीय:।
वर्षासु हर्षभरितं न मन: प्रपूर्णं
ग्रीष्मेऽभितप्तहृदय: शिशिरेऽभिशीत:।।१९३।।

माया विमोहयति मामपमानपूर्वं
गौरी न गौरवकरा तुलसी सुखं न।
गायन्तमात्मजमुपैति सरस्वती न
लक्ष्मि! त्वमेव शरणं कुरु मेऽनुकम्पाम्।।१९४।।

दुर्गा न मामवति तर्जति कोषराज:
कष्टायते मन इदं न सुखायते मे।
वेदो विदारयति चित्तमुपेत्य टङ्क-
ष्टङ्केन टङ्कयति मामतिदूयते तत्।।१९५।।

भेशोऽभिनन्दयति सम्मुखमेत्य नित्यं
दूरादुपेत्य कमल: सुमनायते नो।
कोऽस्मद्यते निकटमेत्य जनोऽन्यदीय:
कामादय: किमु सखाय इमेऽन्तरस्था:।।१९६।।

धैर्यं धियं श्रियमिमे नयनार्थमीयुः
शौर्यस्वसाहसनयैः परिभावनीयाः।
विद्यात्मबुद्धिविभवैः परितो विचार्य
सर्वैर्जनैः सह समं शुभमीक्षणीयम्।।१९७।।

भूतो गतस्तदपि भूतिरपेक्षितव्या
दैवे शुभे सति शुभायतिरीक्षणीया।
नान्यैर्जनैर्भवतु कैरपि वैरभावः
क्षेमङ्करी प्रकुरुतां सुखदाऽऽयतिं मे।।१९८।।

पापं भिन्ते धर्मवृद्धिं विधत्ते
लक्ष्मीं दत्ते विप्रकर्षत्यलक्ष्मीम्।
विद्यां सर्वां वर्द्धयत्येव बुद्धिं
लक्ष्मीः श्रद्धाशालिनी किं न कुर्यात्।।१९९।।

दुर्गा शम्भुर्नैव धाता न विष्णु-
र्नो वा सूर्यो नो गणेशो न शक्रः।
स्वीयं वत्सं पातु मां कामधेनू-
रूपा लक्ष्मीः सर्वदोपास्यमाना।।२००।।

मातासि त्वं तारयस्येव दुःखात्
मां पाहि त्वं सर्वकल्याणरूपा।
सैषा लक्ष्मीर्दुःखविघ्नान् निहन्तु
धर्मं मोक्षं काममर्थं ददातु।।२०१।।

तव कटाक्षनिरीक्षणमीक्षणाद्
द्रुतविलम्बितमत्र गतं वयः।
द्रुतमुपैतु धनं न विलम्बितं
शमय भार्गवि! कामिनिकल्कनम्।।२०२।।

नवकृतौ सुकृतौ मतिरस्तु मे
तव कृते सुकृते गतिरस्तु मे।
कलय भामिनि! केशवकामिनि!
रचय चेतय चिन्तय चिन्तनम्।।२०३।।

निधुवनोपवने भवने वने
मधुवने भुवनेऽपि न मे सुखम्।
तव विलोकनलोचनलोकना-
दनुदिनं सुदिनं समपेक्षते।।२०४।।

इन्दिरे! त्वमिह मन्दिरे मम
शारदे! त्वमपि मन्मुखे वस।
प्रार्थनास्ति युवयोः सुवर्णिता
निर्मितं त्वदुभयार्थकेतनम्।।२०५।।

इन्दिरे! त्वमिह भाषया सह
मद्गृहागमरथोत्सवं कुरु।
शारदे! त्वमपि पद्मया सह
मन्मुखागमरथोद्धता भव।।२०६।।

इन्दिरे! मन्दिरे शीघ्रमागम्यतां
भारति! त्वं मुखे सुप्रसन्ना भव।
आप्यतामिन्दिरा वित्तसम्पद्धिता
लिख्यतां भारती काव्यसम्पद्धिता।।२०७।।

शुक्लवर्णान्विता भारती गुम्फिता
भारतीमिन्दिरां स्रग्विणीं कुर्वता।
मालिके ते उभे प्रार्थिते मन्मुखे
मन्दिरे वासहेतोर्मया वर्णिता।।२०८।।

क्व ते भवेद् वास इतीदमद्य
जानामि हे लक्ष्मि! लिखामि चात्र।
मादृक्षरूपे प्रियपुत्रभूते
करोतु वासं भृशमर्थयेऽहम्।।२०९।।

(स्वधर्मशीलेषु च धर्मवित्सु
वृद्धोपसेवानिरते च दान्ते।
कृतात्मनि क्षान्तिपरे समर्थे
क्षान्तासु दान्तासु तथाऽबलासु।।

सत्यस्वभावार्जवसंयुतासु
वसामि देवद्विजपूजितासु।
सत्यासु नित्यं प्रियदर्शनासु
सौभाग्ययुक्तासु गुणान्वितासु।।

वसामि नारीषु पतिव्रतासु
कल्याणशीलासु विभूषितासु।
यानेषु कन्यासु विभूषणेषु
यज्ञेषु मेघेषु च वृष्टिमत्सु।।

वसामि फुल्लासु च पद्मिनीषु
नक्षत्रवीथीषु च शारदीषु।।
गजेषु गोष्ठेषु तथाऽऽसनेषु
सरःसु फुल्लोत्पलपङ्कजेषु।।

नदीषु हंसस्वननादितासु
क्रौञ्चाऽवघुष्टस्वरशोभितासु।
विकीर्णकूलद्रुमराजितासु
तपस्विसिद्धद्विजसेवितासु।।

वसामि नित्यं सबहूदकासु
सिंहर्गजैश्चाऽऽकुलितोदकासु।।
मत्ते गजे गोवृषभे नरेन्द्रे
सिंहासने सत्पुरुषेषु नित्यम्।।

यस्मिन् जनो हव्यभुजं जुहोति
गोब्राह्मणं चाऽर्चति देवताश्च।
काले च पुष्पैर्वलयः क्रियन्ते
तस्मिन् गृहे नित्यमुपैमि वासम्।।

स्वाध्यायनित्येषु सदा द्विजेषु
क्षेत्रे च धर्माऽभिरते सदैव।।
वैश्ये च कृष्याभिरते वसामि
शूद्रे च शुश्रूषणनित्ययुक्ते।।

नारायणे त्वेकमना वसामि
सर्वेण भावेन शरीरभूता।
तस्मिन् हि धर्मः सुमहान् निविष्टो
ब्रह्मण्यता चाऽत्र तथा प्रियत्वम्।।

नाऽहं शरीरेण वसामि देवि!
नैवं मया शक्यमिहाऽभिधातुम्।
भावेन यस्मिन् निवसामि पुंसि
स वर्द्धते धर्मयशोऽर्थकामैः।।)[१]

वचस्त्वदीयं हि निवासहेतुं
व्यासोऽलिखद् भारतकाव्यरत्ने।
त्वं रुक्मिणीप्रश्नसमुत्तरन्ती
स्त्रियं पुमांसं स्थलनिर्दिशन्ती।।२१०।।

---

१. उपर्युल्लिखिताः कोष्ठमध्याः कविताः महाभारतानुशासनपर्वण उद्धृताः।

तवैव निर्देशनबोधतुष्टः
सम्प्रार्थयेऽहं मम वासगेहम्।
शीघ्रं समायाहि ममत्वबुद्ध्या
नाहं कथं स्यां तव वासपात्रम्।।२११।।

गृहे निवासं कुरु मे रमे! त्वं
सरस्वति! त्वं वस मे मुखेऽद्य।
आरोग्यरूपे! वस मे शरीरे
ममोपकण्ठं वस वित्तरूपे।।२१२।।

वित्तस्वरूपं न भवेद् यदा ते
न लोकयात्रा चलतीति जाने।
मातः सहाया भवती भवेच्चेत्
अन्यः कथं किं कुरुते तवाग्रे।।२१३।।

विद्यां विनापीह जनास्त्वदीयां
कृपामवाप्ताऽग्रसराश्चलन्ति।
विद्वज्जनोऽपीह न लोक्यतेऽत्र
दलीयभावं हि जना गणन्ति।।२१४।।

व्यासेन चोक्तं हि धनं किमर्थं
धर्माय चार्थाय च कामनायै।
चतुर्थभागं तु धनस्य देवि!
ह्यापत्तिकाले प्रशमाय तस्याः।।२१५।।

व्यासोक्तिरेषा हि धनोपयोगे
दृष्टा मया भारतकाव्यरत्ने।
सुखाय दुःखप्रशमाय देवि!
कृपाकटाक्षं वितनोतु ते मे।।२१६।।

त्वदीयभक्तिं प्रकरोमि नित्यं
मातृस्वरूपा भवती सुतोऽहम्।
त्रुटिर्यदि स्याद् भवदर्थनासु
क्षमस्व मां बालिशबुद्धियुक्तम्।।२१७।।
(इति प्रथमांशः)

महालक्ष्मि! नमस्तुभ्यं नमस्तुभ्यं दयानिधे!।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं हरिप्रिये!।।२१८।।

पद्मालये नमस्तुभ्यं नमस्तुभ्यं च सर्वदे!।
दयावति! नमस्तुभ्यं समृद्धिं कुरु मे सदा।।२१९।।

पद्मपत्रेक्षणायै ते पद्मास्यायै नमो नमः।
पद्मासनायै पद्मिन्यै महालक्ष्म्यै नमो नमः।।२२०।।

विश्वेश्वरि! नमस्तुभ्यं नमस्तुभ्यं दयावति!।
नमस्तुभ्यं नमस्तुभ्यं कृपां कुरु ममोपरि।।२२१।।

क्षीरोदतनये! देवि! रमे! रामे! मनोरमे!।
गौरी पद्मा शची मेधा सर्वं त्वं विष्णुवल्लभे!।।२२२।।

जया त्वं विजया त्वं हि सावित्री त्वं सरस्वती।
धनपूर्णाऽन्नपूर्णा त्वं रक्ष मां शरणागतम्।।२२३।।

बन्धुहीनस्त्वया हीनस्त्वया युक्तः सबान्धवः।
पत्नीपुत्रादिहीनः स्यात् त्वया विरहितो नरः।।२२४।।

स्तनन्धयानां बालानां यथा माताऽस्ति शैशवे।
मातृस्नेहविहीनानां त्वं माता मादृशां सदा।।२२५।।

विष्णोस्त्वं विष्णुमायाऽसि सावित्री ब्रह्मणोऽप्यसि।
शिवस्यापि शिवाऽसि त्वं सिद्धिस्त्वं गणपस्य च।।२२६।।

रामस्य दयिता सीता त्वं कृष्णस्याऽसि रुक्मिणी।
पाण्डवानां द्रौपदी त्वं बलरामस्य रेवती।।२२७।।

सुप्रभा त्वं हि सूर्यस्य त्वं चन्द्रस्याऽसि चन्द्रिका।
स्वाहा स्वधा त्वमेवाऽसि हव्यकव्यप्रवाहिका।।२२८।।

त्वमिन्द्राणी सुरेन्द्रस्य वसिष्ठस्याऽप्यरुन्धती।
अत्रेस्त्वमनसूयाऽसि जगन्मायाऽसि मोहिनी।।२२९।।

वीचिस्त्वं सागरस्याऽसि त्वमाकाशस्य नीलिमा।
हिमाद्रेश्च हिमानी त्वं भूमौ त्वमऽसि शाद्वला।।२३०।।

त्वं पदानां सदर्थाऽसि पदार्थानां रसात्मिका।
पौरुषं पुरुषाणां त्वं नारीणां शीलरूपिणी।।२३१।।

सत्स्वरूपाऽसि साधूनां ज्ञानिनां ज्ञानरूपिणी।
कुलाङ्गनानां लज्जा त्वं मित्राणामसि मित्रता।।२३२।।

त्वं स्वादुताऽसि सलिले त्वमुष्मा शिखिनि स्मृता।
पुरुषे चेतनाऽसि त्वं पवने त्वं बलं सदा।।२३३।।

दुःखान्यशेषजीवानां क्षिप्रं हरसि संस्मृता।
दारिद्र्याऽनलदग्धानां त्वं धनौषधिरूपिणी।।२३४।।

स्वर्गिणां स्वर्गलक्ष्मीस्त्वं राजलक्ष्मीर्नृपस्य च।
गृहिणां गेहलक्ष्मीस्त्वं सर्वव्यापकरूपिणी।।२३५।।

त्यक्तस्तनो मातृहीनः सोऽपि दुःखेन जीवति।
त्वया विरहितः कोऽपि न जीवत्येव निश्चितम्।।२३६।।

लक्ष्मि! त्वमेव जननी जनिताऽपि त्वमेव च।
लक्ष्मि! त्वमग्रजा भ्राता बन्धुर्मित्रं त्वमेव च।।२३७।।

देवि! प्रसादपूर्णासि कृपया परिपाहि माम्।
दुःखसागरमज्जन्तं सूद्धर त्वं प्रसादय।।२३८।।

निर्धनानां सदा भीमा त्वं कान्ता धनिनां सदा।
अतस्त्वं भीमकान्तासि भव कान्ता मदन्तिके।।२३९।।

माया त्वमादिमा मातर्लक्ष्मि! त्वं परमा रमा।
मध्यमेनापि ते प्रोक्तं मध्यमं तनुमध्यमम्।।२४०।।

मत्प्रियाऽसि ममैवाऽसि रमाऽसि तनुमध्यमा।
आदिमध्यान्तमैवासि रमा रामा मनोरमा।।२४१।।

जानासि मम नामापि सार्थं कुरु न चेत्तव।
लक्ष्मीकान्तो निर्धनः स्यात् प्रत्ययस्ते कुतो भवेत्?।।२४२।।

सुप्रभे सूर्यकान्ताऽसि चन्द्रकान्ताऽसि चन्द्रिके।
विष्णुकान्ते! कृष्णकान्ते! लक्ष्मीकान्तेन संस्तुते।।२४३।।

भक्तिभावनयोपेतं साधनाचेतनात्मकम्।
त्वन्मायामोहितं भक्तं कृपया परिपालय।।२४४।।

मातः किं बहुनोक्तेन जल्पितेन मुहुर्मुहुः।
मम त्वमेव शरणं नास्ति मे शरणान्तरम्।।२४५।।

अब्जवासे! नमस्तुभ्यं चपलायै नमो नमः।
सरस्वत्यै नमस्तुभ्यं ललितायै नमो नमः।।२४६।।

अब्जवासप्रिये! नित्यं वस मे पद्मसद्मनि।
बुद्धिप्रदे! शारदे! मे मुखपद्मे! स्थिरा भव।।२४७।।

नमस्त्रैलोक्यजननि! नमस्त्रैलोक्यपावनि!।
परिपालय भो मातर्मां लक्ष्मि! शरणागतम्।।२४८।।

शरणागतदीनार्तपरिपालनतत्परे!।
शरण्ये! त्वां प्रपन्नोऽस्मि नारायणि! नमोऽस्तु ते।।२४९।।

स्वयं हिरण्यवर्णाऽसि हिरण्यरजतस्त्रजा।
प्रिया हिरण्यगर्भस्य किं न भूया हिरण्यदा।।२५०।।

प्रिया कमलनेत्रस्य कमलास्या सुकोमला।
कमलाद्धनमानेतुं कमले प्रभवा भव।।२५१।।

त्राहि त्राहि महालक्ष्मि! कमले! कमलालये!।
अहन्ते स्वामिभक्तोऽस्मि दारिद्र्यात्त्राहि वेगतः।।२५२।।

त्राहि त्राहि महालक्ष्मि त्राहि त्राहि सुरेश्वरि!।
त्राहि! त्राहि! जगन्मातः सुतं मां शरणागतम्।।२५३।।

कलाकाष्ठास्वरूपा त्वं प्रकृतिस्त्वं कृतौ स्थिता।
त्वमेवाकाशरूपाऽसि जलाकाराऽसि निर्मला।।२५४।।

त्वं वसन्ताऽसि ग्रीष्माऽसि शरद्वर्षाऽसि निर्मला।
त्वं हेमन्ताऽसि शिशिरा नदी-भूमिश्चला-स्थिरा।।२५५।।

पुष्पपल्लवरूपाऽसि विष्णुरूपा वराङ्गना।
पुष्पिता फलिता माया मायिनी मोहिनी प्रिया।।२५६।।

मन्दोष्णा त्वं वसन्तेऽसि बहूष्णा ग्रीष्मकालिका।
सुतप्ता तापिनी त्वं हि दिवाकरकरप्रभा।।२५७।।

वर्षारूपाऽसि वर्षाऽसि नदीरूपाऽसि निर्मला।
जलाकारा स्थलाकारा सरोरूपा सरस्वती।।२५८।।

नदीषु गङ्गा त्वमऽसि तुलसी त्वं वनस्पतौ।
अश्वत्थरूपा वृक्षेषु त्वं धेनुरसि गोषु च।।२५९।।

जलं पेयपदार्थेषु घृतं त्वमऽसि गोरसे।
शक्तिस्त्वमऽसि सर्वेषु सर्वशक्तिस्वरूपिणी।।२६०।।

सस्यसम्पत् स्वरूपाऽसि शाद्वला प्रकृतिः परा।
सरः सरोजिनी त्वं हि त्वं शरच्चन्द्ररूपिणी।।२६१।।

कादम्बिनी त्वमेवाऽसि यत्र सौदामिनी स्थिता।
चला त्वमचलाऽसि त्वं शरद्रूपा मनोरमा।।२६२।।

मन्दाकिनी त्वमेवाऽसि यत्र पापानि मन्दताम्।
यान्ति मन्दा ऊर्ध्वलोकं तव सान्निध्यमागता:।।२६३।।

पुष्पिणी पुष्पिताऽसि त्वं धनधान्यवती रसा।
वसुन्धरा वसुमती वसुधा त्वं बुधा सुधा।।२६४।।

तेजोमण्डलरूपाऽसि स्निग्धा कोमलरूपिणी।
अग्नितेज:स्वरूपाऽसि हेमन्ते हिमरूपिणी।।२६५।।

शिखरेऽसि हिमानी त्वं महिमाऽसि हिमालये।
शिशिरे जाड्यरूपाऽसि काऽन्या भगवती भवेत्?।।२६६।।

पूर्णा चान्द्रमसी ज्योत्स्ना सकला: पूर्णिमा निशा।
सिनीवाली कुहू राका सन्ध्या त्वमनुरागिणी।।२६७।।

यावद् वर्षं सोत्सवेषु पर्वसूत्सवरूपिणी।
वर्षाऽभिवृद्धौ लोकानां त्वं जन्मोत्सवरूपिणी।।२६८।।

त्वं श्रुतिस्मृतिरूपाऽसि त्वं पुराणेतिहासिका।
रामायणे भारते च त्वं हि सन्मार्गदर्शिका।।२६९।।

व्याकृतौ शिवसूत्रासि वेदान्ते ब्रह्मसूत्रिणी।
त्वमाचारे गृह्यसूत्रा त्वं नीतौ नीतिरूपिणी।।२७०।।

त्वं साङ्ख्यशास्त्रं जगति योगशास्त्रेऽसि कुण्डली।
त्वं हि सङ्ख्यावतां सङ्ख्या मीमांसासूत्ररूपिणी।।२७१।।

त्वं कर्मोपासनामार्गा त्वमेका ज्ञानरूपिणी।
ज्ञात्री ज्ञेया ज्ञानगम्या त्वं हि ब्रह्मात्मिका परा।।२७२।।

शब्दकोषेऽसि शब्दानां त्वमर्था बोधरूपिणी।
वक्ष्ये किमधिकं सर्वं वाणीरूपासि भास्वती।।२७३।।

वैखरी वर्णरूपासि मध्यमा श्रुतिगोचरा।
पश्यन्ती द्योतितार्थाऽसि मूलाधारसमुत्थिता।।२७४।।

त्वं परा नादरूपाऽसि राजयोगे सुविश्रुता।
सहस्रदलपद्मस्था परब्रह्मस्वरूपिणी।।२७५।।

गृह्णन्ति जीवनं ये ते ग्रहास्त्वं ग्रहरूपिणी।
त्रिदशालयसंस्थाऽपि लोके नैका दशा असि।।२७६।।

त्वं सन्नासावंशकेतुस्त्वं प्रतिष्ठाप्रदायिनी।
दुःखदारिद्र्यदग्धेषु तमोरूपाऽसि कालिके।।२७७।।

त्वं मन्दा मन्दभाग्येषु शनैश्चरसि कामिनी।
काव्या कविषु काव्यस्त्वं काव्यं त्वं कविता अपि।।२७८।।

वाचां पतिर्वाक्पतिस्त्वं त्वं हि ज्ञानार्थिनां गुरुः।
सौम्याऽसि सौम्यरूपाऽसि सौम्यमार्गप्रदायिनी।।२७९।।

त्वं मङ्गलं मङ्गलाऽसि त्वं हि मङ्गलरूपिणी।
चन्द्रोत्पले! चन्द्रकान्ते! चन्द्रिके! चन्द्रमा असि।।२८०।।

सूर्याऽसि सूर्यरूपाऽसि सूर्यस्त्वं ग्रहराडसि।
मन्त्रो मन्त्रं मन्त्रिणी त्वं मन्त्री मन्त्रिवरास्यहो!।।२८१।।

मन्त्रणा मन्त्रतन्त्राऽसि मन्त्रदा मन्त्रदर्शिनी।
मन्त्रज्ञाऽसि त्वमोङ्कारा जपहोमफलप्रदा।।२८२।।

अस्मदीये सुवंशेऽपि कवयो दृष्टपूर्वकाः।
सरस्वतीस्वरूपास्ते ह्यनुभूता विशेषतः।।२८३।।

एकोऽग्रज उमानाथः पितृव्यः शेखरस्तथा।
भीमकान्तः पिताऽस्माकमेतयोः प्रवरः कविः।।२८४।।

सारस्वतं सुसन्तानं स्वीकरोषि न मां यदि।
सुवंशे ते सुवंशोऽपि कुवंशो भविता न किम्?।।२८५।।

भूत्वापि प्रवयो मातस्तेऽहमप्रवरो यदि।
अहं स्यामप्रजः किन्तु त्वं कथं स्याः प्रजावती?।।२८६।।

गुणा अपि न शोभन्ते वैदुष्यं शोभते न हि।
शीलं च शोभते नैव महालक्ष्मि! त्वया विना।।२८७।।

रूपं रूपवतां नास्ति शीलं शीलवतां न हि।
गुणा न गुणिनां तावद् यावल्लक्ष्मीः प्रसीदति।।२८८।।

न विद्या विदुषां सार्था बुद्धिबुर्द्धिमतां कुतः?।
बन्धुबान्धवमित्राणि न भवन्ति त्वया विना।।२८९।।

एकस्त्वत्पतिभक्तोऽपि प्रह्लादः सुहृदस्ति मे।
कविः काव्यं विलिख्यैव स्तौति देवं जगत्पतिम्।।२९०।।

दुर्गा प्रसादमात्रं मे ददाति सफलं जलम्।
तामग्रे पूजयित्वापि त्वत्तोऽहं बहु कामये।।२९१।।

पञ्चतत्त्वेष्वन्यतमा वसुधा न सुधाऽऽप्यते।
अजा गावो महिष्योऽपि भवनं जीवनं वनम्।।२९२।।

अन्येषां गुर्जरा गावः सम्भवन्ति पयोमुचः।
अस्मादृशां पार्वतीयाः प्रभवन्ति पयोलुटः।।२९३।।

पयोधरा पार्वती-या नित्यं स्वं प्रस्नुतं पयः।
गङ्गाधरं समर्प्यैव परितोषमुपागता।।२९४।।

गङ्गाधरसमो नास्ति सरस्वान् व्यापकोऽर्णवः।
तस्मै हि-तं पयो राति पार्वती-या पयस्विनी।।२९५।।

त्वद्रूपिण्यो हि सर्वत्र जगत्सु सकलाः स्त्रियः।
सन्ति ताश्च पयस्विन्यः पालकेभ्यो हितं पयः।।२९६।।

अर्पयन्ति, मयाप्येका गौः शाकलवणादिना।
पालिता लालिताप्येषा न मे राति हितं पयः।।२९७।।

भूयासं धनिको मातस्तत्पयो मिलितं यदि।
कृपा स्याद्यदि ते नित्यं पयो मे सार्पयेन्न किम्?।।२९८।।

महिषी चापि त्वद्रूपा पालिता चेद्धितं पयः।
समर्पयति सर्वेभ्योऽमितं सा न ददाति मे।।२९९।।

अमितस्य प्रदात्रे मे पालकाय न चेह सा।
पयोऽमितं हितं रातु त्वत्कृपारहिताय किम्?।।३००।।

नीरसं कण्टकाकीर्णं जीवनं सरसं कुरु।
नीरोगं शक्तिसम्पन्नं धेहि स्तन्यामृतं मधु।।३०१।।

त्वत्कृपारहितस्याद्य नगरं मे गरायितम्।
अनुकम्पाविहीनस्य भवनं च वनायितम्।।३०२।।

न जायते या हि साऽजा त्वन्मायारूपिणी सदा।
विभ्रामयति मामत्र यन्त्रारूढमिवानिशम्।।३०३।।

कृते मायानुसरणे कृपारूपं पयो हि ते।
कथं मिलतु मां त्वं हि विभ्रामयसि भूतले।।३०४।।

अध्रुवामप्यजां मत्तः किमु सेवयसे? ध्रुवम्।
पदं प्रदातुं किमुत ह्यजा-विरहिताय मे।।३०५।।

सर्वदां सार्थकां कर्तुं सर्वरूपाऽसि सर्वदे!
अध्रुवां सेवयित्वाऽपि ध्रुवार्थान् प्रददातु मे।।३०६।।

अध्रुवाय ध्रुवं दातुं शक्यते नेति वक्षि चेत्।
अजा-विरहितो भूत्वा भवान्यहमजो ध्रुवः।।३०७।।

अजामनुगतोऽप्येवं भवान्यहमजो ध्रुवः।
अजा-विरहितोऽप्येवं भवान्यहमजो ध्रुवः।।३०८।।

यदि त्वं पृथिवी मातः पृथिवीं देहि वल्लभाम्।
गौरवां प्रकृतिं देहि मातस्त्वं प्रकृतिर्यदि।।३०९।।

विद्यां विमुक्तिकां देहि मातस्त्वं विदुषी यदि।
मह्यं देहि धनं त्वं चेद्धनाधिष्ठातृका यदि।।३१०।।

यदि त्वदर्थः सौभाग्यं नाऽहं सौभाग्यवान् कथम्?
सौभगं देहि मे मातर्लक्ष्मि त्वं सुभगा यदि।।३११।।

अपि शोभा त्वदर्थोऽस्ति शोभनं कुरु सर्वतः।
न शोभते सभामध्ये लक्ष्मीकान्तोऽयमर्भकः।।३१२।।

लक्ष्मीशब्दार्थिके का त्वं? त्वदर्थः सार्थको मयि।
न चेत् कथं त्वदर्थस्य प्रत्ययो भवतीह किम्?।।३१३।।

निर्धनं नैव पश्यन्ति विद्याशीलगुणान्वितम्।
सधनं तु जनं सर्वे मानयन्ति जगत्त्रये।।३१४।।

निर्धनस्य न मित्राणि न दारा बान्धवा अपि।
विद्याशीलगुणोऽपीह धनहीनोऽतिदुःखितः।।३१५।।

लक्ष्मीशब्दार्थसम्पन्ना यदित्वमसि वल्लभे!
लक्ष्मीकान्तं न वृणुषे कुतो यासि न शोभसे।।३१६।।

पयस्विनि! पयो देहि रसं धेहि सरस्वति!
धनेशानि! धनं देहि लक्ष्मि! त्वं मद्गृहे वस।।३१७।।

कोषराजो धनं मह्यं न ददाति मनागपि।
अपेक्षते परां पूर्वस्वीकृतिं ते धनाधिपे!।।३१८।।

ददाति विपुलं वित्तं कोषराजस्तवाज्ञया।
आज्ञामेकां मदर्थं त्वं कथं दातुं विलम्बसे?।।३१९।।

कुलं रूपं वपुर्विद्या कलत्रं भवनं सुताः।
लक्ष्मीं विना न शोभन्ते लक्ष्मीः सर्वत्र शस्यते।।३२०।।

नमस्तुभ्यं नमस्तुभ्यं महालक्ष्म्यै नमो नमः।
श्रियं देहि श्रियं देहि सत्यं सत्यं वदामि ते।।३२१।।

महाकालीमहालक्ष्मीर्महापूर्वासरस्वती।
सर्वशक्तिस्त्वमेवाऽसि शक्तः कोऽस्ति त्वया विना।।३२२।।

त्वां विना शक्तिहीनोऽस्मि लक्ष्मि! शक्तिं प्रदेहि मे।
ब्रुवतेऽद्य जना: सर्वे धनशक्तिर्बलीयसी।।३२३।।

शिवहीनं विष्णुहीनं न कोऽपि वदतीह माम्।
धनशक्त्या त्वया हीनं शक्तिहीनं वदन्ति माम्।।३२४।।

लक्ष्मीर्धनं धनं लक्ष्मीर्लक्ष्मि! शक्तिर्धनानि मे।
अशक्ता निर्धना: सर्वे धनशक्तिर्बलीयसी।।३२५।।

यथा मेघागमे काले वर्द्धन्ते सस्यसम्पद:।
लोका: प्रसन्ना: शरदि तथैव हि धनागमे।।३२६।।

लक्ष्मि त्वं करुणासिन्धुर्भर्तृभक्तमकिञ्चनम्।
कृपाऽपाङ्गेन मां सिञ्च दारिद्र्याऽनलपीडितम्।।३२७।।

दु:खदावाग्निदग्धोऽहं कर्मघर्मप्रतापित:।
इदानीमनुकम्प्योऽहं सिञ्च मां धनवारिणा।।३२८।।

धर्मार्थकाममोक्षाणां त्वं हि कारणरूपिणी।
पदप्रतिष्ठाकीर्तीनां त्वं सदैवाऽदिकारणम्।।३२९।।

दारिद्र्यार्णवमग्नोऽहं कमले! कमलासने!।
धनं मे कमलाल्लक्ष्मि! दापयित्वा समुद्धर।।३३०।।

ऋणदारिद्र्यदु:खाद्या अपमृत्युकरा: समे।
भयशोकमनस्तापा रोगा नश्यन्तु शत्रव:।।३३१।।

पत्राणि प्रपतन्त्यत्र प्ररोहन्ति नवाङ्कुरा:।
क्वचित् फुल्लं विकसति वृक्षवत् किमु जीवनम्।।३३२।।

उपरिष्टान्नैकविधं रसपुष्पादिकं दधत्।
मधुरं फलनिर्मातृ वृन्तवत् किमु जीवनम्।।३३३।।

शनैर्दूरायते शीतं कायो घर्मायते क्वचित्।
वामदक्षिणयोर्धूलिपङ्के किमु वसन्तवत्।।३३४।।

घर्मेणाऽधिकतप्तेन पतन्ति स्वेदविन्दवः।
नित्यं पिपासितं शुष्कं किमिदं भाति ग्रीष्मवत्।।३३५।।

आपद्घनाभ्रतो नित्यमश्रुधारा झरन्त्यहो!
विपन्नदीतीरवासो दृष्टं वर्षायते क्वचित्।।३३६।।

धूलिपङ्कविनिर्धौतं स्वच्छं वस्त्रमिव क्वचित्।
परितो दृश्यते रम्यं चकास्तीदं यथा शरत्।।३३७।।

कामक्रोधलोभमोहमदमात्सर्यशत्रुभिः।
दुःखशोकामयभयहेमन्तेनेव पीडितम्।।३३८।।

वातपित्तकफग्रस्तो देहो रुग्णो भवेत् क्वचित्।
कार्पासौषधमन्वेष्टृ जीवनं शिशिरायते।।३३९।।

सुखदुःखोपाधिरूपमयनद्वयसंयुतम्।
ऋतृषट्शत्रुभिर्ग्रस्तं जीवनं वत्सरायते।।३४०।।

एतन्नैकविधं मातस्त्वत्कृपारहिते कथम्।
जीवनं सार्थकं भूयात् कृपापात्रं कुरुष्व माम्।।३४१।।

यथाऽशनेन सर्वाणीन्द्रियाणि प्रचलन्त्यहो।
तथा धनेन सर्वाणि कर्माणीह चलन्त्यहो।।३४२।।

आसीत् पुराऽशनं मूलमिन्द्रियाणां प्रचालने।
अधुना त्वशनस्यापि धनं मूलं सुचालने।।३४३।।

बुद्धयः सिद्धयोऽपीह धनात् सिद्ध्यन्ति सर्वतः।
विद्या अपि सुसिद्ध्यन्ति धनादेवेह नान्यथा।।३४४।।

क्षेत्रं वनं वा भवनं वाटी शाटी तथौषधम्।
धनं विना नाप्यतेऽत्र श्वासो जलफलादिकम्।।३४५।।

दुग्धं दधि घृतं क्षीरं तक्रं गोरसनिर्मितम्।
धनेन सर्वं मिलति धनं लक्ष्मीः प्रचोदयात्।।३४६।।

धनादेव गृहं वस्त्रं भूषणं वर्तनादिकम्।
पदं प्रतिष्ठाऽपि तथा लभ्यन्ते धनिकैरिह।।३४७।।

धनाद्धर्मो धनाद् विद्या तीर्थयात्रादिकं धनात्।
वक्ष्ये किमधिकं लोकयात्रापि च धनादिह।।३४८।।

धनादेव कुलं जातिः प्रतिष्ठा सन्ततिः शुभा।
निर्धनस्य कुतो लभ्या धनं सर्वार्थसाधनम्।।३४९।।

क्वचिल्लोके न चलति क्रियारम्भो धनं विना।
मन्दायन्ते क्रियाः सर्वा ग्रीष्मे कुसरितो यथा।।३५०।।

बहुना किमिहोक्तेन धनं धर्मस्य कारणम्।
तीर्थश्राद्धादिकं कर्म न सिद्ध्यति धनं विना।।३५१।।

शास्त्रज्ञानादिकार्येऽपि धनमेवादिकारणम्।
धनं विना पुस्तकस्था सद्विद्याऽपि च नाऽप्यते।।३५२।।

स्थावरे विंशतिर्लक्षं दशैकं कृमियोनिषु।
नवलक्षं जलचरे दशलक्षं पतत्रिषु।।३५३।।

त्रिंशल्लक्षं पशौ ज्ञेयं चतुर्लक्षं तु वानरे।
ततो मानवजन्मास्ति यदात्मज्ञानकारणम्।।३५४।।

आत्मज्ञानैकहेतोश्च वैभवं कामयेऽधुना।
आत्मज्ञानेऽपि नो शक्तो वैभवेन विनाऽधुना।।३५५।।

नाऽन्येषां वैभवाकाङ्क्षा चतुरशीतिजन्मनाम्।
केवलं मानवस्याऽस्ति त्वमाऽकाङ्क्षां प्रपूरय।।३५६।।

कामक्रोधलोभमोहमदमात्सर्यसञ्ज्ञकाः।
अरयोऽभिभवन्त्येनं शरीरस्था इमे सदा।।३५७।।

पराजेतुमिमाँल्लक्ष्मि! वैभवं त्वदपेक्ष्यते।
विजित्य षड्रिपून् गन्ताऽहमात्मज्ञानहेतवे।।३५८।।

सन्ति केचित् कामरूपाः क्रोधरूपधराः क्वचित्।
इतरे लोभरूपाश्च मोहरूपधराः क्वचित्।।३५९।।

अपरे मदरूपाश्च केचिन्मात्सर्यरूपिणः।
इमान् विजेतुमपि मे धनं देहि धनेश्वरि!।।३६०।।

धनादसौ भवेन्मत्त इति शङ्कां करोषि चेत्।
प्राप्तविद्यो विनीतोऽस्मि त्वत्तो मत्तो भवानि किम्?।।३६१।।

भवेयं न कदा मत्तस्त्वत्तोऽहं बहु कामये।
प्राप्तवित्तो विनीतोऽसौ भवितेति विचारय।।३६२।।

शुक्लासि शुक्लवर्णासि ब्रह्मविद्याविचारिणी।
हंसरूपासि जीवोऽहं सोऽहं हंसोऽप्यहं तव।।३६३।।

जीवात्मा प्राणवानस्ति प्राणा जीवात्मनि स्थिताः।
हंसरूपा हि ते प्राणास्त्वमेका हंसवाहना।।३६४।।

हङ्कारेण बहिर्यान्ति सकारेणाऽभियान्ति ते।
प्राणाः प्राणिति तैः प्राणैर्जीवो 'हंस' इतीरितः।।३६५।।

सकारं च हकारं च जीवो जपति सर्वदा।
सोऽहमित्युच्यते देवि! त्वद्रूपं ब्रह्मसञ्ज्ञितम्।।३६६।।

गणेशो हंस इत्युक्तः सूर्यो हंसः प्रकीर्तितः।
विष्णुर्हंसः शिवो हंसो ब्रह्मा हंसो निगद्यते।।३६७।।

हंसो मन्त्रो गुरुर्हंसो हंसः पुण्यजनस्तथा।
हंसो जीवो द्विजो हंसस्त्वमेका हंसवाहना।।३६८।।

हंसो जीवात्मकः सोऽहं परं ब्रह्मेति कथ्यते।
हंसाऽरूढा हंसरूपा सोऽहमित्युच्यसे बुधैः।।३६९।।

सोऽहं हंस इति ख्यातः परात्मा परमेश्वरः।
हंसवाहनयुक्ताऽसि कोऽन्यस्त्वदधिको भवेत्।।३७०।।

सोऽहं सहाभ्यां भिन्नश्चेत्तदोङ्कारोऽवशिष्यते।
त्वमोङ्कारा त्रिभिर्वर्णैर्ब्रह्मविष्णुशिवात्मकैः।।३७१।।

त्रिवर्णानामनेकार्था ब्रह्मविष्णुशिवात्मकाः।
ऋग्यजुःसामवेदाश्च स्वर्भूपातालमित्यपि।।३७२।।

त्रिवर्णास्त्रिगुणास्तिस्रः शक्तयोऽपि त्रयोग्नयः।
ब्रह्मक्षत्रविशो वर्णास्त्रयो यज्ञोपवीतिनः।।३७३।।

दिने समुज्ज्वलासि त्वं निशायां कृष्णरूपिणी।
उभयोः सन्ध्ययोर्लक्ष्मीरनुरागवती शुभा।।३७४।।

सत्त्वं रजस्तम इति त्वमेव त्रिगुणात्मिका।।
अमृताद् विषपर्यन्तं सर्वं त्वयि विलीयते।।३७५।।

लक्ष्मीलज्जाकामशक्तिर्वा प्रभूत्साहमन्त्रणा।
त्रिशक्तिस्त्वं हि नान्याऽस्ति त्वमेका विष्णुवल्लभा।।३७६।।

जाठराग्निर्वाडवाग्निर्दावाग्निरथवा पुनः।
दक्षिणाग्निर्गार्हपत्याऽऽहवनीयाग्निरूपिणी।।३७७।।

सूर्यचन्द्रतडिद्रूपत्रिप्रकाशात्मिका प्रभा।
प्रभावती त्वमेकाऽसि त्रयाणामग्नितेजसाम्।।३७८।।

त्वं हि शब्दात्मकं ज्योतिरासंसारप्रकाशिका।
शब्दानामर्थरूपासि त्वं हि शब्दार्थदीपिका।।३७९।।

स्वयं ज्योतिःस्वरूपाऽसि ज्योतिर्मां परिदर्शय।
ज्योतिःशास्त्रं त्वमेवासि ज्योतिर्ज्ञानं प्रदापय।।३८०।।

लवस्त्रुटिःकलाकाष्ठानिमेषस्तत्परः क्षणः।
घटी मुहूर्तं प्रहरो दिवानक्तमहर्निशम्।।३८१।।

सन्ध्यावारस्तिथिर्योगो राशिः करणमंशकम्।
पक्षमासर्तुवर्षाणि युगं कल्पो महालयः।।३८२।।

लग्नं होरा कालचक्रं सर्वं त्वमसि वैष्णवि !
महाकाली त्वमेवासि महाकालस्वरूपिणी।।३८३।।

बालो यौवनमाप्नोति युवा प्राप्नोति वृद्धताम्।
कालस्य वशमापन्नो वृद्धो यातीह पञ्चताम्।।३८४।।

बली दौर्बल्यमाप्नोति दुर्बलोऽपि बलान्वित:।
य: श्रीमान् सोऽपि नि:श्रीक: कालस्याहो ! विचित्रता।।३८५।।

त्वमेव सुखिनं शीघ्रं दु:खयुक्तं करोष्यहो !।
त्वमेव निर्धनं तूर्णं धनवन्तं करोष्यपि।।३८६।।

एकच्छत्रां महीं सर्वां ये विजित्य प्रशासति।
तेऽपि कालेन गच्छन्ति कालो जेतुं न शक्यते।।३८७।।

ये नियम्येन्द्रियग्रामं सर्वं विश्वं जयन्ति तै:।
कालस्तु नैव विजित: कालो जेतुं न शक्यते।।३८८।।

आयुर्वेदविदो वैद्या: स्वनुष्ठितरसायना:।
गतास्ते दुर्जय: कालो मुनयोऽपि तपस्विन:।।३८९।।

अन्यद् भावयते प्राणी कालोऽन्यत् कुरुते हठात्।
संयोगो वा वियोगो वा सर्वं कालवशे स्थितम्।।३९०।।

कालादुत्पद्यते विश्वं कालादेव विपद्यते।
न कालनिरपेक्षं हि क्वचित् किञ्चन विद्यते।।३९१।।

अत: कालवशे विश्वं कालो विश्ववशे न हि।
त्वं कालनिरपेक्षासि महाकालस्वरूपिणी।।३९२।।

भूतभव्यभवत्कालस्त्वमेव परमा रमा।
त्रिकालव्यापिनी मातस्त्रिकालज्ञं कुरुष्व माम्।।३९३।।

त्वं हि वाचामधिष्ठात्री वाग्देवी वागधीश्वरी।
वाग्भि: संस्तावकं मां त्वं वाक्सिद्धिं परिकल्पय।।३९४।।

निषादर्षभगान्धारषड्जमध्यमधैवताः।
पञ्चमश्च स्वरास्त्वं हि ध्वनिसङ्गीतरूपिणी।।३९५।।

गजनादे निषादासि ऋषभासि गवां पुनः।
गान्धारा त्वमजादीनां मध्यमा क्रौञ्चनादिनी।।३९६।।

षड्जा त्वमसि केकीनामश्वनादेऽसि धैवता।
कोकिलानां कुक्कुटानां नादे त्वमसि पञ्चमा।।३९७।।

सप्तस्वरास्त्वमेवासि गीतं गानेषु गीयसे।
सम्यग्गीतरहस्यज्ञा सुतरां मधुरस्वरा।।३९८।।

सप्तस्वरास्त्रयो ग्रामा मूर्च्छनास्त्वेकविंशतिः।
ताना एकोनपञ्चाशत्ताला एकोत्तरं शतम्।।३९९।।

रागाः षडेव तद्भेदाः षट्त्रिंशत् समुदाहृताः।
ताः सर्वा रागरागिण्यो देशकालविभेदतः।।४००।।

सूक्ष्मरूपेण सङ्ख्याने षट्त्रिंशत् सम्भवन्ति हि।
यावन्त एव तालाः स्यू रागास्तावन्त एव हि।।४०१।।

एवं गीतोपनिषदं वेत्ति कस्त्वदृतेऽधुना।
भूषणानां शिञ्जितासि शृङ्गारादिरसा नव।।४०२।।

शोभावती नर्तकी त्वं त्वमलङ्कारभूषिता।
सुषमा त्वं हि सर्वत्र त्वमिन्द्रधनुरागिणी।।४०३।।

वीणावेणुमृदङ्गानां वाद्यानां किन्नरीकले।
मुखहस्तप्रवाद्यानां ध्वनौ वा काकलीकले।।४०४।।

मन्द्रस्वरस्त्वमेवासि लास्ये तौर्यत्रिकेऽपि च।
संलापे सुप्रलापे त्वं व्याख्यायां सूनृतेऽपि च।।४०५।।

तत्त्वमोघो घनं नृत्यं वीणावेणुध्वनौ मधु।
गीततालल्यास्त्वं हि हरिकीर्तनरञ्जिनी।।४०६।।

त्वं शङ्खघण्टडमरुकुण्डलीवाद्यनादिनी।
त्वं मञ्जूषाकारवाद्यस्वना हृदयनादिनी।।४०७।।

भक्तिभावितभक्तानां करतालसमर्थिनी।
मन्दिरे देवदेवीनां नामकीर्तनरञ्जिनी।।४०८।।

ॐकारे सर्वमेव त्वमोङ्कारा ब्रह्मरूपिणी।
सर्वव्यापकरूपाऽसि न किञ्चिदवशिष्यते।।४०९।।

चोदको बोधकश्चैव मोक्षदस्त्रिविधो गुरुः।
ॐकारादाप्यते देवि! त्वमोङ्कारे प्रतिष्ठिता।।४१०।।

सकलार्थिजनानां त्वं गुरुः सन्मार्गदर्शिका।
त्रिविधाऽप्येकरूपाऽसि मदर्थे मातृरूपिणी।।४११।।

अतोऽहं त्वत्सुतोऽहं ते सोऽहं सोऽहमिति ब्रुवे।
त्वत्तो नाऽहं परः सोऽहं मातस्त्वं मां समुद्धर।।४१२।।

या मां तारयते माता सैषा संसारतारिणी।
गायन्तं त्रायते या सा गायत्री त्वमुदीर्यसे।।४१३।।

सोऽहं सहाभ्यां हीनश्चेत् शिष्ट ॐकार एकलः।
हंसारूढा त्वमोङ्कारा त्वं परब्रह्मरूपिणी।।४१४।।

प्राणविन्दुविसर्गैः स जीवो हंसस्त्वमेव हि।
सोऽहं जीवो विसर्गेण प्राणविन्दू अहं ध्रुवम्।।४१५।।

विलोमेनाऽनुलोमेन वाऽनुलोमविलोमतः।
हंसः सोऽहमिमं मन्त्रं जपाम्यविरतं तव।।४१६।।

मूलाधारे कुण्डलिनीरूपा त्वं मयि वर्तसे।
नाहं जाने प्रसुप्तोऽस्मि रोद्धुं प्राणान्न शक्यते।।४१७।।

ममेडापिङ्गले नाड्यावनिरुद्धे निरन्तरम्।
विद्याबुद्धी बहिर्यातो प्राणायामस्य का कथा।।४१८।।

शक्नुयां चेद्वशीकर्तुं त्वां स्वाधिष्ठानमानये।
ऊर्ध्वमुत्थापयाम्येवाऽऽधारचक्रामधोमुखीम्।।४१९।।

ततोऽपि मणिपूरे त्वामानये नाभिसंस्थिते।
शनैरनाहते चक्रे नेतुमीहे हृदि स्थिते।।४२०।।

कण्ठदेशे विशुद्धौ त्वामारूढामाप्नुयां यदि।
ततोऽपि बहुभिर्यत्नैराज्ञाचक्रे निवेशये।।४२१।।

पृथिव्यप्तेजपवनगगनान्मनसि स्थिताम्।
चञ्चले मानसे मेऽत्राऽऽयातां त्वां चञ्चलात्मिकाम्।।४२२।।

सहस्रारे निवसति परमात्मनि संयुताम्।
त्वामाश्रित्य कथं नेक्षे वदाहं परमं पदम्।।४२३।।

त्वयि स्थितायां मे नाशमायान्ति परमापदः।
रमापदे तु नायान्ति सर्वथा परमापदः।।४२४।।

प्रपश्य पश्य हे! लक्ष्मीकान्तोऽहं त्वत्पदं न किम्?।
न कथं नाशमायान्ति त्वत्पदे परमापदः।।४२५।।

---

अकारो विष्णुरूपः स्यादुकारो ब्रह्मरूपकः।
मकारश्च शिवो ज्ञेयस्त्वमोङ्कारा त्रयात्मिका।।४२६।।

अकारो वासुदेवः स्यादाकारस्तु पितामहः।
अत एव त्वमाधाराऽऽधारशक्तिस्वरूपिणी।।४२७।।

ब्रह्मा जगत्सर्जकोऽस्ति विष्णुः पालयिताऽपरः।
शिवः संहारकोऽपि त्वमोङ्काराऽऽधाररूपिणी।।४२८।।

लक्ष्मीसरस्वतीकालीशब्देष्वीकाररूपिणी।
त्वमीकारा नामरूपा लक्ष्मीरीकार उच्यते।।४२९।।

त्वं गौरी त्वं च सावित्री त्वं गायत्री सरस्वती।
प्रकृतिस्त्वं मतिस्त्वं च त्वमहङ्कृतिरूपिणी।।४३०।।

शुक्लाम्बरधरा शुक्लवर्णाभा हंसवाहना।
पाणौ वीणापुस्तकस्था सा मां पातु सरस्वती।।४३१।।

ऋग्यजुःसामवेदाख्या ब्रह्मविष्णुशिवात्मिका।
वैखरीवर्णरूपा च सा मां पातु सरस्वती।।४३२।।

अधीतिबोधाचरणप्रचारणस्वरूपिणी।
अष्टादशानां विद्यानां सा मां पातु सरस्वती।।४३३।।

पुराणन्यायमीमांसायोगवेदान्तभाषिणी।
रामायणे भारतेऽपि सा मां पातु सरस्वती।।४३४।।

नीतिशास्त्रे धर्मशास्त्रे सतां सन्मार्गदर्शिनी।
आस्तिक्यमतिरुद्घोषा सा मां पातु सरस्वती।।४३५।।

छन्दोभिर्विविधैः पद्यैर्गद्यवाक्यैर्विशेषिता।
संहितासूत्रनियमैः सा मां पातु सरस्वती।।४३६।।

यां पठित्वा विदित्वा च निर्मथ्याखिलबन्धनाः।
योगिनस्तत्पदं यान्ति सा मां पातु सरस्वती।।४३७।।

देवमानवगन्धर्वयक्षरक्षोमुखोद्‌गता।
भिन्नभाषाव्याहृताऽपि सा मां पातु सरस्वती।।४३८।।

गद्यपद्यमयी चम्पूकथाकाव्यनिबन्धिनी।
नैपाली नाट्यसंवादयात्रावृत्तान्तरञ्जिनी।।४३९।।

गीताऽऽलापविशेषाऽपि वाद्यसङ्गीतनादिनी।
धर्मनीतिहिताचारलोकसंस्कृतिवाहिनी।।४४०।।

त्वद्रूपा लोकभाषेयं लोकमातास्वरूपिणी।
भाषापि नाममालायाममरेण कृतादरा।।४४१।।

हिमाचल इव व्याप्ता प्राच्यपश्चिमविस्तृता।
आस्थाश्रद्धासमायुक्ता सर्वेषामधिकप्रिया।।४४२।।

प्रदीप्ता भानुना स्पृष्टा भाषा रामकथाऽऽवृता।
मोतीरामोद्धृता सैषा जनताभिः सदादृता।।४४३।।

सोमनाथलेखनाथगुणराजकृतादरा।
लक्ष्मीप्रसादकविना बहुमानपुरस्सरा।।४४४।।

चक्रपाणिमुकुन्दाभ्यामवतारितभारता।
प्राकृता पोखरारूपा मुकुन्दशरणोदिता।।४४५।।

कर्तुं स्तुतीर्नुतीः पूजाद्युपचारादिकानिह।
भाषायामपि शक्येत किमर्थं सुरभाषया?।।४४६।।

वक्षि चेज्जनभाषापि त्वद्रूपा किन्तु मत्प्रिया।
सुरभाषाऽस्ति त्वत्प्रीत्यै स्तूयते सुरभाषया।।४४७।।

न हि विद्याभिमानेन संस्कृते रचिता स्तुतिः।
शुक्लवर्णां तोषयितुं शुक्लवर्णैः कृतश्रमः।।४४८।।

स्मरणात् कीर्तनात् पाठादभ्यासाल्लेखनादपि।
गिरां देवी प्रसन्ना स्यादिति हेतोः प्रकीर्तये।।४४९।।

पितृपादरजो धृत्वा मस्तके स्तौमि भारतीम्।
विद्यां सुविपुलां बुद्धिं कवित्वं प्रददातु मे।।४५०।।

जगदालोकितं सर्वं वाङ्मयैर्महिमालयैः।
तैरेव महिमा तुल्यो विद्यते ते हिमालयैः।।४५१।।

बुद्धिविद्यावैभवैस्त्वं सम्पन्नाऽसि जगत्त्रये।
सर्वज्ञे! न स्पृशन्ति त्वां जराभीतिविपत्तयः।।४५२।।

हे वाग्देवि! त्वां विनाऽद्य चन्द्रसूर्याग्निविद्युताम्।
जगत्त्रयं दृश्यतेऽत्र ह्यालोकेऽपि तमोमयम्।।४५३।।

मालावीणापुस्तकानि सदा पाणिषु धारिणी।
पद्मासना श्वेतवस्त्रा जयस्ते हंसवाहना।।४५४।।

यदा लोके विवर्द्धन्ते विमूढाः पापबुद्धयः।
मन्दायते तदा ज्योतिर्धर्मस्यापि शुचिव्रते!।।४५५।।

चतुर्भुजधराऽसि त्वं प्रथिता विश्ववाङ्मये।
त्वदीयरूपसम्प्राप्ताः कवयो धर्मरक्षकाः।।४५६।।

हे सरस्वति! तैः पुत्रैस्त्वया पापं निवारितम्।
भूमेर्भारमपाकृत्य धर्मस्योपचयः कृतः।।४५७।।

चौर्यवृत्तिकरो रत्नाकरस्ते कृपया पुनः।
वाल्मीकिरभवद् ज्ञानी रामायणकरः कविः।।४५८।।

मातस्त्वत्कृपयैवान्यो ब्रह्मज्ञोऽनुपमः कविः।
मत्स्यगन्धासुतः कृष्णो वेदव्यासोऽभवत् पुनः।।४५९।।

महाभारतमाख्यानं ब्रह्मसूत्राणि योऽलिखत्।
अष्टादशपुराणानि कृष्णः सारस्वतोऽभवत्।।४६०।।

त्वत्सेवयैव द्वावन्यौ भार्गवाङ्गिरसावपि।
शुक्रः कविरभूद् देवि! वाचां पतिरभूद् गुरुः।।४६१।।

भूयस्ते कृपया मातर्विमूढो मत्स्यघातकः।
कालिदासाभिधः कश्चित् कवीनां शेखरोऽभवत्।।४६२।।

भासभारविमाघश्रीहर्षाद्याः कवयोऽभवन्।
तेषां कृतौ तेऽवलम्बो नान्येषामवलम्बनम्।।४६३।।

विख्यातस्तुलसीदासः सूरदासो महामनाः।
कवीरः कृपया ते हि प्रसिद्धाः कवयोऽभवन्।।४६४।।

अन्ये सुकृतिदत्ताद्याः कुलचन्द्रादयो बुधाः।
भानुभक्तो लेखनाथः सोमनाथ इमे तथा।।४६५।।

लक्ष्मीप्रसादभरतौ गुणराजमुकुन्दकौः।
सर्वे ते कृपया मातः प्रसिद्धाः कवयोऽभवन्।।४६६।।

अस्त्वेतेषां तु का वार्ता? त्वद्गृहस्थः प्रजापतिः।
त्वदासनसमुद्भूतः सङ्गत्या हंसवाहनः।।४६७।।

त्वत्सङ्गतिं समासाद्य त्वद्वृद्धश्चतुराननः।
'कविर्मनीषी परिभूः' स वेदैरपि गीयते।।४६८।।

मातर्मां पञ्चमाब्दात्ते सेवामादिष्टवान् पिता।
सावित्र्या अष्टमादब्दाल्लक्ष्मीमन्त्रं न दत्तवान्।।४६९।।

रुष्टा श्रीर्निकटे नास्ति हित्वा दूरं गता कुतः?।
संस्तवः प्रथमस्तेऽस्ति सावित्री मामुपेक्षते।।४७०।।

'दासोऽय'मिति मां ज्ञात्वाऽनुग्रहं कुरु भारति!।
त्वत्कृपामाप्य मूढाश्च प्रसिद्धाः कवयोऽभवन्।।४७१।।

लक्ष्मीप्रसादोऽपि कविरभवत् कृपया तव।
लक्ष्मीकान्तः कथं न स्यात् तवाऽपाङ्गविलोकनात्।।४७२।।

न च पापठितं काव्यशास्त्रं काव्यानि कान्यपि।
न वै जोघुषितं शब्दशास्त्रं नीतिर्न चिन्तिता।।४७३।।

सङ्गीतं न च सङ्गीतं येन सम्मुह्यते जगत्।
न तथा मेऽभिधानश्रीर्यदर्थो मां विबोधयेत्।।४७४।।

एतैर्विबोधितोऽपीह त्वां विना सुकविः कथम्?
त्वत्पादपद्मानुसृतेरिमान् विविदिषाम्यनु।।४७५।।

त्वं चिकीर्षसि चेन्मातरसौ बोभूयते कविः।
न किं कोकूयते सोऽसौ यदि सास्मर्यते त्वया।।४७६।।

जगदम्बे! कृपां कृत्वा देहि मे स्वाऽवलम्बनम्।
तवाऽऽलम्बोऽमिलिष्यच्चेदभविष्यं कविस्तदा।।४७७।।

वसत्येकेन सार्धं न धनलक्ष्मीस्तु सर्वथा।
सा नाम्ना चञ्चलास्त्येव कथं वसतु सर्वदा।।४७८।।

सैषा मत्प्रार्थना लक्ष्मि! त्वामाकर्षयतु द्रुतम्।
चाञ्चल्यं प्रविहाय त्वं मद्गेहे वस निश्चला।।४७९।।

देव्यौ! लक्ष्मीसरस्वत्यौ! नैकत्र वसतो यदि।
तन्मे वस गृहे लक्ष्मि! मुखे वस सरस्वति!।।४८०।।

लक्ष्मि! कान्तं प्रकुर्वीत शान्तं स्थित्वा गृहेऽनिशम्।
शोभनाः कविताः कर्तुं वदने तिष्ठ भारति!।।४८१।।

उषित्वा मन्मुखे रम्याः कविताः कुरु भारति!
मद्गेहे संस्थिता लक्ष्मि! शोभा वर्द्धय शोभनाः।।४८२।।

लयबद्धां गातुमीशो भारतीसङ्गता यदि।
लक्ष्म्याः सङ्गतिमाप्नुयामधिकञ्चाभिकामये।।४८३।।

महालक्ष्मीश्चरीकर्तु देहे गेहेऽपि भावुकम्।
रोगाञ्छत्रून् दरीदर्तु देहाद् गेहादपि द्रुतम्।।४८४।।

मुखे वाणी नरीनर्तु वरीवर्तु सुखोदयः।
अलक्ष्मीर्मे जरीहर्तु जयं देदीयतां श्रियम्।।४८५।।

देव्यौ! लक्ष्मीसरस्वत्यौ! दीनं मां कुरुतां दयाम्।
भवतां करुणावत्यौ दयापात्रं विशेषितम्।।४८६।।

यथा विषाऽपहा वीरुत् सर्वरोगाऽपहा न किम्?।
तथैव त्वं महालक्ष्मीः सर्वदुःखाऽपहा न किम्?।।४८७।।

मधुकैटभनामानौ बाहुयुद्धविशारदौ।
दनुजौ विष्णुना सार्द्धं युद्धयन्तौ बलवत्तमौ।।४८८।।

पञ्चवर्षसहस्रं स समयो विगतस्तयोः।
न जातौ विमुखौ बुद्धिर्विपरीता कृता त्वया।।४८९।।

विष्णोः सहायो विहितस्तेन तौ निहतौ ततः।
ममाऽपीहा पूरणीया क्रियतां शत्रुनाशनम्।।४९०।।

चण्डमुण्डौ च निहतौ विख्यातौ दनुजौ त्वया।
निपतद् रुधिरं पीत्वा रक्तबीजो विनाशितः।।४९१।।

ततः शुम्भनिशुम्भौ द्वौ दनुजौ बलवत्तमौ।
युद्ध्यमानौ त्वया सार्द्धं क्षणेनैव निपातितौ।।४९२।।

त्रेतायामपि कैकेय्या विपरीता कृता मतिः।
वनवासं गतो रामः पित्राज्ञापरिपालकः।।४९३।।

रावणस्य वधोऽप्येवंविधया विहिता त्वया।
देवेभ्यो मानुषेभ्यश्च सुखदाऽसि सरस्वति!।।४९४।।

त्वं चण्डिकाऽथ चामुण्डा दुर्गा गौरी त भैरवी।
लक्ष्मीः शची जयन्ती त्वं सिद्धिर्बुद्धिरुमासती।।४९५।।

लेखन्या लेखनेनापि मुखतो भाषणेन वा।
कस्ते गुणान् गातुमीशस्त्वं सदासि गुणाकरः।।४९६।।

मादृशानां तु का वार्ता? ब्रह्मविष्णुशिवा अपि।
न ते गुणान् गातुमीशास्तेषां शक्तिस्त्वमेव हि।।४९७।।

विष्णोस्त्वं वैष्णवी शक्तिः शिवशक्तिस्त्वमेव हि।
ब्रह्माणी ब्रह्मणः शक्तिर्गौरी काली त्वमेव हि।।४९८।।

आदिशक्तिस्त्वमेवाऽसि ह्यनन्ता परमा रमा।
अनाद्यनन्ता परमा त्वं वेदैरपि गीयसे।।४९९।।

अवनादोमिति ख्यातं तव नाम्नः प्रभावतः।
भक्तमुन्नयते यस्मात्तदोमिति त्वमीरिता।।५००।।

स्वधास्वाहावषड्वौषट्श्रौषट् त्वं प्रणवात्मिका।
सर्वमन्त्रमयी त्वं हि ब्रह्माद्यास्त्वत्समुद्भवाः।।५०१।।

यद् दृश्यं यददृश्यं च स्थूलसूक्ष्मस्वरूपतः।
तत्र त्वमोता प्रोताऽसि न किञ्चित् त्वदृते क्वचित्।।५०२।।

विद्याशक्तिस्त्वमेवाऽसि महाविद्यास्वरूपिणि!।
महाकाली त्वमेवाऽसि महाकालस्वरूपिणि!।।५०३।।

उग्रतारा त्वमेवाऽसि तारिणी जगदम्बिके!।
षोडशी सृष्टिशक्तिस्त्वं त्वं हि त्रिपुरसुन्दरी।।५०४।।

शैवी शक्तिस्त्वमेवाऽसि त्वमेका भुवनेश्वरी।
छिन्नमस्तास्वरूपासि सूर्यतेजःसमुज्ज्वला।।५०५।।

भैरवी त्वं महादेवी कालभैरवरूपिणी।
धूमावती महाविद्या महाशक्तिस्वरूपिणी।।५०६।।

त्वमेका रुद्ररूपाऽसि शक्तिस्त्वं बगलामुखी।
मातङ्गीशक्तिरूपाऽसि दुर्गा भगवतीश्वरी।।५०७।।

त्वमेव कमलारूपा धनविद्यायशःकरी।
सर्वशक्तिस्वरूपाऽसि मातस्त्रिभुवनेश्वरी।।५०८।।

न त्वं स्त्रीरूपमात्राऽसि पुंरूपाप्यसि सुन्दरि!।
दशावताररूपाऽसि त्वं तेषां शक्तिरूपिणी।।५०९।।

कालिका कृष्णरूपाऽसि रामरूपाऽसि तारिणी।
बगला त्वं कूर्ममूर्तिर्धूमाऽसि झषरूपिणी।।५१०।।

नृसिंहरूपा त्वमसि छिन्नमस्तास्वरूपिणी।
वराहरूपा त्वमसि भैरवीरूपधारिणी।।५११।।

जामदग्न्यस्वरूपाऽसि त्वं हि त्रिपुरसुन्दरि!।
त्वं हि वामनरूपाऽसि मातस्त्वं भुवनेश्वरि!।।५१२।।

त्वं बुद्धरूपा कमले! जगदाधाररूपिणी।
कल्किरूपाऽसि मातङ्गि! त्वया व्याप्तमिदं जगत्।।५१३।।

कुशला सर्वशास्त्रेषु प्राकृतौ प्रकृतिः स्थिता।
हिमालये हिमानी त्वं सर्वदा महिमालया।।५१४।।

जले मधुरता त्वं हि त्वमाकाशेऽसि नीलिमा।
सर्वशक्तिस्वरूपासि त्वं सरस्वान् सरस्वती।।५१५।।

तेजोरूपाऽनलस्याऽसि त्वं चन्द्रस्याऽसि चन्द्रिका।
प्रभारूपाऽसि सूर्यस्य विद्युतां त्वं प्रकाशिका।।५१६।।

मङ्गले मङ्गलार्थे च भवन्नाम गृणन्ति ये।
नास्ति तेषां यशःकाये जरामृत्युविपत्तयः।।५१७।।

अज्ञो जडो विमूढोऽपि बुद्धिहीनोऽपि भारतीम्।
प्रीत्या संस्तौति चेन्नित्यं बुद्धिविद्यायुतो भवेत्।।५१८।।

लक्ष्मि! मद्‌गेहमायातु मुखे वसतु भारति!।
लक्ष्मीकान्तं कलयतु लक्ष्मीकान्तं सदैव हि।।५१९।।

शारदे! शारदाम्भोजवदने! वागधीश्वरि!।
हंसवाहनसंयुक्ते! वागर्थान् प्रददातु मे।।५२०।।

मत्तमातङ्गमहिता मणिमण्डलमण्डिता।
मणिमाला त्वमेवासि मुकुटं मणिमत्तव।।५२१।।

रक्ताम्बरधरे! सिद्धलक्ष्मि! हरितचोलिके!।
पीताम्बरधरं प्रोच्य धनं बहु ददातु मे।।५२२।।

एकोनविंशवर्णेन सह विंशेन योजितम्।
पदार्थं रुद्धमायातान्महालक्ष्मीः प्रचोदयात्।।५२३।।

तवाऽऽसनपदं नाम यस्य सः स्वं ममानयत्।
देशान्तरं गतस्तं हि महालक्ष्मीः प्रचोदयात्।।५२४।।

तव पाणिप्रपातेन पिपूर्तान्मे मनःप्रपाम्।
ग्रहीतारं समाकृष्य महालक्ष्मीः प्रचोदयात्।।५२५।।

शीघ्रमादाय स स्वं मे समर्पयतु सत्वरम्।
अम्लानं त्वत्पदं स्यात्तं महालक्ष्मीः प्रचोदयात्।।५२६।।

प्रच्छन्नं प्रच्युतं पद्मं प्रगृह्णातु ग्रहेश्वरी।
तन्मेऽभिमुखमायातु महालक्ष्मीः प्रचोदयात्।।५२७।।

स्वासनात् शीघ्रमुत्थाप्य त्वं मम स्वं प्रदापय।
स्वासनं स्वप्रदानार्थं महालक्ष्मीः प्रचोदयात्।।५२८।।

महालक्ष्मि! महाकालि! महापूर्वा सरस्वति!।
महाधनं ममाऽऽयातान्महालक्ष्मीः प्रचोदयात्।।५२९।।

अहो! त्वदासनं लक्ष्मि! मम स्वं न ददाति चेत्।
तस्याऽपवादो जगति प्रतिष्ठा तु कुतो भवेत्।।५३०।।

मम स्वमपहृत्य त्वं स्वासने यदि रक्षसि।
स्ववत्सं मां जगद्धात्रि! किं पाययसि तद् वद।।५३१।।

मद्गृहं शीघ्रमायातु लक्ष्मीर्गरुडवाहना।
लक्ष्मीनारायणं चाग्रे स्थापयित्वा जगत्पतिम्।।५३२।।

लक्ष्मीनारायणौ लक्ष्मीं तनुतां दम्पती युवाम्।
दम्पती मिलितौ स्यातां किं कार्यं न प्रसिद्ध्यति।।५३३।।

त्वत्पादयुगले भक्तिः कवित्वे शक्तिरस्तु मे।
व्यवहारे विरक्तिः स्यादनुरक्तिर्हरौ सदा।।५३४।।

आलोक्यतां दिनकरा दिने हिमकरा निशि।
वने वा भवने हर्म्ये भवन्ति समदृष्टयः।।५३५।।

मामपाङ्गेन पश्यन्त्याः का ते हानिः प्रजायते?।
महामनाः सदा शान्ता दृश्यन्ते समदर्शिनः।।५३६।।

तवेष्टां दृष्टिमासाद्य सर्वाभीष्टा विशिष्टताम्।
आप्नुवन्ति दयादृष्ट्या तुष्टिं पुष्टिं करोतु माम्।।५३७।।

कर्मघर्मैः पीडितोऽहं विप्रसारङ्गशावकः।
दूरं नुदतु तं घर्मं दयानुपवनेरितम्।।५३८।।

शीतलैर्धनधाराभिः प्रवर्षतु धनामृतम्।
हरिप्रियापाङ्गमेघश्चिरञ्जीवतु बालकः।।५३९।।

धनाधिपे! धनं देहि तादृशं ते धनं यदि।
यद्धनं सगुणं कुर्यान्मां कुर्वे सद्व्ययं च तत्।।५४०।।

तद्धनं तु न मे देहि निन्देयं स्वजनान् यदि।
तेषां मानमहं कुर्यां सधनस्त्वत्प्रसादतः।।५४१।।

लक्ष्मि! त्वदासने मेऽस्ति धनमुद्धृत्य देहि मे।
त्वदासनस्थात् स्वधनान्न दुःखं सुखमस्तु मे।।५४२।।

अधमर्णोऽहमधुना मामुद्धर महार्णवात्।
भूयास्त्वं कर्णधारा मे तरिमादाय तारय।।५४३।।

ऋणाब्धौ मज्जितोऽहञ्चेत् प्रतिष्ठा ते कुतो भवेत्?।
निष्फलं यदि मन्नाम त्वन्नाम्नो न हि सार्थता।।५४४।।

विद्यां ददातु वाग्देवि! यतो ज्ञानं प्रवर्द्धते।
गालिं दद्यामहं स्वाञ्चेन् मा मे यच्छतु रक्ष ताम्।।५४५।।

अहं मां च मया मह्यं मत्तो मम मयि स्थिताः।
मच्छब्दार्थास्त्वया लक्ष्मि! पालनीयाः प्रयत्नतः।।५४६।।

'विद्या ददाति विनय'मिति नीतौ व्यवस्थितम्।
त्वद्विद्ययाऽविनीतश्चेत् कथं विद्वान् स उच्यते।।५४७।।

मा विद्यास्तु विवादाय परैः सह कदाचन।
विद्या ज्ञानाय मे भूयाद् वाग्देवीं प्रार्थये सदा।।५४८।।

विद्याहीनोऽविनीतोऽपि सधनो दृश्यतेऽधुना।
'पात्रत्वाद् धनमाप्नोति' नीतिरुक्ता कथं त्वया।।५४९।।

पात्रत्वेऽपि धनं नास्ति धनाद्धर्मं कुतः सुखम्?।
त्वन्नीतिविपरीतोऽस्मि पात्रतां कुरु मामपि।।५५०।।

लक्ष्मि! त्वमेव शुभदा सुखदा वरदा सदा।
चित्तं पित्तं च वित्तं च ह्युपयुक्तं करोतु मे।।५५१।।

अयुक्तानि यदीमानि ह्ययुक्तोऽपि च सम्भवः।
त्वया साधु प्रयुक्तानि युक्तियुक्तानि सन्तु मे।।५५२।।

लक्ष्मि! सम्पन्नतां देहि भविष्यं देहि सुन्दरम्।
येनाऽतीतं विस्मरेयं तद् भविष्यं न कामये।।५५३।।

सहयोगान् प्रकुर्वेऽहं तदर्हं मां कुरुष्व भो।
शिवाय जीवनं देहि शिवं भवतु सर्वतः।।५५४।।

नाहं सकलशास्त्रज्ञो धर्मशीलोऽपि नाभवम्।
न कर्मकर्ता त्वत्प्रीत्यै नोद्यतोऽस्मि धनार्जने।।५५५।।

विवर्णोऽपि सवर्णः स्यात् सर्वदाजिव हल्यपि।
कृतादेशागमौ नित्यौ प्रकृतौ प्रत्ययो भवेत्।।५५६।।

विकारिशब्दोच्चारेऽपि ह्यविकारीव लक्ष्यते।
पुंस्त्रीविरहिताभ्यासादपि पुंस्त्रीयुतो भवेत्।।५५७।।

सर्वधातुविहीनोऽपि धातूनां सन्निधौ स्थितिः।
नाम-धातु-विहीनोऽपि नामधातुक्रियाकरः।।५५८।।

वर्तमानः सुमधुरः सम्भवेत् सधने सति।
चिन्ता न क्रियते भूते स्याद् भविष्यं सुनिश्चितम्।।५५९।।

जीवितं सञ्चलन्नस्ति नावकाशोऽत्र विद्यते।
अवकाशे महालक्ष्म्या ग्राह्यं नाम सुमङ्गलम्।।५६०।।

यस्या नाम्नः प्रभावेण जीवनं मधुरं भवेत्।
महालक्ष्मीः सदैवाग्रे पृष्ठे भवति मङ्गला।।५६१।।

मङ्गलं भगवान् विष्णुर्महालक्ष्मीश्च मङ्गला।
लक्ष्मीनारायणौ स्यातां मङ्गलायतने सदा।।५६२।।

भवे भवे महालक्ष्मीर्लक्ष्मीवृद्धिकरी भवेत्।
महालक्ष्मीः प्रेमपात्रं लक्ष्मीकान्तं सदाऽवतु।।५६३।।

तेजो बलं वा यत्सत्त्वं शोभा सारं त्वमेव हि।
निःसारमेतदखिलं त्वां विनाऽऽलोक्यते जगत्।।५६४।।

त्वं विश्वमूर्तिः सर्वेषां माताऽसि भुवनत्रये।
मर्त्योऽहं कीटतुल्योऽस्मि मदाकाङ्क्षां प्रपूरय।।५६५।।

धनधान्यान्नपूर्णाऽसि विद्यावैभवबुद्धिभिः।
संयुताऽसि पूरणीया त्वया मे मूषिकाञ्जलिः।।५६६।।

लूताकृमिसमोऽस्मीह लुताभिर्बाधितोऽभवम्।
न किञ्चित्कर्तुमर्होऽस्मि कुरु मां परिमोचितम्।।५६७।।

त्वयि स्मृतायां दुःखानि क्षीयन्ते दुष्कराण्यपि।
त्वयि स्तुतायां विविधाः ख्याप्यन्ते कीर्तयोऽपि च।।५६८।।

त्वय्यर्चितायां देवेशि! लभ्यन्ते सिद्धयोऽपि हि।
चित्ते त्वय्याऽलम्बितायां सुयोगैर्युज्यतेऽप्यथ।।५६९।।

त्वद्भक्तियुक्तोऽपि जनो स्मृतिं पूजां स्तुतिं नुतिम्।
सर्वं करोति युगपत् तस्मै तानि प्रकल्पय।।५७०।।

केवलं भक्तियुक्तोऽस्मि दम्पत्योर्युवयोर्द्वयोः।
त्वद्भावनाभावितोऽस्मि धनेशान्यां त्वयि स्थितः।।५७१।।

त्वत्साधनायां संलग्नं साधितं कृपया कुरु।
त्वच्चेतनायां चैतन्यं विद्यते चेतनं कुरु।।५७२।।

त्वन्मायामोहितोऽत्यन्तं मायाच्छन्नोऽस्मि साम्प्रतम्।
विष्णुमाया त्वमेवाऽसि सन्निधिं कुरु मामपि।।५७३।।

विष्णौ शृङ्गारपूर्णासि भक्ते प्रेमपरिप्लुता।
त्वं कुत्सनपराऽभक्ते सरोषाऽविनयान्विते।।५७४।।

कृपादृष्टिपरा पुत्रे स्मेरा त्वं सद्गुणान्विते।
दृष्टिं सकरुणां देहि शरणागतवत्सलम्।।५७५।।

निधाय हृदये लक्ष्मीं विधाय गुरुवन्दनम्।
इदं स्तोत्र विरचितं महालक्ष्म्याः प्रसादतः।।५७६।।

आत्मपुत्रकलत्रेभ्यः सुखं नाभूदिह क्वचित्।
ऐश्वर्यधनधान्येभ्यः सुखं नाभूदिह क्वचित्।।५७७।।

भ्रातृबन्धुबान्धवेभ्यः सुखं नाभूदिह क्वचित्।
सख्यमित्रसगर्भेभ्यः सुखं नाभूदिह क्वचित्।।५७८।।

विद्यावृत्तिनिवासेभ्यः सुखं नाभूदिह क्वचित्।
केवलं दुःखमेवाऽभूद् दुःखमेव हि केवलम्।।५७९।।

सुखदात्री दुःखहर्त्री त्वमेवाऽसि मम प्रभुः।
अन्यथा शरणं नास्ति त्वमेव शरणं भव।।५८०।।

महालक्ष्मीं महालक्ष्मीं महालक्ष्मीं ममेशिकाम्।
नाऽन्यं जानामि त्वामेव जानामि दुःखहारिणीम्।।५८१।।

शीघ्रं मोचय दुःखेभ्यः सुखं यच्छसि चेन्न तु।
तव नामजपं कृत्वा प्रणमामि मुहुर्मुहुः।।५८२।।

लक्ष्मीप्रसादाभीष्टोऽहं लक्ष्मीप्रसादलब्धये।
लक्ष्मीकान्त इदं नाम मातः सार्थं कुरुष्व मे।।५८३।।

यथा जलं हि जाह्नव्या नीरं क्षीरं तथामृतम्।
तथा मदर्थे लक्ष्मि! त्वं धनविद्यायशःकरी।।५८४।।

'येषां क्वापि गतिर्नास्ति तेषां वाराणसी गतिः'।
प्रोक्तं शास्त्रे यथा त्वं मे तथैव शरणागतिः।।५८५।।

सर्वधर्मान् परित्यज्य बुद्धमेकं गता यथा।
जनास्तथाहमेकां त्वां शरणं यामि सर्वथा।।५८६।।

सर्वकर्माणि सन्त्यज्य पतिभक्तिरता यथा।
स्त्रियस्तथाऽहमेकायास्ते कुर्वे भक्तिमेकलाम्।।५८७।।

सर्वान् पुरस्थितान् मान्यान् वृद्धानपि गुरूनपि।
विहाय कृष्णशरणा द्रौपदीवाऽहमेकलः।।५८८।।

शाटिकेवेह पाञ्चाल्याः श्रीकृष्णपरिरक्षिता।
आनेतव्या त्वया लक्ष्मीः क्षिप्रं मेऽदूरदेशतः।।५८९।।

कोमलावयवे! लक्ष्मि! कमलासनसंस्थिते!।
कमलाद्धनमानेतुं मदर्थे भव जागरा।।५९०।।

त्रैलोक्यरक्षिते! लक्ष्मि! रक्षणीयोऽस्म्यहं त्वया।
सार्थं भवतु मन्नाम भवत्या नामसंस्तुतौ।।५९१।।

मतिं देहि गतिं देहि त्राहि मां परमे! रमे!।
त्वां विना पालकस्त्राता कश्चिदन्यो न लभ्यते।।५९२।।

श्रुतिस्मृत्युदितैः सम्यक् स्ववर्णाश्रमवर्णितैः।
पूजायज्ञादिकं कुर्वे यथाविधिविधानतः।।५९३।।

सर्वयज्ञतपोदानैस्त्वामेव हि समर्चये।
कायेन मनसा वाचा त्वामेव हि समाश्रये।।५९४।।

त्वच्चित्तस्त्वद्गतप्राणस्त्वन्नामजपतत्परः।
त्वत्प्रसङ्गस्त्वदालापस्त्वद्गुणश्रवणे रतः।।५९५।।

त्वन्मना तव भक्तोऽहं त्वद्याजी त्वां नमस्कृतः।
न त्वं मामेष्यसि कथं त्वद्युक्तं त्वत्परायणम्।।५९६।।

जन्मतो नामतो लक्ष्मि! त्वन्निष्ठस्तव सेवकः।
तवैवोपासकोऽहं त्वं किमहो मां न पश्यसि!।।५९७।।

मातस्तवोपासनायां त्रुटिरस्त्यपि चेद् वद।
अश्रुधाराभिरपि ते कुर्वे पूजामहर्निशम्।।५९८।।

यतस्त्वद्बालकोऽहं मां समुद्धर भवार्णवात्।
अन्यथा शरणं नास्ति त्वमेव शरणं मम।।५९९।।

यद्यहं वासुदेवं वा शिवं वा शरणागतः।
गणेशं वा कुमारं मामुद्धरिष्यन्ति ते ध्रुवम्।।६००।।

बालकस्य हि मे माता गौरवेणाऽतिरिच्यते।
अत एव स्तुता त्वं मां दयापात्रं दयां कुरु।।६०१।।

विरसा निर्गुणाऽप्रौढाऽविदग्धा रुक्षभाषिता।
विधिक्रियामन्त्रहीना प्रार्थनैषेति वक्षि चेत्।।६०२।।

विकलावयवाऽशुद्धा गुणालङ्कारवर्जिता।
शिक्षासंस्कृतिसंस्कारविहीनहृदयोद्गता।।६०३।।

स्तनन्धयस्य बालस्याऽस्फुटा वाणीव भाषिता।
विलाप इव बालस्य भावबोधाऽस्तु मातरम्।।६०४।।

या मां तारयते दुःखात् सा माता प्रोच्यतेऽर्भकैः।
दुःखार्तानां शिशूनां कः शरणं मातरं विना।।६०५।।

मातुरङ्के हठेनाऽपि बालोऽसौ यद्यदिच्छति।
माता पिपर्ति तत्सर्वं स्वबालप्रेमभावतः।।६०६।।

स्वीकुरुष्व महालक्ष्मि! स्तुतिमेनां तवार्पिताम्।
त्वदाश्रितगुणोल्लेखां त्वदर्थं बालबोधिताम्।।६०७।।

यादृशस्तादृशो वाऽस्तु मातुर्बालः प्रियो यथा।
अनन्यशरणस्येह माताऽस्तु शरणं मम।।६०८।।

सदोषमपि स्वं बालं माता स्निह्यति यादृशम्।
स्नेहपात्रं तथा मातुर्भूयासमिति कामये।।६०९।।

इति भक्तिस्तुतिनुतिसपर्यापरितोषिते!।
सुखप्रसादाभिमुखि! प्रसादसुमुखी भव।।६१०।।

सकृद्ध्यायति यो मातर्भोगानिष्टान् ददास्यहो!।
सर्वान् रिपून् क्षपयसि विपदो विनिहंस्यपि।।६११।।

आधीन् प्रदहसि व्याधीन् शीघ्रं शमयसि क्षणात्।
सुखानि तनुसे शश्वद् ह्यन्तर्दु:खानि कान्यपि।।६१२।।

हठाद् दलयसि प्रीत्या प्रकरोषीष्टसङ्गमम्।
धनागमप्रणालीं च रचयस्येव निर्भरम्।।६१३।।

विजयश्रीरग्रतो हि तस्य धावति सत्वरम्।
ध्यातारमसकृत्त्वं मां किं किं प्रकुरुषे कुरु।।६१४।।

त्वत्पादप्रणतं भक्तमनन्यमनसं हि माम्।
यद्यद् वाञ्छसि तत्सर्वं कुरुष्व मनसेप्सितम्।।६१५।।

भुक्त्वाऽभिलषितान् भोगान् त्वामहं विस्मरामि नो।
मात: प्रयाणकालेऽपि विस्मरेयं न ते स्मृतिम्।।६१६।।

जन्मजन्मन्यपि मयि समायातु तव स्मृति:।
या तवोपासनामार्गे शक्तिरुद्गामिनी भवेत्।।६१७।।

वागर्थवति! लक्ष्मि! त्वं न चेल्लोके प्रतिष्ठिता।
जगद् वागर्थहीनं स्यादालोकेऽपि तमोमयम्।।६१८।।

हे लक्ष्मि! त्वं सुवदना शालिनी त्वं प्रहर्षिणी।
विद्युन्माला त्वमेवाऽसि मालिनी स्रग्विणी क्षमा।।६१९।।

प्रियंवदा त्वमेवाऽसि ललिता प्रमिताक्षरा।
वसन्ततिलकाऽसि त्वं हरिणी हारिणीन्दिरा।।६२०।।

समुज्वला शिखरिणी स्वागता चित्रलेखिका।
विद्युल्लेखा त्वमेवाऽसि लक्ष्मि! त्वं तनुमध्यमा।।६२१।।

छन्दोभिर्विविधै: पद्यैरुद्गीता गीतिभि: स्तवै:।
काव्यै: सुकविरुद्गीतैश्चम्पूकाव्यैश्च वर्णिता।।६२२।।

रसालङ्कारसंयुक्ता गुणभावसमन्विता।
निर्दोषा लक्षणवती ललिता काव्यरूपिणी।।६२३।।

न त्वं सरस्वतीवाऽसि गायत्रीवाऽसि नैव हे।
नैव त्वं पार्वतीवाऽसि त्वया हि त्वं विशेषिता।।६२४।।

लक्ष्मि! त्वमेव हि मम जन्मदा प्राणदाऽप्यसि।
त्वमेवार्पय मे शीघ्रं विद्यां च धिषणामपि।।६२५।।

मातुः पयोदमिव मे विद्यासुधिषणे उभे ।
तव स्तन्यमहं याचे बालानां रोदनं बलम्।।६२६।।

यतो हि पुत्रो भवति सर्वदा मातृवैभवम्।
आलोकय दयादृष्ट्या जगज्जननि! वैभवम्।।६२७।।

वागर्थानामधिष्ठात्रि! वागर्थप्रतिपत्तये।
इत्थं प्रसादिता प्राज्ञि! प्रसीदतु न सीदतु।।६२८।।

बुद्धिवैभवशक्तिश्रीविकलोऽपीह सन्ततम्।
त्वदाप्तवाग्वैभवैस्त्वां जन एष नमस्यति।।६१९।।

लक्ष्मीवैभवनाम्नीयं त्वदर्थे मत्कृता स्तुतिः।
प्रसीदसि मदर्थे चेल्लक्ष्मीवैभवमर्थये।।६२०।।

आनन्दनगरे मातरानन्दो यदि वा न वा।
लोकास्तथापि तं देशं तन्नाम्ना ब्रूवते सदा।।६२१।।

माता यद्यपि वत्सान् स्वान् कराभ्यां ताडयत्यहो!।
वत्साः स्वमातरं नित्यमनुयान्ति त्यजन्ति नो।।६२२।।

स्वमातरं विहायाऽहं क्व यायामन्यमातरम्।
को हि रक्षतु मामेवं माताऽस्तु शरणं मम।।६२३।।

त्वत्पतङ्गोदये भातु जीवनाऽम्भोरुहं मम।
वर्षिते ते दयामेघे तत्पुष्यति न शुष्यति।।६२४।।

लक्ष्मीनारायणौ मे स्तां जननीजनकायितौ।
नमोऽस्तु ताभ्यामवतां लक्ष्मीनारायणौ हि माम्।।६३५।।

मत्स्यकूर्मवराहनृसिंहवामनरूपिणे।
रामत्रयीकृष्णबुद्धकल्किने विष्णवे नमः।।६३६।।

वकवत्सकधेनुकपूतनाशम्बरद्विषे।
भक्तमित्राय कृष्णाय नमस्ते यज्ञमूर्तये।।६३७।।

फणाधरप्रियायाद्य नीलाम्बरानुजन्मने।
पीताम्बराय सर्वेषां शेखराय नमोऽस्तु ते।।६३८।।

नमो भगवते वासुदेवाय सुखदाय च।
अलक्ष्मीनाशकाय श्रीदेवकीनन्दनाय ते।।६३९।।

कोऽपि लेखोऽस्तु ते नाम विना नैव विशुद्ध्यति।
लक्ष्मीवैभवनामेदमन्वर्थेन विशुद्ध्यताम्।।६४०।।

तव नामस्मरन् विप्रः सुदामाऽतिधनान्वितः।
द्वितयोऽहं सुदामेव सुदिनं दर्शयष्व माम्।।६४१।।

पृथुस्त्वं पृथुकोऽस्मीह पृथुशब्दकृतस्तुतिम्।
स्वीकृत्य पृथुकं रक्ष मा पृथक् कुरु सन्ततिम्।।६४२।।

पृथुकीर्ते! पृथक्कर्तुं पृथक्कुलभवं जनम्।
शोभते न महात्मानं पृथुकीर्तिं प्रसारय।।६४३।।

योऽभिकामयते लक्ष्मीमभिवर्षतु सन्निधिम्।
लक्ष्मीमन्त्रं प्रजप्येदं पाठं कुर्यादहर्निशम्।।६४४।।

पठत्वनुदिनं नित्यमिदं यो भद्रमिच्छति।
तस्याऽस्तु सुमना लक्ष्मीर्ददातु धनसम्पदः।।६४५।।

नारायणो मनोनाथो वसतान्मम मानसे।
श्रीचक्रपूजकायाऽस्मै श्रियं दद्यान्निरन्तरम्।।६४६।।

भीमकान्तः पिता मेऽस्ति नारायणसमो महान्।
नीलमायाऽपरा लक्ष्मीरिव माताऽस्ति वत्सला।।६४७।।

नीलमायाभीमकान्तौ मां मातापितरौ मुदा।
सदा लाडयतः स्नेहाद् गौर्वत्समिव वत्सलौ।।६४८।।

भीमकान्तो गुणैः स्वीयैर्नेपालतिलकायितः।
लक्ष्मीकान्तस्तत्सुतोऽहं जाड्यपात्रमनेकधा।।६४९।।

शक्तो भक्तो रतो व्यक्तो धने माने गुणे गणे।
नाऽहं पालय देवेशि! त्वं मां शरणमागतम्।।६५०।।

शक्तिभक्तिरतिव्यक्तैर्धने माने गुणे गणे।
शक्तं भक्तं रतं व्यक्तं सुस्पष्टं कुरु मामिह।।६५१।।

न मे वचनचातुर्यं माधुर्यमपि न श्रुतौ।
अलङ्कारैर्गुणैर्वृत्तैरयुक्तै रीतिवृत्तिभिः।।६५२।।

सुश्लोकै रचिता मातर्वैभवार्थं तव स्तुतिः।
महिमानं ख्यापयितुं सन्नद्धा भव संस्तुते!।।६५३।।

केवलं भावबोधार्थमस्पष्टमिव रोदनम्।
दैन्यं निवेदितं मात्रे यथेदं बालभाषितम्।।६५४।।

परेषु निर्गुणेष्वेऽपि महात्मानो दयालवः।
दयां कुर्वन्ति चेन्माता मयि पुत्रायिते न किम्?।।६५५।।

भाषायामसमृद्धायामसमृद्धजनोद्धृताम्।
असमृद्धकथामेतां कोऽसमृद्धः पठेदलम्।।६५६।।

ममतां समतां समासतस्तनुतां मामवतां विशेषतः।
जननीजनकौ सुताय मे ददतां वत्सलतामशेषतः।।६५७।।

भवतीं भवतापनुत्तये प्रणतिः सुक्रियते प्रणम्यते।
भवती भवतीव्रतापितं भवदुःखानलतः सुखीयताम्।।६५८।।

पृथिवीगगनानिलानलैर्जलयुक्ता मम मूर्तिरेकला।
नमति स्वकहंससाक्षिणा तव हंसस्थितयोः पदाब्जयोः।।६५९।।

शरणं चरणाब्जयोस्तव करणे मेऽपि दशेन्द्रियैः सह।
हृदयं मम साक्षिरूपकं किमु जानाति न तेऽत्र मौनताम्।।६६०।।

शरणं तव कुर्वतो मम किमहोरात्रिदिनादिसन्ध्यकाः।
सहसा पुरतो गमागमेऽनुभवन्त्येव हि साक्षिरूपताम्।।६६१।।

स्वकरेण सुगुम्फिता मया पदपुष्पैः कृतकाव्यमालिका।
प्रणतौ तव साक्षिरूपिणी स्तुतिपद्यैरिह षट्शताधिकैः।।६६२।।

तव दृष्टिरतीव निर्मला न कदाप्यऽस्ति तमोगुणान्विता।
अधुना रजसाऽऽप्लुता न हि ननु शुक्लापि कथं न पश्यसि?।।६६३।।

सुत एष ममाऽस्ति पूजको जपकर्ता स्तुतिपाठको नतः।
इति ते मनसा विचारिते किमुपेक्षां कुरुषे सुतं प्रति।।६६४।।

न हरिर्न हरो नमस्यते न विधिर्नापि विधुः प्रणम्यते।
असकृज्जननीपदाब्जयोर्मधुमक्षीव पतामि गुञ्जनैः।।६६५।।

पादौ तवातिरुणितौ नयनाभिरामौ
लाक्षारसै रजतनूपुरशिञ्जितौ च।
जङ्घाद्वयं ननु सुकोमलमीषदुष्णं
रम्भाद्वयाऽधिगुणितं वत किं न तत्ते।।६६६।।

मध्ये कृशा तदनु पुष्टतरा तदूर्ध्वं
दृष्टाऽभिराममुखचन्द्रमसाऽद्वितीया।
नासापुटे मणिमनोहरचिह्नयुक्ता
कर्णावतंसकनकैरुपशोभिता च।।६६७।।

ऊर्ध्वं वसन्ततिलकं निटिलेऽभिलग्नं
सत्यं तवाम्ब! मुखपङ्कजतुल्यशोभम्।
ऊर्ध्वं ततश्चलितकुञ्चितकुन्तलैस्त्वं
धाराधरैरुपमिता करुणाऽभिषिक्तैः।।६६७।।

चित्तं सुकोमलमतीव तवाऽम्ब! जाने
दृष्टिः सदैव करुणावरुणालयाऽस्ति।
या पीवरस्तनवती सुसमांसमीना
लोकोऽनुपालयति रक्षति सेवते ताम्।।६६९।।

शुक्लां गुणैर्जननि! सात्त्विकभावयुक्तां
जानाति तद्गुणगणैर्न रजोवती त्वाम्।
अन्याऽपि केवलतमोगुणभावयुक्ता
त्वां नैव वेत्ति शुभदां परमार्थभावाम्।।६७०।।

लक्ष्मि! त्वमेव कमलाऽसि हरिप्रियाऽसि
त्वं श्री रमाऽसि ललिता कमलेक्षणाऽसि।
त्वं क्षीरसागरसुताऽसि जगद्धिताऽसि
प्रज्ञा त्वमेव विदुषी प्रतिभाप्रदाऽसि।।६७१।।

त्वं तुष्टिपुष्टिसुखदाऽसि धनप्रदाऽसि
विद्याप्रदाऽसि सुकृतं मतिमुक्तिदाऽसि।
सम्पत्प्रदा सकलपापहरा त्वमेव
स्वाहा स्वधा त्वमिह लोकनमस्कृताऽसि।।६७२।।

पृथ्वीजलाग्निगगनानिलरूपिणी त्वं
सन्ध्ये उभे दिवसरात्रिकरी त्वमेव।
का ते स्तुतिर्वचनगोचरलेखपूर्णा?
त्वच्छिक्षितानि वचनानि सुयोजितानि।।६७३।।

श्रीभीमकान्तकविरत्नसुतोऽहमद्य
प्रारब्धकर्मवशगो धनवैभवार्थम्।
प्रीत्यै तवाम्ब! शिरसा धिषणानुरूपा
नत्वा कृता स्तुतिरियं पदपद्ममीयात्।।६७४।।

(उपसंहार:)

य: सेवां कुरुते तव प्रतिदिनं तस्मै शुभं यच्छसि
पापं चाऽत्सि वचांसि काव्यकलने गद्यानि पद्यान्यपि।
दत्से मञ्जुमतिं भवेत् प्रभुरसौ शुभ्रं यश: पुष्यसि
प्रागल्भ्यं तनुषे हि-तं रिपुरपि स्वं मन्यते सूक्तिभि:।।६७५।।

यो हि त्वामभिनन्दति प्रतिदिनं तस्मै धनं यच्छसि
य: स्तौति प्रतिपद्यते प्रणमति प्रेम्णा सुखं दित्ससि।
यस्त्वां ध्यायति मानति प्रतिदिनं त्वामाश्रयत्यर्चति
तस्मै किं न ददासि वाञ्छितफलं कोऽन्यो हि तं रक्षति।।६७६।।

लक्ष्मि! त्वामिह शुद्धपद्यरचनैर्नत्वा कृताभ्यर्थना
संयोगेन क्वचिच्छृणोति यदि तां ब्रह्मा हरिर्वा हर:।
सोऽवश्यं सहसा प्रसीदति वरं दातुं विलम्बेत किं?
मातर्ब्रूहि विलम्बसे तरलितं पातुं स्ववत्सं कथम्?।।६७७।।

नाहं शास्त्रविदुत्तमश्चलमतिर्वेदान्तविज्ञो न हि
तर्कं कर्कशमेति शाब्दविकल: साङ्ख्ये न सख्यं मम।
ज्ञात्वा मां-स-निवृत्त एष किमहो! मीमांसयाऽनाश्रितो
मत्वाऽधर्ममतिं न मेऽन्तिकमयाच्छास्त्रं च धर्माभिधम्।।६७८।।

तप्तं नैव तपो जपो न विहितो दानं न दत्तं क्वचित्
सत्कार्यं न कृतं परोपकृतये लग्नं मन: क्वापि नो।
शास्त्रं पापठितं न, नैव सुकृतं जानामि न ज्योतिषं
लक्ष्मीं केवलमर्थये स्वजननीं ध्यायामि लक्ष्मीमिह।।६७९।।

यो विद्यामधिगम्य वेदविधिना यज्ञादिकर्ता भवेत्
स्वाचारं प्रकरोति सत्यवचनं यः पालयेत् सर्वदा।
शास्त्रं पापठितं च येन सकलं रामायणं भारतं
योगश्चापि कृतो हठेन विधिना वेदान्तवेत्ता भवेत्।।६८०।।

लक्ष्मि! त्वं यदि तादृशं न दयसे मामेव सत्पात्रतां
मत्वा शीघ्रमुपैहि तिष्ठ सततं गेहे मदीये वस।
विद्वांसो यदि ते सपत्नतनयास्ते सन्तु सारस्वता
लक्ष्मीकान्तमिमं स्ववत्सकमतः स्तन्यं दयस्वाऽचिरम्।।६८१।।

लक्ष्मीं योऽर्चति तं जनं प्रतिदिनं जानाति लक्ष्मीपतिः
सैष प्रेरयति प्रियाप्रियमिमां यन्मां चरीकर्तु सा।
रातु प्रातु ददातु लातु तनुतां पुष्णातु पायादिह
तां वाञ्छामि समर्चये बहु भजे ध्यायामि संस्तौमि च।।६८२।।

लक्ष्मि! त्वं भुवि चञ्चलेति विदिता गेहे न किं ते सुखं
वैकुण्ठे भयमस्ति ते विषधराद् यादोगणैर्वा बहु।
भारत्यापि च गङ्गया किमु भयं सापत्न्यभावाच्च ते
मातर्मे गृहमस्ति चञ्चलमतिं हित्वा निवासं कुरु।।६८३।।

त्वं जानासि न वेह मेऽस्ति हृदयं विष्णोर्निवासं प्रियं
हित्वा त्वामपि चञ्चलेति विदितां वासस्तदीयः स्थिरः।
मातस्त्वं पतिभक्तिकर्मनिरता विष्णुः कुतोऽगादिति
चिन्तां मा कुरु सुस्थिरा भव चिरं मन्मानसे मन्दिरे।।६८४।।

मातस्त्वं ललिते! न सीदतु वृथा विश्वं भ्रमन्ती सती
हृद्यन्तर्मम वर्तते प्रियतमो विष्णुस्त्वदीयः प्रभुः।
मातर्मे मनसि प्रसीदतु सदा माति त्वदर्थे न चेद्
गेहान्तर्विशतु प्रसीदतु चिरं भव्यं चरीकर्तु मे।।६८५।।

लक्ष्मि! त्वद्विरहात् कुटीयति भृशं गेहं मदीयं लघु
प्रासादीयतु मद्गृहं भगवति! त्वद्वासहेतोरथ।
सान्निध्यात्तव मे गृहस्य परिधेर्भा इन्द्रचापायतां
वैकुण्ठायतु निश्चितं श्रयतु मद्वासस्त्वदीयाऽऽश्रयात्।।६८६।।

विद्यां देहि धनं मतिं बहु रमे दुष्कर्मघर्मांश्चिरं
दूरं प्रक्षिपती दयानुपवनैः स्नेहाप्लुतान्मानसात्।
सोऽहं त्वत्प्रियबालकस्त्वमधुना नाम्ना स्वयं जानती
कारुण्यान्नयनाम्बुवाहभरिता द्रव्याम्बुधाराः क्षिप।।६८७।।

लक्ष्मीवैभवकाव्यमस्ति न रसालङ्कारविच्छित्तिकं
सौम्यं रीतिगुणैर्युतं न, न चमत्कारोपमाभिर्युतम्।
सद्वृत्तैर्न सुचित्रितं न च पुनः सद्वृत्तिभिर्भाषितं
दृश्यं केवलबालवृत्तिभणितं मातुः पुरस्ताद् हठात्।।६८८।।

इष्ट्वा देवान् सुकृतविभवाँस्तैरवाप्ताशिषेऽपि
ध्यात्वा लक्ष्मीं धनवृषमतिप्राप्तये निर्मितेन।
स्तोत्रेणैषा भवतु सुमनाः पुत्रकल्पाय मह्यं
विद्यां वित्तं विपुलविभवं लोकमाता ददातु।।६८९।।

पाठं किञ्चित् पठित्वा बहुतमदिवसान् यापयित्वाऽथ लोकान्
दृष्ट्वा सम्पाद्य कार्यं वचनतनुमनोभिः समन्ताद् धनस्य-
स्थानं ज्ञात्वा न चान्यत् सुखकरमिति यच्चेतसा सम्प्रबुध्य
ध्यात्वा लक्ष्मीं सपर्यास्तुतिनुतिरचिता प्रीतये तद्धनाप्त्यै।।६९०।।

(इति द्वितीयांशः)

* *

# सारस्वतवैभवम्

(काव्यम्)

# १. संस्मरणम्

नमस्कुर्वे प्रियां देवीं यां प्राप्य मनुजा अहो!।
मनोभावानुद्गिरन्ति शब्दगर्भां सरस्वतीम्।।१।।

देव्या प्रसादितो विद्वान् यस्य वंशे ममोद्भवः।
देवीप्रसादनामानं संस्मरामि पितामहम्।।२।।

नामाक्षरैर्भीमकान्तो वपुषा च गुणेन च।
विद्याभीमं काव्यकान्तं पितरं संस्मराम्यहम्।।३।।

तातरूपं गुरुं वन्दे येनाहं शिक्षितोऽक्षरैः।
तमसः पारमानीतो गायत्रीं चोपदिश्य माम्।।४।।

वाग्देवीं मातरं वन्दे यया वाचाऽनुशासितः।
काश्चिद् वाचोऽभिसार्यैव भवेयमुऋणः कथम्?।।५।।

वाणि! तिष्ठतु जिह्वाग्रे वाणीमग्रे प्रसारय।
वाण्यामेव स्थितो लोकस्तस्माद् वाणीं विचारय।।६।।

विचार! त्वं समायाहि विचारणपरोऽसि चेत्।
मद्विचारमुपाश्रित्य नृणां वाचो विचारय।।७।।

हे शब्दशास्त्र! हे मित्र! बाल्यात् परिचितं मम।
सन्निधिं शीघ्रमायाहि शुद्ध्यर्थमिह लेखने।।८।।

नाऽहं प्रियसखा ते किं नामलिङ्गानुशासन!
रक्षार्थं ते प्रतिष्ठायाः शीघ्रमेहि ममान्तिकम्।।९।।

मया परिचितं बाल्यान्नीतिशास्त्र! त्वमेहि भो!
अधुनाऽवसरः प्राप्तः सख्यं मे कुरु सार्थकम्।।१०।।

साहित्य! त्वत्सहायोऽस्मि त्वया हीनस्तु नीरसः।
साक्षरः सरसो मेऽस्तु 'रस आत्मे'ति घोषितः।।११।।

'गुणा गुणेषु वर्तन्त' इति मत्वा गुणा मम।
सन्निधिं शीघ्रमायान्तु गुणहीनः कथं लिखेत्।।१२।।

गुणाः प्रियतमा यूयं सदा वसत सन्निधौ।
युष्मासु पुत्रवात्सल्यं मम तिष्ठतु सर्वदा।।१३।।

रीतयो वृत्तयो नित्यमायान्तु मम सन्निधिम्।
भगिनीनां च पुत्रीणां स्थानाऽऽपन्ना भवन्तु मे।।१४।।

प्रक्षालयन्त्वशोभां मे रमन्तां कवितासु च।
रीतयो वृत्तयः सम्यक् सुशोभन्तां यथातथम्।।१५।।

नाऽस्मि पर्वतवास्तव्यः पर्वताऽभिजनोऽप्यहम्।
नो जानेऽहमलङ्कारान् लङ्कां जाने कथञ्चन।।१६।।

अलङ्कुर्वन्त्वलङ्कारा न दूरं गच्छत प्रियाः।
यूयं मे भ्रातृसम्बन्धबन्धिताः संस्मृता मया।।१७।।

व्यवहारानर्थशास्त्र! मां प्रशिक्षय सत्वरम्।
व्यवहारान्वितो लोकस्त्वां विनाऽत्र कथं चलेत्।।१८।।

कुरु सख्यं साङ्ख्यशास्त्र! त्वं मया विस्मृतं न हि।
त्वत्तो दूरं च नैवाऽहं सदाऽवां प्रकृतिस्थितौ।।१९।।

तर्काऽमृतं देहि मह्यं जरयाऽहं न चेद् धृतः।
जराजीर्णः कथं कुर्यात् पदार्थानां विवेचनम्।।२०।।

सदाचाराऽन्वितं धर्मशास्त्र! शीघ्रं ममान्तिकम्।
आगत्याऽऽचारसम्पन्नं कुरु मां विनयान्वितम्।।२१।।

मीमांसे! मां समायाहि मांसाद् दूरं नयस्व माम्।
निष्पक्षभावमाश्रित्य मीमांस्यन्ते मया गिरः।।२२।।

वेदान्तवाणि! दुर्दान्ता मा भूर्मह्यं कदाचन।
तव संयोगसम्बन्धाद्धन्योऽहमतिहर्षित:।।२३।।

ज्योति:शास्त्र! त्वमायाहि मदग्रे मार्गदर्शनम्।
कल्याणं कुरु सर्वत्र शान्तिं च ग्रहगोचरात्।।२४।।

रवि: शशी कुज: सौम्यो गुरु: शुक्र: शनैश्चर:।
राहु: केतु: शान्तिकरा ग्रहा: सर्वे भवन्तु मे।।२५।।

सङ्गजां गां मनोभङ्गामस्तरङ्गां तरङ्गिताम्।
रसाङ्गो भावमापन्न: सुसङ्गाऽऽनन्ददोऽस्तु मे।।२६।।

लक्ष्मीकान्तोऽस्म्यहं नाम्ना न वित्तेन न विद्यया।
तथापि बुधसंसर्गात् किञ्चिल्लेखितुमारभे।।२७।।

अरुन्धति! त्वां समवाप्य लोकै: सुचिन्त्य शास्त्रं प्रविचारणीयम्।
परन्तु दृष्टाच्च महाविरोधात् लिखामि किञ्चित् समयाऽनुरोधात्।।२८।।

**

## २. नेपालचित्रम्

आर्यावर्ते पुण्यभूमौ हिमवद्दक्षिणस्थले।
पर्वतप्रान्तबहुले देशो 'नेपाल' उच्यते।।१।।

अनेकजातजातीनां नेपाल: सङ्गमोऽस्त्यपि।
जङ्गमा: सन्ति देशेऽस्मिन् नैकभाषाप्रभाषिण:।।२।।

आसन् किराता गोपाला भूपा लिच्छविवंशजा:।
मल्लवंश्या: शाहवंश्या नेपालस्य प्रशासका:।।३।।

पुराणा अपि राजान आसन् राणाप्रशासका:।
सर्वै: प्रशासकैर्देश: शासितोऽयं सदैव ही।।४।।

अधुना सन्ति नेतारो नेपालस्य प्रशासकाः।
आर्तो वराकसदृशो देशः क्षीणतरोऽभवत्।।५।।

छित्त्वा भित्त्वा पुनर्हत्त्वाऽऽकृष्याऽऽलुञ्च्य प्रतार्य च।
शासकैः शासितो देशो मूकवन्निर्बलोऽभवत्।।६।।

देशोन्नत्यै सुसंयुक्ताः कटिबद्धा हितैषिणः।
वाचो विरुद्धा भाषन्ते संसदिस्था असांसदाः।।७।।

चातका जलपानार्थे काष्ठमण्डपवासिनः।
मेलम्च्या जलमानीय नेतारः पाययन्त्यहो!।।८।।

विना मार्गेण गच्छन्ति मण्डलान्तरवासिनः।
विभिद्य निर्मितं मार्गं विकासः क्व भवेत् कुतः।।९।।

निरक्षराः सन्ति बाला ग्रामस्था धूलिधूसराः।
विद्यालयाः पाठकाश्च नैव सन्ति पठन्ति किम्।।१०।।

रोगार्ता दुखिनः सन्ति नौषधं नौषधालयः।
चिकित्सकस्तत्र नास्ति कथं जीवन्ति रोगिणः।।११।।

असेचितान् भूमिभागान् सेचनार्थं समागतम्।
धनं गृह्णन्ति नेतारः कथमन्नं भवेत् कुतः।।१२।।

आनीतं सेतुबन्धार्थे धनं तत्र न यात्यहो!
सेतुबन्धं विना पान्था नद्यां यान्ति वहन्त्यहो!।।१३।।

मार्गनिर्माणकार्यार्थे धनमादाय वञ्चकाः।
'मार्गो भ्रष्ट' इति प्रोच्य जनतास्तैः प्रवञ्चिताः।।१४।।

लाउडा 'ला उडे'त्युक्त्वा वायुयानमुपागतम्।
लाउडा वायुमार्गेणोड्डीयते धनमन्तिके।।१५।।

नेपालस्य धनं रम्यं वनं हरितशोभितम्।
पुस्तके पठनीयं तद् वनं परिणतं धने।।१६।।

तद्धनं नेतृभिर्भुक्तं प्रदत्तं स्वजनाय च।
दारुणामप्यभावेन गृहाग्निः प्रज्वलेत् कथम्।।१७।।

दलं न विद्यते यस्य तस्य किञ्चिद् भवेन्न हि।
दलं तु विद्यते यस्य तस्य सर्वं भवेदिह।।१८।।

दलात् प्रधानमन्त्रित्वमत्र तिष्ठति सर्वदा।
अदलाद्धान्यमन्त्रित्वं नाप्नुवन्ति कृषीबलाः।।१९।।

राजनीतिर्दलापेक्षा धर्मनीतिर्दलात्मिका।
सत्यनीतिर्दलाधारा न काप्यऽस्तीह निर्दला।।२०।।

जनता निर्दलाऽस्तीह दीनता चापि निर्दला।
बुभुक्षा निर्दलाऽस्तीह सुरक्षा चापि निर्दला।।२१।।

दलहीनः कथं तिष्ठेद् दलहीनश्चलेत् कथम्।
दलहीनश्च किं कुर्यात् दलहीनो न जीवति।।२२।।

निर्दलेन कुतः सख्यं निर्दलस्य कुतो धनम्।
को विश्वासो निर्दलेन निर्दलस्य कुतो बलम्।।२३।।

बुद्धिहीना बुद्धिमन्तः सदलाश्चेदिह स्थिताः।
बुद्धिमन्तो बुद्धिहीना निर्दलाश्चेदिह स्थिताः।।२४।।

भुञ्जते काञ्चने पात्रे सदलाः कुक्कुरा अपि।
मृग्यन्ते पर्णपात्राणि सतां भोजनहेतवे।।२५।।

उदेति निर्दलः सूर्यो जलं वहति निर्दलम्।
सूर्यस्तापं जलं शीतमर्पयेते निरन्तरम्।।२६।।

आकाशं निर्दलञ्चास्ति वायुर्वातीह निर्दलः।
अवकाशं च प्रश्वासमुभौ दत्तो निरन्तरम्।।२७।।

सदलः सर्वकारोऽयं सुरक्षां दातुमक्षमः।
निर्दला जनता दीना कथं जीवतु साऽक्षमा।।२८।।

सदलैर्लिखिताऽऽलाप: काव्यं भवति सुन्दरम्।
कथङ्कारं भवेत् काव्यं निर्दलस्य मनोरमम्।।२९।।

इह मानाधिकं सर्वं प्राप्नोति दलमाश्रित:।
अवमानं हि लभते सज्जनो यदि निर्दल:।।३०।।

दलयुता मनुजा अदला अपि
सरसना मुखत: कथयन्ति किम्।
प्रलपनं कथनं बहुजल्पनं
समुचितं कति वा कति नोचितम्?।।३१।।

**

## ३. वाग्वैभवम्

त्वां प्राप्यारुन्धतीं देवीं नमो वाकमुपास्महे।
त्वत्सहायान्मनुष्याणां मनोभावमुपास्महे।।१।।

सर्वशक्तिस्वरूपासि रसने! सरसे! प्रिये!।
मानुषास्त्वामवाप्यैव मनोभावं वदन्त्यथ।।२।।

कृतार्था: स्मो वयं त्वत्र धन्या त्वमिति निश्चयात्।
धन्यवादानर्पयामस्तुभ्यं वचनगौरवात्।।३।।

मानुषो भूमिमापन्नो जन्मकालाद् विरौत्यथ।
स्तनं धापयते माता मा रोदीरिति वक्ति च।।४।।

बुभुक्षायां तथा जाड्ये रौति ते कृपयाऽर्भक:।
ततो माता पाययति वस्त्रेण परिवेष्टते।।५।।

वत्सोऽपि स्वसुखं दु:खं मातरं वक्ति जिह्वया।
तदेव श्रुत्वा तं माता चाभिनन्दति वत्सला।।६।।

मानुषा जातमात्रेण पशुतुल्या भवन्त्यहो!।
विशिष्टा रसना तेषां मनोभावाऽभिव्यक्तये।।७।।

रसने! सरसे! धन्या त्वमेवासि नृजन्मनि।
कलावपि सरस्वत्यास्त्वयि वासो नृणां मुखे।।८।।

पिता पुत्रं शिक्षयति धार्मिकं वाऽथ नैतिकम्।
विषयं त्वत्सहायेन नाऽन्यथा वक्तुमर्हति।।९।।

मर्यादां रक्षयन्तस्ते विद्वांसः सन्ति मानवाः।
साधवः शिक्षिताः सन्तो भवन्तीह धनाधिपाः।।१०।।

तादृक्षाः सुखिनस्त्वां च मधुमिष्टान्नभोजनम्।
पूर्वमास्वादयन्तस्त्वामुदरं पूरयन्ति स्वम्।।११।।

ये जनास्तव मर्यादामकृत्वा गालिदायिनः।
सन्ति ते दुःखिनः क्षुद्रा दरिद्रा जन्मजन्मनि।।१२।।

वत्सलाऽपि भवेन्माता तस्मै गालिं ददाति चेत्।
स वत्सोऽपि सदाऽन्येभ्यो राति तां गालिपण्डितः।।१३।।

कथं जानन्ति ते धर्मं धर्म्यं वा नैतिकं हितम्।
विषयं बालकेभ्योऽपि गालिमेव दिशन्त्यहो!।।१४।।

ततस्तदर्भकास्तेभ्यो गालिमेव गृणन्ति किम्।
तज्ज्ञात्वा ते परेभ्योऽपि गालिमेवोद्‌गिरन्ति किम्।।१५।।

ते सदैव दुरुक्तिभ्यो दुःखिनोऽत्र भवन्त्यपि।
चूषयन्ति कथं ते त्वां मधुमिष्टान्नभोजनम्।।१६।।

कथं कदा कुतस्तेषां रसना स्नाति सर्पिषा।
तेषां दुरुक्तिपङ्केन रसनाऽस्तीह पङ्किला।।१७।।

अकुर्वन्तोऽपि ते गालिमसत्यं वाऽप्रियं छलम्।
प्रकुर्वन्ति परेभ्यस्ते गालिपङ्केन पङ्किलाः।।१८।।

धनिनोऽपि दुरात्मानो वञ्चकाः परपीडकाः।
धूर्ता विटाः शठास्ते हि शिष्टान् खेटन्ति हन्ति च।।१९।।

रसने! तव सम्मानमकृत्वा मद्यपायिनः।
सर्पिर्विहाय सुरया भवतीं स्नापयन्ति हा!।।२०।।

सुरापिनः सुरां पीत्वा परान् गालीः प्रकुर्वते।
न विद्या तन्मुखे नित्यं गालीर्वर्वर्ति सन्ततम्।।२१।।

ये परेषां गुणानेव नित्यं शंसन्ति साधवः।
ते परैरपि शंस्यन्ते ह्यरुन्धत्या विचार्यते।।२२।।

विद्याऽविद्ये उभौ ज्ञात्वा व्याहारं व्याहरन्ति चेत्।
विद्यया विनयोत्पत्तिः साधूनां सर्वदा भवेत्।।२३।।

अविद्ययाऽऽवृता लोका गालिमात्रं प्रकुर्वते।
न तेषां विनयोत्पत्तिर्गालिरेव मुखे वसेत्।।२४।।

किन्नरास्त्वां नृजिह्वायां वर्तमानामरुन्धतीम्।
सुरया स्नापयन्त्यर्थं वयमत्यन्तदुःखिनः।।२५।।

कारागारायितेऽसि त्वं कठिनैर्दन्तपङ्क्तिभिः।
कृपया तेऽस्ति मानुष्यमस्माकं त्वां जुषामहे।।२६।।

यदि मिलति ममेष्टं स्वादु मिष्टान्नराशिं
वचनरचनमेकं स्वर्पये तुभ्यमेव।
त्वमपि मम सहायं कुर्वती नित्यमेव
परजनपरिवादान्निर्विशेषं करोतु।।२७।।

❊❊

## ४. अरुन्धतीसंस्तवः

नरास्ते वाऽनराः किं वा नराकारा हि केवलम्।
परिच्छेदकरी तेषां त्वमरुन्धति! केवलम्।।१।।

अरुन्धत्याः सहायेन भाषन्ते मानुषा इह।
भोजने सक्रिया जिह्वा पशूनामपि दृश्यते।।२।।

जिह्वामात्रेण वाक्यानि नोच्चार्यन्ते कदाचन।
केवलं जिह्वया वक्तुं पशवः शक्नुवन्ति नो।।३।।

नृजिह्वायामरुन्धत्या वासोऽस्तीति विचार्यताम्।
विना तस्याः सहायात् को वक्तुं शक्नोति मानुषः।।४।।

आदृत्यायै नृजिह्वायै मद्यमांसप्रदायकाः।
पयोघृतैः पूजनीयां तां न जानन्ति किन्नराः।।५।।

देवीभागवते प्रोक्तस्तेषां दण्डो मिलत्यहो!।
अरुन्धती निःसरति दुष्कृतानां मुखादिह।।६।।

किन्नराः किन्नरैस्तुल्या गण्यन्ते दैवतैरपि।
सङ्गीतमधुरैर्गीतै रसने! त्वत्कृतैरिह।।७।।

नराणां कीदृशी बुद्धिरस्ति वा नास्ति वा कुतः।
जायते सुष्ठु वाऽसुष्ठु त्वत्सहायेन निश्चितम्।।८।।

हृदयान्तःस्थितो भावः साधु वा स्यादसाधु वा।
गृहे समाजे संसारे प्रकटीक्रियते त्वया।।९।।

त्वयैवोच्चारितं वाक्यं श्रुत्वार्थो ज्ञायते ततः।
पश्चाद् बुद्ध्या विवेकेन सदसद् वा विविच्यते।।१०।।

अतस्त्वमसि कल्याणि! शुभा मङ्गलकारिणी।
रसज्ञे! सुमुखी भूत्वा सुमुखं कुरु मां सदा।।११।।

रसज्ञे! सूनृतां वाचं मह्यं देहि प्रिये! सदा।
घृतस्नातां करोमि त्वां मा देहि रुशतीं वचः।।१२।।

घृतेन सिस्नासिस चेत् सुमुखं कुरु मामपि।
दुर्मुखो न कदाचित् त्वां घृतेन स्नापयिष्यति।।१३।।

अनुद्वेगकरी वाणी प्रिया सत्या हिता मम।
शास्त्रीया विमला प्रौढा भूयादिति समर्थये।।१४।।

निरर्थां रुशतीं वाणीं प्रलापं परिदेवनम्।
विहाय सार्थकां वाणीं त्वमरुन्धति! देहि मे।।१५।।

'सर्वेन्द्रियाणां नयनं प्रधानं' कथ्यते बुधैः।
विदुषां रसना मुख्यमङ्गमस्तीति मे मतम्।।१६।।

शास्त्रीयां को वदेद् वाणीं मानुषो रसनां विना।
यमान् वा नियमान् नोक्त्वा कथं लोकस्थितिर्भवेत्।।१७।।

'अप्राप्तप्रापणं योगः क्षेमो लब्धस्य रक्षणम्'।
विना रसनया कस्य योगक्षेमः कुतो भवेत्।।१८।।

शासनेऽधिकृतो राजा मन्त्री वा सचिवोऽथवा।
अरुन्धतीं विना सर्वेऽज्ञानिनो जनता अपि।।१९।।

अरुन्धत्याः सहायाद्धि नेतारः सदला अपि।
भाषन्ते बहुशः किन्तु मर्यादां कुर्वते न ते।।२०।।

ततस्ते त्वरितं तुभ्यं मद्यमांसादिना भृशम्।
स्नापयन्ति कथं तेषां सहायं कुरुषे सदा।।२१।।

अतोऽस्माभिः समादृत्याऽरुन्धती मुखवासिनी।
तस्या वासेन सर्वेषां नरत्वमिह सार्थकम्।।२२।।

अरुन्धति! त्वां समवाप्य लोके
ते मानुषा धन्यतमा भवन्ति।
ये त्वद्गुणज्ञानविवेकशीलाः
स्वनामबुद्धिं प्रथयन्ति नित्यम्।।२३।।

**

# जगज्जननीवैभवम्

(काव्यम्)

# ‘जगज्जननीवैभव’ काव्य : एक समीक्षा

**– जयराज आचार्य**

संस्कृतको अध्ययन-अध्यापनमा तीव्र ह्रास आइरहेको समयमा यो खुसीको कुरा हो कि नेपालमा अझै संस्कृत भाषा जान्ने, पढ्ने र कविता लेख्न सक्ने डा. लक्ष्मीकान्त पन्थीजस्ता केही विद्वान् छन्।

दक्षिण एसियामा बसोबास गर्ने लगभग डेढ अर्ब जनताको जीवनमा संस्कृत भाषाले धेरै गहिरो प्रभाव पारेको छ, किनकि यस क्षेत्रमा हजारौँ वर्षअघिदेखि बसोबास गर्दै आएका मानिसहरूले ज्ञानविज्ञान, धर्मसंस्कृति, दर्शन, राजनीति-कूटनीति, साहित्य-कला, आयुर्वेद-गणित, भाषा-व्याकरण र जीवनका हरेक क्षेत्रमा सँगालेको अनुभव यसै भाषामा लेखेर छाडेका छन्। युरोपमा ल्याटिन र ग्रिक भाषाको जस्तै दक्षिण एसियामा संस्कृतको महत्त्व छ– सायद त्योभन्दा पनि बढी। एक अर्ब हिन्दूहरूको जीवनका जन्मदेखि मरणसम्मका धार्मिक कृत्यहरू संस्कृत भाषामा गरिन्छन्।

संस्कृत भाषामा लेखिएका प्राचीन कविता, कथा, पुराणलगायत साहित्य नेपाल र भारतमा मात्र होइन; चीन, जापान र अन्य एसियाली मुलुकमा र युरोप-अमेरिकामा आज पनि पढिन्छन्-पढाइन्छन्। त्यति मात्र होइन, नेपाल र भारतमा त यस भाषामा नयाँनयाँ काव्यकृतिहरू पनि लेखिन्छन्।

मलाई धेरै वर्षअघि डा. लक्ष्मीकान्त पन्थीले आफ्ना पिताजी भीमकान्त पन्थीले लेख्नुभएका दुई कृति जगदम्बिकावैभवम् र जगदीश्वरवैभवम् दिनुभएको थियो। कालिदास, भारवि, माघ आदि महाकविकै कृतिहरूको शैलीमा लेखिएका ती महाकाव्यहरू पढ्दा पं. भीमकान्त पन्थीको विद्वत्ता र कवित्वदेखि म धेरै प्रभावित भएको थिएँ।

आफ्ना पिता कवि पं. भीमकान्त पन्थीद्वारा विरचित जगदम्बिकावैभवम् तथा जगदीश्वरवैभवम् नामक महाकाव्य पढेका र बुझेका कवि लक्ष्मीकान्त पन्थीको काव्यधारा पनि त्यसै गरी वैभवी परम्परामा अघि बढेको देखिन्छ। त्यसैले उहाँको काव्यको नाम पनि जगज्जननीवैभवम् रहन गएको छ।

अब प्रश्न उठ्छ– जगज्जननीवैभवम् काव्यमा के छ? कसरी यहाँ जननीको वैभव कायम गरिएको छ? कवि लक्ष्मीकान्त पन्थीले यस काव्यको प्रारम्भमा नै सङ्केत गरेका छन् कि यो सम्पूर्ण ब्रह्माण्डको सृष्टिप्रक्रिया नै सबैभन्दा पहिले जगज्जननीबाट निर्देशित भएको हो र उनकै सक्रियताबाट अघि बढेको हो। ब्रह्मा, विष्णु र महेशलाई नै महाकालीले सृष्टि गरेर उनीहरूलाई सृष्टि, स्थिति र प्रलयका लागि निर्देशित गरेकी हुन्। फेरि उनीहरूका लागि अर्धाङ्गिनीको स्वरूपमा पनि महाकालीकै अंशांशबाट सिर्जित भएकी हुन्। आफू स्वयम् महाकालरूप शिवलाई साथ दिने छु भनेकीले उनैले दक्षपुत्री भएर सतीका रूपमा जन्म लिइन् र कैलासवासी शिवकी अर्धाङ्गिनी बन्न पुगिन्। त्यसपछि कालान्तरमा उनले कैलासबाट आफ्नो माइती घरमा जाने इच्छा बताइन्। त्यस अवसरमा 'लौ, तिमीसित म पनि जान्छु' भनी शिवले भने। दुवै जना नेपाल देश र भारत देशका विभिन्न तीर्थहरू घुम्दै, हेर्दै र त्यहाँत्यहाँको वैभवलाई विचार गर्दै हरिद्वार-कनखल पुगे जहाँ दक्ष प्रजापतिको घर थियो। त्यहाँको वातावरणलाई पनि सतीले भरसक अनुकूल बनाउन खोजिन्। परन्तु त्यस्तो नभएको हुँदा सतीलाई साथै लिएर शिवजी आफ्नो साँढेमा चढी कैलासमा फर्किए।

केही समयपछि दक्ष प्रजापतिद्वारा यज्ञ गर्ने विचार भएको र त्यस यज्ञमा केकसो हुने होला भनी सतीले शिवको अगाडि आशङ्का गर्दा शिवले पनि उनलाई 'जे हुनुपर्ने छ त्यो नभई छाड्दैन, हुने हुनामीलाई कसैले टारेर टर्दैन, तिमी चिन्ता नलेऊ' भनी आश्वासन दिएका भए पनि त्यसपछि दक्ष प्रजापतिद्वारा गरिएको यज्ञमा नहुनुपर्ने घटनाले गर्दा उनले आफ्नो शरीरलाई दुई भाग लगाएर छाया सतीले योगाग्निद्वारा आफ्नो देहलाई दहन गराएको घटना गराइन्। हंसरूपा सती फेरि हिमालयकी पुत्रीका रूपमा जन्म लिएर पुनः शिवलाई पतिका रूपमा प्राप्त गर्ने मनोभाव व्यक्त गरिन्। यो सबै कुरा सुनेपछि हिमालयकी पत्नी हिमानीले पनि उनलाई पुत्रीका रूपमा पुनर्जन्म दिने वचनबद्धता व्यक्त गरेकी हुनाले उनी सम्पूर्ण प्रकृतिका साथ प्रसन्न भएर पुनर्जन्म लिएर पनि शिवकी पत्नी हुन पाउने विषयमा खुसी भइन्। यता महिमामयी भगवतीलाई पुत्रीका रूपमा जन्म दिन पाउने भएका हिमालय र उनकी पत्नी हिमानी पनि खूब खुसी भए। त्यसपछि यथासमयमा हिमानी गर्भवती हुन्छिन्। समय पुगेपछि बालिकाको जन्म हुन्छ। त्यो बेला सम्पूर्ण प्रकृति नै राम्रो देखिन्छ। छ वटै ऋतुहरू त्यहाँ उपस्थित हुन्छन्। यस्तैमा तुरुन्तै त्यहाँ आइपुगेका नारद ऋषिले त्यहाँ जन्म लिएकी बालिकाको जन्मसमय सोधेर त्यसका आधारमा जन्मकुण्डली बनाउँछन् र बालिकाको भविष्य कस्तो हुने छ भन्ने फलादेश गर्छन्। यी सबै नारदका कुरा

सुनेपछि हिमालय र हिमानी दुवै अति खुसी हुन्छन्। यता फेरि नारद ऋषि स्वर्गमा पुग्छन् र इन्द्र आदि सबै देवताहरूका अगाडि गौरीशङ्कर पर्वतमा पार्वतीको जन्म भएको समाचार सुनाउँछन्। त्यो सुनेर खुसी भएका देवताहरू त्यहाँ आउँछन् र हिमालयलाई बधाई दिन्छन्। साथै बालिकाको भविष्य बताउँदै उनको स्तुति गरेर फर्किन्छन्।

जगज्जननीवैभवम् काव्यको कथा यत्तिमा टुङ्गिन्छ। यसरी सतीदेवीको अवसानपछि पुनर्जन्म भएर भगवती पार्वतीको उदय हुनुरूप फलप्राप्ति नै यस काव्यको वैभव हो। त्यसैले जगज्जननीवैभवम् काव्यको नाम यसमा सार्थक बनेको छ।

यसरी हिन्दूहरूको पौराणिक कथालाई नै अनुसरण गरेर कवि लक्ष्मीकान्त पन्थीले यो जगज्जननीवैभवम् काव्य लेख्नुभएको छ। यसमा नेपाल र हिमालयको विशेष धार्मिक महत्त्व प्रकट भएको छ। स्कन्द पुराणको हिमवत्खण्ड, अम्बिकाखण्ड, नेपालमाहात्म्य, पशुपतिमाहात्म्य आदि पुराणहरूको परम्परामा यो एक नयाँ कडीका रूपमा थपिएको छ। साथै धार्मिक र सांस्कृतिक दृष्टिले नेपाल र भारतको सम्बन्ध धेरै नगिच रहेको कुरा पनि यस कृतिले झल्काएको छ।

लक्ष्मीकान्त पन्थीको यस कृतिमा जगज्जननी शक्तिको वैभववर्णन छ। दुर्गासप्तशतीमा रहेका स्तुतिहरूको शैलीमा लेखिएका पद्यहरू यहाँ देखिन्छन्। तिनै शक्तिबाट सृष्टि, स्थिति र प्रलयका कारक ब्रह्मा, विष्णु र महेशले आआफ्नो काम गरेका हुन् भन्ने बताइएको छ। यस विषयमा ठूलो दार्शनिक र वैज्ञानिक प्रश्न जोडिएको छ जुन मजस्ता सामान्य मानिसको ज्ञान र बुद्धिभन्दा पर छ।

आधुनिक विज्ञानले ब्रह्माण्डको सृष्टि एउटा ठूलो विस्फोटबाट भएको हो भन्छ। त्यो विस्फोट गराउने शक्तिलाई नै जगज्जननी भनिएको त होइन? सायद तिनै शक्तिको स्तुति गरेर शङ्कराचार्यले समेत आफ्नो सौन्दर्यलहरीमा लेख्नुभयो–

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि।
अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति।
तनीयांसं पांसुं तव चरणपङ्केरुहभवं
विरिञ्चिः सञ्चिन्वन् विरचयति लोकानविकलम्।
वहत्येनं शौरिः कथमपि सहस्रेण शिरसां
हरः सङ्क्षुभ्यैनं भजति भसितोद्धूलनविधिम्।

(भगवान् शिव पनि शक्तिले युक्त भएपछि मात्र आफ्नो काम गर्न सक्षम हुनुहुन्छ, नत्र त उहाँ हलचलसम्म पनि गर्न सक्नुहुन्न। अतः विष्णु, शिव, ब्रह्मा आदिले समेत आराधना गरिने तपाईंलाई पुण्य हासिल नगरेको मानिसले प्रणाम गर्न या स्तुति गर्न पनि कसरी सक्ला र? तपाईंका चरणकमलको एउटा सानो कण लिएर ब्रह्माले यी सारा लोकहरूको रचना गर्नुहुन्छ, विष्णुले आफ्ना हजारौँ शिरले यो संसार वहन गर्नुहुन्छ, शिवले त्यसलाई हुँडलेर त्यसको विभूति (खरानी) आफ्नो शरीरमा घस्नुहुन्छ।)

शङ्कराचार्यजस्ता अद्वैत वेदान्तीले यस्तो किन लेख्नुभयो? वेदान्तले त 'ब्रह्म सत्यं जगन्मिथ्या' भन्छ र परमात्मालाई अमूर्त र अनिर्वचनीय मान्छ र त्यसैलाई सृष्ट संसारको मूल मान्छ, होइन र? त्यो त न देवता हो, न असुर, न मानिस, न पशु, न स्त्री, न नपुंसक, न जन्तु, न गुण, न कर्म, न सत्, न असत्। सबै चिज होइन भनेर बाँकी जे रहन्छ त्यो त्यही हो।

स वै न देवासुरमर्त्यतिर्यङ्
न स्त्री न षण्ढो न पुमान् न जन्तुः।
नाऽयं गुणः कर्म न सन् न चासन्
निषेधशेषो जयतादशेषः।।... (श्रीमद्भागवत ८/३/२४)

तर कताकता सृष्टिको मूल कारकका रूपमा शक्ति (माया वा प्रकृति)-लाई मान्नुपर्ने आवश्यकता शङ्कराचार्यले पनि महसुस गर्नुभयो कि? यस्तै भावका पद्यहरू कवि लक्ष्मीकान्त पन्थीको यस कृतिमा पनि छन्। संसारको सृष्टि हुनुभन्दा अघिको अवस्थाबारे कवि पन्थीको विचारमा सृष्टिकर्त्री ब्रह्मस्वरूपा प्रकृति थिइन् जसलाई नित्य चिदानन्द रूपमा बुझ्नुपर्छ। उहाँ यस्तो लेख्नुहुन्छ–

पूर्वं यदेतत् सदसत्स्वरूपमासीदनर्कं शशितारहीनम्।
अनग्निकं रात्रिदिनैश्च हीनमदिङ्मुखं शून्यमिदं समस्तम्।।
न रूपमासीन्न च शब्द आसीद् रसो न गन्धश्च कुतः स्पृशत्वम्।
ब्रह्मस्वरूपा प्रकृतिः सदेका सैषा चिदानन्दवपुर्हि नित्या।। (१/११–१२)

कति राम्रो छ यो? कवि लक्ष्मीकान्त पन्थीका यी पद्यहरूले ऋग्वेद (१०/१२९)-को नासदीय सूक्तको स्मरण गराउँछन्–

नाऽसदासीन्नो सदासीत्तदानीं
नासीद्रजो नो व्योमा परो यत्।
किमावरीवः कुहकस्य शर्मन्
अम्भः किमासीद् गहनं गभीरम्?।।

न मृत्युरासीदमृतं न तर्हि
न रात्र्या अह्न आसीत् प्रकेतः।
आनीदवातं स्वधया तदेकं
तस्माद्धान्यन्न परः किञ्चनाऽऽस।।

जगज्जननीवैभवम् काव्यमा कवि लक्ष्मीकान्त पन्थीजीले उल्लेख गर्नुभएका राम्राराम्रा वर्णनहरू धेरै छन्। कम्तीमा एक ठाउँको उल्लेख नगरी मनले मानेको छैन। कैलास शिखरबाट नेपाल र भारतको यात्रा गर्न हिँडेका सतीदेवी र शिव दुवै जना नेपालको काठमाडौँ आइपुग्दा कस्तो देख्छन् त? हामी पनि हेरौँ–

अन्यां स्थलीं पश्य विराजमानां यां शैलमध्ये नगरायितां ताम्।
उपत्यकां यां प्रवदन्ति मर्त्याः स्वराजधानीमपि मञ्जुगर्तम्।।

श्लेष्मान्तकं चाऽपि वनं प्रसिद्धां नदीं च वाङ्मत्यभिधां प्रपश्य।
इहैव मन्मन्दिरमेकतोऽस्ति यदत्र चिह्नं मम पञ्चवक्त्रम्।।

मदीय पीठेषु च मन्दिरेषु ह्यन्यत्र ज्योतिर्मयलिङ्गकेषु।
न तेषु भक्ता मम पञ्चवक्त्रं शिरः प्रपश्यन्ति तदत्र दृश्यम्।।

भक्ता मदीयं मुखदर्शनार्थमायान्ति पश्यन्ति प्रपूजन्ति।
भुक्तिं च मुक्तिं च ददामि तेभ्यो पूर्णं करिष्येऽन्यमनोरथं च।।

(तृतीय सर्ग २१–२४)

(यतातिर अर्को ठाउँ हेरहेर, जहाँ पर्वतहरूको माझमा राम्रो सहर बसेको देखिन्छ। यसलाई त यहाँका मान्छेहरू आफ्नो राजधानी हो र पनि 'काठमाडौँ उपत्यका' भन्ने गर्छन्। त्यहाँ श्लेष्मान्तक वन छ, हेर त! त्यहीँ वाग्मती नदी बग्दै छिन्। हो, त्यहीँ मेरो पशुपति मन्दिर छ जहाँ मेरा पञ्चमुखहरू छन्। तिमीलाई थाहा छ? मेरा अन्य ज्योतिर्लिङ्गहरूमा कहीँ पनि भक्तहरूले मेरा शिरहरू हेर्न पाउँदैनन्। यहाँ त मेरा पाँचै मुखहरू देख्न सकिन्छ। यहाँ मेरा मुखहरूको दर्शन गर्न टाढाटाढाबाट भक्तहरू आउँछन्, दर्शन गर्छन् र पूजा गर्छन्। म तिनीहरूलाई भुक्ति र मुक्ति त दिन्छु नै, साथै अरू इच्छा पनि पूरा गर्छु।)

यस्तो राम्रो कृति लेखेर नेपाली समाजलाई गुन लगाउनुभएकोमा डा. पन्थीलाई म हार्दिक धन्यवाद दिन्छु र जोजो पाठकले संस्कृत बुझ्नुहुन्न उहाँहरूलाई पनि म अनुरोध गर्दै भन्छु कि संस्कृत जान्नेहरूसित यसको अर्थ सोधीसोधी बुझ्न कोसिस गर्नुहोस्। जीवन सार्थक हुने छ। नीतिशास्त्रमा भनिएको छ

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा।।

बुद्धिमान्हरूको समय काव्य र शास्त्र सुनेर त्यसमा रमाउँदै बित्छ। मूर्खहरूको समय चाहिँ सुतेर वा अरूसित झगडा गरेर बित्छ।

अन्त्यमा यस्तो राम्रो काव्य प्रकाशन हुन लागेकोमा खुसी प्रकट गर्दै यसका प्रकाशकलाई पनि म धन्यवाद दिन्छु। धन्यवाद...!

## पुरो वाचः

श्रीशं वन्दे कार्यसंसिद्धिहेतुं वाणीं वन्दे काव्यसंसिद्धिहेतुम्।
तातं वन्दे जन्मसाफल्यहेतुं वात्सल्यार्थं मातरं चापि वन्दे।।१।।

काव्यस्याहो! लक्षणं विज्ञवृन्दैरुक्तं सर्गास्तत्कथायां भवेयुः।
ते सर्गाश्चेदष्टसङ्ख्याधिकाः स्युस्तेषां बन्धः स्यान्महाकाव्यमेवम्।।२।।

धीरोदात्तो नायको नायिका वा सर्वैश्चिह्नैः संयुता तत्र भूयात्।
शान्तो दान्तो दानशीलोऽतिमान्यस्तच्चारित्र्यं सर्वलोकस्य मान्यम्।।३।।

रामादीनामस्ति रामायणादौ यच्चारित्र्यं सर्वलोकस्य मान्यम्।
भूयात्तद्वत् सर्वलोकानुकार्यं यस्मात् तस्मात् देवमायावतारात्।।४।।

महोच्चः सर्वशैलेषु महनीयो गुणाकरः।
स्वर्गमस्तकनामासौ गिरिराजो विराजते।।५।।

देवर्षयो निरातङ्का यत्र तिष्ठन्ति सर्वदा।
तत्सुता पार्वती मान्या या जगज्जननी स्मृता।।६।।

नायिकारूपमायाता चारित्र्येण समुज्ज्वला।
देवर्षयोऽपि काङ्क्षन्ते यत्कृपां मानुषादयः।।७।।

या शक्तिः सर्वशास्त्रेषु सर्वतन्त्रेषु गीयते।
ब्रह्मविष्णुशिवादीनां देवानां यक्षरक्षसाम्।।८।।

मनुष्याणां खगानां च पशूनामपि सर्वदा।
लतावृक्षौषधीनां च शक्तिरेषा सनातनी।।९।।

यया विरहिता देवा अपि कार्यक्षमा न हि।
शक्तिहीनः शिवोऽपि स्याच्छव एव निगद्यते।।१०।।

देवा इन्द्रादयो नित्यं प्रभवन्ति यदिच्छया।
सृष्टौ स्थितौ च संहारे तदिच्छाचलितं जगत्।।११।।

प्रातःसन्ध्यानदीशैला वर्णनीयाः प्रसङ्गतः।
ऋतूनां वर्णनं चापि महाकाव्ये पुरा कृतम्।।१२।।

खलानां दमनं कृत्वा सज्जनानां समुन्नतिः।
महाकाव्ये दर्शनीया यया लोकहितं भवेत्।।१३।।

यतः काव्यं हि यशसेऽर्थकृते मङ्गलाय च।
शिवेतरक्षतविधौ व्यवहारविदे भवेत्।।१४।।

सद्य आनन्दाय कान्तासम्मिता वागवाप्तये।
भवेदेवं विचारेण लेखनीयं ससूक्तिकम्।।१५।।

अजानता महाकाव्यं जगज्जननि! वैभवम्।
खण्डकाव्यं समारब्धं कृपया पूर्णतामियात्।।१६।।

समारब्धां रचयितुं दृष्ट्वा काव्यायितां कृतिम्।
वक्तारोऽनन्यकर्तारोऽवश्यं परिहसन्ति माम्।।१७।।

दक्षिणा ये परकृतौ दोषमार्गणकर्मसु।
नमस्कारं कर्तुमीहे तेभ्यः किमधिकं ददे।।१८।।

जननीवैभवं काव्यं लेखनार्थे समाप्तये।
आशीर्वाचो मिलेन्मातुरित्याशासे मुहुर्मुहुः।।१९।।

जननीवैभवं काव्यं रचितं यत् प्रभावतः।
तन्मातुश्चरणद्वन्द्वं भजामीह विशेषतः।।२०।।

* *

# उपक्रमः

के ते विष्णुर्विरञ्चिः शिव इति परमाह्लादिनी शक्तिरेका
कोऽसौ श्रीरामरूपः सकलजनमनोहारिणी शक्तिरेव।
कोऽयं श्रीकृष्णसञ्ज्ञः परमपदभवा शक्तिरेका भवानी
सृष्टिस्थित्यन्तकर्त्री सकलभुवनपाऽऽकाशपातालरूपा।।२१।।

व्याप्तं यस्याः प्रपञ्चं धरणितलभवैर्मानवैर्दानवैश्च
सिंहव्याघ्रादिरूपैः पशुकपिशकुनैः कीटभृङ्गैः पतङ्गैः।
आ शृङ्गादासमुद्रं प्रकृतिरनुपदैर्वल्लिभिः पादपैर्वा
यद्रूपं दृष्टमेभिस्तमिदिवसकरैस्तारकाचन्द्रसूर्यैः।।२२।।

या दुष्टान् चण्डमुण्डानसुरकुलभवान्रक्तबीजाननेकान्
हत्वाऽहङ्कारमूर्तानहमिति वदतः शुम्भरूपान् निशुम्भान्।
रक्षन्ती सज्जनान् या सुरथनृपसमान् वैश्यवर्यान् समाधीन्
साऽभीष्टान् पूरयित्वाऽवनितलचरतः पातु नित्यं स्वभक्तान्।।२३।।

ब्रह्मा विष्णू रुद्र एते त्रिदेवा यामाराध्य सृष्टिरक्षालयेषु।
संलग्नां यां योगिभिर्वन्दनीयां मायारूपां नौमि विश्वाम्बिकां ताम्।।२४।।

विश्वोत्पत्तौ हेतुभूतां पुराणीमाद्यां शक्तिं शास्त्रमार्गैकगम्याम्।
ध्येयां ज्ञेयां व्यापिनीं विश्वरूपां नत्वा ध्यात्वा साधये स्वेष्टकार्यम्।।२५।।

याऽरूपैषा सर्वदेवस्य शक्तिरूपाऽऽसीत् स्वं रूपमाप्तुं प्रतिष्ठाम्।
या विश्वात्मा सापि दक्षस्य पत्नीमम्बां कर्तुं जन्म लेभे प्रसूतिम्।।२६।।

यस्या लीलां नैव जानाति कोऽपि सैषा लक्ष्मीरूपिणी विष्णुपत्नी।
अंशांशेन ब्रह्मणोऽर्धाङ्गिनी या सावित्री सा सर्वशक्तिस्वरूपा।।२७।।

वागीशाद्याः सर्वकार्येषु नित्यं स्मृत्वा नत्वा यान्ति साफल्यमेनम्।
ध्यात्वा स्मृत्वा तं गजास्यं प्रणम्य लक्ष्मीकान्तो यातु साफल्यमत्र।।२८।।

सर्वे धन्याः सन्ति शिक्षामवाप्तास्तेषां धन्या विद्ययालङ्कृताश्च।
तेषां धन्यो लेखकः काव्यकर्ता मादृक्षः किं धन्यतामेतु बालः।।२९।।

कवय इह समस्ताः पूर्वजाः सन्ति धन्या
यदिह रचित एतैः काव्यलोकोऽपि धन्यः।
प्रपठनपदशीलाः पाठकास्तत्र धन्या
भवतु कथमधन्यस्तत्सृतिं चानुसर्ता।।३०।।

कविरपि स्वयमन्तःस्थं विहायोष्ठवर्णं
लिखति यदि समेषामग्रतो भाति तूर्णम्।
कपिरिव मनुजः स्यात् साधुसङ्गे कुशीलो
लिखति यदि स धन्योऽन्तःस्थवर्णं सुशीलः।।३१।।

* *

## प्रथमः सर्गः

नमामि शक्तिं जगदात्मरूपां नमामि शक्तिं जगदम्बिकां ताम्।
नमामि शक्तिं हि जगत्स्वरूपां शक्तिं नमस्यामि ममाऽऽत्मरूपाम्।।१।।

सर्वाधिकस्त्वं भगवाननन्त! सर्वाधिकस्त्वं हि विधातृजन्मन्!
सर्वाधिकस्त्वं शिवसृष्टिकर्त! त्वत्तोऽधिका शक्तिरहो! विशिष्टा।।२।।

सर्वाधिकस्त्वं खलु वामनोऽसि सर्वाधिको दाशरथिस्त्वमेव।
सर्वाधिकस्त्वं वसुदेवपुत्रस्त्वत्तोऽधिका शक्तिरिति प्रतिष्ठा।।३।।

सर्वाधिकः को भगवान् गणेशः सर्वाधिकः कः किमु कार्तिकेयः।
सर्वाधिको भास्कर एष सूर्यः सर्वाधिका शक्तिरहो! विशिष्टा।।४।।

सेयं सती सा शिवशक्तिरूपा माहेश्वरी शक्तिरिति प्रतिष्ठा।
सा ब्रह्मणः शक्तिरिति प्रसिद्धा ब्राह्मीति बोध्या हि विधातृशक्तिः।।५।।

सा वैष्णवी शक्तिरहो! विशिष्टा लक्ष्मी रमा श्रीः कमलास्वरूपा।
सीता स्वयं सैव हि रुक्मिणीति शची समेषां सकलात्मशक्तिः।।६।।

सैषा समेषां परमा हि शक्तिः सैषा समेषां परमार्थशक्तिः।
सैषा समेषां बलशक्तिरूपा सैषा समेषां धनशक्तिरूपा।।७।।

विद्यास्वरूपा सकलात्मशक्तिः सा ज्ञानरूपा दृढबोधशक्तिः।
ममत्वरूपाऽस्ति च दर्पशक्तिरहङ्कृता शक्तिरियं समेषाम्।।८।।

शक्तिः समायान्मम बोधरूपा शक्तिः समायान्मम तत्त्वरूपा।
शक्तिः समायातु परार्थरूपा शक्तिः समायातु ममात्मरूपा।।९।।

सर्वाग्रतः शक्तिरिति प्रतिष्ठा शक्तिप्रिया देवगणाश्च सर्वे।
शक्त्या विहीनाः प्रथमं हि ते तामुपासते शक्तिरहो! विचित्रम्।।१०।।

पूर्वं यदेतत् सदसत्स्वरूपमासीदनर्कं शशितारहीनम्।
अनग्निकं रात्रिदिनैश्च हीनमदिङ्मुखं शून्यमिदं समस्तम्।।११।।

न रूपमासीन्न च शब्द आसीद् रसो न गन्धश्च कुतः स्पृशत्वम्।
ब्रह्मस्वरूपा प्रकृतिः सदेका सैषा चिदानन्दवपुर्हि नित्या।।१२।।

रूपैर्विहीना बहुरूपमिष्टे दधे स्वरूपं प्रकृतिः पुराणी।
त्रैगुण्ययुक्तापि चतुर्भुजाऽऽसीत् सिंहाधिरूढापि दिगम्बराऽऽसीत्।।१३।।

रक्तेक्षणा प्रोन्नतविग्रहापि पीनस्तनी सैव विमुक्तकेशा।
सृष्टं सुरूपं पुरुषं पुराणं देव्याऽनया चेतनहीनमेकम्।।१४।।

सिसृक्षयाऽक्रम्य तमेव तस्मै गुणत्रयं चेतनतां ददौ सा।
त्रिदेवरूपं हि तदेवरूपं विष्णुर्विधाता शिवरूपमन्यत्।।१५।।

ततोऽपि सृष्टिं न विलोक्य देव्या द्विधा कृतास्ते पुरुषाः स्वशक्त्या।
जीवात्मरूपं हि पुमांसमेकं परात्मरूपं पररूपमन्यत्।।१६।।

ततस्त्रिधाऽऽत्मानमियं चकार माया च विद्या च परात्मरूपा।
स्वया हि मायात्मिकया तयैव त्रिलोकमेतद्धि विमोहितं च।।१७।।

तत्त्वात्मिका सा परमादिशक्तिर्यया परिस्पन्दमिदं त्रिलोकम्।
यस्याः प्रपञ्चं जगतः स्वरूपमित्येव बोधे विनिवर्तिका सा।।१८।।

विद्याऽभिधा यास्ति परा तृतीया सा पञ्चधात्मानमतो विभक्तम्।
राधा च दुर्गा च सरस्वती च लक्ष्मीश्च सावित्र्यपि सैव विद्या।।१९।।

उपासिता देवगणैर्हि शक्तिरग्रे समेषां प्रकटीबभूव।
मायात्मिकापीह तु शक्तिरूपा सृष्ट्यर्थमेकापि विभिन्नरूपा।।२०।।

विरञ्चिविष्णू उभयौ स्वशक्तिं सम्प्रार्थयन्तौ समुपास्यमानौ।
शक्त्याऽनया तौ सुतपोऽभिलग्नौ दृष्टौ तदिच्छां परिपूरयन्त्या।।२१।।

शिवोऽपि कालीं स्वयमागतां तां दृष्ट्वा समाकृष्ट इवाऽभवत् किम्।
गत्वा समक्षं समवाप्तुकाम अतोषयत् तां तपसाऽचिरेण।।२२।।

अतोऽवदत् सा प्रकृतिः पुराणी स्वेनैव सृष्टान् प्रथमाँस्त्रिदेवान्।
यूयं मया सृष्टिवितानकर्मकर्तुं हि सृष्टा इह तत्कुरुध्वम्।।२३।।

वरं ददौ साऽपि च जन्म लब्ध्वा शिवं स्वकीयं वरमर्थयन्ती।
इच्छन्तमेतां हि पुरा शिवाय वरो वरार्थं ह्यनया प्रदत्तः।।२४।।

ब्रह्मा सृजत्वनुदिनं सचराचरादीन्
विष्णुस्तु पालयतु तानिह सर्वलोकान्।
संहारकर्म जगतोऽपि ममाज्ञया हि
कुर्यात्तमोगुणमयो हि सदा शिवोऽपि।।२५।।

गङ्गा रमा सरसवत्यपि विष्णुपत्न्यः
सावित्र्यहं पुनरुपैमि विधातुरङ्गम्।
दुर्गास्वरूपमपरा शिवसन्निधौ स्यां
रामा विभूय भवतां निकटे भवित्री।।२६।।

एषाऽहमेव भवतां सृजने सहायं कुर्वे सदैव वनिता प्रसवे भवित्री।
शम्भुश्च मे पुरुषरूपमुपैतु नित्यमावां त्रिलोकपितरौ सृजने भवावः।।२७।।

कालीरूपार्धाङ्गमिष्टे त्वदीयं गौरीरूपं सम्भविष्यामि पश्चात्।
कालीं गौरीमन्यवर्णां ममैव जानीहि त्वं शक्तिरूपं समेषाम्।।२८।।

गौरोऽसि त्वं कृष्णवर्णोऽपि भूया अन्येऽपि स्युस्ते तवांशाः पुमांसः।
काली गौरी यादृशी तादृशी वा शक्तिस्तेऽहं मां विना कः शिवः स्यात्।।२९।।

नारीरूपं शक्तिरूपं समस्तं शक्त्या हीनः कः पुमान् कर्तुमीशः।
सृष्ट्यर्थं नौ द्वन्द्वमेकं विभूय ह्यन्यद्रूपं स्रष्टुमीशौ भवावः।।३०।।

तस्माद् गोत्रद्वन्द्वयोरेकवत्वे नारीपुंसोर्गोत्रमन्यद् भविष्णु।
गोत्रैकत्वे गोत्रमन्यन्नभूयादेतज्ज्ञानं सृष्टिकर्मार्थमिष्टम्।।३१।।

इत्युक्त्वा साऽन्तर्दधे शक्तिरूपा ब्रह्माद्यास्ते विस्मिता देवरूपाः।
सृष्ट्यर्थं ते यत्नशीला बभूवुः स्वं स्वं कार्यं यत्नतः शक्तितोऽपि।।३२।।

एकाऽऽसीदपि सा पुरा भगवती तद्रूपमाद्या पुनः
सर्गेच्छामपि कुर्वती बहुविधां त्वं रूपमेषाऽभवत्।
सा जीवात्मपरात्मनोर्बहुविधं रूपं गृहीत्वा पुनर्
दृष्टाऽदृष्टमिदं चराचरजगत् सर्वं जनित्री स्वयम्।।३३।।

❊ ❊

## द्वितीयः सर्गः

सृष्टिं स्थितिं पालनकर्म कर्तुं ब्रह्मा हरिः शम्भुरभूत् क्रमेण।
आदौ मरीचिप्रमुखान् समस्तान् ब्रह्मासृजत् तेऽपि च सर्जयन्तः।।१।।

मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुः प्रचेता भृगुरङ्गिरा च।
वसिष्ठ एतैः सह नारदोऽपि पुत्रा विधेर्मानससञ्ज्ञकास्ते।।२।।

ततः स्वदेहाच्छतरूपिकेति नारीं नरं तं मनुसञ्ज्ञकं च।
सृष्ट्वा हि तौ मैथुनतः पृथिव्यां सृष्ट्यर्थमाज्ञामददात् स्वरूपम्।।३।।

ततो हि दक्षप्रमुखान् प्रजापतीन् स्वायम्भुवं नाम मनुं शताकृतिम्।
सृष्ट्वा विधिस्तावपि सृष्टिकाम्यया नियोजयामास हि शक्तिराज्ञया।।४।।

कृतं पञ्चतत्त्वं क्षितिर्व्योमवायुर्जलं वह्निरित्येव धात्राऽऽत्मनैव।
ततो गन्धशब्दस्पृशत्वं रसाश्च तथा रूपकाणीन्द्रियाण्येतदर्थाः।।५।।

ब्रह्मा स्वयं दक्षमुखान् स्वपुत्रान् दृष्ट्वा तदर्थं विनियुक्तवाँस्ते।
पित्राज्ञया दक्षमुखाश्च सर्वे तां सृष्टितन्तुं हि वितेनुरत्र।।६।।

विधातुराज्ञां बहु मन्यमानो दक्षः पुरा तां सुतपो विधाय।
सुदीर्घकालं परितुष्टिमाप्तां मायां स्वपुत्रीभवितुं ययाचे।।७।।

माया परा सापि समुत्सुकेव समागता जन्म परं ग्रहीतुम्।
परन्तु दक्षस्य पुरः समेत्य प्रस्तावमेकं स्वयमेव प्रास्तौत्।।८।।

अहं पितस्ते तपसा सुतुष्टा लब्ध्वा जनिं त्वद् भविताऽस्मि पुत्री।
विनिन्दिता चेद् भवतो भविष्ये तदा त्यजिष्यामि गृहं तवाऽहम्।।९।।

दक्षस्तु वाक्यं प्रथमं हि श्रुत्वा प्रसन्नचित्तोऽभवदेकपक्षे।
वाक्यं द्वितीयं तु श्रुतं न तेन नतेन मूर्ध्ना तु नमश्चकार।।१०।।

दक्षस्य पुत्र्यो बहुशोऽभवँस्ताः सृष्ट्यर्थमेता ऋषये ददौ सः।
ब्रह्मा स्वयं दक्षसमीपमेत्य शिवाय देहीति सतीं ययाचे।।११।।

दक्षः पितुर्वाक्यमिदं गृहीत्वा ददामि कन्यां भवदाज्ञयाऽहम्।
ततो वसिष्ठं विधिना निमन्त्र्य वाग्दानमस्याः कृतवान् शिवाय।।१२।।

एवं प्रकारेण शिवः सतीं तामाहूय देवान् वरयातृरूपान्।
विवाहयज्ञोचितवह्निहोमं विधाय पाणिग्रहणं चकार।।१३।।

दक्षः सतीं शीलगुणैः सुवस्त्रैराच्छादितां भूषणभूषिताङ्गाम्।
समं प्रसूत्या विधिपूर्वकेण कन्यां प्रदायाऽर्पितवान् शिवाय।।१४।।

अनेन रूपेण शिवः स्वमायां ज्ञात्वैव भार्यां सविधिं चकार।
सती कनिष्ठा परमार्थरूपा विवाहिताऽऽसीत् परमेश्वरेण।।१५।।

समागतास्ते वरयातृरूपा देवाः समस्ताः शिवयोर्विवाहे।
वधूं शुभाशीर्वचनैः समेतां दाक्षायणीं कर्मसु दक्षिणां च।।१६।।

सञ्जातहर्षाः पुलकाञ्चितास्ते वधूं समासाद्य सुलक्षणां ताम्।
श्यामां नवोढां कमनीयरूपां कैलासमाप्ताः सहिताः शिवाभ्याम्।।१७।।

याता सती तैर्वरयात्रिभिश्च शिवं स्वकीयं वरमर्थयन्ती।
इदं तु वध्वा खलु भाग्यमस्ति वरस्वरूपेण शिवः समीतः।।१८।।

वपुर्विरूपाक्षमथेह दृष्ट्वा दिगम्बरं तस्य धनाभिकाङ्क्षाम्।
नैवाऽकरोत्तं विधिना प्रदत्तं वृक्षं लतेवाऽनुगता बभूव।।१९।।

शीलं कुलं रूपवपुर्वयोऽपि कुसङ्गतिस्तामितरत्र कुर्यात्।
तस्मात् कुसङ्गं प्रविहाय नारी प्राप्तं पतिं या भजते सती सा।।२०।।

या मानसेऽन्यं जनमादधाति प्राप्तं पतिं स्वं समुपेक्षते चेत्।
भवेत् कथं साऽत्र सती न सैषा सत्याः पतिश्चेत् शिवरूप एव।।२१।।

दृष्ट्वा वधूं तां नयनाभिरामां शिवद्वितीयां च सतीं रमेव।
कैलासमाप्ता गिरिराजराज्ञी स्नेहेन पुत्रीमिव काङ्क्षयन्ती।।२२।।

गत्वा समीपं स्वयमर्थयन्ती पुत्री भव त्वं मयि जन्म लब्ध्वा।
एवं विधां त्वामिह दर्शयन्ती वात्सल्यभावोल्लसितुं मनो मे।।२३।।

कुक्षिं मदीयां समुपैतु वत्से! मातृत्वमेवं सफलं मम स्यात्।
एवं विधां सर्वगुणैकशोभां त्वामङ्कमारोप्य पयो धयेऽहम्।।२४।।

श्रुत्वाऽभिलाषं गिरिराजराज्ञा माता जगत्याः करुणैकसिन्धुः।
स्वमातृकल्पां सहसैव मत्वा तामप्यवोचद् भवितास्मि पुत्री।।२५।।

शिवेन सार्धं विहरिष्यमाणा लीलाविहारं च प्रकुर्वती सा।
स्वमातृगेहे गमनाऽभिकाङ्क्षां निवेद्य लज्जाविनता बभूव।।२६।।

ओमित्युदीर्यैव शिवोऽप्यवोचत् प्रिये! प्रगच्छामि त्वयाऽहमद्य।
मात्रालयं ते नय मामपि त्वं गच्छाव सार्धं विहराव तत्र।।२७।।

❊ ❊

## तृतीयः सर्गः

शिवोऽधिगन्तुं श्वशुरालयं तं सधूमयानाधिकचण्डवेगम्।
धर्मावतारं वृषमारुरोह सत्या स्वपत्न्या सहितः प्रसन्नः।।१।।

इत्थं विनिश्चित्य सतीशिवौ तौ कैलासशैलादवरुह्य यातौ।
नेपालभालान् कनकायमानान् मार्गप्रदेशान् सुविलोकयन्तौ।।२।।

नेपालदेशस्य हिमालयो यः सैपालसञ्ज्ञो महिमालयोऽस्ति।
डोटीप्रदेशं ह्यधिरुह्य तिष्ठन्नुच्चस्थशैलेषु च गण्यमानः।।३।।

अन्योऽस्त्ययं खेचरशैलसञ्ज्ञः सेत्यञ्चलं येन विभूषितं हि।
अधित्यकायां च दरीगुहायां वनौषधौ चापि सुसिद्ध एषः।।४।।

योऽयं प्रदेशो यमलाभिधोऽस्ति सोऽयं प्रदेशः किल मुक्तिनाथः।
सुरम्यशैलो धवलो हिमालो नेपालभालायित एष मालः।।५।।

इमां पुरः पश्य कुतोऽस्ति दृष्टिः कृष्णां नदीं तां खलु मुक्तिदात्रीम्।
यस्या जलान्तर्हरिरेव साक्षात् शिलास्वरूपैर्वसतीह नित्यम्।।६।।

अमुं पुरः पश्य सति! प्रिये! त्वं स मत्स्यपुच्छाऽभिधशैलराजः।
पयोधरौ तौ किमु मत्स्यपुच्छौ शुक्लां नदीं पश्य पयःप्रवाहाम्।।७।।

पश्येह फेवासरसि त्वमद्य ह्यन्यो महामत्स्य इवास्य छायाम्।
मुहुर्मुहुः पश्य त्वमत्र चित्रं विचित्रमत्रास्ति च शैलचित्रम्।।८।।

स्थली सुरम्यास्ति च पोखराऽख्या पयोनदी यत्र वनौषधीश्च।
यस्मिन् सुवर्णानि फलानि सन्ति सुस्वाद्यतोयानि फलान्यमूनि।।९।।

नेपालस्यात्रैव दृश्यं मनोज्ञं यद् गण्डक्याः क्षेत्रमेतद् विशालम्।
सप्तस्रोतोभिर्युता गण्डकीयं सर्वा नद्यो देवघट्टे मिलन्ति।।१०।।

कृष्णा शुक्ला गण्डकी या त्रिशूली चान्या वृद्धा मादिमर्स्याङ्दिनाम्नी।
साऽन्या चेपेमिश्रिता या दराँदी सप्तस्रोता पश्य नारायणीं ताम्।।११।।

स्नानं नित्यं यत्र कुर्वन्ति देवा विष्णोः शम्भोः क्षेत्रमेतद् वदन्ति।
केचिद् देवाटं वदन्तीदमेव देवास्तत्राऽटन्ति यान्तीति बुध्वा।।१२।।

स्नात्वा विष्णुं ये स्मरन्तीह तेऽपि शम्भुं स्मृत्वा मुक्तिभाजो भवन्ति।
विष्णोः शम्भोर्भेदबुद्धिं न कुर्याद् धात्रा युक्ता स्मो वयं ह्येकरूपाः।।१३।।

योऽहं शम्भुर्विष्णुरूपेण वर्ते यद्वा विष्णुः शम्भुरूपं विधत्ते।
शम्भुर्विष्णुर्द्वावुभौ धातृरूपौ धाता विष्णुर्द्वावुभौ शम्भुरूपौ।।१४।।

धाता शम्भुस्तौ च विष्णुस्वरूपौ त्वं सर्वेषां शक्तिरेवासि धन्या।
भिन्ना भिन्ना तद्द्वयोः शक्तिरन्ये त्वद्रूपे ते सत्यमेतद् ब्रवीमि।।१५।।

लक्ष्मीर्वा स्यात् भारती वापि किं स्यात् सावित्री वा राधिका वापि कापि।
स्त्रीणां सर्वासां त्वमेकाऽऽदिशक्तिरूपासि त्वं पूरुषाणां च शक्तिः।।१६।।

इन्द्रस्यापि त्वं शचीरूपशक्तिः सूर्यस्य त्वं सुप्रभारूपशक्तिः।
ब्रूवे सत्यं सर्वशक्तिस्त्वमेका पक्षीणां वा त्वं पशूनां च शक्तिः।।१७।।

ये जानन्तः शक्तितत्त्वात्मिकां त्वां लोकास्ते वै त्वामुपास्यन्ति सर्वे।
तेषामिष्टा त्वं भवित्री सदैवाऽन्यज्ज्ञातारः शक्तिमन्तः कथं स्युः।।१८।।

देवाटमागत्य जना जलेऽस्मिन् स्नानं प्रकुर्वन्ति च तर्पयन्ति।
प्रीणन्ति तेषां पितरश्च तेभ्यो दत्वाऽऽशिषो मुक्तिपदं लभन्ते।।१९।।

लोकेऽमृतं मोक्षपदं ततो गवां पयोऽमृतं स्यादथ गण्डकीपयः।
इहाऽऽगतानां सुलभं पयोऽमृतं सुसेव्यते काव्यरसामृतं बुधैः।।२०।।

अन्यां स्थलीं पश्य विराजमानां यां शैलमध्ये नगरायितां ताम्।
उपत्यकां यां प्रवदन्ति मर्त्याः स्वराजधानीमपि मञ्जुगर्तम्।।२१।।

श्लेष्मान्तकं चापि वनं प्रसिद्धां नदीं च वाङ्मत्यभिधां प्रपश्य।
इहैव मन्मन्दिरमेकतोऽस्ति यदत्र चिह्नं मम पञ्चवक्त्रम्।।२२।।

मदीयपीठेषु च मन्दिरेषु ह्यन्यत्र ज्योतिर्मयलिङ्गकेषु।
न तेषु भक्ता मम पञ्चवक्त्रं शिरः प्रपश्यन्ति तदत्र दृश्यम्।।२३।।

भक्ता मदीयं मुखदर्शनार्थमायान्ति पश्यन्ति प्रपूजयन्ति।
भुक्तिं च मुक्तिं च ददामि तेभ्यो पूर्णं करिष्येऽन्यमनोरथं च।।२४।।

मम पशुपतिनाम्नी मूर्तिरेकाऽपि तत्र
विविधवदनरूपा राजते पञ्चधा सा।
सुकृतजनसुसेव्या पूर्वपुण्यैः सुलभ्या
अतुलमहिमयुक्ता साधुभिर्दर्शनीया।।२५।।

सद्योजातो वामदेवोऽप्यघोर-
स्तत्पूरुषश्चाऽन्य ईशानसञ्ज्ञः।
शब्दैरेतैर्नामभिर्भक्तिमद्भिः
पूज्या मूर्तिः पञ्चधाऽप्येकरूपा।।२६।।

वस्त्रश्रिया भाति शरीरमेकं दन्तश्रिया भाति मुखं हि सत्यम्।
मुखश्रिया भाति जनः समग्रं सम्भाषणं भाति वचःश्रियैव।।२७।।

अलिश्रिया भान्ति सुमानि पश्य सुमश्रिया भान्ति वनानि पश्य।
सद्मश्रिया भान्ति पुराणि पश्य शैलश्रिया कान्तिपुरी विभाति।।२८।।

नेपालदेशस्य हि राजधानी सैषा स्थली कान्तिपुरी प्रिया मे।
उपत्यकायां मम मन्दिरेण क्षेत्रं जनाः पाशुपतं वदन्ति।।२९।।

सा कौशिकी नाम नदी प्रसिद्धा यस्यान्तिकं पश्य ममास्ति पीठम्।
पिण्डेश्वरं नाम जना वदन्ति प्रसिद्धमेतच्च ममास्ति लिङ्गम्।।३०।।

अस्याः शिरोभाग इहास्ति पश्य स्थलीं सभापुष्करिणीं वदन्ति।
इन्द्रादिदेवाः सकलाः कदाचिदायान्ति गोष्ठीमपि कुर्वतेऽत्र।।३१।।

प्रपश्य पश्येह किमत्र चित्रं विचित्रमुच्चैः शिखरायमाणम्।
जानीहि स्वर्मस्तकशैलमेतं नेपालभालं महिमालयं च।।३२।।

प्रिये! त्वया सार्धमहं प्रसन्नः क्रीडाविहारे रतिकेलिकार्ये।
कृष्णस्वरूपोऽस्म्यधुना त्वमेवं गौर्यावयोर्द्वन्द्वमतीव रम्यम्।।३३।।

आवां युगं स्याव परे जनौ च ममैव पत्नी भव जन्म लब्ध्वा।
एवं प्रकारेण त्वया विहारमहं चिकीर्षुर्यदि रोचते ते।।३४।।

प्रिये! तवाग्रे कथनीयमेतन् मनो मदीयं त्विह साभिलाषम्।
प्रिये! तवेच्छा यदि तद् वदेयं नो चेत् तवेच्छा प्रवदे विना त्वाम्।।३५।।

मौनेन साऽपीह शिवस्य वाचः श्रुताऽवधाना स्मितपूर्वमेवम्।
हसन्त्यवोचच्च परे जनौ स्यात् काङ्क्षा ममाऽप्यस्ति भवान् सखा स्यात्।।३६।।

प्रिये! परे जन्मनि मेऽभिलाषं पुमान् भव त्वं तव कृष्णरूपम्।
तत्रैव मेऽप्यस्त्वधुना तवास्यपद्मं गृहीत्वा वनितास्वरूपम्।।३७।।

सत्या मुखं प्रेक्ष्य शिवेन मौनं सत्या धृतं सस्मितमेव मौनम्।
साकाङ्क्षमौनं हि शिवस्य दृष्ट्वा सत्या धृतं सोत्तरमत्र मौनम्।।३८।।

पत्या सह स्मेरमुखा सती च नेपालदेशं प्रविलोकयन्ती।
वार्तां शिवोक्तां श्रुतवत्यपूर्वां मौनेन तामुत्तरयाञ्चकार।।३९।।

तत: परिभ्रम्य सतीशिवौ तौ दक्षालयं गन्तुमुभौ प्रयातौ।
वाराणसीमेत्य विलोक्य गङ्गां गाङ्गं पय:स्नातुमथ प्रवृत्तौ।।४०।।

उत्तार्य वस्त्राणि शिवापि गङ्गां शिवं विना नैव गता कथञ्चित्।
विहाय व्याघ्राम्बरमत्र गाङ्गे गन्तुं जले लज्जितवान् शिवोऽपि।।४१।।

तौ दम्पती वीक्ष्य मुखं परस्परं यथा कथञ्चिद् विशतौ जलान्तरम्।
न लज्जितौ तौ तु परन्तु जाह्नवी लज्जाऽवनम्राऽऽशु पवित्रिताऽभूत्।।४२।।

मुखं विलोक्यैव शिवस्य तस्य गङ्गानिमग्नस्य जना अजानन्।
नीलोत्पलं फुल्लमहो! जलेऽस्मिन् तस्योपमेयं जगतीह नान्यत्।।४३।।

सतीमुखं ते सलिले विलोक्य लोका वन्दतो चकिता अभूवन्।
पद्मं प्रफुल्लं किमहो! विचित्रं ह्यनन्यपूर्वं वदनं तदाऽऽसीत्।।४४।।

तस्या मुखं गाङ्गजलोपमेयं तत्कुन्तलं किं यमुनाजलाभम्।
द्वे अक्षिणी ते भ्रमरायिते किं फुल्लारविन्दं किमहो! विचित्रम्।।४५।।

तत: शिवौ तौ बहिरागतौ द्वौ वस्त्रं समादाय स्वकं दधानौ।
सती स्वहस्तेन विशोधयन्ती स्वपाचितान्नानि ददौ शिवाय।।४६।।

एवं प्रकारेण सतीशिवौ तौ संलापपूर्वं प्रविलोकयन्तौ।
नेपालदेशे कियत: प्रदेशान् वाराणसीं वस्तुमुपागतौ च।।४५।।

वाराणस्यामन्नपूर्णासमेतो वासं चक्रे विश्वनाथ: प्रसन्न:।
भक्ता: सम्यग्दर्शनं प्राप्नुवन्ति पापं हित्वा मुक्तिभाजो भवन्ति।।४७।।

शान्ताय शान्त्यै च शिवाय तुभ्यं सते च सत्यै भवते भवत्यै।
नम: प्रकुर्वे विनयं प्रकुर्वे प्रसीदतां पालयतामुभौ माम्।।४८।।

❊❊

# चतुर्थः सर्गः

वाराणसीतोऽपि सतीशिवौ तौ प्राग्ज्योतिषाख्यं पुरमागतौ द्वौ।
नदोऽस्ति कैलाससमागतो यः स ब्रह्मपुत्राऽभिधतीर्थराजः।।१।।

सतीं च तं स्थूलनदं प्रदर्शयन् शिवोऽवदत्तं पुरुषस्वरूपम्।
नदीस्वरूपाऽसि सति! त्वमेव नदोऽयमत्राऽस्ति ममैवरूपः।।२।।

कैलासमूलेऽस्ति पतिर्नदीनां यदस्य स्रोतोऽस्ति च मानसं सरः।
एतादृशोऽन्योऽपि नदः प्रवर्तते दिशि प्रतीच्यामपि सिन्धुसञ्ज्ञकः।।३।।

नद्यो महानद्य इमौ समस्ता गत्वा समुद्रं प्रमिलन्ति तद्वत्।
यद्वत् त्वयाहं मिलितोऽस्मि शैल इमास्तथानन्दगतिं लभन्ते।।४।।

मूलं समुद्रस्य नदाविमौ स्तः गत्वा समुद्रं वसतः सदैव।
श्रीविष्णुरूपोऽस्ति समुद्र एष गङ्गादिनद्यः प्रमिलन्ति तत्र।।५।।

प्राग्ज्योतिषाद् दक्षिणदिग्गतौ तौ सतीशिवौ विष्णुपुरीं समुत्कौ।
स्नातुं समुद्रे विशतौ यदैव सिन्धुः स्वरूपेण पुरः समायात्।।६।।

सुस्वागतं वामहमत्र कुर्वे स्नात्वा भवन्तौ शुचिमागतोऽस्मि।
आयान्त्यहो! पापिजनाः सदैव समागतावद्य तु पुण्यमूर्ती।।७।।

अकिञ्चनस्यात्र न किञ्चिदस्ति तथापि माले तु समर्पये वाम्।
इत्युक्तवान् सागररूपविष्णुर्गलेऽर्पयन् मौक्तिमालिके द्वे।।८।।

शिवो जगन्नाथसमीपमेत्याऽवदद् भवान् सिन्धुतटे वसेच्चेत्।
भक्ता भवन्तं प्रविलोकयन्तो भक्तप्रसादं समवाप्नुवन्ति।।९।।

ततो जगन्नाथ इदं विचार्य लक्ष्मीसनाथोऽब्धितटं समायात्।
भक्ता महन्मदिरमेकमत्र विनिर्ममुस्तस्य निवासहेतोः।।१०।।

ततो जगन्नाथपुरीं समेताः समुद्रमाप्लाव्य सुतर्पयन्तः।
भक्ता जगन्नाथसुदर्शनान्ते भक्तप्रसादं समवाप्नुवन्ति।।११।।

मधुरइपुरमाप्तौ तौ शिवौ दम्पती द्वौ
भ्रमणरमणलग्नौ भारतं पर्यटन्तौ।
दिशि दिशि विहरन्तौ लोककल्याणहेतो-
र्यदिह भुवि वसन्तौ तीर्थरूपं स्थलन्तत्।।१२।।

मधुरइपुरमध्ये सुन्दरे मन्दिरे स्तो
निरतिशयसुरम्ये मण्डपे मध्यविन्दौ।
सकलजनमनांस्याऽऽकर्षयन्तौ शिवौ ता-
वतिशयकमनीयौ मूर्तिमन्तौ वसन्तौ।।१३।।

मधुरइपुरमाप्ता भक्तियुक्ता मनुष्याः
शिवसदनविशन्तो मन्दिरस्यान्तरङ्गे।
अभिलषितवरार्थं दर्शनं पूजनादि-
मनुदिनमिह कृत्वा वाञ्छितं प्राप्नुवन्ति।।१४।।

सतीशिवौ द्वौ प्रगतौ ततोऽपि ह्यवाग्भवं स्थानमुपैतुमिष्टम्।
लङ्काप्रदेशं निकषा स्थितं तं द्वीपं विहर्तुं समुपागतौ तौ।।१५।।

सिन्धौ विहारार्थमुपैतुमुत्कौ निवासमासादयितुं प्रवृत्तौ।
कियद्दिनानीह शिवोऽभिरेमे सत्या शिवेनेह सती च रेमे।।१६।।

❊ ❊

## पञ्चमः सर्गः

सतीशिवौ भारतवर्षतीर्थे कृत्वा विहारं क्रमशः समीतौ।
नेपालदेशादिकमार्गमेत्य समागतौ दक्षगृहे स्मितास्यौ।।१।।

सती हसन्ती प्रथमं स्वतातमग्रे समागत्य नमस्करोति।
शिवस्तु दक्षस्य मुखं विलोक्य तिष्ठँस्तदग्रे न च संविवेश।।२।।

दक्षः शिवं नैव नमस्करोति शिवोऽपि दक्षं न नमस्करोति।
वृद्धोऽपि मान्यं न नमस्करोति मान्योऽपि वृद्धं न नमस्करोति।।३।।

दक्षोऽतिकोपेन शिवं व्यलोकत् शिवोऽपि कोपाच्छ्वशुरं निरैक्षत्।
उभौ विलोक्याऽथ पतिं च तातं क्रुद्धा सती स्वं पितरं व्यलोकत्॥४॥

ततः प्रसूतिः समुपागता बहिः शिवं च पुत्रीं स्वपतिं प्रणम्य।
आहूय कक्षान्तरमानयन्ती संवासयन्ती च गृहान्तराले॥५॥

पुत्रीं च जामातरमप्यनेकवारं परिपृच्छति स्वास्थ्यवृत्तम्।
सर्वं परिज्ञाय जलं सुशीतं साऽपाययत् पृच्छति चान्यवृत्तम्॥६॥

ब्रूते सती मे पितरं किमद्य जातं स्वचैतन्यमहो! कुतोऽगात्।
नमस्करोति स्म कथं न मान्यं शिवं समेत्याऽप्यशिवं करोति॥७॥

एतावदुक्त्वा विरराम किञ्चिदूचे तदित्थं शिवमेत्य किञ्चित्।
अद्य त्रुटिर्मे पितुरेव मन्ये कृतागसं मे पितरं क्षमस्व॥८॥

रुष्टः शिवोऽपि श्वसुरालयात्तां सतीं समानीय गतो गृहं स्वम्।
आरुह्य तौ द्वौ वृषभं स्वकीयं कैलासमाप्तौ श्वशुरालयाद् वै॥९॥

सती च पत्या सह भासमाना चन्द्रेण सार्द्धं किल कौमुदीव।
रराज रम्या तनुमध्यमापि पीनोरुवक्षा मुखचन्द्ररूपा॥१०॥

श्रुतं मया मातृमुखाद् यदेतच्चिकीर्षुरस्तीह पिता मदीयः।
सत्यं वदामीह भवत्समक्षं मयोक्तमद्यैव स्वमातृगेहे॥११॥

शिवं विना कोऽपि कृतप्रयत्नो यज्ञं प्रकुर्वन् सफलः कथं स्यात्।
यज्ञो हरेः प्रीतिकरः कथं स्यात् शिवं विनाहूय समस्तदेवान्॥१२॥

दक्षोऽप्यदक्षोऽस्ति पिता मदीयो निन्दन् शिवं द्वेष्टि मखं करोति।
दाक्षायणी नाम धिगस्तु जन्म ममेदमन्यत्र शरीरमस्तु॥१३॥

शिवोऽब्रवीत् कर्तुमनाः करोतु यज्ञं पिता ते न विधेहि चिन्ताम्।
यद् भावितं तद् भवतीह नान्यन् न यद् भविष्यं तु न तत्कृतेऽपि॥१४॥

ततस्तु दक्षोऽपि च यज्ञकर्म कर्तुं समारब्ध इति श्रुतेन।
कैलासमागत्य हि नारदेन वार्ता कृतेत्थं च सतीमवादीत्॥१५॥

दक्षस्तु यज्ञं प्रकरोति मातः सर्वे कुटुम्बाश्च निमन्त्रिताः स्युः।
मात्रालयं त्वं न कथं प्रगच्छेर्निमन्त्रणापत्रमवश्यमायात्।।१६।।

अन्ये च देवा गतवन्त आसन् सर्वा भगिन्यः पतिभिः समेताः।
कथं कनिष्ठा दुहिता प्रिया त्वं यज्ञं न गत्वा गृहमेव तिष्ठेः।।१७।।

विबोधितोऽपीह दधीचिनाम्ना महर्षिणा किन्तु न बुद्ध एषः।
दक्षो हठेनैव शिवं विनापि यज्ञं समारब्धुमना बभूव।।१८।।

दक्षोऽवदद् रक्षक एष विष्णुर्यज्ञस्य मे कः प्रकरोति विघ्नम्।
कथं त्वमेतां वदसीह वार्तामुद्घाटितो मार्ग इतः प्रयाहि।।१९।।

अहं प्रगच्छामि परं त्वमेतज्जानीहि भद्रं न विलोक्यते ते।
शिवं विना नैव शिवं भविष्णुरलक्षणं स्यात् तव यज्ञमध्ये।।२०।।

दधीचिनोक्तं शृणु दक्ष मूढ! युद्धं त्वदर्थं न शिवेन विष्णुः।
करिष्यतीति त्वमपीह पश्य पश्यामि तेऽहं विपरीतबुद्धिम्।।२१।।

एतावदुक्त्वा प्रगतो दधीचिर्यज्ञस्थलात् तत्र न वस्तुमिष्टम्।
ततो गतास्ते च्यवनादयश्च दुर्वाससा गौतमवामदेवौ।।२२।।

ततोऽपि ये शिवतत्त्वं विदन्ति विनिर्ययुस्तेऽपि समे हि पश्चात्।
विचिन्त्य दक्षोऽपि हरेः समीपं गतः पुनर्यज्ञकृते किमेवम्।।२३।।

यज्ञस्वरूपोऽसि हरिस्त्वमेव यज्ञस्य गोप्ता स्वयमेव भूयाः।
दधीचिना यत् कथितं न भूयात् शिवस्य हेतोरशिवं न भूयात्।।२४।।

गतेषु तेष्वेव सविष्मयोऽभूत् शेषान् द्विजातीन् समुवाच दक्षः।
वसन्तु सर्वे प्रददामि वित्तं कुर्वन्तु यज्ञं द्विगुणं भवद्भ्यः।।२५।।

सती हिमान्या कथितां समर्थनां समस्मरत् सम्प्रति जन्म लब्धुम्।
दक्षं स्वयोक्तामपि पूर्ववाणीं समस्मरत् सम्प्रति जन्म हातुम्।।२६।।

अतस्तदर्थं मनसा स्वदेहं द्विधा कृतात्मानमिवास्य छाया।
पित्रालये तां गमनाय सद्यो निषेधयन्तं शिवमेवमूचे।।२७।।

प्रभो! भवन्तं किमहं ब्रुवेऽधुना स्त्रीजातिरेषा पितृगेहजाता।
आगत्य पुंसो गृहिणी भवामि मात्रालयञ्चापि न विस्मरामि।।२८।।

अतोऽधुना पितृगृहेऽस्ति यज्ञो श्रुतं सुरर्षेर्मुखतस्तवाग्रे।
निमन्त्रितौ तेन भवेव आवामायास्यतेऽवश्यमपीहपत्रम्।।२९।।

अतो भवान् मामनुमन्यतां भो! पित्रालये गन्तुमिह प्रवृत्ताम्।
नो चेदहं यामि पितुर्गृहेऽद्य सतीदमुक्त्वा प्रगतैकलापि।।३०।।

दक्षालये साऽधिगता द्रुतं हि शिवस्य भागोऽपि मखे न दृष्टः।
कोपेन चास्या वदनं मलीमसं दृष्टं जनैः साऽभवदेव काली।।३१।।

इत्थं विचारेण सती स्वदेहं दक्षस्य यज्ञस्य हुताशनान्ते।
स्वाहाऽकरोत्तं परजन्मकाङ्क्षं सस्मार चित्ते शिवमेकभावा।।३२।।

एतज्जघन्यं प्रियताविहीनं सन्देशमानीय शिवं प्रयातः।
स नारदो नेत्रजलैः समेत्य रुरोद दुःखेन कुरामवोचत्।।३३।।

श्रुत्वा शिवस्तत्र सुदुःखितोऽभूत् प्रध्वंसनार्थं स्वकवीरभद्रम्।
दक्षस्य यज्ञस्य पुरोहितानां चाऽऽज्ञापयामास प्रयाहि शीघ्रम्।।३४।।

स वीरभद्रः स्वगणैः समेत्य दक्षं च यज्ञं च पुरोहिताँश्च।
गात्राणि पात्राणि बभञ्ज तेषां तेषां य आसन् शिवनिन्दकाश्च।।३५।।

समाह्वयत् सोऽपि शिवं ततो हि प्रादर्शयत् तानिह भिन्नगात्रान्।
आनीय देहं स्वयमेव सत्याः प्रादात् शिवायैव शिवोऽग्रहीत् तम्।।३६।।

मनो मदीयं शिवमस्तु नित्यं लभे शिवं जन्म परं ममास्तु।
पिता मदीयोऽपि सगौरवोऽस्तु शिवप्रभावस्य स वेत्तु भावम्।।३७।।

जन्मस्थली पुण्यतमा ममाऽस्तु तदेव नामाऽस्तु ममेति भावा।
जगज्जनन्यापि स्वजन्म लब्धुं गवेषयन्त्या समयो निनीतः।।३८।।

दिस्युत्तरस्यामिह देवतात्मा प्रसिद्धनामा स हिमालयोऽस्ति।
उच्चैस्तमः स्वर्गशिरो गिरीन्द्रो नेपालभालो महिमालयोऽस्ति।।३९।।

देवर्षयः सिद्धगणाश्च सर्वे तपःप्रभावादिह सिद्धिकामाः।
वसन्ति तिष्ठन्ति जपन्ति मन्त्रं तपस्तपस्यन्ति शिवं स्मरन्ति।।४०।।

पिता मदीयः स हिमालयोऽस्तु मातापि मे सा महिमालयास्तु।
इत्थं विचारेण सती स्वजन्म लब्धुं हिमानीममिलत् सहर्षम्।।४१।।

प्रणम्य तां किञ्चिदवोचदेषा वक्तुं सलज्जापि च सस्मितास्या।
मातस्तवाग्रे कथनीयमस्ति क्षमस्व दुःखान्यपि चेत्सहस्व।।४२।।

कैलासभाले वसतिः शिवस्य पुण्यस्थली सा जगदीश्वरस्य।
प्राणेश्वरं तं समवाप्तुकामां मामीरयज्जन्म कुतो लभेय।।४३।।

हिमालयाङ्के वससीह मातस्त्वदङ्गतो वै बहुशो हि नद्यः।
नेपालदेशाधिकभागमाप्ताः सुनिर्मलाः सन्ति जनान् पुनन्ति।।४४।।

सा गण्डकी साऽपि च कौशिकीति कर्णालिसञ्ज्ञा च परा सुशीता।
तदन्तरं सन्ति च सप्त सप्त स्रोतोवहास्ताः परिपुष्टयन्त्यः।।४५।।

त्वत्तः कपोलात् पवनाश्चलन्ति नैपालकान् शीतलयन्ति सम्यक्।
यतो हि नेपालभवा मनुष्या नित्यं परैर्वाङ्मधुरा भवन्ति।।४६।।

सर्वोच्चरूपेण तव स्थितायां शैलान्तराः सन्ति समे हि खर्वाः।
यतो हि नेपालभवा मनुष्या अखर्वगर्वा न भवन्ति कैश्चित्।।४७।।

समस्थले वा विषमस्थले वा नैपालकास्ते निवसन्ति मातः।
यतः परैर्नो विषमा भवन्ति शान्ताः सुरूपा गुणशीलवन्तः।।४८।।

मातस्तवौदार्यगुणान् विदित्वा दाक्षिण्यदानानि दयादयाँस्ते।
पुत्री त्वदीया भवितुं ययाचे यदीच्छसि त्वं मम जन्म देहि।।४९।।

सती हिमानीमिदमर्थयन्ती जन्माऽपराप्तावनुरोधिनी सा।
स्थिता तदुत्सङ्गविनीतभावा गता न दूरं न समीपमाप।।५०।।

दिशः प्रसन्नाः सलिलं सुनिर्मलं स्वच्छं मनो मेऽत्र नभश्च पर्वताः।
मनः कथं स्यात् प्रकृतिस्वभावात् आश्चर्यमेतत् परिवर्तते हि।।५१।।

इति विदितविचारा तां महेशीं च बुद्ध्वा
हिमगिरिगृहिणी सा गर्भमाधातुमिष्टे।
तदनु च गिरिराजं वृत्तमेतन्निवेद्य
प्रमुदितमनसा तद् गर्भमाधत्त राज्ञी।।५२।।

❊ ❊

## षष्ठः सर्गः

अथैकदा गर्भदिनावसाने गौरीश्वरख्यापितपर्वतान्ते।
शुभग्रहैरुच्चगकीटलग्ने वैशाखमासे मुदिता हिमानी।।१।।

गौरीस्वरूपां हि सतीं स्वगर्भां पुत्रीं नवां तां सुषुवे भवानीम्।
या दक्षयज्ञे विससर्ज देहं सैवाऽभवत् पर्वतराजपुत्री।।२।।

प्राप्तो गेहे नारदस्तद्दिनान्ते गौरीशाख्ये पर्वताग्रे सुखेन।
ब्रूते– राजन्! अस्ति कश्चिद् विशेषस्तं मां सर्वं ख्याहि पूर्वं सहर्षः।।३।।

श्रुत्वा वाक्यं नारदात् स्वेष्टसिद्धिं धृत्वा चित्ते तन्महत्त्वं नगेशः।
एवं ब्रूते– बालिकाया भविष्यं श्रोतुं वाञ्छन् जन्मपत्रं फलं च।।४।।

मध्याऽऽकाशे भानुगे चैत्रशुक्ले पक्षेऽष्टम्यां गर्भवासाद् हिमान्याः।
भूमौ लब्धं जन्म देव्या भवान्या तस्याः खेटाः कीदृशः किं फलं स्यात्।।५।।

दृष्ट्वाऽऽकाशं किञ्चिदग्रे विचार्य धृत्वा हस्ते लेखनीं सोऽप्यवोचत्।
जन्मस्याङ्कं तत्फलं चेदमेव सर्वं रम्यं प्रोच्यते श्रूयतां तत्।।६।।

कीटो लग्नं तत्र चन्द्रो गुरुश्च तुर्ये मन्दः स्वोच्चगोऽभ्रे च भानुः।
जयास्थानं मङ्गलेनैवमुच्चं धर्मे शुक्रो रुद्रभावे बुधोऽस्ति।।७।।

अष्टमे स्वगृही राहुस्तस्या आयुष्करो भवेत्।
धनस्थानगतः केतुर्धनमस्यै न रोचते।।८।।

मानं प्रतिष्ठा वृद्धिः स्यात् सदा लोकहितार्थिनी।
गुणगौरववृद्ध्यर्थं लोकैराराध्यते हि सा।।९।।

लग्नं चन्द्रगृहस्थितं शुभकरं गौराङ्गिनी वल्लभा
वित्ताख्यं द्वितयं शुभं रविगृहं केतुस्थितं दृश्यते।
दृष्टं वित्तसुखं सदैव भविता तत्स्थानपात् स्वोच्चगात्
अस्या विक्रमपोऽस्ति लाभभवने सिंहाऽधिरूढा भवेत्।।१०।।

तुर्यस्थानपतिस्तदुच्चभवनात् पश्यन् गृहं सुन्दरं
भूयादेवमनन्यगेहसदृशं प्रोच्चस्थितं सर्वतः।
सम्मान्या भविता सदैव सकलैर्लोकैः सुपूज्या परं
तस्या गेहगतेन तेन शनिना जाड्यं भवेन्मातरम्।।११।।

पुत्रस्थानपतिस्तदुच्चभवनात् पुत्रो भवेद् विक्रमी
मान्यः सद्गुणवर्द्धकः सुनयनो नेता भवेद् विश्वजित्।
विद्या बुद्धिरपि ह्यनन्यसदृशी चाऽऽयाति संवर्द्धते
सैषाऽऽविष्कुरुते हि शास्त्रसकलं तन्त्रं च कल्याणकृत्।।१२।।

षष्ठस्थानपतिः स्वमुच्चभवनाच्छत्रुं निहन्ति द्रुतं
भ्राता दूरमुपागतो न हि सुखं दुःखं सपत्नाज्जनात्।
ये केऽपीह सपत्नभावभरिताँस्तान् ध्वंसयित्री स्वयं
ये केऽपीह सभक्तिभावभरितास्तेभ्यो वरं दायिनी।।१३।।

अस्याः सप्तमभावभूमितनयात् स्वोच्चात् पतिः शङ्करः
स्यादेवं सुखकारकः पतिरयं विद्वान् जगद् रक्षकः।
एवं मानधनं मिलेच्च बहुशो नीरोगतामाप्नुयात्
अस्या अष्टमगस्तमः स्वभवने दीर्घायुषं विन्दति।।१४।।

अस्या धर्मपतिः स्वतुङ्गभवनात् तत्रोच्चगाद् भार्गवाद्
विद्यामानधनादिकं बहु भवेद् धर्मे मतिर्वर्द्धते।
भक्तिः स्यादचला शिवेऽधिकतमा यद्यापि नारायणे
गार्हस्थ्यं च सुखं भवेत् समधिकं सर्वैः सुपूज्या सदा।।१५।।

पितृस्थानमुपागतेन रविणा भूयात् पिता विश्रुतः
तुङ्गस्थेन सुखान्विता धनवती रत्नाकरस्तत्पिता।
लाभस्थानपतिः स्वतुङ्गभवनात् सर्वाम्बिका स्वामिनी
लाभस्थेन बुधेन तत्पतिरहो! भूयाज्जगच्छङ्करः।।१६।।

इत्थं तस्या जन्मलग्नग्रहाणां स्थित्या रीत्या तत्फलं नारदोक्तम्।
श्रुत्वा तस्मै सादरं पर्वतेशो मिष्टान्नानि स्वर्पयन् मोदमाप।।१७।।

षडर्तवस्तत्र गिरौ समेता नाना विहङ्गा अपि कूजयन्तः।
पुष्पाणि फुल्लानि तदैकवारं प्रसीदतो द्वौ हिमवान् हिमानी।।१८।।

ते षट्पदास्तत्र समागताश्च रसं लिहन्तः कुसुमेषु तुष्टाः।
गुञ्जायमाना रसमादधाना शोभायमानास्तुहिने गिरौ च।।१९।।

इति स्थिते तत्र गिरौ स नारदः स्वर्गं गतः सत्वरमेव भूतलात्।
निरीक्षमाणं महतीं करस्थां नारायणं प्रोच्चरयँश्च नादयन्।।२०।।

इन्द्रादि देवान् सकलान् समेत्याऽवदत् समाचारमसौ ससम्भ्रमात्।
"न कोऽपि जानाति हिमाचलेऽद्य बालामपर्णां सुषुवे हिमानी।।२१।।

गतोऽहमासं हिमशैलकूटे तत्रैव गौरीश्वरसञ्ज्ञकेऽद्य।
दृष्टा च बाला ललिता स गौरा तदायतिं प्रोच्य समागतोऽहम्।।२२।।

जानीथ यूयं किमु? तत्र देवीं सतीं स्वपुत्रीं सुषुवे हिमानी।
विलम्बते सा किमु शङ्करस्य वामां सकामां न कथं भवित्री।।२३।।

श्रुत्वा वाक्यमिदं हि नारदमुखाद् हर्षेण देवाः समे
इन्द्राद्या विधिविष्णुदक्षसहिताः सर्वे समेत्याऽवदन्।
गौरीशङ्करपर्वते हिमगिरौ अद्यैव गच्छेम किम्?
लेभे जन्म सती परा भगवती भक्तिं प्रकुर्मो वयम्।।२४।।
(भक्तिं न कुर्मः कथम्?)

❊ ❊

## सप्तमः सर्गः

गौरीश्वरगिरौ तत्र सर्वे देवाः समागमन्।
ब्रह्माद्या विष्णुसहिताः सुरेन्द्रेण पुरःसराः।।१।।

सर्वे हिमालयस्याद्य सन्निधिं समुपस्थिताः।
सहर्षाः सस्मिता हृष्टा वर्धापनमिहाऽर्पयन्।।२।।

अद्यप्रभृति हे राजन्! महिमा वर्द्धयेत् तव।
सौन्दर्योऽनुपमो भूयात् विश्वमान्यो भविष्यसि।।३।।

त्वद्दर्शनार्थमायान्ति दूरस्था अपि पर्यटाः।
महिमानं प्रगायन्ति धन्या ते स्थितिरुन्नता।।४।।

तव स्थित्या हि नेपालदेशोऽपि महिमायते।
विश्वे समुन्नतोऽस्तीह शैलोऽयं स्वर्गमस्तकः।।५।।

सज्जनाः साधुशीलाश्च गुणवन्त उपासकाः।
नेपाले जन्म सिद्धिं च समिच्छन्तीह लम्भितुम्।।६।।

अधुना त्वद्गृहे राजन्! हिमान्याः कुक्षितः स्वयम्।
देवी भगवती जाता श्रीमत्सिंहासनेश्वरी।।७।।

तव भाग्योदयो जातस्तया साकं विनिश्चयः।
सैषा ते वल्लभा पुत्री पार्वती सम्भविष्यति।।८।।

कैलासे शङ्करस्यैव चार्धाङ्गी शङ्करी पुनः।
देवकार्यार्थसिद्ध्यर्थं सेनानीं जनयिष्यति।।९।।

निजारुणप्रभा तस्या लोकमुज्ज्वलयिष्यति।
क्रोधाकारान् चण्डमुण्डान् सैकला संहनिष्यति।।१०।।

भक्तानामभया सैव करुणावरुणालया।
सा शुद्धविद्या भविता द्विजानामुपकारिणी।।११।।

शिवमानन्दयन्ती सा लोकरक्षाकरी सदा।
कामपूरा भवेद् भक्त्या शङ्करप्राणवल्लभा।।१२।।

अस्या भक्तिं यः कुरुते तस्य लक्ष्मीः प्रसीदति।
देवी सरस्वती चापि तस्मै विद्यां प्रयच्छति।।१३।।

अर्धाङ्गिनी शङ्करस्य नेयं लक्ष्मीः सरस्वती।
शारदा शरदभ्राऽपि नास्याः स्थानमवाप्नुयात्।।१४।।

सैषा दशमहाविद्या दुर्गा च ललिता रमा।
सा वेदोपनिषद्रूपा सावित्री मन्त्ररूपिणी।।१५।।

चिन्तामणिस्वरूपा च तन्त्रयन्त्राकृतिः स्वयम्।
कामरूपास्ति कामाक्षी सर्वाभरणभूषिता।।१६।।

सर्वत्र महिलाः सर्वा अस्या अंशांशसम्भवाः।
यत्र सम्मानिता नार्यस्तत्र देवी प्रसीदति।।१७।।

भोगमोक्षप्रदा सैषा गिरिजा गिरिशप्रिया।
अन्नं वस्त्रं धनं धान्यं यशो विद्या बलप्रदा।।१८।।

यत्र देव्याः स्वरूपं स्यात् तत्राऽस्माकं मनो भवेत्।
यत्र देव्याः पदद्वन्द्वं तत्राऽस्माकं शिरो नमेत्।।१९।।

क्व विद्यते नवा बाला राजन्! दर्शय नोऽधुना।
तस्याः स्तुतिं नुतिं भक्तिं कुर्मो देवा वयं न किम्।।२०।।

तेषां तदुक्तिमाकर्ण्य पिता पुत्रीमदर्शयत्।
कोष्ठे हिमानीमपि ते देवा ब्रह्मादयः समे।।२१।।

अभूवन् विनताः सर्वे हिमानीं तत्सुतां प्रति।
तेऽब्रुवन्– हे हिमानि! त्वं सञ्जाता भाग्यशालिनी।।२२।।

देवि! त्वमद्य जाताऽपि त्वमजा व्यापिनी सदा।
एकाकाराऽधुनाऽपि त्वं विविधाऽऽकाररूपिणी।।२३।।

मूलप्रकृतिरूपा त्वं गङ्गा लक्ष्मीः सरस्वती।
त्वं राधा रुक्मिणी सीता ब्रह्माणीरूपधारिणी।।२४।।

सत्त्वंरजस्तमोरूपा त्वमेव त्रिगुणात्मिका।
त्वमोङ्कारा नादरूपा परं ब्रह्मस्वरूपिणी।।२५।।

त्वमात्मविद्या श्रीविद्या श्रुतिः स्मृतिरनुत्तमा।
वेदाङ्गानि त्वमेवाऽसि त्वमेवोपनिषन्मता।।२६।।

पुराणन्यायमीमांसाधर्मशास्त्रार्थरूपिणी।
इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिस्वरूपिणी।।२७।।

दाक्षायणी त्वमेवाऽभूर्दक्षयज्ञविनाशिनी।
व्यक्ताऽधुना पार्वती त्वं सुस्वरा त्वं विकस्वरा।।२८।।

शैलेन्द्रतनयाऽसि त्वं ज्ञानदा वागधीश्वरी।
सर्ववेदान्तसंवेद्या सदसद्रूपधारिणी।।२९।।

त्वं वैष्णवी विष्णुरूपा त्वं शिवा शिवरूपिणी।
कल्याणकर्त्री लोकानां ब्रह्माणी त्वं बुधार्चिता।।३०।।

नवदुर्गास्वरूपाऽसि चामुण्डा चण्डविक्रमा।
निशुम्भशुम्भमथिनी त्वमेव गुहजन्मभूः।।३१।।

त्वं विश्वरूपा विश्वेशी शिवशक्तिस्वरूपिणी।
त्वं वेदान्तार्थसंवेद्या चित्कलाऽऽनन्दरूपिणी।।३२।।

महाकाली महालक्ष्मीर्महापूर्वा सरस्वती।
जगदम्बा त्वमेवाऽसि त्वं सदा सिंहवाहना।।३३।।

जगद्रङ्गे त्वमेवाऽसि महानाटकरूपिणी।
दर्शकाः प्राणिनः सर्वे द्रष्टुं त्वां शक्नुवन्ति नो।।३४।।

धार्मिकी धर्मशीला त्वं धर्ममार्गप्रवर्तिनी।
धर्मवाहनसंयुक्ता धर्ममार्गानुरोधिनी।।३५।।

शिवरूपा शिवारूपा श्रुतिसंस्तुतवैभवा।
गणेशाम्बा त्वमेवाऽसि सर्वदैव शिवङ्करी।।३६।।

जगदम्बे! वाञ्छितार्थप्रदा त्वं कामरूपिणी।
त्वमद्भुताऽसि चारित्रं क्व ते को वेत्तुमर्हति।।३७।।

त्वमेव देवि! श्रीरूपा त्वं श्रीयन्त्रनियन्त्रिता।
त्वमेव शरणं भूया मातस्ते शरणागता:।।३८।।

विश्वमाता जगद्धात्री त्वं श्रीत्रिपुरसुन्दरी।
सुमङ्गली सदा भूया: शिवशक्त्यैक्यरूपिणी।।३९।।

कलानिधि: काव्यकला विबुधा त्वं बुधार्चिता।
सत्यज्ञानाऽऽनन्दरूपा धनधान्यविवर्धिनी।।४०।।

इत्थं बालां संस्तुवन्तस्तत्राऽऽयाता हि देवता:।
निवर्त्याऽऽकाशमार्गेण सस्मितास्त्रिदिवं गता:।।४१।।

नेदं काव्यं ध्वनिरसगुणाऽलङ्कृतं भावपूर्णं
अस्मत् प्राच्या शुभकृतकथा प्रस्तुता या पुराणी।
नैपालीयै: सुकृतकविभिर्यत्कृतं वर्त्म तस्मिन्
मन्दा स्यान्मे गतिरपि बुधैर्दृश्यतां कीदृशी सा।।४२।।

* *

## उपसंहार:

न धान्यधनमर्जितं जनुषि नैव भुक्तं सुखं
सदैव परिपूरितं स्वमुदरं वृथा दु:खत:।
न सज्जनसमागम: सममिलत् क्वचिज्जीवने
न ते सविधिपूजनं व्रतमुपोषितं कर्हिचित्।।१।।

न शास्त्रविधिना धृतो तव मनुश्च सन्मार्गदः
त्वदीयपदबोधको जपकृतो मनुः केवलम्।
न शास्त्रपठनं कृतं न च कदापि काव्यं धृतं
जगज्जननि! वैभवं लिखितमस्फुटं तावकम्।।२।।

सपुण्यजनसेविता त्वमिह सौख्यदात्री रमा
त्वमेव विदुषां सदा हृदयवर्तिनी बुद्धिदा।
सकल्मषजनालये न रमसे सते मुक्तिदा
नतोऽस्मि चरणाब्जयोस्तव तयोर्दयापूर्णयोः।।३।।

जननीरचनाप्रभावतः कवितायामभवद्रुचिर्मम।
जननीपरितोषेहेतवे जननीवैभवनिर्मितिः कृता।।४।।

प्रभजे जननीपदद्वयमनुकम्पामभिलाषुकोऽन्वहम्।
जननीचरणाब्जयोरिदं जननीवैभवकाव्यमर्पितम्।।५।।

**

## लेखकपरिचयः

नेपाले प्राग्विश्वविद्यालयान्त-
विंशत्यष्टौ वर्षमध्यापयित्वा।
काश्यां हिन्दूविश्वविद्यालये यो
शोधच्छात्राध्यापनार्थं नियुक्तः।।१।।

शिक्षामन्त्रागारनिर्देशतोऽसौ
काश्यां हिन्दूविश्वविद्यालयाऽऽप्तः।
यत्र स्थित्वाऽध्यापनार्थं प्रवृत्तः
स्वीयानन्याँश्छात्रवर्गाननेकान्।।२।।

काश्यां हिन्दूविश्वविद्यालयान्त-
र्नैपालाख्यं पीठमास्तेऽधुनायम्।
स्वीयैर्लक्ष्मीकान्त इत्वेव नाम्ना-
ऽऽख्यातो ज्ञातो नैव जानाति शास्त्रम्।।३।।

लक्ष्मीकान्तो विद्यते मन्दबुद्धिः
शास्त्राभ्यासे यस्य बुद्धिर्न लग्ना।
लेखान् लेखे लेखनी मूकतुल्या
शास्त्रार्थे वाऽनूदये चाप्यशक्ता।।४।।

भारद्वाजसगोत्रविप्रकुलजो ज्योतिर्विदामग्रगो
दत्तात्रेय इति स्वनामचलितो नेपालभूमध्यगः।
आसीन्मे प्रपितामहः कुलमणिर्नेपालपालाश्रितो
होरासागरपारगः श्रुतवतां कालत्रयोद्भाषकः।।५।।

तत्पुत्रः श्रुतिशास्त्रविद् बहुमतो देवीप्रसादोऽभवत्
सोऽयं पितृपथाश्रितो बहुजनैः सम्मानितः सादरम्।
यत्पुत्रा वसुसङ्ख्यका दिशि दिशि स्वाधीतविद्यागुणैः
सम्मान्याः कुलधर्मनीतिनिपुणा आचारवन्तोऽभवन्।।६।।

तन्मध्यो निगमागमेऽतिनिपुणः शास्त्रज्ञ एको महान्
विद्याध्यापनधर्मनिर्णयविधौ वक्ता पुराणेष्वपि।
यो रामायणभारतादिषु तथा प्रश्नोत्तरादौ श्रुतो
यज्ञे यज्ञविधौ च काव्यकलने श्रीभीमकान्तः सुधीः।।७।।

तत्पुत्रोऽयमतीव चञ्चलमतिः शास्त्रे न काचिद् गतिः
युक्तोऽध्यापनवृत्तिनिर्भरगतिः खादन् श्वसन् मन्दधीः।
लक्ष्मीः पूर्वपदं तदुत्तरपदं कान्तः समासात्तयो-
र्लक्ष्मीकान्त इमं विदन्तु विवुधास्तेषां विधेयं जनम्।।८।।

गुल्मीमण्डलमालिकाद्रितनया या निम्नगा पन्नगा
तस्याः प्राक्तटमाश्रितास्ति वसतिर्ग्रामो बृहच्चत्वरः।
भारद्वाजकुलेऽमले जनिरभूत् श्रीनीलमायाङ्गजो
लक्ष्मीकान्त इतीह नाम कथितं श्रीभीमकान्तात्मजः।।९।।

❊ ❊

# वंशदर्शनम्

(काव्यम्)

# आमुखम्

अथाऽऽत्मवृक्षस्य लिखामि मूलं
यन्मूलमूर्ध्वं भविता स्वपक्षात्।
अधश्च तस्यैव ददामि पक्षाँ-
स्ततोऽव्ययोऽश्वत्थ इवास्तु वृक्षः।।१।।

छन्दांसि पर्णानि वयं कथञ्चिद्
यो वेत्ति विद्वानिव वंशपत्रम्।[१]
करे गृहीत्वा स्वकवंशबोधो
भूयादवश्यं सफलोऽस्मदीयः।।२।।

❊❊

# मङ्गलम्

श्रीभीमकान्तं जनकं शिवात्मकं
श्रीनीलमायां जननीं शिवात्मिकाम्।
लक्ष्म्यादिकान्तोऽस्मि गणेशवत्तयोः
प्रदक्षिणीकृत्य नमामि पादयोः।।१।।

स्ववंशनामानि यथा श्रुतानि
स्ववंशमूलात् पुरुषाल्लिखामि।
स्ववंशशाखा अपि योजयित्वा
स्ववंशपत्राणि निदर्शयामि।।२।।

---

१. ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्।। (श्रीमद्भगवद्गीता)

शिवं प्रकुर्वन्तु च वंशदेवाः
यथा प्रजाः पालयते क्षितीशः।
शिवं प्रगच्छन्तु च वंशमूलाः
प्रजा अभीप्सन्ति यथा क्षितीशम्।।३।।

शिवेतरं हन्तु च वंशदेवी
माता यथा रक्षति बालकं स्वम्।
शिवाय मे सन्तु च वंशजाताः
पिता यथा कामयते स्वपुत्रम्।।४।।

**

## प्रथमं सोपानम्

एकदा भक्तिरित्याख्या समायाता मदन्तिकम्।
वंशजिज्ञासया पुत्री पृच्छन्ती वाक्यमब्रवीत्।।१।।

भो पितर् वंशपूर्वास्ते समायाताः कुतः कथम्।
वंशमूलं निगदतु पृच्छन्तीमिति मां सुताम्।।२।।

शृणु पुत्रि! निगद्यन्ते तेऽस्माकं वंशपूर्वजाः।
कुत्रत्याः कुत आयाताः कथमत्र सुविस्तृताः।।३।।

अश्वत्थ इव तद्वृक्षोऽधोमुखो विद्यते महान्।
तद्वंशवृक्षं विज्ञाय 'विदुषी भव' मत्सुते!।।४।।

ऊर्ध्वमूलमधः शाखो वंशवृक्षो निबोध्यताम्।
अधस्तात् प्रसृताः शाखा ज्ञायन्तां वंशबान्धवाः।।५।।

अथाऽस्मिन् भारते वर्षे सम्प्राप्तेऽपि कलौ युगे।
युगवेदखरामाब्दाद् विक्रमादित्यशासनम्।।६।।

आसीज्जनपदः कश्चिदुज्जयिन्यां प्रतिष्ठितः।
विक्रमादित्यनृपतेर्मारवाडिति विश्रुतः।।७।।

तत्र क्षिप्रानदीतीरे शृङ्गेरीमठसन्निधौ।
आदिवाराहदेवस्य भक्ता: कालीप्रपूजका:।।८।।

महर्षेर्याज्ञवल्क्यस्य वेदस्मृत्यनुसारिण:।
सनातना यायजूका यजुर्वेदप्रपाठका:।।९।।

ब्राह्मणा यज्ञियाऽऽचार्या भरद्वाजस्य गोत्रजा:।
भारद्वाजास्त्रिप्रवरा वसन्ति स्मेति बुद्ध्यते।।१०।।

भरद्वाजकुलोत्पत्ते: कारणाद् गोत्रमित्यपि।
भारद्वाज इति ख्यातं प्रवरैर्विदितास्त्रिभि:।।११।।

'आङ्गिरस-बार्हस्पत्य-भारद्वाजा:' क्रमादमी।
त्रयस्ते प्रवरा ज्ञेया भारद्वाजैरधिष्ठिता:।।१२।।

तद्वंशजो हि कूटस्थ: प्रजापतिरभून्मुनि:।
ततोऽभवत् पद्मनाभ: सोऽपि मुनि: प्रभाषित:।।१३।।

कार्यकारणतो जाता स्थलादपि क्वचित् क्वचित्।
'थर' इत्युपनामानि ह्यस्माकं कार्यकारणात्।।१४।।

सुष्ठु वेदान् पठन्त्यस्मात् 'सुवेदी'त्युपनामका:।
पद्मनाभाङ्गजनुष इत ऊर्ध्वं सुवेदिन:।।१५।।

सन्ति शाखास्वनेकासु मूलशाखा सुवेदिनाम्।
अस्माकं वंशजातास्ते ज्ञायन्तां वंशबान्धवा:।।१६।।

तस्मादुद्धवदेवोऽभूद् भानुदेवस्ततोऽभवत्।
भानुदेवाद् दत्तदेवो रामदेवस्ततोऽभवत्।।१७।।

जयदेवो रामदेवान्महादेवस्ततोऽभवत्।
अस्मादेवाभवन् भिन्ना: पोखरेलोपनामका:।।१८।।

भरद्वाजकुलोद्भूतास्तस्य वंशप्रवर्द्धका:।
सन्ति ते स्वकुलोत्पन्ना अस्माकं वंशबान्धवा:।।१९।।

महादेवस्तु कन्नौजस्थलं गत्वाऽवसत्ततः।
सर्वानन्दस्ततो जातोऽच्युतानन्दस्ततोऽभवत्।।२०।।

एतस्मात् सहजानन्दो रामानन्दस्ततोऽभवत्।
तस्मादभूत् सदानन्द इतो भिन्नत्वमागताः।।२१।।

'देवकोटा'भिधा जाता निवसन्तीह सर्वतः।
भरद्वाजकुलोत्पन्नास्तेऽस्माकं वंशबान्धवाः।।२२।।

ततो डोटीमधिगता 'भण्डारी'त्युपनामकाः।
सन्ति तत्पूर्वजा भारद्वाजास्ते वंशबान्धवाः।।२३।।

'निरौली'स्थलमागत्य 'निरौले'त्युपनामकाः।
भरद्वाजकुलोत्पन्नास्तेऽस्माकं वंशबान्धवाः।।२४।।

'यमला'मण्डलान्तःस्थाश्चौडिल्लाग्रामवासिनः।
अस्माकं वंशजातास्ते 'चौलागाञी'ति नामकाः।।२५।।

सदानन्दस्ततः प्रागाड्डोटीमन्तःस्थितं पुनः।
'गङ्गोलि'स्थलमापन्नो वसतिं कृतवान् स हि।।२६।।

बहुं पन्थानमाक्रम्याऽवसत् 'पन्थ्यु'पनामकः।
अस्य वंशोद्भवा आसन् सर्वे यायावरास्ततः।।२७।।

भारद्वाजास्त्रिप्रवरा वयं 'पन्थ्यु'पनामकाः।
अस्य रुक्माङ्गदः पुत्रस्तस्माज्जाताः सुतास्त्रयः।।२८।।

नाथः सुनाथः श्रीनाथ इत्येवंविधनामकाः।
ततः पूर्वं गतौ नाथसुनाथौ तु तदङ्गजाः।।२९।।

भरद्वाजकुलोत्पन्नाः 'कँड्यालो'ऽपरनामकाः।
सन्ति ते स्वकुलोत्पन्नाः ज्ञायन्तां वंशबान्धवाः।।३०।।

श्रीनाथस्य सुतो जातो धवलः सञ्ज्ञितस्ततः।
गौतमः सञ्ज्ञितो जात सोऽपि यायावरोऽभवत्।।३१।।

अस्य पुत्रः समभवदुद्धवो नाम एकलः।
ध्रुवकूटे जनपदे समायातः स उद्धवः।।।३२।।

वन्यप्रायं पाशुपाल्यं सौविध्यं सुविचार्य तत्।
'वाग्ला'स्थलं समालोक्य वसतिं कृतवानसौ।।३३।।

उद्धवस्य सुता जाताश्चत्वारो वंशवर्द्धकाः।
सदुः शम्भुर्लक्ष्मणश्च परमानन्दतुर्यकाः।।३४।।

सदोः कुलोद्भवा जाता 'राङ्गाल्य'परनामकाः।
वसन्ति यत्र कुत्रापि ते च नो वंशबान्धवाः।।३५।।

'वाग्ला'स्थलादपि पूर्वं गतौ द्वौ शम्भुलक्ष्मणौ।
एतयोरङ्गजातास्तु सर्वे 'वाग्ले'ऽभिधास्ततः।।३६।।

लक्ष्मणस्याथ द्वौ पुत्रौ जातौ दुल्लभवल्लभौ।
एतयोर्दुल्लभाज्जाता 'डँडाल्य'परसञ्ज्ञकाः।।३७।।

वसेयुर्यत्र कुत्रापि तेऽपि नो वंशबान्धवाः।
वल्लभो गतवान् भीरकोटं स्याङ्जास्थलान्तरम्।।३८।।

अस्मद् वंशविवर्द्धको मुनिभरद्वाजो महान् पूरुषः
यस्यायं कुलपादपोऽस्ति बहुभिः शाखाभिरुक्तोऽधुना।
तच्छाखासु निबद्धतन्तुसहिताः पर्णस्वरूपा वयं
जिज्ञासा यदि तेऽस्ति पृच्छ दुहितर्ह्यन्यापि काचित् पुनः।।३९।।

* *

## द्वितीयं सोपानम्

अथ मे भावना पुत्री पृच्छन्ती मामतोऽब्रवीत्।
अस्माकं वंशवृक्षस्य 'वाग्ले'शाखा कुतो गता।।१।।

स्याङ्जामण्डलमायाता गतान्यत्रापि वा क्वचित्।
विस्तृता वा सङ्कुचिता 'वाग्ले'शाखा निगद्यताम्।।२।।

शृणु पुत्रि! प्रवक्ष्यामि 'वाग्ले'शाखा कुतो गता।
स्याङ्जायां विस्तृता सैव प्रगता मण्डलान्तरम्।।३।।

**(क) स्याङ्जामण्डलीयाः**

स्याङ्जाजनपदे 'कीचनाशे' वाग्लेपदाभिधा।
'सामडाँडा-वीरडाँडा-भड्डाँडा-नेहुले'स्थले।।४।।

दुम्सिदी-भलडाँडा च मइन्काँडा'स्थले तथा।
सन्ति केचिदितो याता 'दैलेखे' निवसन्ति च।।५।।

सुर्खेतादिस्थले केचित् सन्ति वाग्ले पदाभिधा।
वसेयुर्यत्र कुत्रापि ते सर्वे वंशबान्धवाः।।६।।

य आसीद् वल्लभो नाम लक्ष्मणस्यैक आत्मजः।
वाग्लास्थलादागतत्वाज्जाता 'वाग्ले' तदात्मजाः।।७।।

श्रीकण्ठो वल्लभाज्जातो मुकुन्दश्च ततोऽभवत्।
ततो गदाधरो जातस्तस्माज्जातौ सुतावुभौ।।८।।

हीरामणिहृषीकेशौ 'वाग्ले'वंशविवर्द्धकौ।
स्याङ्जामण्डलमध्युष्टा अनयोर्वंशजाः समे।।९।।

हीरामणेरङ्गजातास्तल्लाथोकनिवासिनः।
हृषीकेशाङ्गजनुष उपल्लाथोकवासिनः।।१०।।

हीरामणेस्त्रयो जाताः सुताः स्वकुलरक्षकाः।
कृष्णानन्दो वल्लभश्च मणिराम इमे त्रयः।।११।।

कृष्णानन्दादभूज्जोषुः श्रीवत्सश्च ततोऽभवत्।
ततोऽभूच्छ्रीधरो विद्वान् तद्वंशे बहुविश्रुतः।।१२।।

ततो बृहस्पतिरभूत् तस्माज्जातो भगीरथः।
भद्रनाथस्ततो जातो दीपेन्द्रश्च ततोऽभवत्।।१३।।

काष्ठमण्डपमागत्याऽवसन् न्यायाधिपोऽस्त्ययम्।
यस्मादेतन्मया प्राप्तं वंशमूलमखण्डितम्।।१४।।

प्रजापतिसमुद्भूतैः पद्मनाभसुविस्तृतैः।
सुवेदिपन्थिपोखे्रलदेवकोटाकँडेलकैः।।१५।।

चौलागाञीनिरौलाभिर्वाग्लेभण्डारीनामकैः।
नवशाखाप्रशाखाभिर्दर्शितं वंशदर्शनम्।।१६।।

जातौ रवीन्द्रराजेन्द्रौ दीपेन्द्रस्य सुतावुभौ।
तावद्य वसतः काष्ठमण्डपे पितृसद्मनि।।१७।।

हीरामणेरेकपुत्रो मणिरामाभिधस्ततः।
बालानन्दरामनन्दौ जातौ स्वकुलरक्षकौ।।१८।।

बालानन्दसुतो ज्येष्ठो नाम्ना शशिधरः पुनः।
प्रेमनारायणस्त्वन्यः कनिष्ठो भ्रातराविमौ।।१९।।

कनिष्ठो गतवान् कीचनाशान्नेपालपश्चिमे।
दैलेखमण्डले तस्य शाखाः सन्ति सुविस्तृताः।।२०।।

सुर्खेतादिस्थले केचिज्जाजर्कोटस्थलेऽपि वा।
'वाग्ले' पदाभिधाः सन्ति प्रेमनारायणाङ्गजाः।।२१।।

रामनन्दसुताः सन्ति चत्वारो वंशपत्रके ।
ज्येष्ठो दशरथस्तस्य जयनारायणः सुतः।।२२।।

रविलालदण्डपाणी जयनारायणात्मजौ।
रामनन्दसुतोऽस्त्यन्यः परमानन्दसञ्ज्ञकः।।२३।।

ततो देवहरिर्जातो बोधराजस्ततोऽभवत्।
बोधराजाद् दण्डपाणिर्वाग्लेवंशविवर्द्धकाः।।२४।।

### (ख) तनहुँमण्डलीयाः

वल्लभस्य सुतोऽस्त्यन्यो वसिष्ठो नाम नामतः।
कीचनाशस्थलात्पूर्वं तनहूँमण्डलं गतः।।२५।।

तत्सुतः पद्मनाभोऽस्ति ततो जात ऋषीश्वरः।
हेमानन्दव्रजानन्दौ ऋषीश्वरसुतावुभौ।।२६।।

हेमानन्दस्य तनयौ द्वौ जातौ वंशवर्द्धकौ।
षडानन्दोऽभवज्ज्येष्ठस्तद्भ्राता हरिमाधवः।।२७।।

हरिमाधवपुत्रास्तु त्रयो जाता तथाविधाः।
दामोदरो रङ्गनाथो लोकनाथ इमे त्रयः।।२८।।

दामोदरसुतौ रामकृष्णश्रीकृष्णसञ्ज्ञकौ।
सञ्जातौ रामकृष्णस्य सुतौ जातौ तथाविधौ।।२९।।

जीवनाथहेमनाथौ रामकृष्णसुताविमौ।
जीवनाथस्य पुत्राश्च त्रयो जातास्तथाविधाः।।३०।।

लक्ष्मीनाथहरिदत्तज्ञानिशङ्करनामकाः।
ज्ञानिशङ्करपुत्राश्च त्रयः सन्त्यधुनावधि।।३१।।

पूर्णचन्द्रो रामचन्द्रः कृष्णचन्द्र इमे त्रयः।
रामचन्द्रान्मया प्राप्तं वंशपत्रं सुरक्षितम्।।३२।।

श्रीकृष्णस्यापि द्वौ पुत्रौ सञ्जातौ वंशरक्षकौ।
शिवलालश्यामलालौ श्रीकृष्णस्य सुताविमौ।।३३।।

श्यामलालसुता जातास्त्रयो वंशविवर्द्धकाः।
विश्वनाथश्चिरञ्जीवी ऋषिराम इमे त्रयः।।३४।।

रङ्गनाथसुतः कोऽपि न दृष्टो वंशपत्रके।
लोकनाथसुतश्चैको रविलालोऽस्ति विश्रुतः।।३५।।

रविलालसुता जातास्त्रय एव तथाविधाः।
राधाकृष्णो बालकृष्णो हरिकृष्ण इमे त्रयः।।३६।।

बालकृष्णसुतश्चैको रुद्रनाथोऽभवत्ततः।
रुद्रनाथसुता जातास्त्रय एवंविधा पुनः।।३७।।

यज्ञमूर्तिचन्द्रकान्तशिवशङ्करनामकाः।
खिलनाथभूतनाथौ यज्ञमूर्तिसुताविमौ।।३८।।

खिलनाथसुताः पञ्च जातास्ते सन्ति साम्प्रतम्।
शिवशङ्करपुत्राश्च त्रयो जातास्तथाविधाः।।३९।।

प्रेमनाथो रामदत्तः सूर्यनाथ इमे त्रयः।
हरिकृष्णस्य द्वौ पुत्रौ जातौ वंशविवर्द्धकौ।।४०।।

ज्येष्ठः शोभाकरश्चान्यः कुसुमाकरसञ्ज्ञकः।
शोभाकरसुतो विष्णुहरिर्जातः स एकलः।।४१।।

विष्णुहरेः सुताः पञ्च जातास्ते सन्ति साम्प्रतम्।
व्रजानन्दोऽगमद् बन्दीपुरं ग्रामान्तरं पुनः।।४२।।

त्रिलोचनस्तत्सुतोऽभूद् राधाकृष्णस्ततोऽभवत्।
श्रीहर्षस्तत्सुतो जातः शिवलालस्ततोऽभवत्।।४३।।

श्यामलालस्ततो जातस्ततः पीताम्बरोऽभवत्।
पीताम्बरसुतश्चैक उमानाथोऽस्ति साम्प्रतम्।।४४।।

एते बन्दीपुरभवा व्रजानन्दाङ्गसम्भवाः।
वाग्लास्थलात् समायता 'वाग्ले' इत्युपनामकाः।।४५।।

केचिद् बाग्लुङ्मण्डलान्तर्धुल्लूग्रामस्थिता इमे।
केचिद् गोर्खामण्डलान्तःस्थिता 'वाग्ले' पदाभिधाः।।४६।।

काष्ठमण्डपपूर्वस्थाः काभ्रेमण्डलमाश्रिताः।
इतः पूर्वं गता अन्ये सन्ति 'वाग्ले' पदाभिधाः।।४७।।

मध्यदेशे भारतेऽपि याता नो वंशबान्धवाः।
एतेषां वंशमूलं तु जानीयादेकमेव हि।।४८।।

एतेऽस्माकं बन्धुवर्गा नितान्तं
भिन्नीभूताः पन्थिनो वंशमूलात्।
वाग्लाग्रामात् पूर्वजात् पूर्वलग्नाद्
'वाग्ले' प्रोक्तास्तस्य वंश्याः प्रदिष्टाः।।४९।।

❊ ❊

# तृतीयं सोपानम्

अथान्या साधना पुत्री पृच्छन्ती मामतोऽब्रवीत्।
अस्मत्कुले पन्थिवंशः कुतोऽभूत् कति पूरुषाः।।१।।

कानि तेषां च नामानि सर्वं वदतु मामिति।
शृणु पुत्रि प्रवक्ष्यामि यथाज्ञानं सविस्तरम्।।२।।

आसीज्जनपदः कश्चित् पश्चिमायां दिशि श्रुतः।
गङ्गोलिनाम्ना तत्रैव वंशमूलं सुविश्रुतम्।।३।।

उपाध्यायकुलोत्पन्नो गौतमस्तत आगतः।
'वाग्ला'नाम स्थलं दृष्ट्वा वसतिं कृतवान् पुरा।।४।।

उद्धवो नाम पुत्रोऽस्य सोऽपि पित्रा सहागतः।
'वाग्ला' स्थलं समालोक्य वसतिं कृतवानसौ।।५।।

वाग्लं समागतस्यैवोद्धवस्यैकः सुतोऽन्तिमः।
य आसीत् परमानन्दस्तज्जाताः पन्थिनो वयम्।।६।।

अस्मात्पुंसोऽनन्तराणि नवनामानि साम्प्रतम्।
वंशपत्रे न दृष्टानि विस्मृतान्यथवा किमु।।७।।

परमानन्ददशमाच्छुतदासोऽभवत्ततः।
मनोहरस्ततो जातः कृष्णस्तस्य सुतोऽभवत्।।८।।

धनिरामः कृष्णपुत्रः पतिरामस्ततोऽभवत्।
पतिरामस्य द्वौ पुत्रौ गङ्गाभरतसञ्ज्ञकौ।।९।।

वाग्लायां जनिसम्प्राप्तौ ततो भिन्नावुभौ बुधौ।
गङ्गारामः समवसद् वाग्लायां पितृसद्मनि।।१०।।

भरतो नाम विबुधो वाग्लाग्रामात् समागतः।
खर्वटेऽस्मिन् बडाचौरे वसतिं कृतवान् पुनः।।११।।

दत्तात्रेयो नाम पुत्रो भरतस्याऽधिकः प्रियः।
पितुः सकाशादेवासौ ज्योतिःशास्त्रं समासदत्।।१२।।

धर्मशास्त्रं प्रमाणेन गणितं फलितादिकम्।
ज्योतिषस्य फलादेशे सफलोऽभूद् दृढाशयः।।१३।।

सोमनेत्राङ्कचन्द्राब्दमिते (१९२१) वैक्रमवत्सरे।
देवीप्रसादविबुधो दत्तात्रेयमलङ्करोत्।।१४।।

योऽधीतवान् व्याकरणं निगमं कर्मकाण्डकम्।
पितुः सकाशान्मेधावी काव्यं ज्योतिषधर्मकम्।।१५।।

आकृत्या सुन्दरो धीमान् मृदुभाषी सदाशयः।
अजातशत्रुरेवासीत् प्रसन्नमुखमण्डलः।।१६।।

सोऽयं सत्पुरुषो ग्रामे पौरोहित्ये कृतादरः।
यावज्जीवं पुराणानि कथयामास भूसुरः।।१७।।

नवम्यामसिते राधे वसुव्योमखलोचने।
स्वर्गतोऽयं महाभागो वैक्रमे पुण्यसङ्ग्रही।।१८।।

अस्य पुंसस्तिस्र आसन् धर्मपत्न्यस्तथात्मजाः।
अष्टौ जाताश्चतस्रश्च पुत्र्यो जाताः पतिव्रताः।।१९।।

एकराजो डोरनाथः प्रथमामध्यमाङ्गजौ।
एकराजोऽनपत्योऽभूड्डोरनाथात्मजास्त्रयः।।२०।।

प्रसादान्तावुभौ लक्ष्मीरेवत्यौ ज्येष्ठमध्यमौ।
कनिष्ठश्च सुरेशोऽस्ति डोरनाथात्मजा इमे।।२१।।

भूमा भूपा नामधेया प्रथमामध्यमाङ्गजे।
पुनर्भूत्वं गता भूमा बाल्याज्भूपास्ति निर्धवा।।२२।।

तृतीयायां समुद्भूताः सूनवो मिलिताशयाः।
वंशे पताकाः सदृशाः सञ्जाताः कुलदीपकाः।।२३।।

यज्ञमूर्तिर्नामधेयो ज्येष्ठः सुचतुरः सुतः।
अष्टौ रसाङ्कभूम्यब्दे सम्भूतो वैक्रमे शुचौ।।२४।।

पूर्वे वयस्यसौ विद्यामधीतो दारसङ्ग्रहम्।
कृतवान् गतवान् स्वर्गं स्मृत्वाऽनास्थां हि भौतिके।।२५।।

अष्टसप्ताङ्कचन्द्राब्दे (१९७८) राधे वैक्रमवत्सरे।
पञ्चम्यामसिते जातो भीमकान्तो हि मध्यमः।।२६।।

साधुस्वभावात् कौमारे पित्राज्ञापरिपालनम्।
परिज्ञातं सदा तेन न ज्ञातं परपीडनम्।।२७।।

शिक्षा प्राथमिकी प्राप्ता भवने पितुरन्तिके।
पुनः षोडशवर्षीयो विद्यार्थं गृहमत्यजत्।।२८।।

काष्ठमण्डपमागत्य राजपुष्करिणीतटे।
समारभत शास्त्रस्याऽभ्यासं स गुरुसन्निधौ।।२९।।

शब्दशास्त्रं हेमनाथात् साहित्यं कालिदासतः।
तर्कशास्त्रं लोकनाथाद् गणितं कविराजतः।।३०।।

धर्मशास्त्रं च वेदान्तं सोमनाथाद् गुरोरपि।
अपाठि यत्नतो येन शारदा वरदा कृता।।३१।।

श्रुत्वैव गुरुवाक्यानि कविता रचिता तदा।
कवितारचनाकार्यं सुकरं प्रतिभावताम्।।३२।।

तदा सन्तोष्य वाग्देवीं कविता व्यलिखत् कति।
पत्रं पद्यमयं प्रेष्य सतीर्थ्यांश्च तुतोष सः।।३३।।

परीक्षा प्रथमोत्तीर्णा सम्भूय प्रथमस्तदा।
पारितोषिकरूपेण प्राप्तवान् पुस्तकादिकम्।।३४।।

पुनः खिदीमं सम्प्राप्य दधिरामाद् गुरोरपि।
वेदान्तं व्याकृतिं धर्मं साहित्यञ्चापठत् सुधीः।।३५।।

परीक्षां मध्यमानाम्नीं काश्यां दत्वा गृहं गतः।
अत्रापि प्रथमश्रेण्यामुत्तीर्णोऽयं कुशाग्रधीः।।३६।।

पश्चादध्यापनेनैव काँश्चिद् वर्षानयापयत्।
विप्रवर्यस्य कर्तव्यं पठनात् पाठनं स्मृतम्।।३७।।

स्मृत्वा पुत्रस्य कर्तव्यं पित्रोः सेवां विषेशतः।
कर्तुं समागतो गेहे विनयो वृद्धसेवनम्।।३८।।

शास्त्राभ्यसनशीलोऽसौ स्वाध्यायं कृतवान् गृहे।
काश्यां परीक्षामददात् 'शास्त्री'ति ख्यापितस्ततः।।३९।।

पितृनिर्देशितेभ्यश्च यजमानेभ्य एव किम्।
जीविकां चालयामास पौरोहित्येन कर्मणा।।४०।।

कर्मकाण्डे सदाचारे प्रकाण्डः शास्त्रमर्मवित्।
ज्ञाता मधुरवाक् तेन न ज्ञाता परमर्मभित्।।४१।।

धर्मशास्त्रं प्रमाणेन फलादेशेन ज्यौतिषम्।
श्रीमद्भागवतादीनां कथामचकथद् बुधः।।४२।।

अयं प्रांशुः शरीरेण, गौरो वर्णेन, सुन्दरः।
आकृत्या, दीर्घबाहुभ्यां भीमकान्तो हि दर्शने।।४३।।

शास्त्रद्वारसमाने द्वे सुश्रोत्रे, मुखमण्डलम्।
प्रसन्नं दर्शनान्नित्यमन्वर्थमनुमीयते।।४४।।

लोचने द्वे कारुणिके दृश्येते, सुकृती स्वयम्।
ब्रह्मज्ञानादिन्द्रियजिन्मिष्टवाचा ह्यमर्षजित्।।४५।।

इत्थं लोकप्रियो विद्वानहो! दुर्जनसङ्गतिः।
हेतुरत्रविधिश्चित्रं कस्तूरी गहने वने।।४६।।

पञ्चाशत्पञ्चवयसि भूयोऽपि काष्ठमण्डपम्।
संयोगेन समागत्य ने.वे.विद्याश्रमं स्थितः।।४७।।

सुपरीक्षकरूपेण वर्षद्वयमतिष्ठिपत्।
वटूनशिक्षयच्छम्यक् सदाचारो हि जीवनम्।।४८।।

ब्रह्मज्ञानैकबुद्ध्यासौ स्वाश्रमं शिश्रिये पुनः।
एकान्तमेव शान्ताय भीमकान्ताय रोचते।।४९।।

पुनश्च गौरीघट्टस्थविद्यालयसुचालकैः।
बाँसकोटाभिधैर्विप्रैराहूतोऽध्यापनाय सः।।५०।।

अतो ग्रामादागतवान् त्रिषष्टिवयसा मितः।
गौरीघट्टे चोपविश्य द्वादशाब्दानपाठयत्।।५१।।

'जगदम्बावैभवञ्च जगदीश्वरवैभवम्।
काव्यद्वयं रचितवान् विविधां पद्यमालिकाम्'।।५२।।

पन्थिवंशोद्भवानां हि जनानां काष्ठमण्डपे।
सेवासमाजो घटितो रसवाणखलोचने।।५३।।

अनेनैव समाजेन मुनिवाणखलोचने।
वैक्रमेऽब्देऽह्यसौ विद्वान् वाक्पुष्पैरभिनन्दितः।।५४।।

सभायां प्रमुखो धीमान् बडागुरुमहोदयः।
केसरिराजपाण्डेयोऽभिनन्दनसमर्पकः।।५५।।

तेनोक्तपद्यपुष्पाणि सभायां समुपस्थितैः।
यथा श्रुतानि सर्वाणि ३परिशिष्टेऽङ्कितानि च।।५६।।

एवं कविरयं भीमकान्तः काव्यकलाधरः।
विद्याविद्योतितस्वान्तः पूर्णचन्द्र इवोदितः।।५७।।

विश्वहिन्दुमहासङ्घनेपालसमितेरपि।
पाणिनीयपुरस्कारसहितः सोऽभिनन्दितः।।५८।।

अभिनन्दनमेतच्च ४परिशिष्टेऽङ्कितं क्रमात्।
पाणिनीयपुरस्कारसहितं ज्ञायते ततः।।५९।।

सोऽन्यैर्जनैः समूहैस्तद्विद्यार्थिभिश्च सादरम्।
अध्यापितैरधीतैश्च संस्थाभिरपि सत्कृतः।।६०।।

लालुग्रामे लब्धजन्मा नाथ-सन्यासदीक्षितः।
विद्वान्नीतीतिहासज्ञः कविः शास्त्रार्थकोविदः।।६१।।

लब्धवर्णः ख्यातनामा योगी नरहरिः स्वयम्।
महाकविं भीमकान्तं वाक्पुष्पैरभिनन्दति।।६२।।

अस्याभिनन्दनं पत्रं पुस्तकेऽपि प्रकाशितम्।
पाठकानां सुबोधाय ५परिशिष्टे प्रदर्शितम्।।६३।।

अस्य काव्यद्वयं वीक्ष्य कथनीयं विशेषतः।
भूमिकावाक्यविस्तारं संविविच्य विलेखनात्।।६४।।

कवेः काव्य-कला-भाव-मर्मज्ञो भावकः कविः।
टीकारामो व्याकृतिज्ञो वाक्पुष्पैरभिनन्दति।।६५।।

जगदम्बावैभवे च जगदीश्वरवैभवे।
भूमिकायां संस्तवोऽस्ति काव्यस्य च कवेरपि।।६६।।

तदंशमात्रमुद्धृत्य पाठकानां हिताय वै।
वैशिष्ट्यबोधनार्थं हि ६परिशिष्टे प्रकाशितम्।।६७।।

फणिनारायणोऽस्त्यन्यः संस्कृताध्यापकः सुधीः।
सोऽयं भागवताचार्यः साहित्याम्बुधिपारगः।।६८।।

श्रीमद्भागवतार्थस्य नेपाल्यां कविताकरः।
तदुक्तैः पद्यकुसुमैर्भीमकान्तोऽभिनन्दितः।।६९।।

अस्याभिनन्दनं पत्रं परिशिष्टे७ प्रकाशितम्।
पाठकानां सुबोधाय पठितुं शक्यते ततः।।७०।।

विद्यया जन्मना चेति द्विधा वंशोऽस्ति यन्मतम्।
पाठनाल्लेखनाद् वापि पुत्रैः शिष्यैश्च सम्मतम्।।७१।।

नायं नगरवास्तव्यः कविगोष्ठ्यां न सङ्गतः।
रचिता ह्यात्मनैवात्र विरक्तस्येव जीवनी।।७२।।

पित्रा विलिखिता सैषा स्वकीया लघु जीवनी।
पूर्वमेव समालोच्य पत्रिकायां प्रकाशिता।।७३।।

इत्थमत्रास्य विदुषोऽशीतितोऽप्यधिकं वयः।
गतं परार्थेऽवज्ञातमात्मार्थे ब्रह्म केवलम्।।७४।।

सोऽयं मम पिता रोगाऽऽक्रान्तोऽपीह हरिं स्मरन्।
वसुवाणखनेत्राब्दे (२०५८) स्वर्गतः पुण्यसङ्ग्रही।।७५।।

महिते पितरि स्वस्य त्रिदशालयसंस्थिते।
भुवं त्यक्त्वा विहायाऽस्मान् कस्त्राता भविता वत।।७६।।

शोकसंविग्नमनसा स्मरता पितरं मया।
पितृसूक्तं विरचितं मया पूर्वं प्रकाशितम्।।७७।।[१]

अद्यपर्यन्तमस्यापि जायासन्ततिनां ततिः।
द्वे भार्ये पञ्च पुत्राश्च तिस्रः पुत्र्योऽधुनाऽभवन्।।७८।।

लक्ष्मीसूर्यचन्द्रविष्णुकृष्णाः कान्तोत्तरा वयम्।
पुत्राः स्वकार्यसंलग्नाः पितुराज्ञानुकारिणः।।७९।।

पुत्री पूर्वोद्भवा शान्ता विजयाकमलेऽनुजे।
कुलद्वयमलङ्कृत्य भूयासुस्ताः पतिव्रताः।।८०।।

अन्यः फणाधरो नामास्मदीयजनकानुजः।
व्योमवस्वङ्कभूम्यब्दे (१९८०) सञ्जातो व्यवहारवित्।।८१।।

व्यवहारपरिज्ञानात् पञ्चस्वन्यतमः स्मृतः।
निर्णेतृमण्डले मान्यः स्थितिविन्नीतिविच्च यः।।८२।।

---

१. जीवनदर्शनस्य ३४ पृष्ठे द्रष्टव्यम्।

अवशेन्द्रियचित्तानामन्येषां न वशं गतः।
कर्तुः समाजसेवायाः सर्वोऽप्यस्य वशं गतः।।८३।।

फणाधरस्य पत्न्यैका सन्ति पुत्रास्त्रयोऽधुना।
गृहस्थौ पितरौ त्यक्त्वा पुत्र्यो भर्तृगृहं गताः।।८४।।

सोऽयं फणाधरोऽप्यद्य रममाणःस्वकर्मणि।
वृद्धत्वे रुग्णतां जातो ह्यशीतेरधिकोऽभवत्।।८५।।

कलत्रपुत्रमित्राद्या न तं संरक्षितुं क्षमाः।
हित्वा सर्वान् धर्मपापे धृत्वा सोऽपि दिवं गतः।।८६।।

मधुरामोऽनन्तरामो बलरामस्त्रयः सुताः।
स्वकार्यकुशलाः सन्ति रक्षयन्तः परम्पराम्।।८७।।

फणाधरस्य भ्रातास्ति देवकीनन्दनोऽपरः।
नेत्रवस्वङ्कभूम्यब्दे (१९८२) सञ्जातः कुलधर्मवित्।।८८।।

बाल्येऽनध्ययनं कृत्वा चञ्चलोऽसौ प्रवासितः।
त्यक्त्वाऽऽत्मजननीं भूमिं यौवने बन्धुबान्धवान्।।८९।।

मध्यदेशं समागत्य सोऽभिनन्दति सोदरान्।
भोग्यं पूर्वार्जितं कर्म 'वचने का दरिद्रता'।।९०।।

अयं परिवृतोऽद्याऽऽस्ते पत्नीपुत्रादिनां गणैः।
शुष्काश्च वनजा वृक्षा बध्यन्ते तैर्लतादिभिः।।९१।।

देवकीनन्दनसुताः स्वकार्यकुशलास्त्रयः।
ज्येष्ठो हरिर्दिनेशोऽस्ति मध्यमो लक्ष्मणोऽवरः।।९२।।

अस्य नीलाम्बरो भ्राता सर्वेषामधिकः प्रियः।
वेदवस्वङ्कभूम्यब्दे (१९८४) चैत्रे मासि समुद्भवः।।९३।।

अग्रजाद् भवने प्राप्य शिक्षां प्राथमिकीं पुनः।
गृहं विहाय पाठार्थं खिदीमं गतवानसौ।।९४।।

कियान् ग्रन्थान् पठित्वात्र विश्वनाथपुरीं गतः।
परीक्षां स समुत्तीर्य मध्यमानामिकां ततः।।९५।।

क्षेत्रं पाशुपतं प्राप्तः पिपठिषुः कुशाग्रधीः।
राजकार्यञ्च कृत्वात्र शास्त्रमध्येतुमुत्सुकः।।९६।।

शब्दशास्त्रादिकं ज्ञात्वा परीक्षायां सुनिश्चितान्।
ग्रन्थानजीज्ञपत् सम्यक् वेदान्तविषयादिकान्।।९७।।

पठने पाठने दक्षो भाषणे कुशलो बुधः।
उदारो व्यवहारेऽसौ समाजस्य सुधारकः।।९८।।

नीलाम्बरः समो नित्यं जनसन्तापहारकः।
स्तिमितोन्नतसञ्चारी मेघवज्जनवल्लभः।।९९।।

नेतृत्वगुणशीलत्वाज्जननिर्वाचने विधौ।
सम्प्राप्य विजयं सम्यगतिष्ठद् राष्ट्रसंसदि।।१००।।

देशनायकभूतेन महेन्द्रेण तदन्तरम्।
संसदं विघटय्यापि नेतारः प्रतिबन्धिताः।।१०१।।

देशे स्वातन्त्र्यमानेतुं चिन्तयन् बोधयन् सदा।
कारावासे प्रवासे च काँश्चिदब्दानयापयत्।।१०२।।

ततोऽपि चिन्तयन्नास्ते नेपाले परिवर्तनम्।
यतः प्रजातन्त्रविधौ विकाससम्भवः सदा।।१०३।।

कविश्चासौ कियत्काव्यमाख्यानान्यलिखत् कति।
कविता लघुकायाश्च कथा रचितवान् कति।।१०४।।

मध्यदेशं सपत्नीको द्वादशाब्दानधिष्ठिपत्।
स सानन्दो वरीवर्ति राजनीतिं सुचिन्तयन्।।१०५।।

महाविद्यालये वर्षद्वयं प्राध्यापनं कृतम्।
प्राध्यापनं विहायापि राजनीतिः सुचिन्तिता।।१०६।।

मध्यदेशं विहायान्ते काष्ठमण्डपमागतः।
राजनीतौ सुसंलग्नः सभ्यो राष्ट्रसभां श्रितः।।१०७।।

अशीत्यब्दः स रुग्णो हि चिकित्सालयमाश्रितः।
गुल्मिसेवासमाजेन वाक्पुष्पैरभिनन्दितः।।१०८।।

तस्याभिनन्दनञ्चापि परिशिष्टे९ प्रकाशितम्।
पाठकानां सुखायास्तु तद्व्यक्तितत्त्वप्रबोधकम्।।१०९।।

इत्थं जनप्रियो विद्वान्नेता भुवि दिवि स्थितान्।
नेपालीयान् बोधयितुं सुधर्मासंस्थितानपि।।११०।।

देवानिन्द्रपराधीनान् स्वतन्त्रान् कर्तुमुत्सुकः।
सचेतनान् कर्तुमिच्छुर्भुवं त्यक्त्वा दिवं गतः।।१११।।

अस्याऽर्थे 'शब्दपुष्पाणि' श्रद्धया रचिता मया।
प्रकाशितानि चात्रैव शक्यन्ते पठितुं जनैः।।११२।।[१]

सागरश्च महेशोऽन्यो नीलाम्बरसुतावुभौ।
मध्यदेशे वसन्नेकः कान्तिपुर्यामथापरः।।११३।।

सागरश्च महेशोऽपि नेपालात्तु समुद्गतौ।
द्वावेतौ भ्रातरौ गत्वाऽमेरिकायां सुसंस्थितौ।।११४।।

भ्राता कनिष्ठश्चैतेषां सर्वेषामधिकः प्रियः।
इन्दुनवाङ्कभूम्यब्दे (१९९१) सञ्जातः शेखराभिधः।।११५।।

शेखरः सुन्दरश्चास्ति सरलो मधुरस्तथा।
अग्रजात् प्राप्तवान् गेहे पूर्वशिक्षां सनातनीम्।।११६।।

परीक्षां दातुकामोऽसौ गतवान् काष्ठमण्डपम्।
अशिक्षितेन केनाद्य प्रतिष्ठा लभ्यते कुतः।।११७।।

---

१. जीवनदर्शनस्य १५७ पृष्ठे सन्ति।

नेपाले राजकीयाख्ये पूर्वं 'संस्कृत'शब्दिते।
महाविद्यालये शास्त्रमधीतं गुरुसन्निधौ॥११८॥

कति वर्षानधीत्यात्र शास्त्री भूत्वा तदन्तरम्।
ख्यापितः शेखरः शास्त्री ततः प्रतिययौ गृहम्॥११९॥

शिक्षया वञ्चितो लोक इति मत्वा भवेन्नु किम्।
शिक्षयितुं समारब्धः शिशून् ग्रामोद्भवानसौ॥१२०॥

एका पत्नी च पुत्री च ह्यस्यासाते सुतावुभौ।
लघुना परिवारेण सुखी चानन्दवानसौ॥१२१॥

पूर्वे वयसि सम्पाठ्य बहून् ग्राम्याननक्षरान्।
भूत्वाऽऽशु नागरः स्थातुं मध्यदेशपुरीमगात्॥१२२॥

मध्यदेशं समागत्य विद्याध्यापनकर्मणि।
सुसंलग्नः पुराणानां कथावाचनकर्मणि॥१२३॥

कथाः श्रीमद्भागवतीर्लेखितुं कुशलोऽभवत्।
धर्मार्थनिर्णये चापि सत्कृतः पुरवासिभिः॥१२४॥

प्रशस्तिशेखरोऽप्येकस्तत्कृतौ च प्रकाशितः।
पुस्तिकायां भागवतचन्द्रिकायां मया कृतः॥१२५॥

प्रकाशितोऽप्ययञ्चाऽग्रे कवितासङ्ग्रहे मम।
शक्यते द्रष्टुमत्रैव पठनार्थं समुत्सुकैः॥१२६॥[१]

स्थानेश्वरो भेषराजो द्वावेतौ शेखरात्मजौ।
मध्यदेशे वसन्तौ स्तः स्वकार्यकुशलावुभौ॥१२७॥

एतेषां भगिनीमध्ये ज्येष्ठा तु नवयौवने।
पतिं विहाय स्वर्याता यौवनेऽजातसन्ततिः॥१२८॥

---

१. जीवनदर्शनस्य १५८ पृष्ठे द्रष्टव्यः।

भीमाकुमारी नाम्न्यस्ति कनिष्ठा भगिनी परा।
सुशीला सा सुरूपा च गुणबुद्धियुता तथा।।१२९।।

आरादस्य विवाहोऽभूत् सत्कुले सुखकारकः।
पुत्रपौत्रयुता साभूत् कुलाचारानुवर्तिनी।।१३०।।

दत्तात्रेयस्यान्यपुत्रः केशवो नाम नामतः।
देवीप्रसादभ्राताऽऽसीत् मातृसेवापरायणः।।१३१।।

अस्य पुत्रास्त्रयो ज्येष्ठो भूपलालोऽथ मध्यमः।
चेतोनाथः कनिष्ठस्तु जातो लीलाधरोऽपरः।।१३२।।

अनपत्यो भूपलालश्चेतनाथसुतावुभौ।
पुण्यो मधुकरश्चान्यो मध्यदेशस्थितावुभौ।।१३३।।

स्वकार्यकुशलौ तत्र भ्रातरौ लग्नमानसौ।
विष्णुबुद्धिरिमौ जातौ लीलाधरसुतावुभौ।।१३४।।

मध्यदेशं गताः सन्ति साम्प्रतं केशवाङ्गजाः।
स्वधर्मपालनं कृत्वा रक्षयन्तः स्वजीवनम्।।१३५।।

एते वयं वंशमूलान्ववायाः
सन्त्यन्यशाखास्वपि चान्ववायाः।
के ते? कुतः सन्ति? गवेषणीया-
स्तन्नामकर्मापि विलेखनीयम्।।१३६।।

❊ ❊

## चतुर्थं सोपानम्

कनिष्ठा चेतना पुत्री पृच्छन्ती मामथाऽब्रवीत्।
अस्मद्वंश्याऽतिरिक्ता ये पन्थिनः कुत्र सन्ति ते।।१।।

कस्मिन् ग्रामेऽधितिष्ठन्ते सर्वान् वदतु तानिति।
शृणु पुत्रि! प्रवक्ष्यामि यथाज्ञानं सविस्तरम्।।२।।

## (क) वाग्लास्थलोद्भवाः

वाग्लायां वसतो गङ्गारामस्यापि सुतास्त्रयः।
विनिरामः पद्मपाणिश्चूडामणिरिमे त्रयः।।३।।

विनिरामोऽगमद् बर्मादेशे तस्य सुतादयः।
बर्मायां ते सन्ति न वा गता अन्यत्र वा क्वचित्।।४।।

पद्मपाणेस्तु चत्वारः सुता जातास्तथाविधाः।
कुञ्जरो हिमलालश्च रुक्माङ्गदधनेश्वरौ।।५।।

कुञ्जरस्य सुता जातास्त्रयो वंशविवर्द्धकाः।
हरिलालः शिवलालो डिलाराम इमे त्रयः।।६।।

हरिलालस्यापि सुतास्त्रयो जातास्तथाविधाः।
हेमराजष्ठाकुरश्च ज्ञानुराम इमे त्रयः।।७।।

ज्येष्ठो गतो हेमराजो विदेशं भारतं प्रति।
शिवलालस्य पुत्राश्च त्रय एवाऽभवन्निह।।८।।

विनारामश्चेतुरामः कलाधर इमे त्रयः।
डिलारामस्य पुत्राश्च त्रय एवाऽभवन्निह।।९।।

मित्रलालो भीमलालष्टेकराज इमे त्रयः।
हिमलालसुतश्चैको नरेश्वर इतो गतः।।१०।।

चत्वारः समजायन्त रुक्माङ्गदसुता अपि।।
बलरामः पुनारामष्टीकारामस्तथोत्तरः।।११।।

अन्यः शेरबहादुरोऽभवत्तत्र चतुर्थकः।
बलरामस्य द्वौ पुत्रौ ह्यनन्तष्टेकराजकौ।।१२।।

हरिः कृष्णो जीवराजोऽनन्तपुत्रास्त्रयोऽभवन्।
पुनारामः पुत्रहीनष्टीकाराम इतो गतः।।१३।।

मध्यदेशं गताः सन्ति टीकारामसुतास्त्रयः।
मध्यदेशे प्रवसति परिवारगणैर्युतः।।१४।।

यमो विनयश्छन्दश्च शेरस्यापि सुतास्त्रयः।
धनेश्वरस्यैकपुत्रो लक्ष्मणो बहुविश्रुतः।।१५।।

येनात्मबान्धवैः सार्द्धं पन्नगापि नियन्त्रिता।
क्षेत्रं निर्माय तत्स्थाने धान्यसम्पत् प्रवर्द्धिता।।१६।।

लक्ष्मणस्य सुतश्चैको हरिरध्यापकोऽभवत्।
हरेः पुत्रद्वयौ जातौ वासुपुष्पेति सञ्ज्ञकौ।।१७।।

चूडामणेरपि सुतास्त्रयो जातास्तथाविधाः।
खिमानन्दः कुलानन्दो गौरीश्वर इमे त्रयः।।१८।।

खिमानन्दस्यापि सुतास्त्रयो जाता इहैव हि।
जनार्दनः खुमानन्दः पर्शुराम इमे त्रयः।।१९।।

जनार्दनसुतौ रामप्रसादज्ञानुरामकौ
मध्यदेशं गतो रामप्रसादस्तत्सुतास्त्रयः।।२०।।

खुमानन्दसुतश्चैको गतवान् भारतं प्रति।
पर्शुरामसुतो लक्ष्मीप्रसादोऽपि स एकलः।।२१।।

लक्ष्मीप्रसादपुत्रास्तु ह्यष्टौ जाता इतस्ततः।
केचित्तु भारते सन्ति शेषा नेपालवासिनः।।२२।।

बाबुरामादयः पञ्च नेपाले निवसन्त्यपि।
शेषास्त्रयो भारते हि रक्षयन्ति स्वजीवनम्।।२३।।

कुलानन्दो ह्यपुत्रोऽभूद् गौरीश्वरसुतास्त्रयः।।
शिवलालजनार्दनदेवीराम इमे त्रयः।।२४।।

रविलालनिमानन्दौ शिवलालसुतावुभौ।
जनार्दनो मध्यदेशं गतवान् ससुखं वसन्।।२५।।

जनार्दनसुतः पुण्यप्रसादोऽस्ति स एकलः।।
देवीरामः पुत्रहीनो दीर्घायुस्त्रिदिवं गतः।।२६।।

अन्येऽपि बान्धवाः सन्ति ह्यस्मदीयकुलोद्भवाः।
नामानि तेषामप्राप्य स्थानोल्लेखं करोम्यहम्।।२७।।

काहुले-धर्मपानीया नेटाखर्कनिवासिनः।
लाहाँटाग्रामवास्तव्या एकवंशसमुद्भवाः।।२८।।

गैह्राखर्कं गताः केचिद् वाग्लामूलस्थलोद्भवाः।
एतेषां पूर्वपुरुषो 'वाग्ला'ग्रामात् समागतः।।२९।।

वाग्लाग्रामादेव केचित् प्रतिष्ठानपुरं गताः।
दाङ्मण्डलभवं लक्ष्मीपुरं केचिद् गताः पुरा।।३०।।

एते पन्थिमूलभूमौ वाग्लायामेव साम्प्रतम्।
निवसन्ति समेषां सा मूलभूमिर्विराजते।।३१।।

अस्मत्कुलभवैः पूर्वपुरुषैर्मन्दिरायितम्।
वाग्लायामीश्वरीस्थानमस्ति क्षेमकरं शुभम्।।३२।।

अत्रैव राजतेऽस्माकं कुलदेवालयः शुभः।
यत्र वर्षान्तरे पूज्यौ वराहश्चाथ कालिका।।३३।।

पूजनीया कुलभवैरस्माकं बन्धुबान्धवैः।
गोर्दुग्धैः पाचितं क्षीरमर्पणीयं सशष्कुलीः।।३४।।

पाठो भागवतस्याथ चण्डीपाठो विशेषतः।
क्रियते कुलपूजायां वाग्लादेवालये समैः।।३५।।

## (ख) धुरकोटभवाः

ध्रुवकूटे जनपदे 'वाग्ला'स्थानात् समागतः।
जोषूपाध्याय इत्येकः परमानन्दवंशजः।।३६।।

राजप्रासादनिकटे लब्धभूरवसत्ततः।
प्रेमोपाध्यायनामाभूद् हरिकेशस्ततोऽभवत्।।३७।।

गोवर्द्धनस्ततो रामकृष्णस्तद्वंशविश्रुतः।
रामकृष्णसुतो धीमान् जयभद्रः सुविश्रुतः।।३८।।

जयभद्रसुताः सप्त ग्रामान्तरगता इमे।
जगन्नाथोऽगमद् वर्दवासग्रामं ततोऽपरः।।३९।।

लक्ष्मीनारायणो दाद्राग्रामं गत्वाऽवसत् पुनः।
गङ्गारामो भिर्कटेरीं गतवानपरस्ततः।।४०।।

षडानन्दो बडाचौरं वसतिं कृतवान् पुनः।
अन्योऽगाद् भन्भने ग्राममपरस्तन्तुहीनकः।।४१।।

तुलसीरामनामैकोऽवसत् पित्रोर्गृहं ततः।
स काशीनगरीं प्राप्य धर्मशास्त्रमधीतवान्।।४२।।

काँश्चिद् वर्षान् यापयित्वा समायातो गृहं प्रति।
पण्डितस्तुलसीरामो लब्धवर्णः सुविश्रुतः।।४३।।

तेनैव धार्मिकाः केचित् सदाचाराः प्रचारिताः।
धूमपानमजापालं तथा गोरसविक्रयः।।४४।।

सर्वदा वर्जनीयानि ब्राह्मणैर्यत्नपूर्वकम्।
तथैव विजयायां च विजयोत्सवखेलनम्।।४५।।

सरायेत्यभिधा यात्रा राजप्रासादसंस्थितैः।
सोत्सवैर्हषभरितैः सर्वराशिजनैः कृता।।४६।।

तुलसीरामपुत्रोऽभून्माधवो बहुविश्रुतः।
अस्य पुत्रास्त्रयो जाताः पन्थिवंशविवर्द्धकाः।।४७।।

यज्ञमूर्तिरभूज्ज्येष्ठः श्रीकृष्णो मध्यमस्ततः।
कनिष्ठ ईश्वरीनामा त्रयो माधवनन्दनाः।।४८।।

यज्ञमूर्तिसुतौ जातावुभौ स्वकुलरक्षकौ।
अग्रजः केशवो भ्राता लक्ष्मीनारायणोऽवरः।।४९।।

केशवस्य सुतौ जातौ द्वावेव कुलरक्षकौ।
रुक्माङ्गदस्ततो वेणीमाधवश्चापरोऽभवत्।।५०।।

रुक्माङ्गदसुतौ जातौ द्वौ थुमालीतिसञ्ज्ञकौ।
एकः पुण्यप्रसादोऽस्ति भ्राता नारायणोऽपरः।।५१।।

वेणीमाधवपुत्रास्तु चत्वारः कुलवर्द्धकाः।
रामचन्द्रो युवराजो लोकनाथश्च ठाकुरः।।५२।।

लक्ष्मीनारायणसुताश्चत्वारः कुलरक्षकाः।
जीवलालस्तथा द्रोणाचार्यो दुर्गा नरेन्द्रकः।।५३।।

जीवलालसुताः सन्ति षट्सङ्ख्याका इमे समे।
जगन्नाथो रश्मिराज ईश्वरी कृष्णनामकाः।।५४।।

गोविन्दो रघुनाथश्च षडेते कुलवर्द्धकाः।
द्रोणाचार्यसुताः सन्ति चत्वारस्त इमे पुनः।।५५।।

हेमराज ईश्वरी च हरिभोजौ तथापरौ।
दुर्गाप्रसादपुत्रोऽस्ति बाबुरामः स एकलः।।५६।।

त्रयः पुत्रा नरेन्द्रस्य महेश्वरखगेश्वरौ।
चक्रपाणिरिमे जाताः सर्वे पल्लाघरेऽभिधाः।।५७।।

श्रीकृष्णपुत्राः सप्तासन् सर्वे पण्डितपूर्वकाः।
विश्रुतो ढुण्ढिराजोऽभूदुमानाथश्च तत्सुतः।।५८।।

सुविश्रुतो रुरुक्षेत्रे संस्कृताध्यापकोऽभवत्।
गण्डकीगौरवं काव्यमनेन लिखितं मधु।।५९।।

गण्डकीवैभवं यस्मिन् प्राप्यतेऽतिमनोरमम्।
वैभवं रामनाम्नोऽपि हृषीकेशाष्टकान्वितम्।।६०।।

गण्डकीगौरवं कर्ता पुत्रादिरहितोऽप्ययम्।
विख्यातो भविता तेन किमन्यैर्बहुभिः सुतैः।।६१।।

उपलस्यानुसन्धाने देवतामुपलब्धवान्।
चरिष्णुर्गण्डकीतीरं भ्राजिष्णुरभवत् कविः।।६२।।

गण्डकीगौरवाख्यातृशालग्रामशिलार्चकः।
उमानाथः स्वयमपि गण्डकीगौरवायितः।।६३।।

गण्डकीगौरवाख्यातिर्यत्कृतिः काव्यरूपिणी।
तयैव जीवन् भविता 'कीर्तिर्यस्य स जीवति'।।६४।।

भ्रातास्य भोजराजोऽपि तत्रैवाध्यापकोऽभवत्।
भोजराजसुताः सन्ति चत्वारस्त इमे पुनः।।६५।।

दीनानाथो लक्ष्मणश्च रामो विष्णुश्चतुर्थकः।
कनीयान् हेमराजोऽस्ति ढुण्ढिराजसुतोऽपरः।।६६।।

जनार्दनो रामराजो हेमराजसुतावुभौ।
जनार्दनो मध्यमोऽभूच्छ्रीकृष्णस्य सुतोऽपरः।।६७।।

अपरो युवराजोऽभूद् घनश्यामपदः परः।
अन्यो नारायणोऽप्येवमृषिरामस्तथापरः।।६८।।

परः श्रीकृष्णपुत्रोऽभूज्जागेश्वर इति श्रुतः।
जनार्दनसुतोऽनन्तरामशर्मा स एकलः।।६९।।

गोविन्दरामौ द्वौ पुत्रौ यस्याऽऽसाते तथाविधौ।
युवराजसुतो मेघराजः कण्ठेति विश्रुतः।।७०।।

तत्सुतोऽस्ति घनश्यामो गणेश इति विश्रुतः।
घनश्यामसुतो विष्णुप्रसादोऽस्ति स एकलः।।७१।।

तत्सुतो लालजी नामाऽऽसीदेकस्त्रिदिवं गतः।
नारायणसुतश्चैक आसीद्धनेश्वराभिधः।।७२।।

एकलोऽसौ विरक्तोऽभूद् भक्त्या वृन्दावनं गतः।
वृन्दावने वसन्नासीद् ब्रह्मचारी दिवं गतः।।७३।।

ऋषिरामः साधुशीलः संस्कृताऽध्यापकोऽभवत्।
ऋषिरामसुताः पञ्च विख्याता अभवन् समे।।७४।।

युवराजो गुणनिधिः प्रेमखेमौ ततश्छविः।
युवराजोऽभवज्ज्येष्ठः संस्कृताध्यापकः पटुः।।७५।।

युवराजसुताः सन्ति त्रय एते तथाविधाः।
मदनो माधवो रामो नामान्ते राजसञ्ज्ञकाः।।७६।।

कुलधर्मं पालयन्तो रक्षयन्तः स्वगौरवम्।
गुणनिधिः सुचतुरः समाजस्य सुधारकः।।७७।।

आसीदस्य सुताः सन्ति त्रयो नारायणादयः।
दिलीपो मध्यमो बद्री कनिष्ठः पितृवल्लभाः।।७८।।

प्रेमराजसुतश्चैको भीष्मराजोऽपि तादृशः।
खेमराजसुताः सन्ति त्रय एते तथाविधाः।।७९।।

गोविन्दो रामकृष्णश्च मधुसूदनसञ्ज्ञकः।
कनिष्ठश्छविराजस्तु ऋषिरामसुतोऽपरः।।८०।।

वाराणस्यां पठन्नासीद्देहं त्यक्त्वा दिवं गतः।
जागेश्वरसुताः सर्वे चत्वारश्चतुरा इह।।८१।।

रामकृष्णौ प्रसादान्तौ हरिरेकस्तथाविधः।
उपेन्द्रश्च कनिष्ठोऽभूज्जागेश्वरसुता अमी।।८२।।

द्वौ सन्तोषसरोजौ स्तो रामपुत्रौ क्रमादमू।
कृष्णप्रसादस्य पुत्रास्त्रयो जाताः क्रमादमी।।८३।।

ज्येष्ठोऽस्ति माधवो मध्यो विनोदः केशवोऽवरः।
हरिप्रसादपुत्रस्तु सुदीपो नाम केवलः।।८४।।

उपेन्द्रस्य सुतो जातः प्रसिद्धो नाम नामतः।
श्रीकृष्णपुत्रपौत्राद्या एते तल्लाघरेऽभिधाः।।८५।।

ईश्वरी नामकश्चान्य आसीन्माधवपुत्रक:।
सञ्जातास्तत्सुता: पञ्च तेषां सन्ततितन्तव:।।८६।।

लिख्यन्ते प्रथम: शोभाकरोऽभूत् तत्सुतावुभौ।
कुलप्रसाद: प्रथमश्चत्वारस्तत्सुता इमे।।८७।।

ज्येष्ठ: पशुपतिश्चान्यौ मध्यमौ विष्णुयादवौ।
कनिष्ठ: शम्भुरित्येते चत्वार: कुलतन्तव:।।८८।।

शोभाकरसुतश्चान्यो रामेश्वर इति श्रुत:।
तत्सुतो विष्णुनामास्ति ज्ञायते वंशबान्धवै:।।८९।।

अन्य: शोभाकरभ्राता दामोदर इति श्रुत:।
युवराजहेमराजगोविन्दा इति तत्सुता:।।९०।।

युवराजस्य द्वौ पुत्रौ तौ मुकुन्दमहेन्द्रकौ।
पठन्नाधुनिकीं विद्यां मुकुन्दोऽस्ति चिकित्सक:।।९१।।

शोभाकरानुजश्चान्यो नारायण इति श्रुत:।
गोकर्णस्तत्सुतश्चैक: पौरोहित्ये कृतादर:।।९२।।

शोभाकरानुजश्चान्यो गङ्गाधर इति श्रुत:।
चत्वारोऽस्य सुता जाताष्टीकारामस्तथाऽपरे।।९३।।

उमानाथश्च तिलक: काशीनाथ इमे त्रय:।
शोभाकरानुज: पद्मप्रसादोऽन्योऽस्ति तत्सुत:।।९४।।

दुर्गेति नाम्ना जानन्ति सर्वे पन्थिकुलोद्भवा:।।
एते बुढाघरे प्रोक्ता ईश्वरीपुत्रपौत्रका:।।९५।।

सर्वे माधवसन्ताना: सुखिन: सन्ति निर्भया:।
धुरकोटं विहायाद्य मध्यदेशं गता अहो!।।९६।।

अन्ये भिरकटेरीस्था बर्दवासस्थितास्तथा।
दाद्राबडाचौरभवा भन्भने संस्थिता अपि।।९७।।

सन्त्येव तेषां नामानि मया विज्ञाय साम्प्रतम्।
लिखितानि न सर्वेषां नान्यथा वक्तुमर्हथ।।९८।।

### (ग) तम्घासभवाः

वाग्लापूर्वं गतः कश्चित् परमानन्दवंशजः।
नवनामान्तर्गतो हि कूटस्थः पुरुषो भवेत्।।९९।।

माझकोटस्थले तस्य वंशवृद्धिरजायत।
एते किसानकेरुङ्गाछत्रगङ्गादिके स्थले।।१००।।

सन्त्येव कश्चित् तद्वंश्यो लक्ष्मणो वाससारणात्।
गोपालनादिकार्यार्थं ऋष्यशृङ्गाश्रमं गतः।।१०१।।

गुल्मीमण्डलमध्यस्थां रेसुङ्गाशैलसन्निधिम्।
उपत्यकामलङ्कृत्य ग्राम आस्तेऽतिसुन्दरः।।१०२।।

पूर्वं तमो वास आसीदधुना ज्योतिरागतम्।
तमसो मा ज्योतिरिति घोषयद् वेदडिण्डिमम्।।१०३।।

रेसुङ्गाश्रमतीर्थस्थोपत्यकां समधिष्ठितम्।
ग्रामं लोका वदन्ति स्म नामापीत्थं पुरा श्रुतम्।।१०४।।

'तम आस तमो वासस्तमासस्तत्र गम्यते।
तमोवासस्तत्र वासस्तंवास उष्यतेऽधुना'।।१०५।।

इत्थमुक्त्वा समायातैर्दृष्टा घासा जनैर्भृशम्।
ततस्तं घासमाश्रित्य वसन्तस्ते समागताः।।१०६।।

यातायातं प्रकुर्वन्तो जनास्तम्घास अब्रुवन्।
असतस्तमसो नाशः सज्ज्योतिरधुनाऽऽगतम्।।१०७।।

किसाननामकग्रामात् तम्घासमेत्य लक्ष्मणः।
अध्युवास ससन्तान ऋष्यशृङ्गाश्रमान्तिके।।१०८।।

लक्ष्मणात् सिद्धिनाथोऽभूत् कृष्णानन्दस्ततोऽभवत्।
तस्माद् भागीरथो जातो यजुर्वेदप्रपाठकः।।१०९।।

उधिन्दुगाभिधो ग्रामस्तम्घासोत्तर भागगः।
भागीरथोऽवसत्तत्र सन्तत्यस्तस्य विस्तृताः।।११०।।

अष्टौ जाताः सुतास्तस्य पन्थिवंशप्रवर्द्धकाः।
ज्येष्ठोऽस्ति छविलालो हि वैदिकः कुलनायकः।।१११।।

छविलालसुता जातास्त्रय एव हि वैदिकाः।
चिन्तामणिर्बुद्धिरामो मुक्तिराम इमे त्रयः।।११२।।

चिन्तामणेः सुतो नास्ति चत्वारो बुद्धिरामजाः।
भेषराजः परानन्दो जगन्नाथश्च मोतिराट्।।११३।।

एते सपुत्रपौत्राद्या सन्ति वंशप्रवर्द्धकाः।
कुलधर्मं पालयन्तो बन्धुबान्धवसंयुताः।।११४।।

मुक्तिरामसुतश्चैकष्टीकारामोऽभवत् सुधीः।
यस्योत्पत्तिरभूदग्निनवाङ्केन्दुमिते (१९९३) शुचौ।।११५।।

वेदवेदाङ्गशास्त्रज्ञो भाषाव्याकरणादिके।
समीक्षणे सुचतुरो विद्यावारिधिभूषितः।।११६।।

कुशलोऽस्तीह नेपाले विश्वविद्यालयेऽपि च।
प्राध्यापनेऽतिकुशलः शिक्षाध्यक्षचरस्तथा।।११७।।

प्राज्ञः प्रज्ञाप्रतिष्ठाने संलग्नः कुशलः सुधीः।
राज्ञाऽभिनन्दितो राष्ट्रसम्मान्यो गुणवेदिभिः।।११८।।

स्पष्टवक्ता सुचरितो निर्लोभः कुलभूषणः।
रुचिराख्यानसंयुक्तकथाकाव्यादिलेखकः।।११९।।

नेनेपालोऽश्रूपहारः सुधर्मा मङ्गलग्रहः।
रुरुवृत्तं तथा बुद्धस्मरणं कृतयोऽस्य षट्।।१२०।।

भाषासंस्कृतिसम्बन्धिसमीक्षाभूमिकादितः।
जनश्रुत्याख्यानकानां टीकारामोऽस्ति भावकः।।१२१।।

काष्ठमण्डपमागत्य वसतां पन्थिनामपि।
सेवासमाजो घटितो रसवाणखलोचने।।१२२।।

अनेनैव समाजेन मुनिबाणखलोचने।
वैक्रमेऽब्दे ह्यसौ विद्वान् वाक्पुष्पैरभिनन्दितः।।१२३।।

सभायां प्रमुखो धीमान् बडागुरुमहोदयः।
केसरीराजपाण्डेयोऽभिनन्दनसमर्पकः।।१२४।।

एषा वाक्पुष्पमालान्या पाणिनीयपुरस्कृतौ।
परिशिष्टे१० प्रस्तुतास्ति टीकारामकरार्पिता।।१२५।।

भागीरथस्यान्यपुत्रः कृपारामोऽपि वैदिकः।
आसीत्तद्देहजाताः षट्पुत्राः वंशविवर्द्धकाः।।१२६।।

छविलालो डिलारामो गुणाकरस्ततोऽपरः।
कृष्णरामो बलरामो देवीदत्त इमे हि षट्।।१२७।।

ज्येष्ठोऽस्ति छविलालो हि गजाधर इति श्रुतः।
अस्य पञ्चाभवन् पुत्राः पद्मपाण्यादयो हि ते।।१२८।।

टीकारामविश्वनाथगङ्गाकेदारसञ्ज्ञकाः।
पुत्रपौत्रयुताः सन्ति सर्वे बन्धुजनप्रियाः।।१२९।।

गुणाकरस्य द्वौ पुत्रौ डिल्लीशालिकसञ्ज्ञकौ।
द्वावेव पुत्रपौत्रादियुतौ स्वकुलरक्षकौ।।१३०।।

कृष्णरामस्यैकपुत्रो रामचन्द्रोऽभवत् स हि।
सुतद्वयसमेतोऽस्ति कुलधर्मप्रपालकः।।१३१।।

बलरामात्मजौ देवराजदीनौ सहात्मजैः।
कुलधर्मं रक्षयन्तावासाते बन्धुभिर्वृतौ।।१३२।।

कृपारामसुतश्चैको देवीदत्तः सुविश्रुतः।
यो दीर्घजीवनं प्राप्य सुकृतं कृतवानहो!।।१३३।।

ज्योतिर्वित् पण्डितो धीमान् शीलसौजन्यमूर्तिमान्।
सज्जनः सरलः साधुस्वभावः सज्जनप्रियः।।१३४।।

विनम्रः सर्वकार्येषु मितभाषी स्मिताननः।
वैदिको धर्मकार्येषु संलग्नः पितृपूजकः।।१३५।।

परोपकारे सन्नद्धः परनिन्दापराङ्मुखः।
निर्मत्सरः सुसन्तुष्टः समशीलः सनातनी।।१३६।।

देव्या दत्तो यथा देवीदत्तो लोचनवल्लभः।
अजातशत्रुरेवासीत् हितैषी हितकारकः।।१३७।।

वैक्रमे नगशैलाङ्कभूमिते (१९७७) वत्सरे मधौ।
जातः सामाजिकीं सेवां वितरन् स्वीयजीवने।।१३८।।

ज्योतिषाद्वैतविद्यां च पुस्तकागारमादिकाम्।
आत्मनो दीर्घमायुष्यं लब्ध्वैकं विश्रुतं सुतम्।।१३९।।

वैक्रमे भूरसव्योमनेत्राब्दे (२०६१) मासि फाल्गुने।
पितृलोकं गतो धन्यः शेषः कीर्तिकलेवरः।।१४०।।

देहवन्तः पुण्यवन्तः सन्तः कुर्वन्ति सत्कृतिम्।
असद्देहविनाशेऽपि सत्कीर्तिरवशिष्यते।।१४१।।

दीर्घजीवनमेवापि दुष्कृताल्लघुजीवनम्।
लघुजीवनमप्यत्र सुकृताद्दीर्घजीवनम्।।१४२।।

देवीदत्तसुतश्चैकः शशीनाम्ना सुविश्रुतः।
रेसुङ्गापदपूर्वस्य विद्यापीठप्रवर्तकः।।१४३।।

चारु सञ्चालयन्नास्ते प्राचार्यपदभूषितः।
किरणपुस्तकालयो ह्यनेन परिचालितः।।१४४।।

कृत्वा समाजसेवाञ्च वरीवर्ति ह्यसौ शशी।
ज्ञानालोकैर्जन्मभुवं यथाशक्त्या प्रकाशयन्।।१४५।।

अस्य पुत्रः कोविदोऽस्ति तं को वेत्तीति नामकः।
विद्याधनार्जने लग्नः किशोरवयसोऽधुना।।१४६।।

विद्याविनयसम्पन्ने तस्मिन् लोकहितैषिणी।
मतिरायातु तं सर्वे विदन्तु कोविदं जनाः।।१४७।।

लक्ष्मणस्यान्यपुत्राणां पुत्रपौत्रादयस्तथा।
उपल्लो तमघासस्था ग्रामान्तरगता अपि।।१४८।।

तेषां नामान्यविज्ञाय लिखितान्यधुना न हि।
भागीरथान्यात्मजानामपि सन्ततितन्तवः।।१४९।।

सन्ति तेषां च नामानि ह्यविज्ञातानि साम्प्रतम्।
इह नोट्टङ्कितानि स्युरवधेयं बुधैरिति।।१५०।।

माझकोटभवाश्चान्ये किसानग्रामसम्भवाः।
केरुङ्गाछत्रगञ्जस्थाश्चिदिकाग्रामवासिनः।।१५१।।

अड्गुरीपालिवास्तव्या वामरुकघमीरगाः।
ग्रामान्तरस्थिताः सर्वे मध्यदेशं गता अपि।।१५२।।

पालपामण्डलान्तःस्थाः काष्ठमण्डपमागताः।
लम्जुङ्मण्डलवास्तव्याः पन्थिनो बान्धवाः समे।।१५३।।

मयानुरुद्धाः कार्येऽस्मिन् हार्दिकं सूचयन्तु माम्।
यतः शाखाप्रशाखाभिर्वर्द्धतां वंशपादपः।।१५४।।

भिन्नस्थानं सङ्गताः पूर्वजास्ते
तद्वंश्या ये पन्थिनो बन्धुवर्गाः।
भारद्वाजा गोत्रमेकं समेषा-
मस्मद्वंश्या वंशशाखोद्भवास्ते।।१५५।।

* *

# परिशिष्टम्

# परिशिष्टम् १

स्वपरिचयसन्दर्भे परिशिष्टेऽधिसूचितम्।
मित्रेण फणिना तस्मै प्रदत्तं पत्रमीदृशम्।।

⁂

श्रीमते ते सतीर्थ्याय मित्राय विदुषे मम।
लक्ष्मीकान्ताय कान्ताय नमः सम्बन्धिनेऽनिशम्।।१।।

विश्वविद्यालयस्यैको योग्यः ख्यातोऽपि शिक्षकः।
सहपाठी सखा मान्यो लक्ष्मीकान्तोऽस्ति मे भवान्।।२।।

अयि! स्मरति चात्रैव यापितानि दिनानि किम्?
वत्स्यामः सखिभिः सार्द्धं पठिष्यामः सहैव भो!।।३।।

गुरूणां ममता दिव्या मित्राणामादरास्तथा।
निश्चिन्ततायुताः सर्वे ते हि नो दिवसा गताः।।४।।

पङ्के वसति मण्डूकः पङ्काद् भवति पङ्कजम्।
इतोऽपि लब्धविद्यस्त्वं राजधान्या हि पङ्कजम्।।५।।

क्व भवान् बुधवर्यवन्दितः कविवर्येषु सभाजितः सुधीः।
मम मित्रमिदं मुदेऽस्ति मे कवितालब्धसुपारितोषिकः।।६।।

क्व महाविपिनेन सन्निभे कृतसद्मा नगरे गरायिते।
सरिता परिखीकृतेऽत्र वै निवसामीड्य! सदारदारकः।।७।।

गुणशीलधनैः सदा च्युतः श्रुतिशास्त्रैः कवितादिभिस्तथा।
उदरम्भर एव सन्ततं निजवृत्यर्थमहं चरामि भो!।।८।।

सुहृदस्ति ममेति सत्कृतः प्रभुणा निर्धनरूपभूषणः।
स्वसखा स सुदामविश्रुतस्त्वमवेह्यार्य! तथैव मामपि।।९।।

कविताकरणे कुधीः कथं कृतकान्तारकदाश्रयः किल।
कमनीय! कथं कृपाकरं कलयामि क्व नु कीर्तय क्रमात्।।१०।।

सततं शिशुशब्दसञ्चयश्लथितः सज्जनसङ्गसुत्यजः।
समयं सभयं समापयं शृणु शौरेः शरणं समाश्रये।।११।।

इति वच्मि रुदन् तथापि मे भ्रमतीभ्येषु मनो निरन्तरम्।
किमहं करवाणि भो! वृथा खलु लोकद्वयमेति निष्फलम्।।१२।।

तव पत्रसुधारसं मुदा निपिवामीह च दिष्टलम्भितम्।
त्वयि पत्रमिदं लिखाम्यहं सुरवाण्यां न हि दर्पतः कवे!।।१३।।

सुरवाक् स्मरणापि द्रुतं नरिनर्त्यार्य! मनो मयूरकम्।
अनयैव गिरा ददाम्यतस्तव पत्रोत्तरमद्य भो सखे!।।१४।।

त्वमवेहि निरायणं हि मां 'फणिनारायणशर्म' नामकम्।
अत एव नरायणं परं खलु नारायणमीश्वरं भजे।।१५।।

क्व नु नौ खलु सङ्गमो भवेन् निगदिष्याम इमाः प्रियाः कथाः।
सततं हृदये स्थितोऽस्ति मे तव चित्तेऽपि तथा भवान्यहम्।।१६।।

यानारूढो जिगमिषति यः पत्रवाहे वृतोऽस्ति।
'शीघ्रं शीघ्रं कुरु' भणति मां पत्रलेखाय लग्नम्।
ज्ञानाभावादथ च समयाऽभावतः सन्ति दोषा
हार्दं भावं स्वसखिकथितं पत्रपुष्पं गृहाण।।१७।।

भवतो हि गुणाञ्चिचीषता
फणिनारायणशर्मणा किल।
लिखितं प्रथमं हि पत्रक-
मिदमत्रैव मया विरम्यते'।।१८।।

❊ ❊

# परिशिष्टम् २

जयतु संस्कृतं धर्मभूतये
जयतु संस्कृतं लोकभूतये।
जयतु संस्कृतं राष्ट्रभूतये
जयतु संस्कृतं विश्वभूतये।।

## जयतु संस्कृतम्

## सपुरस्कारमभिनन्दनपत्रम्

(२०६३)

लब्धानेकस्नातकोत्तरोपाधीनां वेद-वेदान्त-धर्मशास्त्र-साहित्याद्यनेकविषय-महार्णवावगाहिनां संस्कृत-नेपाली-हिन्दी-प्रभृतिभाषाविज्ञानां कविता-कामिनीविलासव्यसनिनां विविधपुरस्कार-विद्याभूषण-भूषितानां सततं सुरभारतीसेवा-समासक्तानां परमास्तिकानां सत्यधर्म-दृढव्रतानां परमनैष्ठिकानां पन्थिवंशविभूषणानां विद्वद्धौरेय-महाकविभीमकान्तनीलमायाङ्गजनुषां विद्वन्मण्डलप्रसृत-यशसां कविशिरोमणि-लेखनाथ-विरचितसुप्रसिद्ध-ऋतुविचार-काव्यस्यानुवादकानां श्रीमल्लक्ष्मीकान्तपन्थी-महाभागानां करकमलयोर्जयतु संस्कृतं नाम्नीयं संस्था 'जयतुसंस्कृतपुरस्कार'सहितं सादरं समभिनन्दति–

गुल्मीमण्डलविश्रुते सुखकरे सस्याढ्यशैलावृते
धुर्कोटस्थलमध्यभागवितते वाग्लाबडाचौरके।
जन्माऽऽसाद्य हि भीमकान्ततनयाः श्रीनीलमायासुताः
लक्ष्मीकान्तबुधोत्तमाः सुकवयः शोभायमाना इह।।१।।

विद्याऽऽलोकविभासिताः सहृदयाः संस्कावह्न्युज्ज्वलाः
शास्त्राध्यापनलेखचिन्तनपराः सत्काव्यसेवारताः।
काव्यानामनुवादकर्मकुशला विश्लेषणे तत्पराः
शास्त्रानेकविचक्षणाः कुशलिनः प्राध्यापकाः सूरयः।।२।।
विद्यावारिधयः स्मिताननधनाः सद्धर्मनिष्ठाव्रताः
विद्याभूषणभूषिताः सुकृतिनः सम्मानिताः सत्कृताः।
पन्थीवंश-सुदीपकाः सुचरिताः सैद्धान्तिका नैष्ठिकाः
श्रद्धेयाः कविपण्डिताः प्रतिपदं वः संस्मरामो वयम्।।३।।
नानाग्रन्थमहोदधिप्रणयिनो वेदान्ति-साहित्यिकाः
वन्द्याः शास्त्रविचारकाव्यकवितालेखादिचिन्तारताः।
नैपाल्याः सुरवाचिवर्णनविधौ पारङ्गताः कोविदाः
सत्काव्यैर्विविधैः सतां नयनयोर्नृत्यन्ति नित्यं हि-ते।।४।।
काव्ये संस्कृतशुभ्रभावभरिते वो मानसं मोदते
काव्यानामनुवादकर्मकुशला वो लेखनी शोभते।
वारं-वारमनेकलेखरचनैः सम्पूरिताः पत्रिका
युष्माकं धिषणाऽमला सुविशदाऽस्माभिस्सदाऽऽकर्णिता।।५।।
ग्रन्थानामनुवादकर्मसु यदा सम्प्रेषिता लेखनी
रम्या 'प्राकृतपोखरा' समभवद् गीर्वाणवाणीमयी।
नैपाल्यामृतुवर्णनात्मकतया ख्यातिङ्गतं सुन्दरं
काव्यं चापि विनिर्मितं सुरगवि प्रेम्णा यशोवर्द्धकम्।।६।।
'ऋतुविचार'काव्यस्य सुन्दरं सुमनोहरम्।
समवृत्तादिसम्पूर्णमनुवादं सलक्षणम्।।७।।
प्रसमीक्ष्य मुदाऽस्माभिर्भवतामभिनन्दनम्।
परितोषिकसंयुक्तं भवद्भ्योऽत्र समर्प्यते।।८।।

| | |
|---|---|
| ...................... | ...................... |
| विदुरः पौडेलः | हेमराजो ज्ञवाली |
| प्रमुखातिथयः | अध्यक्षाः |

दिनाङ्काः – संवत् २०६४ आषाढस्य प्रथमदिवसे शुक्रवासरे शुभं भूयात्।

## परिशिष्टम् ३

# पन्थिसेवासमाजः

सुरसरस्वतीसमाराधनया समेधितशाश्वतमूल्यानां कामक्रोधादिषड्रिपुविजय-
भीमानां भगवद्भक्तिलीनानां गुरुत्वेनाचार्यत्वेन निर्णायकत्वेन सनातन-
संस्कृतिसंरक्षकत्वेन च सकललोककान्तानां ध्यानसमाधिसाक्षात्
कृतभगवत्साम्राज्यप्रान्तानां देवीप्रसादाधिगतपारदर्शिवैदुष्यजुषां
श्रीमद्देवीप्रसादजनुषां गुरुकुलपरम्पराया मूर्तावताराणां निगमा-
ऽगममर्मज्ञानां निगमागमनिर्दिष्टभगवद्रहस्यविज्ञानां समधिगत-
पुमर्थानां पाणिन्यादिविविधपुरस्कारसभाजितानां वीणा-
वादिनीहृदयहाराणां चेतोहारिकवितासर्जकानां समर्जित-
जगदम्बिकाजगदीश्वरवैभवविभवानां पन्थिवंश-
वैभवानां भीमाऽभिधसदाशिवाराधनया कान्त-
रूपाणां श्रीकृष्णवल्लभानां महर्षिकल्पानां
भीमकान्ताभिधानां विद्वद्रत्नानां
करकमलयोः सश्रद्धं
समर्पितमभिनन्दनपत्रम्–
(२०५७)

लुम्बिन्यञ्चलमध्यस्थगुल्मीमण्डलमण्डने।
ध्रुवकूटबडाचौरे सम्भूतं शास्त्रकोविदम्।।१।।

पौराणिकसुधीदेवीप्रसादतनयं कविम्।
सद्भक्तभूषणं भद्रं विद्वद्रत्नं गुणार्णवम्।।२।।

विद्याप्रचारकं विद्यासाधकं विद्ययोज्ज्वलम्।
विद्याविदितविद्येशं ब्रह्मविद्याविभूषितम्।।३।।

नेपालगौरवं वन्द्यं श्रौतसंस्कृतिसौरभम्।
सदाचारैर्विचारैश्च पावनैर्लोकवन्दितम्।।४।।

गणेशगुरुगायत्रीगङ्गागोविन्दगायकम्।
कवीनां विदुषां भद्रजनानां भुवि नायकम्।।५।।

जगदम्बावैभवञ्च जगदीश्वरवैभवम्।
महाकाव्यद्वयं येन प्रणीतं भावनोज्ज्वलम्।।६।।

रचितानां विभिन्नेषु क्षणेषु जीवने निजे।
विविधानां च पद्यानामावलिः कवितावलिः।।७।।

तमसः परमं ज्योतिरसत्यात् परमं च सत्।
मृत्योरप्यमृतं यस्य गमयित्री प्रकाशते।।८।।

महाकविं भीमकान्तं समाजः पन्थिनामकः।
समर्पयन् पुरस्कारमभिनन्दति सादरम्।।९।।

| ........................ | ...................... | .......................... |
| --- | --- | --- |
| केशरीराजः पाण्डे | ढुनराजः पन्थी | डा. मुकुन्दः पन्थी |
| प्रमुखातिथिः | सचिवः | अध्यक्षः |
| सम्माननीयाः | पन्थिसेवासमाजः | पन्थिसेवासमाजः |
| 'श्री६बडागुरुमहाभागाः' | | |

इति संवत् २०५७ वैक्रमाब्दे आषाढमासे ३१ गते शनिवासरे शुभम्।

# परिशिष्टम् ४

वेदोऽखिलो धर्ममूलम्

हिन्दुसंस्कृतिपरिपोषकाणाम् सनातनधर्मरक्षाव्रतिनाम्
नैकविद्याविचक्षणानाम् विपश्चिदपश्चिमानाम्
पाणिनिपुरस्कारेण सभाजितानाम्
महाकवीनाम् पन्थीत्युपाह्वानाम्
पं. भीमकान्तशर्ममहोदयानाम्
सादरमभिनन्दनपत्रम्
(वि. सं. २०५६)

श्रीनारायणगण्डवाहितटिनी श्रीगण्डकीकूलगे
भारद्वाजकुलेऽमले स्नु बहुले गुल्मीस्थले निश्छले।
सञ्जातो ध्रुवकूटखर्वटमलङ्कुर्वन् कविः कोविदः
सम्मान्यो गुणवेदिभिः सहृदयैः श्रीभीमकान्तोऽधुना।।१।।

महाकाव्यद्वय्या सह लघुकृतीः पद्यभरिता
मनीषिभ्यो दत्वा प्रभवति भवाँल्लोकमहितः।
न सीमा स्याद् देश्या न समयभवा वा भवतु सा
भविष्यत्कालः स्यान्निरवधिरहो भावुकहृदे।।२।।

सञ्चाल्यैवं गुरुकुलमथाध्यापयन्नैकशिष्यान्
सौम्यं मार्गं श्रुतिपथदिशा शाश्वतं योऽददर्शत्।
अभ्रान्तोऽसौ विदितसदसद्वस्तुजातोऽथ दान्तः
शान्तोऽन्तेवासिजनमहितः साधु सम्माननीयः।।३।।

ध्यायं ध्यायं प्रकृतिसुलभं सत्यमार्षं गुणौघं
पाठं पाठं कृतिषु निहितं भाषिकं सौष्ठवं वा।
पायं पायं सरसमधुरं काव्यपीयूषमेवं
स्मारं स्मारं सुमति-सुगती किन्नु सर्वे विमुग्धाः।।४।।

विलक्षणं काव्य-कला-कलाप-कलन-क्षमम्।
विद्या-भीमं काव्य-कान्तमभिनन्दाम सद्‌बुधम्।।५।।

.....................................
डा. केशरजङ्गरायमाझीः
सभापतिः
राजपरिषद्‌स्थायीसमितेः

..........................
अच्युतराजरेग्मीः
अध्यक्षः
नेपालराष्ट्रियसमितेः
विश्वहिन्दु-महासङ्घस्य

इति श्रीसंवत् २०५६ वैक्रमवर्षीयस्य चैत्रमासस्य त्रिंशगते
रामनवम्यां बुधवासरे शुभम्।

# परिशिष्टम् ५

## महाकविः श्रीबुधभीमकान्तः

(२०५५)

शान्तैकान्तनितान्तरम्यविषये गुल्मीस्थले श्यामले
रेसुङ्गासविधेऽत्र पन्नगनदीकूलेऽतिरम्ये स्थले।
ओषध्यः खनयो लसन्ति शकुना वासन्ति शान्ता मृगाः
शुद्धे वायुजले प्रसन्नमखिलं दिङ्मण्डलं दृश्यते।।१।।

तन्मध्ये ध्रुवकूटमण्डल'बडाचौरा'भिधेखर्वटे
शाके रामयुगद्विपेन्दुमिलिते वैशाखमासेऽसिते।
पञ्चम्यां बुधवासरेऽजनि बुधः श्रीभीमकान्तः कवि-
र्माता नन्दकुमारिका किल पिता देवीप्रसादः सुधीः।।२।।

काले वर्षति वारिदः कृषिगणा नम्रा जनन्यां क्षितौ
स्निग्धा बन्धुजना नताः परिजना मित्राणि भद्राणि वै।
गावश्चारु चरन्ति गोचरवने गर्जन्ति सत्पुङ्गवा
अत्रैवार्षपरम्परा हिमवतः कैलासतः स्थायिनी।।३।।

वृक्षा नम्रशिखा लताः परिवृता देवाः सदा पूजिताः
निर्वैरा मनुजाः पठन्ति वटवो जागर्ति विद्यालयः।
भारद्वाजकुलं चरित्रधवलं लक्ष्यं हि विद्यार्जनं
अत्रोत्पन्न उदारधीः कविवरः श्रीभीमकान्तो बुधः।।४।।

वंश-प्राप्त-परम्परा-परिधृता निश्शुल्कशिक्षाकृता
अत्राद्यापि कृतज्ञमानवगणो भीमार्चको भ्राजते।
शान्तो दान्त उदारमानसकविः शिष्टः स्वकीयैर्गुणैः
काव्यं चारु चमत्कृतं सुललितं भावैर्गभीरं महत्।।५।।

जगदम्बावैभवञ्च जगदीश्वरवैभवम्।
महाकाव्यद्वयं दिव्यं तथान्याः कविताः शतम्।।६।।

यो लिखित्वाऽचरत् पूजां देव्या देवस्य चात्मनः।
अभिनन्दति तं सन्तं योगी नरहरिः कविम्।।७।।

(जगदम्बिकावैभवकाव्ये विविधपद्यावल्यां च प्रकाशितं अभिनन्दनम्)

❋ ❋

# परिशिष्टम् ६

## जगदम्बिकावैभवकाव्यस्य मुद्रणे द्वितीयावृत्तौ प्रकाशितम्

(२०५५)

उपचर्चितवाक्यविस्तरः प्रथमावृत्तिगतोऽवगम्यताम्।
इदमन्यप्रकाशनं पुनर्विदतो मे प्रभवेन्न मुद् हृदि।।१।।

क्रयिकैर्ग्रहणादवक्रयैरुपहारादपि चाद्यवत्सरे।
अवसायमितान्यहो दशशतसङ्ख्यप्रतिरूपकाणि हि।।२।।

कविकर्म कियन्महत्त्ववज्जगदम्बामहिमा च कीदृशः।
इति चाद्यप्रकाशनान्तकृद्दशमासावधिना निवेदितम्।।३।।

सरसा मधुरा जगत्प्रसूपरिचेयोच्चगुणानुदर्शिनी।
पुनरर्थनयोदिता किमु न रुचिष्या कृतिरेषिका भवेत्।।४।।

सहृदयेन गणेन विपश्चितामधियता मृदु काव्यमधीयता।
अपरिमेयशरद्गणसम्मितो रसमयः समयो गमयिष्यते।।५।।

कविवरेऽविवरे वचसि प्रभौ
सहृदया हृदयानि दधेमहि।
कवितयाऽवितया रसिकात्मसु
नवसुधा वसुधातल आप्यताम्।।६।।

विजयताममरी जननी सदा
विजयताममरी च सरस्वती।
विजयतां जगदम्बिकयाऽऽश्रितं
सरसकाव्यमिदं चिरमायतौ।।७।।

दिष्टेऽनिष्टे कलिकलुषिते वित्तकामप्रधाने
तृप्ताहृष्टाश्च वयमधुना काव्यमीदृक् पठित्वा।
विश्रूयेत श्रुति-पथ-चलत्पन्थिवंशावतंसो
धन्यो मान्यो भुवि मुनिसमो भीमकान्तः कवीन्द्रः।।१।।

पूर्वे सन्तो हिमनगवहन्निम्नगाकूलवासा
हृद्यं काव्यामृतमधुरसं विश्वमर्त्यानपीप्यन्।
निष्प्रत्यूहां विरतिरहितां स्थापयन् रीतिमेतां
ध्यात्वा कृष्णं कवयति कविः कोविदो भीमकान्तः।।२।।

**– डा. टीकारामपन्थी**

# परिशिष्टम् ७

## अभिनन्दनपत्रम्

(२०४३)

श्रीमत्सु प्रथितेषु पञ्च पितृषु ख्यातोऽस्ति जायापिता
तस्यैव श्वशुरस्य चाग्रज इतो वन्द्यो भवान् मे सदा।
भारद्वाजकुलाचले रविनिभः प्रेष्ठो भवान् दीप्तिमान्
विद्वद्वृन्दशिरोमणिर्विलसति स्वान्ताद्धि तुभ्यं नमः।।१।।

श्रीमत्कृष्णपदाब्जसौरभसुधास्वादालसालिर्भृशं
श्रीमत्तन्मुखचन्द्रवीक्षणरतश्चेतश्चकोरीकृतः।
तस्य श्रीरसिकेश्वरस्य कृपया युष्मच्छुभाशीर्गिरा
विद्येऽहं कुशली लभेय भवतः पत्रोत्तरं सत्वरम्।।२।।

धीमाञ्छ्री भीमकान्तो जयति कविमहाकाशगेष्वर्क एकः
वृद्धो ज्ञानेन साकं जगति निजवयोरंहसा ख्यातनामा।
अष्टानामात्मजानामतिशयगुणिनां जन्मदं धातृकल्पं
नित्यं पूज्यं भवन्तं पितरमनुदिनं भीमकान्तं नमामि।।३।।

जिज्ञासे शास्त्रभानो! विधिविषयमहं ते बुभूषामि शिष्यः
सुश्रूषे ते मुखाब्जादतिशयमधुराः सूक्तिवाचो मनोज्ञाः।
शङ्का लोके च शास्त्रे मनसि मम भृशं सन्ति ताः सञ्जिहीर्षु-
र्याचे कालं हि किञ्चिन्मिलतु तव कृपा प्रार्थयामीड्य! नित्यम्।।४।।

पठितसकलशास्त्रो ज्ञानविद्योतितात्मा
भगवति कृतचित्तो विद्यते भीमकान्तः।
दिशि दिशि परिचर्चा श्रूयते ते हि नूनं
ननु कथय कदाहं दर्शनं प्राप्नुयां भो!।।५।।

पठितसकलशास्त्रस्त्वत्समीपेऽस्ति बालः
पठितदुरितमिथ्योदन्त एषोऽस्मि बालः।
त्रुटिरिव शिशुवाण्यां जायते कौ मनोज्ञा
वितरतु मुदमेवं श्रीमतां मेऽद्य वाणी।।६।।

'मुक्ता-मनोहरकथा-सरिता'प्रसङ्गात्
मायाटवीषु रमतेऽनुदिनं सुलग्नम्।
चेतः स्वशास्त्रविषये भगवत्कथायां
धित्सामि नैव किमपीड्य! कियाननर्थः।।७।।

नेनीयते मन इदं हि मया वृथैवं
सद्भिर्विगर्हिततमेषु च लोकगीःषु ।
दन्दह्यते निपतितस्य ह्यसत्कथाभिः
संस्मर्यते तदनु कौ गुणवान् भवान् वै।।८।।

पुत्रस्य ते गुणवतः सहपाठिनो मे
मोमुह्यतां खलु मनो ननु बालवाण्याम्।
अज्ञातवृत्तनियमस्य च शुद्धताया
दोषान् क्षमस्व कवितासु समाहितान् मे।।९।।

शास्त्रेषु धार्मिकविधौ फणिरेष बालः
काव्येषु शुद्धकविताकरणेऽप्यशक्तः।
शास्त्रार्णवं भुवनभास्वरभास्करं तं
श्रीभीमकान्तमभिनन्दति शब्दपुष्पैः।।१०।।

असच्छास्त्रसंसक्तचेता भृशं हि
सुदूरः स्वशास्त्रीयपीयूषपानात्।
अहं ज्ञानशून्योऽस्मि खिन्नोऽस्मि विद्वन्!
विशोचन् हि तातप्यते मे मनोऽद्य।।११।।

अदास्यद् भवान् मां यदि ज्ञानपुञ्जं
निजान्तःस्थितध्वान्तपुञ्जं न्वहास्यम्।
अलप्स्ये सुधां चेद् भवत्काव्यरूपा-
मचेखित्स्य इत्थं न काव्ये कदापि।।१२।।

अयि! पितस्तव दर्शनलालसा भवतु नाम कथं परिपूरिता।
न हि कदाप्यभवत्तव सङ्गमो मम मनोऽतितरामिह दूयते।।१३।।

आचार्योऽसाविति गदति मां प्राप्तपत्रप्रमाणं
नाहं जाने किमपि गहनं शास्त्रतत्त्वं विचित्रम्।
आत्माऽऽलोको न भवति यतः किं प्रमाणैर्मदीयै-
स्तत्त्वार्थं त्वामत इति गृणन् शीघ्रमेवानुरुन्धे।।१४।।

भवच्छास्त्रार्कात् कौ समधिगतधामात्र सततं
यवीयाँस्ते भ्राता विधुरिव मनः प्रीणयति नः।
कदार्कं त्वां लब्ध्वा परिहृतमहामोहतमसो
वयं खद्योताः कौ कथय सफलाः स्याम नितराम्।।१५।।

सूर्यं सर्वजनः सदा सुमनसा सच्छ्रद्धया सेवते
सूर्यो वेत्तु कथं चराचरजगन्नाम्ना सदाकाशगः।
तद्वच्छास्त्रदिवाकरं कविवरं जानीमहे त्वां वयं
सम्पर्काय सुबोधनाय च भवान् सम्प्रार्थ्यते पत्रतः।।१६।।

कालिदासभवभूतिसुबन्धुहर्षबाणभरतादिकवीन्द्राः।
व्यष्टितां खलु निजां परिहायरूपमेतदलभन्त तवाद्य।।१७।।

दृश्यते तव कृतौ च तथैव तस्य तस्य हि कवेः प्रतिमत्वम्।
देववागमृतपानसुरेशं त्वां दिदृक्ष इह चार्यगुणेशम्।।१८।।

निजसंस्कृतिरक्षणव्रती स्वगुणालोकचकाशितावनिः।
कविता-वनिता सुनर्तकः कतमोऽन्यस्त्वदृतेऽद्य लभ्यते।।१९।।

निगमागमचिन्तनोद्भवैः स्थविरोऽस्त्येव भवान् निजैर्गुणैः।
वयसा सममेव सर्वथा निरवच्छिन्नमतिर्विराजते।।२०।।

विषमे परिवारसागरासृतनक्रादिनिभे सुदुस्तरे।
पतितं वृजिनैर्निषूदितं दयया पत्रचयान्निबोधय।।२१।।

कलिकालकरालकौतुकैः कलितान्तःकरणः कुतार्किकः।
कमनीय! कथं कृपाकरं कलयामि क्व नु किन्नु केशवम्।।२२।।

भवतामनुजोऽत्र शेखरः कविवर्येषु च शेखरायते।
भवदीयविशिष्टसङ्गमात् कृतविद्योऽत्र विराजतेतराम्।।२३।।

भवदीयगुणैः सुभाषितैः सुचरित्रैश्च विभूषितादतः।
उपलभ्य सुभाषितानि वः वसुधायाममृतं निपीयते।।२४।।

भवतो हि गुणाञ्चिचीषता फणिनारायणनामकेन वै।
लिखितं प्रथमं हि पत्रकं प्रतिपत्रेभ्य इमं निबोधय।।२५।।

नितरां विकलानि बालकवचनान्येव हि वक्ति योऽस्फुटम्।
अतिहर्षकराणि हे गुरो! मम वाक्यानि तथा निशम्यताम्।।२६।।

कवितासु निजात्मभावना प्रकटीकृत्य निवेदयिष्यतः।
प्रतिभा रहितस्य मे शिशुप्रतिमस्यास्य वचांसि गृह्यताम्।।२७।।

क्व भवान् सुरगीःसुधार्णवः क्व नु चाहं मरुभूमिसन्निभः।
त्रुटये खलु बालभाषितमिति सम्प्रार्थ्य विरम्यतेऽधुना।।२८।।

प्रस्तोता– **फणिनारायणसिग्देलः**

# परिशिष्ट ८

## अभिनन्दनपत्रम्

(२०६४)

सुप्रसिद्धमुक्तिक्षेत्रसमुद्भूतकृष्णगण्डकीतटस्थगुल्मीमण्डलमण्डितानां, स्वजनुषा बडाचौरभुवमलङ्कुर्वाणानां, श्रीमद्देवीप्रसादजनुषां, गुरुकुलपरम्परया समधिगतवेदान्तविद्यानां, समाजसेवासँल्लग्नचित्तानां, स्तिमितोन्नतसञ्चाराणां, जनसन्तापहारिणां, लोकमतविश्वस्तानां, प्रजातन्त्रसंरक्षणैकव्रतानां, निस्वार्थसेवा-परायणानां, जनवल्लभानां, देश-शिक्षा-विकासरुचीनां रामायणमहाभारतादीतिहास-कथासाहित्यस्वाध्यायशीलानां, सत्साहित्यलेखकानां, वीणावादिनी-हृदयहाराणां, मनोहारिकवितासर्जकानां, पन्थिवंशगौरवाणां, अजातशत्रूणां, नीलाम्बराऽभिधानां, विद्वद्रत्नानां करकमलयोः सश्रद्धं समर्पितमभिनन्दनपत्रम्

शालग्रामनदीतटस्थितमहापुण्यस्थले यो भवान्
सञ्जातो धुरकोटमण्डलबडाचौराभिधे खर्वटे।
अध्यास्ते ह्यधुना तथागतपुरीं तां राजधानीं च य-
स्तं नीलाम्बरपन्थिनं नयविदं वन्दामहे सादरम्॥१॥

साहित्ये स्वकराष्ट्रवाग्विरचिते वेदान्तशास्त्रे च यो
लब्ध्वा वैधमुपाधिमन्यविषयान् स्वाध्यायतोऽधीत्य यः।
प्राजातान्त्रिकनव्यशासनविधौ निर्वाचने चादिमे
लोकैर्यो निरवाचि सांसदवरो नीलाम्बरं तं नुमः॥२॥

तस्मिँल्लौकिकशासने विघटिते कारां गतः षट्समाः
सप्ताब्दान् निरवास्यताऽथ विषयात् क्रूरेण तन्त्रेण यः।
वीपीमेलनयप्रवर्तनपरो बन्दीकृतोऽभूत् पुनर्
वर्षञ्चैकमहो! तपोनिधिममुं नीलाम्बरं संस्तुमः॥३॥

पञ्चायत्तविकल्पने बहुदले निर्वाच्यमाने पुनर्
लुम्बिन्यञ्चलनागरैर्बहुमतं सम्प्रापयन्नीतितः।
कारायां निहितः पुनश्च स भवान् सत्याग्रहान्दोलने
पञ्चायत्तनिरासनेऽन्तिममृधे योधं भवन्तं नुमः।।४।।

राणाशासननिर्गतौ हयमितान् यो हायनान् राष्ट्रिय-
सेवायां निरतोऽभवद् युगमितानब्दाँस्ततोऽध्यापकः।
जातो नैकदले स राट्रियसभासभ्यो हि वर्षद्वयं
प्राजातन्त्रिकवृन्दसङ्गतममुं जानीम आजीवनम्।।५।।

साहित्यं वा नयविदयनं संश्रयन् सर्वकालं
लोकान् योऽसेवत नु सततं तप्यमानाय तस्मै।
विद्वद्वर्याय हि नयविदग्र्याय नीलाम्बराय
वाक्पुष्पाणामुपहृतिरियं गुल्मिसेवासमाजात्।।५।।

| ............................ | ...................................... |
|---|---|
| सुशीलः कोइराला | कृष्णबहादुरश्छन्त्यालः |
| उपसभापतिः | अध्यक्षः |
| नेपाली काङ्ग्रेस | गुल्मी-काठमाडौँ सम्पर्कसमितिः |
| नेपाली काङ्ग्रेस | |

दिनाङ्काः – २०६४/४/१९

# परिशिष्टम् ९

## पन्थिसेवासमाज:

पदवाक्यप्रमाणमर्मज्ञानां सत्साहित्यरहस्यविज्ञानां समीक्षाशास्त्रविशारदानां शारदासत्पुत्राणां वाङ्मयमूर्तीनां दिग्दिगन्तस्फीतकीर्तीनां महेन्द्रसंस्कृतविश्व-विद्यालयीयशिक्षाध्यक्षपदमलङ्कृतवतां नेपालराजकीयप्रज्ञाप्रतिष्ठानस्य प्रज्ञापदवी-मलङ्कुर्वाणानां नेपालस्य मूर्द्धन्यविदुषां भुक्तये मुक्तये च सदाशिवाराध्यत्वम-ङ्गीकुर्वतां मुक्तिरामसूनूनां सनातनसंस्कृतिसौरभाणां पन्थिवंशगौरवाणां विद्या-वारिधीनां श्रीमतां टीकारामपन्थिमहानुभावानां करकमलयो: सश्रद्धं समर्पितम्–

## अभिनन्दनपत्रम्

(२०५७)

गुल्मीक्षेत्रे सुरमुनिनुते पन्थिवंशे भवन्तं
भद्रग्रामे प्रकृतिरुचिरे भद्रमेवाचरन्तम्।
प्रज्ञादीप्तं सुकृतिततिभिर्भारतीं सम्भजन्तं
टीकारामं नुम इह वयं पन्थिरत्नं भवन्तम्।।१।।

शिक्षाध्यक्षं पदमपि पुरा भूषितं येन भद्रै:
तैस्तै: कृत्यैर्बुधजननुतै: प्रौढवैदुष्यदीप्तै:।
सा माहेन्द्री कृतिरुपकृता विश्वविद्यालयाख्या
शिक्षा-दीक्षासफलजनुषं हे गुरो! त्वां स्मराम:।।२।।

नेनेपालं रुरुसुचरितं भौमकाव्यं सुधर्मा
भव्यं बुद्धस्मरणमहितं काव्यरत्नं प्रदाय।
सा गैर्वाणी त्रिभुवननुता मोदिता येन वाणी
टीकारामाभिधमिहकविं श्रद्धयाभ्यर्चयाम:।।३।।

नैपालानां प्रखरविदुषां मौलिरत्नं विशिष्टं
टीकारूपं सरसकविताकामिनीभालसंस्थम्।
प्रेष्ठं प्राज्ञं कविजननुतं गीष्पतिं राष्ट्रवन्द्यं
टीकारामं वयमिह नता वाक्सुमैर्नन्दयाम:।।४।।

नेपालीवाग् विविधकृतिभिर्भूष्यते येन सत्यं
सा दैवीवाक् पदनिगमनैः पूज्यते येन नित्यम्।
पन्थिन्! सर्वे समकुलभवा: पन्थिनो भावनम्रा:
वाक्पुष्पं ते करकमलयोः श्रद्धया स्वर्पयाम:।।५।।

| ........................ | ........................ | ........................ |
| --- | --- | --- |
| केसरीराज: पाण्डे | ढुनराज: पन्थी | डा. मुकुन्द: पन्थी |
| प्रमुखातिथि: | सचिव: | अध्यक्ष: |
| सम्माननीया: | पन्थिसेवासमाज: | पन्थिसेवासमाज: |
| 'श्रीबडागुरुमहाभागा:' | | |

इतिश्री संवत् २०५७ वैक्रमाब्दे आषाढमासे ३१ गते शनिवासरे शुभम्।

# काव्यमालिका

रचयिता

**डा. लक्ष्मीकान्तः पन्थी**

प्रकाशकः

**किरण-पुस्तकालयः**

तम्घास, गुल्मी

# काव्यमालिका

*डा. लक्ष्मीकान्तः पन्थी*

**प्रकाशक** : किरण-पुस्तकालयः, तम्घास, गुल्मी
**प्रथम संस्करण** : २०७५ (सन् २०१८)
© **सर्वाधिकार** : प्रकाशकमा
**टाइप सेटिङ** : सृजन गृह

नेपालमा मुद्रित

**KAVYAMALIKA**

by Dr. Lakshmi Kanta Panthi

ISBN: 978-9937-0-4938-2

# प्रकाशकीय

किरण पुस्तकालयले 'हाम्रो पुरुषार्थ'-का अतिरिक्त विगत समयमा पनि आफ्नो शक्तिअनुसार केही पुस्तकहरू प्रकाशन गर्दै आएको कुरा पाठकहरूलाई थाहा भएकै छ।

यो वर्ष किरण पुस्तकालय स्थापना भएको हिसाबले स्वर्ण जयन्ती वर्ष पर्न आएको हुँदा यो अवसरमा तीन वटा पुस्तक प्रकाशन गरेर पुस्तक प्रकाशनको परम्परा कायम राख्ने उद्देश्यअनुरूप संस्कृतका विद्वान् एवम् नेपाली विषयका सहप्राध्यापक भएर सेवानिवृत्त भएका डा. लक्ष्मीकान्त पन्थीद्वारा विरचित 'काव्यमालिका' नामको पुस्तक प्रकाशन गर्ने निर्णयमा किरण पुस्तकालय पुगेको हो।

प्रस्तुत 'काव्यमालिका'-भित्र पाँच वटा कवितासङ्ग्रह रहेका छन्। तिनमा 'जीवनदर्शनम्' फुटकर कविताहरूको सँगालो हो। अरू चार वटा सानासाना खण्डकाव्यात्मक कृतिहरू हुन्। यस 'काव्यमालिका'-भित्र सङ्गृहीत सबै कविताहरू संस्कृतमा विरचित छन् तापनि वर्तमान सामाजिक परिप्रेक्ष्यमा बहुसङ्ख्यक पाठकहरूलाई संस्कृत कविताहरूको अर्थ बुझ्न सजिलो होस् भन्ने विचारले तीन जना स्वनामधन्य विद्वान्हरूद्वारा लिखित भूमिकाबाट यस सङ्ग्रहभित्रका प्रायः सबैजसो कविताहरूले बताएको विषय बोध गराइएको छ। पाठकहरूलाई बुझ्न सजिलो होस् भन्ने हेतुले संस्कृतमा लिखित भूमिकालाई नेपालीमा रूपान्तर पनि गरिएको छ। साथै अङ्ग्रेजीमा पनि सङ्क्षिप्त जानकारी गराइएको छ।

हामीले देखेका, सुनेका, जानेका र बुझेका विषयलाई समेटेर लेखकले संस्कृत भाषामा प्रस्तुत गर्नुभएका कविता पढ्दा अझै पनि संस्कृत भाषा हाम्रो समाजको अभिन्न भाषा हो जस्तो लाग्छ। हुन पनि जन्मेदेखि लिएर मृत्यु संस्कार गर्दासम्म र व्यवहारमा पनि पात्रो हेरेर साइत वा लग्न जुराई काम गर्ने

परम्पराले संस्कृतलाई नजिकैबाट हामी देख्छौँ। सानोतिनो पूजाआजादेखि लिएर सप्ताह पुराण सुन्दा पनि संस्कृतमा यस्तो रहेछ भन्ने, विश्वास गर्ने र मान्यता दिने हाम्रो प्रचलन रहेकै छ। कुनै एक कविले लेखेका पनि छन्–

यानेव शब्दान् वयमालपामो
यानेव शब्दान् वयमुल्लिखामः।
तैरेव विन्यासविशेषभव्यैः
सम्मोहयन्तः कवयो जयन्ति।।

[व्यवहारमा हामीले जेजस्ता शब्दहरू बोल्छौँ र लेख्ने गर्छौं तिनै शब्दहरूलाई मिलाएर कविले पनि कविता लेखेका हुन्छन्। परन्तु कविताहरू पढ्दा विशेष राम्रा लाग्छन् र हामीलाई आकर्षित गर्छन्। त्यसैले त कविहरू समाजमा विशिष्ट हुन्छन्।]

अत एव डा. लक्ष्मीकान्त पन्थीद्वारा विरचित कवितासङ्ग्रह एवम् खण्डकाव्यहरू पढेर-बुझेर पाठकहरूले पनि धेरै लाभ लिनुहुने छ भन्ने विश्वासमा किरण पुस्तकालय रहेको छ। नेपाली विद्वान्हरूद्वारा विरचित संस्कृत साहित्यको भण्डारमा थप हुन आएको यस कृतिले भविष्यमा अवश्य पनि महत्त्वपूर्ण स्थान प्राप्त गर्ने छ भन्ने विचारमा किरण पुस्तकालय रहेको छ। आफ्नो अमूल्य रचना हामीलाई प्रकाशनार्थ दिनुभएकोमा यसका रचनाकार एवम् कवि डा. लक्ष्मीकान्त पन्थीजीलाई विशेष धन्यवाद अर्पण गर्दै किरण पुस्तकालय उहाँप्रति आभार प्रकट गर्दछ।

*स्वर्ण जयन्ती वर्ष, २०७५*

# काव्यमालिकां प्रति मदीया दृष्टिः
# (काव्यमालिकाप्रति मेरो दृष्टि)

१. गीर्वाणवाण्यां जगदम्बिकावैभव-जगदीश्वरवैभव महाकाव्यद्वयस्य विविधपद्यावलिनामकसंस्कृतकवितासङ्ग्रहस्य च रचयितुर्मदग्रजवरस्य विद्वज्जनाग्रगण्यस्य पं. भीमकान्तशर्ममहोदयस्य पुत्रेण त्रिभुवन- विश्वविद्यालयस्य सहप्राध्यापकेन विद्यावारिधिपदालङ्कृतेन महेन्द्रविद्याभूषणादिलब्धविविध-पारितोषिकेन लक्ष्मीकान्तपन्थिना भ्रातृव्येन रचिता काव्यपञ्चकग्रथिता काव्यमालिका मयाऽवलोकिता। अस्यां काव्यमालिकावाटिकायां प्रथम-श्चतुरुन्मेषविटपविभक्तश्चतुरशीत्यधिक-शतशीर्षकस्तवकैः परिपूर्णो जीवनदर्शन-नामको द्विसहस्राऽधिकपद्यपुष्पविकसितः स्वशब्दवारिधाराभिषिक्तोपवन-पुस्तकपादपः सम्यगवलोकितो मया। तत्र अनुष्टुभ्मन्दाक्रान्ता-स्रग्धराशिखरिणी-मालिनी-वियोगिनीन्द्रवज्राशार्दूलविक्रीडितमित्याद्यनेकच्छन्दः पत्रप्रयोगैः सुशोभितो दृश्यतेऽनुष्टुभो बाहुल्यं च वर्तते।

जीवनदर्शनस्य रचयितुः कवेर्लक्ष्मीकान्तस्य केषु केषु विषयेषु वात्सल्यं वर्तते तथा कुत्र प्रतिभास्फुरणमस्तीत्यादिदर्शनं कारयत्यस्माद्दृशान् पाठका-ञ्जीवनदर्शनम्।

ऋतुविचारस्य प्राकृतपोखरायाश्च नेपालीकाव्यद्वयस्य संस्कृतच्छायानुवाद-दर्शनाच्छायानुवादे विदग्धता तु प्रागेव ज्ञाताऽऽसीत्। विभिन्नच्छन्दःसु पद्यगुम्फन-सामर्थ्यमपि जीवनदर्शनदर्शनाज्ज्ञातमधुना।

प्रथमतो जीवनदर्शनं कीदृशं काव्यमस्तीत्यपि अस्यैव कवेरस्मिन्नेव जीवनदर्शने काव्यमिति शीर्षके लिखितया काव्यपरिभाषया विचार्यते।

*१. संस्कृत भाषामा 'जगदम्बिकावैभव' र 'जगदीश्वरवैभव' नामक दुई महाकाव्यका प्रणेता मेरा दाजु पं. भीमकान्त पन्थी विद्वान् जनमा अग्रगण्य हुनुहुन्छ। उहाँले संस्कृत भाषामै 'विविधपद्यावलि' नामक कवितासङ्ग्रहको*

*रचना पनि गर्नुभएको छ। यस्ता महाकवि भीमकान्तका सुपुत्र मेरा भतिजा लक्ष्मीकान्त पन्थी त्रिभुवन विश्वविद्यालयमा सहप्राध्यापक छन्। उनी विद्यावारिधि उपाधिबाट अलङ्कृत छन् एवम् महेन्द्र विद्याभूषण आदि पदकबाट विभूषित छन्। उनले रचना गरेको 'काव्यपञ्चक'-युक्त काव्यमालिका भन्ने कृति मैले पढेँ।*

*यो 'काव्यमालिका' एउटा वाटिका हो। यस वाटिकामा पहिलो वृक्ष 'जीवनदर्शन' नामको रहेको छ जसमा चार उन्मेषरूपी हाँगा छन्, १८४ भन्दा बढी शीर्षकरूपी गुच्छाहरू सजिएका छन्, २,००० भन्दा बढी श्लोकरूपी फूलहरू सुशोभित छन्; यस्तो कविका शब्दरूपी शीतल जलधाराले सिञ्चित काव्यरूपी वृक्षलाई मैले राम्ररी अवलोकन गरेँ। यसमा अनुष्टुप्, मन्दाक्रान्ता, स्रग्धरा, शिखरिणी, मालिनी, शालिनी, वियोगिनी, इन्द्रवज्रा, शार्दूलविक्रीडित आदि अनेक छन्दरूपी सुमनोहर पातहरू छन्। विशेषत: अनुष्टुप् छन्दको बहुलता देखिन्छ। 'जीवनदर्शन'-का रचयिता कवि पन्थीको दार्शनिकता एवम् कविप्रतिभाको दर्शन गराएको छ यस कृतिले। कसरी पन्थी छायानुवाद गर्न खप्पिस छन् भन्ने कुराको पुष्टि त उनले गरेको 'ऋतुविचार' र 'प्राकृत पोखरा'-को सफल संस्कृत अनुवादबाटै जगजाहेर छ। विभिन्न छन्दमा सुन्दर कविता गाँस्न पनि कवि पन्थी कुशल रहेछन् भन्ने कुरा उनको 'जीवनदर्शन' पढेपछि जानियो।*

*प्रथमत: 'जीवनदर्शन' कस्तो काव्य हो भन्ने बुझ्न कविको यसै काव्यकृतिमा समाविष्ट 'काव्यम्' शीर्षकमा विरचित कविता हेरौँ–*

किं काव्यं किमकाव्यं स्यात् परिभाषा कथं भवेत्।
कविकर्म भवेत् काव्यं यद्वा काव्ये कथा भवेत्।।१।।

गद्येऽपि कथया काव्यं भवतीत्यनुशुश्रुम।
कथां विनापि पद्ये तु काव्यं कविकृतं भवेत्।।२।।

कथया तु भवेत् पद्यकाव्यं तच्छ्रुतिसुन्दरम्।
गद्ये तु कथया हीनं काव्यं न भवतीत्यत:।।३।।

"कविता छन्दसा व्यक्ता सरसा गुणसंयुता।
मनोरमा रमा तुल्या सदाऽऽनन्दा सुखावहा।।४।।

सुरम्यपदविन्यासैरलङ्कारैरनुत्तमैः।
गुणभावरसैराढ्या नारीव कविता भवेत्।।५।।
सरसं कोमलं रम्यमिहामुत्र विचारितम्।
सश्लेषं सार्थकं काव्यं लघुवृत्तानुसार्यपि।।६।।"

२. अनयैव परिभाषया ज्ञायते यदेतज्जीवनदर्शनमपि काव्यायितमेवेति। अत्र काव्ये जीवनदर्शनं प्रस्तुतमस्ति। प्रायोऽसमस्ताभिः सरलपदावलीभिर्गुम्फितेऽस्मिन् जीवनदर्शनकाव्ये कवेर्लक्ष्मीकान्तस्य वैदुष्यविशेषो दृश्यते। यथा–

*२. यस कविताबाट के बुझिन्छ भने कविले आफ्नो जीवनसम्बन्धी दर्शनलाई काव्यात्मक शैलीमा प्रस्तुत गरेका छन्। प्रायः असमस्त र सरल-सरस पदावलीले युक्त यस काव्यमा कवि पन्थीको विद्वत्ता एवम् बौद्धिकताको प्रदर्शन भएको छ। जस्तै–*

भूयान्नित्यानित्यवस्तुविवेकस्य समुद्भवः।
संसारासारतां बुद्ध्वा कुर्याज्जीवनदर्शनम्।। ('मङ्गलम्' श्लोकः ६)

३. अनेकस्थानेषु कविलक्ष्मीकान्तपन्थिनः प्रतिभास्फुरणं वैदुष्ययुतं लभ्यते। उपनिषदि गीतायां ब्रह्मसूत्रे च दृष्टानि ब्रह्मविषयकवाक्यानि समुच्चार्य स्वं वेदान्तविदं दर्शयितुकामान् ज्ञानशून्यान् वेदान्तिब्रुवानुद्देश्य कविना लक्ष्मीकान्तपन्थिना शब्दार्थौ ब्रह्म इत्यस्मिन् शीर्षके रचितो रोचकः समीचीनः श्लोक एतादृशो वर्तते। यथा–

*३. अनेक ठाउँमा कवि पन्थीको प्रतिभा र विद्वत्ताको मिलन भएको देखिन्छ। उपनिषद्, गीता र ब्रह्मसूत्रमा देखिएका ब्रह्म विषयक वाक्यहरू उठाएर कविले 'शब्दार्थौ ब्रह्म' शीर्षकको कविता रचना गरेका छन्। उक्त कवितामा आफूलाई वेदान्तविद् ठान्ने तर थोपो ज्ञान नभएका वेदान्ती भनाउँदाहरूप्रति कविले कटाक्ष गरेका छन्। यस कवितामा रहेको एउटा श्लोक कति रोचक र मनमुग्धकारी छ, हेरौँ–*

तत्तत्तेनाथ तस्मै तत इति क्रमशस्तस्य तस्मिन् विभक्तौ
शब्दार्थे ब्रह्मबोधेऽव्ययमपि कुत इत्यादिशब्दैर्निरस्तम्।
सोऽहं ब्रह्मास्मि किन्ते कथयति किमु वा तत्त्वमेवासि शब्दं
शब्दार्थं ब्रह्म बुद्ध्या सकृदपि स नरो ब्रह्मबोधेऽसमर्थः।।१।।

४. एतादृशं कठिनमद्वैतब्रह्मविषयमपि सरलसरसभाषया संस्मारयितुं समर्था अस्य कविताः सन्ति। यथा–

*४. यस्तो अद्वैत ब्रह्मजस्तो कठिन विषय पनि सरल-सरस भाषामा सम्झाउन सक्ने कविकौशल स्तुत्य छ। जस्तै–*

रामो रामं च रामेण तथा रामाय तत्परम्।
रामाद्रामस्य रामे हे राम चाष्टविधो न किम्?।।४।।
विभक्तिभ्यो विभक्तेऽस्मिन् रामे सगुणता भवेत्।
सोऽहं ब्रह्म तत्त्वमसि वाऽयमात्माऽस्ति निर्गुणे।।५।।
व्यवहारे स नैकोऽस्ति स एकः पारमार्थिके।
विभक्त्युपाधौ पुरुषे यथैकस्मिन्ननेकता।।६।।
तत् तेन तस्मै तत् तस्मात् तस्य तस्मिन् विभाजिते।
एकोऽपि बहुधा भाति पितृजामातृमातुलैः।।७।।
एकः शिवो व्यापकोऽस्ति नैके जीवात्मनि स्थिते।
सूर्यबिम्बो भाति यथाऽनेकस्थालीजले बहु।।८।।

५. इत्याद्यनेकान् सरलपदगुम्फितान् सरसभावयुतान् बहुशः पद्यसमूहान् दृष्ट्वा शीघ्रमेव स्वपितेव संस्कृतभाषायां महाकाव्यं रचयितुं समर्थो भविष्यति कविर्लक्ष्मीकान्तपन्थीति मन्ये। जीवनदर्शनस्य श्रीकृष्णार्पणमस्तुनामके पद्यबन्धे–

*५. यस्ता अनेकौँ सरल पदावलीले गाँसिएका, सरस र भावनाले भरिएका धेरै कविताहरू देखेर चाँडै नै आफ्ना पिताजीले झैँ यिनले पनि संस्कृत भाषामा महाकाव्य लेख्न सक्ने छन् भन्ने मलाई लागेको छ। हेरौँ उनको 'श्रीकृष्णार्पणमस्तु' नामक कविताका सुन्दर पद्यहरू–*

श्रीकृष्णार्पणमस्तु वाक्यमुदितं यद्यन्मया स्वाननात्
सत्यं तद्रहितं हिताहितकरं यद्वा प्रियं वाप्रियम्।
तस्यार्थान्तरमस्तु कृष्णनमनं तत्प्रार्थना पूजनम्
नो जाने मम जीवने कतिविधं वाक्यं समुच्चारितम्।।८।।
श्रीकृष्णार्पणमस्तु यत् प्रपठिताः पाठा गुरोः सन्निधौ
ज्ञातार्था न तथाऽथवा गुरुजनैः संशोध्य सम्बोधिताः।
काव्ये व्याकरणेऽथवाऽमरकृतौ बोध्यस्तदर्थो मयि
कृष्णे भक्तिकरो भवेत् स हि यतः शास्त्रैकगम्यो महान्।।९।।

श्रीकृष्णार्पणमस्तु नेत्रविषयीभूता यथेष्टं मम
आ शृङ्गादधिसागरान्तरगता भूमेः प्रदेशाः कति।
ग्राम्या नागरिका भवन्तु वनजा कृष्णस्य यात्रोत्सवै
रम्यैर्मन्दिरमूर्तिभिर्विजयिनः कृष्णेन पूर्णं जगत्।।१०।।
श्रीकृष्णार्पणमस्तु बाहुचरणैर्यत्राऽऽक्रमो मेऽभवत्
सर्वः कृष्णमहोत्सवे भवतु तत् सार्थः समर्थोऽपि च।
कृष्णार्थं मम वक्त्रदृग्भुजपदैर्यद्यत्कृतं कारितं
तत् सर्वं मनसा निवेदितमहो कृष्णोऽस्ति सर्वं मम।।११।।

६. एतादृशानां पद्यानां पठनात् कवेर्भगवन्तं श्रीकृष्णं प्रति भक्त्युद्रेकस्तु दृश्यत एव, प्रसङ्गेऽस्मिन् शिवमानसपूजाविधौ भगवत आद्यशङ्कराचार्यस्यैष श्लोकः स्मृतिपथमायाति।

*६. यस्ता पद्यहरू पढ्दा कविको भगवान् श्रीकृष्णप्रतिको भक्तिभाव त देखिन्छ नै, यसै प्रसङ्गमा आद्य शङ्कराचार्यको 'शिवमानसपूजाविधि'-को यो श्लोक स्मृतिमा आउँछ–*

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत् कर्म करोमि तत् तदखिलं शम्भो तवाराधनम्।।

७. एवमेव शङ्कराचार्यस्यैव परचित्स्वरूपाया भगवत्याः स्तवनविषयमधिकृत्य विरचितस्य सौन्दर्यलहरीकाव्यस्यैष श्लोकोऽपि स्मृतिपथमायाति।

*७. यस्तै यस सन्दर्भमा शङ्कराचार्यकै परब्रह्मस्वरूपिणी भगवतीको स्तवन विषयमा आधारित भएर रचिएको 'सौन्दर्यलहरी' काव्यको यो श्लोक पनि सम्झनामा आउँछ–*

जपो जल्पः शिल्पं सकलमपि मुद्राविरचना
गतिः प्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः।
प्रणामः संवेशः सुखमखिलमात्मार्पणतया
सपर्यापर्यायस्तव भवतु यन्मे विलसितम्।।

८. कविना लक्ष्मीकान्तपन्थिना स्वकीयजन्मस्थानीयानां बडाचौरग्रामोद्भवानां पितृपितामहादीनामपि सङ्क्षेपेण पितसूक्तनाम्ना पद्यबन्धेन परिचयो दत्तः। यथा–

*८. कवि लक्ष्मीकान्त पन्थीले आफ्नो जन्मस्थान बडाचौर गाउँका पितृ-पितामहहरूको परिचय 'पितृसूक्त' भन्ने कवितामा सुन्दर ढङ्गले दिएका छन्। जस्तै–*

पुराणसारं प्रसमीक्ष्य पारं सकामनिष्कामविचारभावम्।
काव्यद्वयं यो रुचिरं विलिख्य गतः सुधर्मां कवितां प्रवक्तुम्।।८।।
ततोऽपि देवेन्द्रसभां समेत्य काव्यद्वयं देवचरित्रचारु।
देवाँस्तथा देवगुरुं प्रदर्श्य योऽश्रावयत् स्वां कवितां सदर्थाम्।।९।।
कृतादरस्तत्र निवेशितेषु नैपालविद्वज्जनसंयुतेषु।
निषण्णके संस्थितवान् सुरम्ये ह्यग्रे कृतोऽयं विबुधैर्बुधैश्च।।१०।।

९. इत्यादिषु पितृवात्सल्याधिक्यमतीव दृश्यते। एवमेव कविना लक्ष्मीकान्तपन्थिना आत्मनः सपत्नमातरं प्रति लिखितयाऽनया कवितया सपत्नमातरं प्रत्यपि सद्भक्तिः दृश्यते।

*९. यी कविताहरूमा पितृवात्सल्यको अधिकता देखिन्छ। यस्तै कवि लक्ष्मीकान्तले आफ्नी सपत्नमाताप्रति सद्भक्ति देखाएर लेखिएको यो कविता पठनीय र मननीय छ–*

सदा मदीयास्तु सपत्नमाता मामेव पुत्रं मनुतां प्रसन्ना।
अहं तदर्थं जलमन्नवस्त्रं यथाभिलाषं रचयानि नित्यम्।।१।।

१०. अनेन कविना स्वपरिचयनाम्नि पद्यबन्धे स्वकीयजन्मभूमेर्बडाचौरग्रामस्य परिचयः सुष्ठु प्रस्तुतस्तथात्मनोऽपि सर्वविधपरिचयपूर्वकं व्याकरणादिशास्त्राध्यापकानां गुरूणां नामानि च प्रस्तुतानि। यथा–

*१०. कवि पन्थीले 'स्वपरिचय' नामक कवितामा आफ्नो जन्मभूमि 'बडाचौर' गाउँको सुन्दर वर्णन गरेका छन्, साथै आफ्नो परिचय दिँदै व्याकरण आदि शास्त्र पढाउने आफ्ना गुरुहरूको नामोच्चारण गरेका छन्। जस्तै–*

शब्दादिशास्त्राणि पितुः सकाशात् पुण्यप्रसादाद् युवराजतोऽपि।
श्रीपूर्णचन्द्राच्च हरिप्रसादाद् गङ्गाधराद्योऽधिगतो विशेषम्।।२०।।

११. एवं क्रमेण पं. भीमकान्त-शेखरनाथ-पुण्यप्रसाद-देवराज-युवराज-पूर्णचन्द्र-हरिप्रसाद-रामेश्वर-गङ्गाधर-शेषराज-खेमराज-दीर्घराज-शिवराज-हरिदेव-दुर्गाप्रसाद-बुद्धिसागर-टीकारामादिभ्योऽनेकगुरुभ्य: शास्त्राण्य-धीतवानहमित्यपि लिखितमेव। इत्थं रूपेण स्वपरिचयसन्दर्भे गुरूणां नामानि प्रस्तोतु: कवेर्गुरूणां प्रति सद्भावो दृश्यते तथानेन कविना गुरूणां प्रति विनयभावोऽपि कवितायां प्रकटितो दृश्यते। यथा–

*११. यसै क्रमले पं. भीमकान्त, शेखरनाथ, पुण्यप्रसाद, देवराज, युवराज, पूर्णचन्द्र, हरिप्रसाद, रामेश्वर, गङ्गाधर, शेषराज, खेमराज, दीर्घराज, शिवराज, हरिदेव, दुर्गाप्रसाद, बुद्धिसागर, टीकाराम आदि गुरुहरूबाट मैले शास्त्रहरू पढेँ भनी विनम्रतापूर्वक लेखेका छन्। यसरी आफ्नो परिचयका सन्दर्भमा गुरुहरूका नाम प्रस्तुत गरेर कविले गुरुहरूप्रति सद्भाव र विनयभाव प्रकट गरेका छन्–*

दन्तपङ्क्तिसमै: शुक्लैर्विद्याज्योत्स्नासमुज्ज्वलै:।
गुरुभि: शिक्षितो वक्ति रसनेव सुरक्षित:।।४४।।
तथा नाधीतविद्योऽयं यथाऽऽसन् गुरवो हि ते।
यत्किञ्चित् कर्तुमर्होऽद्य तद् गुरूणां प्रसादत:।।४५।।

१२. सोऽयं कवि: पितु: सकाशात् कैशोरकाले कथङ्कारं पाठमपठदित्येवं तज्जन्मभूमौ बडाचौरग्रामे यापितानां दिनानां संस्मरणं च कवितायामित्थं करोति। यथा–

*१२. यिनै कविले पिताको आज्ञाबाट कसरी पाठ पढे भन्ने र बडाचौर गाउँमा बिताएका दिनहरूको संस्मरणमा लेखिएका कविताले पाठकलाई भावुक बनाउँछ। जस्तै–*

पित्रा सार्द्धं ह्यनुदिनमसौ यत्र विद्यार्थिभिश्च
गोभिर्युक्तं सकलमहिषीचारणं कर्मपूर्वम्।
पाठं पाठं प्रणयभरितां व्याकृतिं सूत्रपूर्वां
कोषं काव्यं ससुखमरटद् यत्र शब्दार्थपूर्वम्।।१८।।
सानन्दास्ते मृदुलपवना बोधिवृक्ष: समीपे
क्रीडारम्यं विषमविरहं शाद्वलं स्थानमस्ति।
बाल्यावस्था सहचरगणैर्यापिता सौष्ठवेन
संस्मर्यन्ते जनिभुविगता यत्र रम्या दिनान्ता:।।१९।।

१३. अस्मिञ्जीवनदर्शने सङ्कलितेभ्यस्तेनैव रचितेभ्यो त्रिशतोत्तरसहस्रपद्य-रत्नेभ्यश्च ज्ञायते– कविरसावनेकविषयज्ञातेति। अस्य जीवनदर्शनस्य समाप्तौ कविनाऽऽत्मनः पितुः महाकवेर्भीमकान्तस्य संस्मारकानि पद्यानि लिखितानि तान्यत्र समुद्धरणीयानि। यथा–

*१३. 'जीवनदर्शन' कवितासङ्ग्रहमा सङ्कलित १३ सयभन्दा बढी सुन्दर कविताहरूबाट कवि अनेक विषयका ज्ञाता रहेछन् भन्ने बुझिन्छ। जीवनदर्शन काव्यको अन्तमा कविले आफ्ना पिता महाकवि भीमकान्तको स्मरणमा कविता लेखेका छन्। ती कविता यहाँ उल्लेखनीय छन्–*

वेदान्तादिकदर्शनेषु निपुणः साङ्गश्रुतौ पारगः
　　यो रामायण-भारतादिक-पुराणानां बुधो वाचकः।
साहित्याम्बुधिपारगः सुकृतकृत् सन्तः स्वतातोऽभवत्
　　स्वाचारान्वितवेषभूषिततनुः श्रीभीमकान्तो गुरुः।।१६४।।
सद्धर्मस्योपदेष्टा स्वयमपि सुकृती तत्कुलालङ्कृतिः सन्
　　विद्वानेष प्रवक्ता रुचिरपदकविः शास्त्रवित् काव्यकर्ता।
योऽन्येषां चोपकर्ता ग्रहफलकथनादायुरारोग्यवेत्ता
　　लोकैः सम्मानितोऽसौ विनयनयविधेर्मूर्तिकल्पो विपश्चित्।।१६५।।
भारद्वाजकुलावतंसमणिवद् योऽभूत् सतामग्रणीः
　　लोकैर्गीतगुणोऽर्थिभिः परिवृतो विद्यार्थिभिः संस्तुतः।
सर्वैर्माण्डलिकैर्बहुश्रुतजनैर्यत्पादपद्मार्चितम्
　　तस्यैतत् पदपद्ममस्तु सुखदं भूयात्तमोहारकम्।।१६६।।

१४. एवमेव काव्यमालिकावाटिकायां कविना लक्ष्मीकान्तेन भगवत्या महालक्ष्म्याः स्तवनविषयमधिकृत्य विरचितादपराल् लक्ष्मीवैभवकाव्यपादपादपि महालक्ष्म्याः प्रार्थनाविषये विशेषतोऽनुष्टुप्छन्दसि लिखितासु कवितासु महालक्ष्म्याः प्रसादरूपाणि (६९०) कविताफलानि सम्यगास्वादितानि। तासु कवितासु महालक्ष्म्याः पादादिवर्णनप्रसङ्गे कण्ठोर्ध्वभागस्य, मुखमण्डलस्य च वर्णने काश्चिदत्र समुद्धरणीयाः सन्ति। यथा–

*१४. यही काव्यमालिकारूपी वाटिकामा कवि लक्ष्मीकान्तले भगवती महालक्ष्मीको स्तुतिस्वरूप विरचित 'लक्ष्मीवैभव' नामक काव्यरूपी वृक्ष पनि रहेको छ। यसमा महालक्ष्मीको प्रार्थनासित सम्बद्ध अनुष्टुप् छन्दमा लेखिएका*

*कवितामा महालक्ष्मीको प्रसादस्वरूप ६९० श्लोकहरू रहेका छन्। ती कविताहरूमा महालक्ष्मीको पाउ आदिको वर्णन प्रसङ्गमा घाँटीभन्दा माथिको भागको र मुखमण्डलको वर्णनमा केन्द्रित केही कविता उद्धरणीय छन्। जस्तै–*

तिस्रो रेखा विराजन्ते ग्रीवायां तेऽतिशोभनाः।
सत्त्वं रजस्तम इति गुणाः श्लेषादयोऽपि वा।।७०।।
यद्वा कण्ठे सुशोभन्ते तिस्रो रेखाः सुमङ्गलाः।
छन्दांसि रीतयस्तिस्रो वृत्तयो वा चकाशते।।७१।।
सममर्द्धसमं तद्वद् विषमं त्रिविधं ततः।
त्रीणिच्छन्दांसि राजन्ते स्यन्दन्तेऽपि च कण्ठतः।।७२।।
गौडिवैदर्भिपाञ्चालिरीतयोऽप्यथ वृत्तयः।
अभिधालक्षणार्थान्या व्यञ्जनार्थप्रदायिकाः।।७३।।
तथैव कण्ठे ते मुक्ताहारमालाः सुशोभिताः।
मयानुमीयते सत्यमलङ्कारविशेषकाः।।७४।।
स्वच्छस्फटिकसङ्काशं त्वन्मुखादर्शवृन्तवत्।
त्वत्पित्रा लालितं रम्यं चिबुकं ते समुज्ज्वलम्।।७५।।
त्वन्मुखाम्भोजमुकुरं पश्यता विष्णुनाऽपि तत्।
गृहीत्वाऽऽत्ममुखच्छाया दृष्टा ते मुखदर्पणे।।७६।।
तवोष्ठबिम्बयुगलं सन्ध्यारुणिमरागितम्।
स्यातां विद्रुमवल्लीनां फले बिम्बफले न किम्।।७७।।
तवोष्ठमुकुले दृष्टे पक्वबिम्बफले इव।
ते फले विवृते दन्तफलान्तर्बीजमालिके।।७८।।
अहो! सुदति! ते दन्ताः कुन्दकुड्मलतूलिताः।
किमु ते दाडिमीबीजास्तत्रोदाहरणं भवेत्।।७९।।

१५. आभिः कविताभिः स्वकीयं वैशिष्ट्यं तु प्रकटितमेव। एतादृश-श्लेषपूर्णकवितापठनादनुमीयते यदयं कविः शुक्लवर्णां सरस्वतीं स्वहस्तेन नर्तयितुं शक्नोति। अथवा संस्कृते छन्दसि स्वमनोभावान् सहजतया प्रकटीकरोतीति।

*१५. यी कविताहरूमा कविको निजी विशेषता त प्रकट भएको छ नै। यस्ता श्लेषपूर्ण कविताहरू पढ्दा के लाग्छ भने कवि शुक्लवर्णा सरस्वतीलाई*

*आफ्ना हातले नचाउन सक्छन् अथवा कविले आफ्ना मनोभावहरूलाई सजिलै संस्कृत छन्दमा प्रकट गर्न सक्छन्।*

१६. एवमेवास्याः काव्यमालिकावाटिकायास्तृतीयः सारस्वतवैभवकाव्य-पादपोऽपि शाखाचतुष्टयात्मको नवीनरीत्या सरसं फलं प्रस्तौति। यस्मिन् रसनाग्रस्थितायाः सरस्वत्याः अरुन्धत्याः स्तवनरूपाणि सरसानि १०९ कविताफलानि फलितानि, तानि आस्वादितानि। यथा–

*१६. काव्यमालिका वाटिकाको तेस्रो काव्यवृक्ष 'सारस्वतवैभव' हो। यस काव्यवृक्षमा चार हाँगा छन्, ती हाँगाबाट कवितारूपी सरस फलहरू नवीन शैलीमा झर्छन्। यसमा जिभ्राको टुप्पामा रहने सरस्वती अरुन्धतीको स्तवन गरिएका १०९ सरस कवितारूपी फलहरू फलेका छन्, ती स्वाद लिन योग्य छन्। जस्तै–*

ये परेषां गुणानेव नित्यं शंसन्ति साधवः।
ते परैरपि शंस्यन्ते ह्यरुन्धत्या विचार्यते।।२२।।
विद्याविद्ये उभे ज्ञात्वा व्याहारं व्याहरन्ति चेत्।
विद्यया विनयोत्पत्तिः साधूनां सर्वथा भवेत्।।२३।। इत्यादयः...
यदि मिलति ममेष्टं स्वादु मिष्टान्नराशिं
वचनरचनमेकं स्वर्पये तुभ्यमेव।
त्वमपि मम सहायं कुर्वती नित्यमेव
परजनपरिवादान्निर्विशेषं करोतु।।२७।। (वाग्वैभवम्)
हृदयान्तःस्थितो भावः साधु वा स्यादसाधु वा।
गृहे समाजे संसारे प्रकटीक्रियते त्वया।।९।।
त्वयैवोच्चारितं वाक्यं श्रुत्वार्थो ज्ञायते ततः।
पश्चाद् बुद्ध्या विवेकेन सदसद् वा विविच्यते।।१०।। इत्यादयः...
अरुन्धति! त्वां समवाप्य लोके ते मानुषा धन्यतमा भवन्ति।
ये त्वद्गुणज्ञानविवेकशीलाः स्वनामबुद्धिं प्रथयन्ति नित्यम्।।२३।।
(अरुन्धतीसंस्तवः)

१७. अनेन विचार्यते यत् काव्यमिदं सर्वथैव नवीनरीत्या प्रतिपादितं प्रस्तुतं च दरीदृश्यते।

*१७. यसबाट यो काव्य सर्वथा नवीन शैलीमा प्रतिपादित भएको स्पष्ट हुन्छ।*

१८. अस्याः काव्यमालिकावाटिकाया अवसानेऽपि चतुःसोपानात्मकं वंशदर्शनपादपं सरलसरसभाषया विरच्य कविना लक्ष्मीकान्तेनास्मदीयवंशपूर्वजानां परिचयपूर्वकं वंशशाखानामपि परिचय उपस्थापितः। पादपेऽस्मिन् चतुःसोपानानि सन्ति। यत्रास्माकं वंशमूलानां, वंशशाखानां, वंशबन्धूनां च परिचयः ३८५ श्लोकैः प्राप्यते। सोऽयं प्रसन्नताविषयोऽस्ति, यदस्माकं भारद्वाजगोत्राणां सुवेदीपोखरेलदेवकोटाचौलागाञीभण्डारीनिरौलापन्थीवाग्लेकँडेलोपनामकानां सर्वेषां वंशमूलमेकमेवेति अत्रास्मद्वंशादर्शरूपौ विद्वज्जनाग्रगण्यौ कविवर्यौ पं. भीमकान्तपन्थी-पं. टीकारामपन्थी महोदयौ समभिनन्दितौ पन्थिसेवा-समाजमाध्यमेनेति च ज्ञायते पाठकैरयं विद्वज्जनसुखास्पदो विषयः। तथैवास्माकं सामाजिको नेता कविश्च नीलाम्बरपन्थीमहाभागोऽपि समभिनन्दितो गुल्मिसेवासमाजमाध्यमेनेत्यपि ज्ञायते। किमधिकम्, अनेन वंशानुसन्धानकर्तृणां कृते आगामिनि कालेऽपि मार्ग उद्घाटित इति मदीया दृष्टिः। अन्ते च सम्मतिलेखने कृतारम्भस्य ममापि हृदयादकस्मादेतादृश उद्गारः समागतः–

*१८. यस काव्यमालिका वाटिकाको अन्तमा चार सोपान भएको वंशदर्शन काव्य सरल र सरस भाषामा रचिएको छ। यस काव्यमार्फत कवि लक्ष्मीकान्त पन्थीले हाम्रा वंशका पूर्वजहरूको परिचय र वंशका शाखाप्रशाखाहरूको विवरण प्रस्तुत गरेका छन्। यस काव्यका चार सोपान छन् जसमा हाम्रा वंशमूल, वंशशाखा र वंशबन्धुको परिचय ३८५ श्लोकमा पाइन्छ।*

*प्रसन्नताको विषय के छ भने हाम्रो भारद्वाज गोत्रका सुवेदी-पोखरेल-देवकोटा-चौलागाईं-भण्डारी-निरौला-पन्थी-वाग्ले-कँडेल थरका सबैको वंशमूल एउटै हो। हाम्रो वंशका आदर्श रूप भएका, विद्वान्हरूमध्ये अग्रगण्य, कविहरूमा श्रेष्ठ पं. भीमकान्त पन्थी एवम् पं. टीकाराम पन्थी 'पन्थी सेवा समाज'-बाट सम्मानित र अभिनन्दित भएको यसै काव्यबाट थाहा पाउँदा पाठक र विद्वज्जनका लागि हर्षको विषय भएको छ। त्यस्तै हाम्रा सामाजिक नेता र कवि नीलाम्बर पन्थी पनि गुल्मी सेवा समाजबाट सम्मानित र अभिनन्दित भएको यस काव्यबाट बुझिन्छ। धेरै किन, यस काव्यले वंशका बारेमा अनुसन्धान गर्नेहरूका लागि*

*पथप्रदर्शन गरेको छ भन्ने मेरो विचार छ। अन्तमा सम्मति लेख्न थालेको मेरो हृदयबाट पनि अकस्मात् यस्ता उद्‌गार प्रकट भए–*

किं काव्यं हिन्दवः के च शिष्टाचारश्च को भवेत्।
का शोभा कः सदाचारः कवित्त्वं कीदृशं भवेत्।।१।।
किं वै जीवनलक्ष्यं च देवपूजा कथं भवेत्।
को नाम विषयानन्दः प्रेममार्गश्च कः स्मृतः।।२।।
कं प्राहुर्भजनानन्दं व्यवहारश्च को भवेत्।
को वा भागवतार्थश्च विवेकः कीदृशो मतः।।३।।
सुखस्य साधनं किं स्यात् किं तथा दुःखसाधनम्।
प्रारब्धं किं च पुण्यं किं सन्तोषः कः प्रकीर्तितः।।४।।
को वै प्रकृतिभावश्च कथं भूयाद्धनागमः।
किं च जीवनसाफल्यं को धर्मः कश्च सद्‌गुरुः।।५।।
को रामः कश्च वै कामः का मुक्तिः किं च बन्धनम्।
किं सुखं किं च वै दुःखं किं पापं का च भिन्नता।।६।।
कोऽभेदः कश्च भेदः स्यात् का शान्तिः का च वासना।
कुत्रास्ति भगवद्‌वासः कस्त्यागः का च सद्‌गतिः।।७।।
परिश्रमफलं किं स्याद् गुणज्ञः क उदाहृतः।
क ईश्वरः किं च तत्त्वं का च जीवनसार्थता।।८।।
कः स्वर्गः किं च सामर्थ्यं धार्मिकः कः सतां मतः।
किं मनः कर्णधारः कः का मैत्री कश्च निन्दकः।।९।।
काऽऽकाङ्क्षा किं च साहित्यं को विद्वान् किं वृथा गतम्।
प्रवृत्तिः का निवृत्तिः का कीदृशी ग्रहसंहतिः।।१०।।
को विवेकः प्रजातन्त्रं किं किं जीवनदर्शनम्।
को वा परिचयस्तस्य लक्ष्मीकान्तकवेरिति।।११।।
इत्याद्यनेकप्रश्नानां समाधानं यदीच्छसि।
लक्ष्मीकान्तकवेरेतत् पठ जीवनदर्शनम्।।१२।।
अयं तु कविताहारो नाम्ना जीवनदर्शनम्।
जिज्ञासुभ्यः पाठकेभ्यो ददाति ज्ञानदर्शनम्।।१३।।

लक्ष्मीकान्तकवेश्चैतत्तथा वैदुष्यदर्शनम्।
भवत्यत्र प्रसन्नात्मा सत्यं वदति शेखरः।।१४।।
काव्यं जीवनदर्शनं स्फुटकवित्त्वस्यैव रम्यं महत्
यत्रोन्मेषचतुष्टयं विलसितं नैकेषु शीर्षेषु यत्।
लक्ष्मीवैभवनामकाव्यमपरं सारस्वतं वैभवं
वंशानामभिदर्शनं तदपरं सोपानतुर्यात्मकम्।।१५।।
लक्ष्मीकान्तेन कविना कृता काव्यपरम्परा।
वैभवी दृश्यते रम्या स्वपित्रापि कृतादरा।।१६।।
अनेकपुष्पस्तवकैर्गुम्फिता काव्यमालिका।
गौरवैः सौरभैर्युक्ता पाठकेभ्योऽभिरोचताम्।।१७।।
सुकोमलानि काव्यानि रसभावयुतान्यपि।
एवंविधानि लिखतात् कविरन्यानि सन्ततम्।।१८।।
इमानि काव्यानि मनोहराणि
पठेद् बुधश्चेदकविः कविः स्यात्।
कविर्यदि स्यात् सुकविर्भवेत् सः
पठेत् स एवापि महाकविः स्यात्।।१९।।

**पं. शेखरनाथः पन्थी**
भूतपूर्वसंस्कृताध्यापकः
तौलिहवा, कपिलवस्तु

(यसमा गद्यांशका नेपाली अनुवादक दीननाथ पन्थी,
सहप्राध्यापक, रेसुङ्गा बहुमुखी क्याम्पस, तम्घास, गुल्मी हुन्।)

# ‘काव्यमालिका’-का कृतिहरूमाथि विहङ्गम दृष्टि

सुरभारतीमा महाकाव्य लेख्ने गुल्मी मण्डलका प्रथम संस्कृत महाकवि पं. भीमकान्त पन्थीका प्रथम पुत्र, त्रिभुवन विश्वविद्यालयका सहप्राध्यापक डा. लक्ष्मीकान्त पन्थी निरन्तर प्राध्यापन सेवा निरत भए तापनि संस्कृत कवितालेखनमा समुत्सुक र प्रवृत्त हुनुहुन्छ। यहाँको त्यो प्रतिभान्वित प्रवृत्ति सफल भइरहेको छ। कविशिरोमणि लेखनाथ पौड्यालको नेपाली भाषामा रचित ‘ऋतुविचार’ खण्डकाव्य डा. पन्थीद्वारा तत्समच्छन्दमा संस्कृत पद्यहरूमा अनूदित भयो। सो अनूदित कृति वि. सं. २०६२ मा प्रकाशित भयो। संस्कृत काव्यका लागि प्रतिवर्ष दिने गरेको ‘जयतु संस्कृतम्’ संस्थाको ‘साभिनन्दन पुरस्कार २०६३’ यसै कृतिका आधारमा डा. पन्थीलाई दिइयो। प्रा. मुकुन्दशरण उपाध्यायको नेपालीमा लिखित काव्य ‘प्राकृत पोखरा’ पनि डा. पन्थीद्वारा तत्समच्छन्दका संस्कृत पद्यहरूमा अनूदित भई प्रकाशित छ। यी अनूदित कृतिबाहेक डा. पन्थीका अन्य मौलिक संस्कृत काव्यकृतिहरू पनि प्रकाशोन्मुख छन्। ती हुन्– १. जीवनदर्शनम्, २. लक्ष्मीवैभवम्, ३. सारस्वतवैभवम् र ४. वंशदर्शनम्।

यी चार ओटा कृतिहरूमध्ये २, ३ र ४ खण्डकाव्य हुन् भने पहिलो ‘जीवनदर्शनम्’ जीवनभर, समयसमयमा विशेष अवसर, सम्मेलन, उत्सव, आमन्त्रण, सम्मतिप्रदान, शुभकामना, अनुवादकीय, प्रकाशकीय, काव्यसार, देवीस्तुति, देवस्तुति, धार्मिक कृत्य, सांस्कृतिक समस्या आदि सन्दर्भमा विरचित संस्कृत कविताहरूको सँगालो भनौँ कविताराशि हो। यसमा लघ्वाकार र दीर्घाकार अनेक पद्यप्रबन्ध समावेशित गरिएकाले यो पनि काव्यकै रूपमा प्रस्तुत छ।

### १. जीवनदर्शनम्

डा. लक्ष्मीकान्त पन्थीको ‘जीवनदर्शनम्’ नामक पद्यप्रबन्धात्मक कृति वेलावेलामा संस्कृतमा रचित स्फुट कविताहरूको सङ्ग्रह हो। लेखककै प्रस्तुतिमा

केही वर्ष पहिल्यैदेखि वि. सं. २०७५ को श्रीकृष्णाष्टमी तिथिसम्म लेखिएका अनेक स्फुट कविताहरू यसमा छन्। यस सङ्ग्रहमा परेको विहङ्गम दृष्टि यहाँ प्रस्तुत गरिन्छ।

चार उन्मेषमा विभाजित यस पद्यप्रबन्धमा विभिन्न शीर्षकहरूमा सानाठूला गरी २,००० भन्दा बढी पद्यहरू छन्।

सङ्ग्रहका रचनाहरूमा 'स्वपरिचय:' सबभन्दा पछिल्लो र दीर्घकाय खण्डकाव्याकार पद्यप्रबन्ध हो। स्रग्धरा, शार्दूलविक्रीडित, मन्दाक्रान्ता, शालिनी आदि लामा छन्दमा रचित केही पद्य र अनुष्टुप् छन्दमा रचित अरू सबै पद्य भएको १७० पद्यात्मक यस कृतिमा वि. सं. २००८ को जन्मकालदेखि २०७५ सालसम्म ६८ वर्षे जीवनको चित्र प्रस्तुत छ। उत्तम पुरुषको प्रयोग नगरेर प्रथम पुरुषको प्रयोग (यस्तो गऱ्यो, यस्तो छ, यस्तो गर्छ इत्यादि) शैलीमा यो कृति रचित छ। प्रथम पद्यमा भनिएको छ– "गण्डकीको पश्चिमतर्फ पन्नगा नदीको पूर्वी तटमा बडाचौर भन्ने गाउँ छ। त्यहाँ माता नीलमाया र पिता भीमकान्तका पुत्रका रूपमा लक्ष्मीकान्त जन्म्यो।"

गण्डक्या: पश्चिमायां विलसति जनिभू: पन्नगानिम्नगाया:
प्राक्कूले संश्रितं तद् वसनमपि 'बडाचौर' इत्यस्ति रम्यम्।
माताश्री नीलमाया गुरुसदृशगुरुर्भीमकान्त: पिताश्री:
लक्ष्मीकान्तं च नाम्ना प्रवदति जनता विप्रवंशेऽभिजातम्।।१।।

(स्वपरिचय, श्लोक १)

यहाँ आफ्नो छात्र जीवनका साथै प्राध्यापनमा जीवन बितेको कुरा उल्लिखित छ। सुरुमा आफ्ना भाइहरू र बहिनीहरूका नाम उल्लेख गर्दै आफ्नो जन्मस्थलको प्राकृतिक सौन्दर्य चित्रित छ। वि. सं. २००८ मा जन्म, २०१६ मा पिताबाटै उपनयन संस्कार सम्पन्न एवम् पिताबाटै व्याकरण, काव्य र कोषहरूको प्राथमिक शिक्षाप्राप्ति भएको कुरा उल्लिखित छ। त्यसपछि संस्कृत विद्वान्हरूबाट विभिन्न संस्कृत विषयहरूको अध्ययन भएको कुरा गुरुनाम र विषयनामको विवरणका साथ प्रस्तुत छ। नेपालीतर्फ पनि भाषा, साहित्य, समालोचना आदि विषय पढेको विवरण प्राध्यापकहरूको नामोल्लेखसहित दिइएको छ। पाणिनीय व्याकरण, अमरकोष, छन्द:शास्त्र, काव्यहरू, वेदान्त, ज्योतिष, धर्मशास्त्र आदि विषयहरू पढेर पनि तीती विषयहरूमा पारङ्गत हुन सकिएन

भन्ने नम्रता प्रदर्शित छ, साथै गुरुहरूका कृपाले केही लेख्ने शक्ति प्राप्त भएको कुरा पनि प्रस्तुत छ। त्यही लेखनशक्तिद्वारा लिखित कृति विवरण पनि दिइएको छ– 'ऋतुविचार' र 'प्राकृत पोखरा'-को संस्कृतमा अनुवाद भयो। 'हठयोगप्रदीपिका'-को नेपालीमा अनुवाद गरियो। 'जन्मपत्रफल' तथा 'गोरखापत्र'-को योगदानका विषयमा लेख्ने काम भयो। व्रतबन्ध र विवाहको समीक्षा गरियो।

यसपछि स्नान, सन्ध्या, पञ्चायतनपूजा, तर्पणका साथ देवस्तुतिसम्बन्धी पाठ तथा धार्मिक ग्रन्थहरू पढ्ने दैनिक कर्म, आचार इत्यादि प्रस्तुत छन्। सामान्यतः आफ्ना केही प्रमुख सतीर्थ्य सुहृद्‌हरूको गतिविधि उल्लिखित छ। आफ्नी श्रीमती मायाबाट जनित चार छोरी भक्ति, भावना, साधना, चेतनाको नामोल्लेख छ। वि. सं. २०५० र २०५४ मा आफ्ना पूज्य मातापितालाई लिएर तीर्थयात्रा गरेको कुरा प्रस्तुत छ। २०५८ मा पूज्य पिता स्वर्ग जानुभएको उल्लेखपछि आफ्ना जीवनमा अन्य अनेक उतारचढाव, अध्ययन, प्राध्यापन, लेखन आदि विवरणहरू काव्यात्मक भाषामा प्रस्तुत गर्दै 'स्वपरिचयः'-लाई समाप्त गरिएको छ। सरल-सुमधुर-आकर्षक संस्कृत पद्यावलिमा, बौद्धिक पक्षतर्फ आफ्नो परिचय प्रस्तुतिमा विनम्रता देखाउनु यस काव्यप्रबन्धको विशेषता हो।

बाँकी अगाडिका तीन सोपानहरूमा प्रस्तुत कविताका मुख्य विषय यस प्रकार छन्।

सपरिश्रम ऐतिहासिक गवेषणाको परिचायक बनेको 'अर्ज्यालवंशावलिः'-ले ३३ पद्यमा मावलीतर्फको वंशावली प्रस्तुत गरेको छ। मूल पुरुष प्रभाकरको २८ औँ पुरुष पण्डित श्रुतधर (डिल्लीराज अर्ज्याल) लक्ष्मीकान्तका प्रमातामह हुन्। मातामह खेमराज हुन्। खेमराजकी पुत्री नीलमाया र उहाँका पति भीमकान्त पन्थीका ज्येष्ठ पुत्र लक्ष्मीकान्त पन्थी हुन्। 'नारी शब्दार्थः' शीर्षक भएको एकश्लेकात्मक कवितामा 'नारी' शब्दको अचम्मलाग्दो अर्थ गरिएको देखिन्छ– न-अरिः (अरी) = नारी। जो बाबु, आमा, दाजु, भाइ, पति, देवर, सासूससुरा, लालाबाला आदि र इष्टमित्र, नोकरचाकर तथा गोठालासमेत सबैकी आत्मीय सुहृद् बनेकी, कसैकी पनि शत्रु नबनेकी 'नारी' भन्ने बुझ्नुपर्छ। औणादिक इन् प्रत्यय लाग्दा, स्त्रीलिङ्गमा राजिः, राजी जस्तै अरिः, अरी दुवै रूप बन्न सक्छन्।

हाम्रो सनातन धर्मअनुसार पिता र माता देववत् पूज्य हुन्छन्। यो विषय अनुष्टुप् छन्दका ३० पद्य भएको 'पितरौ' शीर्षक कवितामा सविस्तार वर्णित छ। विभिन्न छन्दका २८ पद्यमा रचित 'पितृसूक्तम्' कवितामा वाग्ला-बडाचौरका स्वपूर्वज भरत पन्थीको वंशविस्तार वर्णित छ। वृद्धप्रपितामह भरतदेखि स्वपितासम्मको नामोल्लेख छ– भरत, दत्त, देवीप्रसाद, भीमकान्त। यसमा पिताको वैदुष्य, चरित्र, उदारता आदि गुणहरूको सबहुमान वर्णन छ र आफूहरू, भीमकान्तका छोराहरूको नामोल्लेख मात्र छ। 'सपत्नमाता' कवितामा चार श्लोक छन्, यसमा उहाँको अत्यन्त आदरका साथ भक्तिभाव पूर्ण सम्झना गरिएको छ। 'मातृसूक्तिः' कवितामा स्रग्धरामा, वसन्ततिलकामा र अनुष्टुप्मा समेत गरी सात श्लोक छन्, यसमा जन्मभूमिभन्दा पनि गरीयसी आफ्नी आमाको सम्झना गर्दै उहाँको सामीप्यमा रहन नपाएर सेवा गर्ने अवसर नमिलेको बताउँदै 'आमा! हजुर त लक्ष्मी, सरस्वती, पार्वती र शचीतुल्य हुनुहन्छ' भनिएको छ। आफ्ना महनीय उद्देश्य र पवित्रतम आकाङ्क्षा अभिव्यक्त गर्ने उपजाति छन्दका ९ श्लोक भएको 'आकाङ्क्षा' कविता जीवनदर्शनको निदर्शन बनेको छ। आफ्ना परिवार र मित्रजनलाई लक्षित गरी रचिएको 'ग्रहसंहतिः' कविताले जगत् र जगदाधारलाई पनि समेटेको छ। साथै सूर्यादि नवग्रहहरूको यन्त्र निर्माणविधि पनि २ श्लोकमा बताइएको छ। यस कविताले ज्योतिष विषयमा पनि राम्रो ज्ञान भएको थाहा दिन्छ। यस्तै अनुष्टुप् छन्दका पद्य भएको 'वंशो द्विधा' शीर्षक कविता डा. पन्थीको स्वकीय जीवनसँग सम्बद्ध छ। यसमा पुत्र नभए पनि आफ्ना चार ओटी पुत्रीहरूबाट नै स्वकीय विद्या-वंशविस्तारको आकाङ्क्षा राखिएको छ। आफ्नै जन्मोत्सवको कुरा प्रस्तुत गर्ने ३ पद्यको कविता स्वजीवन सम्बद्ध छ। समस्यापूर्ति सम्बद्ध ६ पद्यको कविताले जीवनदर्शनकै कुरालाई प्रस्तुत गरेको छ। त्यस्तै 'जीवनदर्शनम्' कवितामा जीवन के हो र दर्शन के हो भन्ने रोचक प्रश्नहरू अघि सारिएका छन्– सास फेर्नु मात्र जीवनदर्शन हो कि? पेटभर मीठोमीठो खानु र अरूलाई गाली गर्नु नै जीवनदर्शन हो कि? अथवा पत्नी छोराछोरी र धनसम्पत्तिको रक्षा गर्नु नै जीवनदर्शन हो? यसको उत्तर त्यहीँ छ– लोभलालसारहित भएर रहनु र अरूलाई समेत बचाएर आफू पनि बाँच्नु जीवनदर्शन हो। काम, क्रोध, लोभ, मोह आदि छाडेर समानताका आधारमा दुःखसुखात्मक अवस्था सहेर बस्नु नै जीवनदर्शन हो।

हामी सनातनधर्मीहरूका लागि श्रुति-स्मृति-पुराणहरूले देखाएका मार्ग नै आश्रयणीय हुन्छन्। हाम्रा धर्म, संस्कृति, सदाचार, मर्यादा, दर्शन इत्यादि सबै वेद र तन्मूलक धर्मशास्त्रमा निहित छन्। तसर्थ वैदिक धर्मको पालन नै हाम्रो जीवनदर्शन हो। गणेश, सूर्य, देवी, शिव, विष्णु आदि देवताहरूको उपासना-अर्चना पनि हाम्रा कर्तव्यभित्रै छन्। डा. पन्थीको 'जीवनदर्शनम्'-मा सङ्गृहीत केही स्फुट कविताहरूमा वर्णित विषय, कविताहरूको शीर्षक नदिईकन एक कविताको आशय एक वाक्यमा दिइएको शैलीमा निम्नलिखित अनुच्छेदमा प्रस्तुत गरिन्छ।

एक कवितामा दैनिक सदाचार प्रस्तुत छ। एकमा जीवनमा केही गर्न नसक्दा पछुतो देखाइएको छ। अर्कोमा शैशवावस्थादेखि प्रौढावस्थासम्म गर्न सके-नसकेका कर्म भगवान् श्रीकृष्णमा अर्पित छन्। भगवान् शिवसमक्ष आफ्नो र नेपाली समाजका लागि कल्याण-कामना प्रार्थित छ। ४३ पद्यमा शिवस्तुति, शिवचालिसा प्रस्तुत छ। अन्य ४२ पद्यमा गणेशचालिसा छ। यी दुई चालीसा भने नेपाली पद्यमा छायानुवादसहित छन्। हरिहरको र नागको पनि प्रार्थना गरिएको छ। सत्य साईको प्रार्थना छ। देवपूजाका १६ उपचार छन्। अतिथिहरूप्रति गृहस्थका शिष्टाचार प्रस्तुत छन्।

'हिन्दू' पदको व्याख्या र अर्थ नयाँ शैलीमा गरिएको छ। शिक्षाको कृत्य के हो? यसबारे जानकारी दिइएको छ। शोभाको कृत्य वर्णित छ। भूषणपरिचय प्रस्तुत छ। चतुर्धाम तीर्थको व्याख्या अभिव्यक्त छ। जीवनको लक्ष्य देखाइएको छ। ईश्वरभक्तिको महिमा छ। निवृत्तिमार्गको महत्त्व प्रदर्शित छ। 'भागवत' शब्दको अवास्तव अर्थ खण्डित छ, वास्तविक अर्थ देखाउँदै श्रीमद्भागवतमा वर्णित विषयको जानकारी गराइएको छ। ज्ञान र कर्म यी दुवै जीवनको सफलताकारक तत्त्व हुन्। विवेक र अविवेक छुट्ट्याउनु आवश्यक छ। सत्कर्मबाट नै धनोपार्जन हुनुपर्छ र उपार्जित धनको आधा भाग धर्ममा खर्च गर्नुपर्छ। काम (भोगविलास) र राम (ईश्वरोपासना)-मा भेद छ। सुख र दुःखमा भेद छ।

एक कवितामा द्वैतवाद र अद्वैतवाद प्रस्तुत छन्। अर्को एक कवितामा मुक्ति र बन्धनको स्वरूप बताइएको छ। अर्कोमा दुःख तथा पापको स्वरूप प्रस्तुत छ। शान्तिप्राप्तिका लागि कामवासनाको त्याग आवश्यक छ। सद्गति, त्याग र ब्रह्मानन्दलाभबारे आवश्यक ज्ञान हुनुपर्छ। 'ईश्वर' शब्दको व्युत्पत्ति र

ईश्वरमहिमा बुझ्नुपर्छ। ईश्वरभक्तिद्वारा दिव्य जीवन पाइन्छ। ज्ञानेन्द्रिय– श्रोत्र, त्वग्, नेत्र, रसना, घ्राण यिनलाई विनीत बनाउनुपर्छ। त्यस्तै अन्य स्फुट कविताहरूले मन:शुद्धिको मार्ग, उत्साह जारणको आशा, तत्त्वज्ञानको उपाय, नारीशिक्षा, जीवन र कवित्वबारे रम्य अभिव्यक्ति, जीवन व्यर्थमा बित्ने अवस्था र सफल पार्ने उपायहरू, नवग्रहस्तुति, गीतासार, पुराणहरूले बताएको सदाचार, असगोत्रा कन्यासँग विवाह गर्नुपर्ने आवश्यकता, नारीका गुणको उत्कर्ष र अपकर्ष, राजतन्त्र र जनतन्त्रको विशेषता, नेतृत्व गुणबाट जनतालाई लाभ इत्यादि विषयहरूलाई विभिन्न शीर्षकका स्फुट कविताहरूले रोचक ढङ्गबाट प्रस्तुत गरेका छन्।

प्रह्लाद, कोषराज, दुर्गाप्रसाद, प्रयाग, लक्ष्मीकान्त, तोयराज, टङ्केश्वर यी ७ जनाको नृत्य प्रस्तुत गर्ने एकपद्यात्मक हास्यरसपूर्ण कविता पनि सङ्कलित छ। साथै टङ्केश्वर, कोषराज, दिनेश, धीमन्त, लक्ष्मीकान्त यिनीहरूका छोरीहरूको विवाहकालमा विरचित 'स्वयंवरनिमन्त्रणा' स्फुट कविताका रूपमा प्रस्तुत छन्। स्वयंवर निमन्त्रणा चारदेखि सात पद्यसम्मका छन्। सूर्यकान्तका छोरा गौरवको व्रतबन्धमा आमन्त्रणपत्र चार पद्यको कविता छ।

विद्वान्, कवि, लेखक, मित्रहरूप्रति प्रशस्ति, ग्रन्थप्रकाशन, अनुवाद आदि विषय सम्बद्ध अनेक स्फुट कविताहरू पनि यसमा सङ्गृहीत छन्।

पं. भीमकान्त पन्थीका काव्यकृतिसँग सम्बद्ध काव्यसार: दुई ओटा छन् भने प्रकाशकीयम् पनि दुई ओटा छन्। डा. लक्ष्मीकान्तले स्वयम् अनुवाद गरेका कृतिहरूसँग सम्बद्ध 'अनुवादकीयम्' तीन ओटा छन्। आचार्य खेमराजसँग सम्बद्ध दुई स्फुट कविता छन्– १. प्रशस्ति र २. 'मानवता' नामक काव्यको महिमा। भरतराज मन्थलीय, प्रयागराज, घटराज यी तीन जनाप्रति प्रशस्ति र शुभकामनाबारे तीन ओटा कविता छन्। नेपालीमा 'गोसाइँकुण्ड' काव्यका लेखक प्रह्लादको प्रशस्ति चार पद्यको कविता छ। 'नेनेपाल:' काव्य र टीकाराम: यी दुई शीर्षकमा १६ पद्यका दुई स्फुट कविता छन्। पं. शेखरनाथ पन्थीको भागवतचन्द्रिका कृतिबारे दिइएको प्रशस्ति: पाँच पद्यमा छ। पं. रश्मिराजको सत्यनारायणकथामृतम्प्रति विरचित 'प्रशस्तिप्रसूनम्'-मा १५ पद्य छन्। कवि मुकुन्द शर्माद्वारा लिखित महाभारत चम्पू काव्यको प्रशस्ति 'नमो वाच:'-मा १८ पद्य छन्। यसै गरी हिरण्याक्ष र हिरण्यकशिपु तथा रावण र कंसको

जानकारी दिने दुई ओटा स्फुट कविता छन्। फणिनारायण नामक मित्रलाई पठाएको अनुष्टुप् छन्दका १६ पद्यको पत्रकविता जीवनी सम्बद्ध छ।

यस प्रकार अनेक फुटकर कविताको यो सङ्ग्रह जीवनदर्शनम्मा २,००० भन्दा बढी श्लोक छन्। यिनको रचनामा रचयिता कवि लक्ष्मीकान्त पन्थीका प्रतिभा, व्युत्पत्तिपटुता र परिश्रमशीलता देदीप्यमान रूपमा प्रतीत हुन्छन्।

### २. लक्ष्मीवैभवम्

जगज्जननी भगवती महालक्ष्मीको आराधना, उपासना र गुणकीर्तनमा आधारित यो काव्यकृति डा. लक्ष्मीकान्त पन्थीका खण्डकाव्यात्मक काव्यकृतिहरूमध्ये दीर्घकाय खण्डकाव्य हो। प्रथमांश र द्वितीयांशमा विभाजित यस खण्डकाव्यमा जम्मा ६९० पद्य छन्। प्रथमांशमा २१७ र बाँकी द्वितीयांशमा निहित ४७३ पद्यहरूमध्ये अंशान्तमा परिवर्त्य लामा छन्द भएका २५ र ३४ पद्यबाहेक ६३१ पद्य अनुष्टुप् छन्दमा रचित छन्। जगत्पालिका लोकमाता इन्दिरा एकमात्र नायिका भएको यस काव्यमा अनुप्रास, रूपक, उपमा, उत्प्रेक्षा आदि अलङ्कारहरूको प्रयोग छ, काव्यात्मक छटा छ, चमत्कार छ, माधुर्य छ, मार्मिकता छ, हृदयस्पर्शिता छ, भक्तिभावप्रवाह छ, शान्तरस-स्यन्दना छ। भक्तहरूद्वारा वर्णनीय भक्तिभावका पाँच प्रकार – शान्त, दास्य, सख्य, वात्सल्य, माधुर्य – कुनै न कुनै किसिमले यस काव्यमा छताछुल्ल छन्। तसर्थ यो काव्य भक्तिभाव-भरित शान्तरसप्रधान काव्य हो।

प्रथमांशको प्रारम्भमा मङ्गलाचरणपूर्वक २५ पद्यहरूद्वारा भगवती महालक्ष्मीलाई मानसी पूजा समर्पित छ। त्यसपछि 'दण्डवत् प्रणामका लागि पादकमल दिनुहोस् आमा!' भनी पाउबाट सुरु गरेर लक्ष्मीका शिरस्थ केशसम्म समस्त अङ्गप्रत्यङ्गको वर्णन अतिसूक्ष्मता, सौन्दर्य, रोचकता र आकर्षकताका साथ अनुष्टुप् छन्दका ९२ पद्यहरूद्वारा प्रस्तुत छ। यस्तो वर्णन कहीँ पाइन्न, यसमा अनुपम काव्यात्मक छटा छ, प्रस्तुतिमा चमत्कार छ। त्यसपछि लक्ष्मीका विभिन्न नामहरूको कीर्तन गरी कवचका रूपमा आफ्ना विभिन्न क्षेत्रहरू, अङ्गहरू र आचारव्यवहारको संरक्षण याचित छ यस्तो शैलीमा–

> लक्ष्मीः पातु चतुर्दिक्षु पद्मा पातु विदिक्षु माम्। (श्लोक १३४)
> सदाचारान् सदा पातु माता त्रैलोक्यपावनी। (श्लोक १५१)

अन्तमा सर्वविध सङ्कट, ग्रहोपग्रह, योगिन्यादि दशाबाट आफ्नो सुरक्षार्थ माता लक्ष्मीलाई सादर अनुरोध गर्दै इन्दिरा (लक्ष्मी) र शारदा (सरस्वती) मिलेर भौतिक र बौद्धिक मार्गमा समुन्नत गराउनुहोस् भनी प्रार्थना गर्दै प्रथमांश समाप्त गरिएको छ।

द्वितीयांश स्तुतिबाट सुरु हुन्छ। सर्वस्वरूपा भगवती महालक्ष्मीको स्तवन अनेकौँ नामहरूबाट गरिएको छ। पद्मालया, पद्मासना, सूर्यप्रभा, चन्द्रिका, स्वाहा, स्वधा, इन्द्राणी, अरुन्धती, हिमानी, शाद्वला, वीचि, सीता, रुक्मिणी आदि नामहरू विभूतिकै शैलीमा कीर्तित छन्। समर्पणात्मक आग्रह चरमोत्कर्षमा पुगेको छ। यसरी लक्ष्मीका अनेक नामरूपको कीर्तन गर्ने प्रक्रियामा काव्यकारद्वारा आफ्ना पिता, आफू स्वयम्, भाइहरू र छोरीहरू तथा आफ्ना प्रतिवेशी मित्रहरूका नाम पनि भगवती महालक्ष्मीको गुण-चरित्र-नाम-रूप-कीर्तनमा लगाइएका छन्। 'आमा! आमा!' पुकार्दै समर्पित भएर भगवती लक्ष्मीको स्नेह-वात्सल्य माग्ने काम भएको छ।

यस किसिमको समर्पकतालाई भारतका भक्तिमार्गीहरूले 'वाममार्ग' भन्छन्। 'वाम' भनेको जिद्दी हो। जिद्दीको सरणि वाममार्ग हो भन्ने उनीहरूको आशय छ। 'महालक्ष्मी सत्त्वगुणप्रधाना जगत्पालिका देवी हुन्' यस सिद्धान्तलाई पूर्णतया हृदयङ्गम गरेर काव्यात्मक शैलीमा महालक्ष्मीको वन्दना र रक्षाको याचना प्रस्तुत छ।

द्वितीयांशको उत्तरार्द्धमा दयामूर्ति, लोकोपकारिणी, धनसम्पदास्वामिनी, भगवती महालक्ष्मीसमक्ष कविद्वारा आफ्ना अवस्था-दुरवस्थाहरू पोख्दै सरस-सरल-पदसम्बलित अनेक पद्यहरूद्वारा धनसम्पत्तिको अभ्यर्थना सम्बद्ध कोमल अन्तर्भावनाहरू प्रस्तुत छन्। यसका साथै सर्वशक्तिसम्पन्ना, सर्वदेवोपरिस्थिता, विश्वब्रह्माण्डव्यापिनी, महालक्ष्मी देवीको स्वरूप शक्ति-अद्वैतवादी सिद्धान्तको धारामा प्रस्तुत छ। यस सन्दर्भमा काव्यकारको भनाइ छ– महाकाली, महालक्ष्मी, महासरस्वती एउटै देवी हुन्, यिनै हंसरूपा छन्। ब्रह्मा, विष्णु, शिव, गणेश, सूर्य हंस हुन् भने यिनीहरूभन्दा माथि रहने हंसवाहिनी लक्ष्मी नै हुन्। वेदत्रयीरूपा, त्रिगुणात्मिका, त्रिवर्णरूपा, अग्नित्रयात्मिका, ज्योतिःस्वरूपा, कालस्वरूपा, त्रिकालात्मिका, वाग्देवी, सङ्गीतात्मिका, सर्वविधवाद्यरूपा महालक्ष्मी नै सृष्टिस्थितिसंहारकर्त्री, अ+उ+म निर्मित ॐकारस्वरूपा ब्रह्मविष्णुशिवरूपा हुन्–

अकारो विष्णुरूपः स्यादुकारो ब्रह्मरूपकः।
मकारश्च शिवो ज्ञेयस्त्वमोङ्कारा त्रयात्मिका।। (श्लोक ४२६)

यी तीनमध्ये महालक्ष्मीलाई प्राधान्य दिएर उनको महिमा वर्णन गरिएको यो लक्ष्मीवैभवम् खण्डकाव्य हो–

लक्ष्मीसरस्वतीकालीशब्देष्वीकाररूपिणी।
त्वमीकारा नामरूपा लक्ष्मीरीकार उच्यते।। (श्लोक ४२९)

लक्ष्मी, सरस्वती, काली यी तीन देवीहरूमध्ये लक्ष्मी र सरस्वती यी दुईको साहचर्य, साङ्गत्य, समान महनीयता र मान्यतामा धनप्रदा लक्ष्मीका साथ विद्याप्रदा सरस्वतीलाई एकासनासीन बनाएर काव्य समाप्त गरिएको छ।

वागर्थवति! लक्ष्मि! त्वं न चेल्लोके प्रतिष्ठिता।
जगद् वागर्थहीनं स्यादालोकेऽपि तमोमयम्।। (श्लोक ६१८)
लक्ष्मि! त्वमेव कमलाऽसि हरिप्रियाऽसि
त्वं श्री रमाऽसि ललिता कमलेक्षणाऽसि।
त्वं क्षीरसागरसुताऽसि जगद्धिताऽसि
प्रज्ञा त्वमेव विदुषी प्रतिभाप्रदाऽसि।। (श्लोक ६७१)

कवि पन्थीको लक्ष्मीवैभवम् छुट्टै किसिमको अपूर्व रसास्वाद गराउन समर्थ पाण्डित्यपूर्ण काव्य भए पनि यसको अन्त्यमा कविले आफूले धेरै शास्त्रहरू नपढेको र योगसाधनाहरू पनि नगरेको हुँदा यो काव्य त्यति राम्रो चमत्कारपूर्ण हुन सकेको छैन, यसमा त आमाको अगाडि केवल बालहठ मात्र गरिएको छ भन्ने विनय प्रदर्शन पनि गरेका छन्। जस्तै–

लक्ष्मीवैभवकाव्यमस्ति न रसालङ्कारविच्छित्तिकम्
सौम्यं रीतिगुणैर्युतं न, न चमत्कारोपमाभिर्युतम्।
सद्वृत्तैर्न सुचित्रितं न च पुनः सद्वृत्तिभिर्भाषितम्
दृश्यं केवलबालवृत्तिभणितं मातुः पुरस्ताद् हठात्।। (श्लोक ६८८)

अन्ततः डा. लक्ष्मीकान्त पन्थीको ‘लक्ष्मीवैभवम्’ खण्डकाव्य अहिलेसम्म नेपालका कविहरूले संस्कृत भाषामा रचना गरेका पद्यप्रबन्धहरूभन्दा भिन्न प्रकारको अपूर्व, अनुपम र एकाकी छ भन्नुमा कुनै पनि अत्युक्ति नहोला। विषयवस्तु तथा अभिव्यक्तिशैलीका दृष्टिले यो कृति एक्लो छ, अतुलनीय छ।

## ३. सारस्वतवैभवं काव्यम्

डा. लक्ष्मीकान्त पन्थीको तेस्रो सारस्वतवैभवं काव्यम् लघुतर कलेवर भएको खण्डकाव्यायित पद्यप्रबन्धात्मक कृति हो। यसमा चार भाग छन् र १०९ पद्य छन्। प्रत्येक भागका अन्तिम पद्यहरू परिवर्तित लामा छन्दमा छन् र अरू १०५ पद्य अनुष्टुप् छन्दमा रचित छन्। एउटै मात्र भगवती वाग्देवी सरस्वती नायिकाका रूपमा वर्णित हुनाले यसलाई लघुकाय खण्डकाव्य भन्न सकिन्छ।

'संस्मरणम्' नामक २८ पद्यको प्रथम भागमा वाग्देवी सरस्वतीको वन्दनाका साथ वाग्देवीद्वारा अनुगृहीत आफ्ना पितामह, पिता र गुरुको सम्झना गरिएको छ। वाग्देवीद्वारा अनुगृहीत हुन कविहृदय लालायित छ। वाग्देवीका अङ्गभूत व्याकरण, दर्शन, कोष, नीतिशास्त्र, साहित्य, गुण, रीति, वृत्ति, अलङ्कार, साङ्ख्यदर्शन, धर्मशास्त्र, मीमांसा, वेदान्त, ज्योतिष जस्ता विषयलाई सम्बोधन गरेर आफ्ना मस्तिष्कमा प्रविष्ट हुन अनुरोध गरिएको छ।

'नेपालचित्रम्' नामक ३१ पद्यको द्वितीय भागमा भ्रष्टाचारी र असत्य, अपशब्द, भ्रमात्मक उद्घोष, वञ्चनात्मक भाषण आदिद्वारा वाग्देवी सरस्वतीलाई अवहेलित गर्दै जनसमाज ठग्ने सत्तासीन नेताहरूको व्यवहारप्रति व्यङ्ग्य प्रहार गरिएको छ। दलवादको उग्रता उर्लिरहेको वर्तमान नेपालमा कुनै पनि राजनीतिक दलमा नलागेका स्वतन्त्र नागरिकहरू ओझेलमा परिरहेका छन्। राजनीतिक दलमा आश्रित व्यक्तिहरू मात्र बुद्धिमान्, विद्वान् ठहरिन्छन्। तिनीहरूका रचना जस्तासुकै भए पनि सम्मान्य ठहरिन्छन्। दलाश्रित नहुनेको कुनै मान्यता छैन। यसरी देशको राजनीतिक दुर्दशाले वाग्देवीको अपमान भइरहेको कुरा प्रस्तुत छ।

'वाग्वैभवम्' नामक २७ पद्यको तृतीय भागमा वाग्देवी सरस्वतीकी आश्रयणीय अङ्ग (आवास)-रूपा रसना, जिह्वा (जिब्रो)-को महिमा प्रस्तुत छ। कविको यो प्रस्तुति बिलकुलै नवीन किसिमको छ। यहाँ 'हे रसने! (ए जिब्रो!)' भनी सादर सम्बोधन गर्दै वाग्देवीकी आवास जिह्वाको महनीय भूमिका वर्णित छ। जन्मनेबित्तिकै बालक रुन्छ, आमाद्वारा बालक फुल्याइन्छ। यस्ता सम्पूर्ण क्रियाप्रक्रिया जीवनभर जिभ्रामा बसेकी, त्यसैमा चलखेल गर्ने वाणीदेवीबाट पूरा गरिन्छन्। पढ्नु, पढाउनु, गुरुको वाणी सुनेर तदनुरूप काम गर्नु जस्ता सबै काम जिह्वाश्रित सरस्वतीबाट पूरा हुन्छन्। कविको भनाइमा

सरस्वतीकी आवासभूता जिह्वा (जिभ्रा)-लाई रक्सीले दूषित पार्न हुँदैन, बरु घिउ राखेर पवित्र तुल्याउनुपर्छ।

'अरुन्धतीसंस्तव:' नामक २३ पद्यको चतुर्थ भागमा मानवको भावाभिव्यक्तिमा जिह्वालाई सहायता दिने अरुन्धतीदेवीको महिमा प्रस्तुत छ। नर र वानरलाई वाणीका आधारमा छुट्ट्याउने अरुन्धतीदेवी नै हुन्। जिभ्रोले मात्र वाक्य उच्चारित हुँदैनन्, मानवीय जिभ्रामा अरुन्धतीको आवास भएकाले तिनकै सहायताले मानिसहरू आफ्ना वाणीद्वारा भावाभिव्यक्तिमा समर्थ हुन्छन्। मानवका बौद्धिक शक्ति र हार्दिक भावका उज्ज्वलता एवम् शिष्टता अरुन्धतीद्वारा नै परिचायित हुन्छन्। अरुन्धतीदेवीको आवास भएको जिभ्रामा रक्सी-मासु पर्दा त्यस्ता पापीका मुखबाट अरुन्धती निस्कन्छिन्। अरुन्धतीलाई निस्कन नदिन जिभ्रामा दूध र घिउ राख्ने गर्नुपर्छ। अरुन्धतीदेवीका सहायताले नै मुखबाट सत्य, तथ्य, लोकोपकारिणी, मङ्गलकारिणी वाणीको निर्गमन हुने गर्छ।

यस प्रकार डा. लक्ष्मीकान्त पन्थीले यस सारस्वतवैभव प्रबन्धकाव्यका तृतीय र चतुर्थ भागमा जिह्वामा निवास गर्ने वाणी र अरुन्धतीको महनीय भूमिका प्रस्तुत गर्नुभएको छ। यस्तो प्रस्तुति वास्तवमा नौलो शैलीको नै हो।

**४. वंशदर्शनम्**

डा. लक्ष्मीकान्त पन्थीको वंशदर्शनम् नामक पाँचौँ पद्यप्रबन्ध ३९७ पद्य भएको र चार सोपानमा पूरा गरिएको छ। सुरुका आमुखम् र मङ्गलम्का ६ ओटा पद्य, सोपानान्तमा परिवर्तित ४ पद्य तथा अन्य महत्त्वपूर्ण ठाउँमा पनि लामो छन्दका पद्यहरू प्रयुक्त छन्। यीबाहेक विशेष गरी अनुष्टुप् छन्दमा रचित छन्। काव्यीय अलङ्कार र रसहरूको समावेश नभए पनि आकारप्रकारले यो संस्कृत खण्डकाव्य भन्न सुहाउने कृति हो। पन्थीहरूको मूल स्थल गुल्मी-अर्घाखाँची क्षेत्र हो, त्यसमा पनि गुल्मी-धुरकोटको 'वाग्ला' केन्द्रविन्दु नै हो। वाग्ला-बडाचौर अभिजनभूमि भएका डा. पन्थीको यो कृति पन्थीहरूको वंशविस्तार प्रदर्शित गर्ने सन्दर्भमा संस्कृत पद्यप्रबन्धात्मक प्रथम कृति हो। प्रस्तुत कृतिका चार ओटै सोपानमा सुरुका दुईदुई श्लोकद्वारा डा. पन्थीका चार छोरीहरू – भक्ति, भावना, साधना, चेतना – का प्रश्नहरू क्रमश: उपस्थापित

छन् र कृतिकारबाट जानेबुझेसम्म, अन्वेषणद्वारा भेट्टाएसम्म यथार्थ उत्तर दिने काम भएको छ।

प्रथम सोपानमा जेठी छोरी भक्तिका प्रश्नको उत्तर दिइएको छ। यसमा गोत्रप्रवर्तक भरद्वाज ऋषिका कुलमा जन्मेका हुनाले भारद्वाज गोत्रीय, आङ्गिरस-बार्हस्पत्य-भारद्वाज यी त्रिप्रवर हुने शुक्लयजुर्वेदाध्यायी ब्राह्मणहरूको मूल स्थान बताएर उनीहरूको वंशविस्तार एवम् थरहरूको भिन्नता देखाइएको छ।

भारद्वाज गोत्रीय ब्राह्मणहरूको मूल स्थल विक्रमादित्यको राज्यकालमा उज्जयिनीको मारवाड जनपद थियो। भारद्वाज गोत्रीय मूल पुरुष प्रजापति मुनि हुन्। तिनका पुत्र पद्मनाभ मुनि थिए। तिनैका सन्ततिहरू कार्यकारणका आधारमा वा स्थलका आधारमा विभिन्न थरले चिनिने बन्दै गए। सुवेदी, पोखरेल, देवकोटा, कँडेल, पन्थी, चौलागाञी, निरौला, भण्डारी आदि थरका ब्राह्मणहरू एउटै वंश भारद्वाजीय कुलका हुन्। ती भारद्वाज वंशज ब्राह्मणहरू विभिन्न ठाउँमा फैलिँदा कन्नौज, गङ्गोली, डोटी, बझाङ, जुम्ला आदि स्थलमा पुगे। तात्कालिक डोटीको बझाङअन्तर्गत पर्ने 'सुवेदा' भन्ने गाउँका बासिन्दा बनेका सदानन्द नामक ब्राह्मण सुवेदी थर भएका थिए। यिनी धेरै पन्था (बाटो)-मा यायावर (डुलुवा) बनेका हुँदा 'पन्थी' भनिए। यिनका वंशमा जन्मेका धेरै घुमन्ते पन्थी थिए। उक्त सदानन्दकै वंशज 'उद्धव' नामक पन्थी धुरकोट-वाग्लाका प्रथम बासिन्दा पन्थी भए। यिनै उद्धवका सदु, शम्भु, लक्ष्मण र परमानन्द यी ४ छोरा भए। शम्भु र लक्ष्मण यी २ भाइ वाग्लाबाट पनि पूर्वतर्फ लागे। यी दुई भाइका सन्तान 'वाग्ले' थरले प्रसिद्ध भए। लक्ष्मणका दुई छोरा दुल्लभ र वल्लभ थिए। दुल्लभका सन्तान डँडाली भनिए। वल्लभ भने स्याङ्जाको भीरकोट भन्ने ठाउँमा गई बसे। प्रथम सोपानमा वर्णित वंशविस्तार यही हो।

'वंशदर्शनम्'-को द्वितीय सोपानमा माहिली छोरी भावनाका प्रश्नको उत्तर दिने काम भएको छ। यसमा पन्थीको वाग्ले शाखा वर्णित छ। वाग्लेहरू स्याङ्जाका विभिन्न ठाउँमा फैलिए; स्याङ्जाका कीचनाश, सामडाँडा, वीरडाँडा, भड्डाँडा, नेहुले, भलडाँडा, मइनकाँडा आदि ठाउँमा गएर बसे। कोही स्याङ्जाबाटै दैलेख, सुर्खेत आदि ठाउँमा गएर बसे। त्यहीँबाट बागलुङको धुल्लू र तनहूँको बन्दीपुर, गोरखा एवम् काभ्रे जिल्लामा र त्योभन्दा पनि पूर्वतर्फका विभिन्न ठाउँहरूतर्फ पनि गए।

उल्लिखित लक्ष्मणका छोरा वल्लभका वंशजहरूमध्ये कुनै काठमाडौँ गएर बसेको र कोही पश्चिम नेपालको दैलेखमा गएर बसेको कुरासमेत द्वितीय सोपानमा वर्णित छ।

तृतीय सोपानमा डा. लक्ष्मीकान्त पन्थीले साहिँली छोरी साधनाका प्रश्नको उत्तर दिँदै स्वपरिवार, बडाचौर निवासी पन्थी-वंश्य व्यक्तित्वको वर्णन गर्नुभएको छ, त्यसमा वाग्लाबाट बडाचौर आएर बसेका भरत पन्थीको वंशविस्तार प्रस्तुत गर्दा लेखकका प्रपितामह, पितामह, पिता, पितृव्यहरूको वंशावली प्रस्तुत छ। यिनमा विशेषतः भीमकान्त पन्थी, नीलाम्बर पन्थी र शेखरनाथ पन्थीका जीवनीको उत्कर्ष प्रस्तुत छ। भीमकान्त पन्थीको ८० वर्षे जीवनावधिका प्रमुख पक्षहरू सङ्क्षेपतः उपस्थापित छन्।

उहाँको प्राथमिक शिक्षा, काठमाडौँमा विभिन्न गुरुहरूबाट अध्ययन, खिदिममा अध्ययन, कवितालेखन, काशीमा शास्त्री उपाधिप्राप्ति, धार्मिकता, सदाचारशीलता, अध्यापन, याजन, लोकोपकार, सदुपदेश, दुई ओटा महाकाव्य र अन्य स्फुट कवितालेखन, अभिनन्दनप्राप्ति इत्यादि बाल्यकालदेखि ८० वर्षको उमेरसम्मका यावत् वृत्तान्त प्रस्तुत छन्। उहाँका छोराछोरीहरू (आफूहरू)-को नामोल्लेख मात्र छ। नीलाम्बर पन्थीको बौद्धिक व्यक्तित्व र राजनीतिक मार्ग तथा शेखरनाथ पन्थीको वैदुष्य वर्णन गरेपछि तृतीय सोपान समाप्त गरिएको देखिन्छ।

चतुर्थ सोपानमा बडाचौरे पन्थी-परिवारबाहेक अन्य पन्थीहरू कहाँकहाँ र कुनकुन गाउँहरूमा बसेका छन् भन्ने कान्छी छोरी चेतनाका प्रश्नका उत्तरका रूपमा पन्थीहरूका निवासस्थल वर्णित छन्। यसमा क, ख, ग भनी तीन थरीको वर्णन गरिएको छ।

(क)-मा वाग्लामै जन्मेर बर्मा र भारतका विभिन्न ठाउँ, नेपालका मधेस तथा काहुले, धरमपानी, नेटाखर्क, लाहाँटा एवम् गैराखर्क आदि ठाउँमा बसेको बताएर वाग्लास्थित कुलदेवताको पूजास्थानमा र कुलदेवीको मन्दिरमा पूजाका लागि आउने गरेको कुरा वर्णित छ।

(ख)-मा धुरकोटको रजस्थल विशेष गरी पण्डित टोलामा बसेका पन्थीहरूको वंशविस्तार सङ्क्षेपतः वर्णन गर्दै यिनीहरू धेरैजसो मधेसका विभिन्न भागमा बसाइँ सरेको कुरा बताइएको छ।

(ग)-मा तमघासे पन्थीहरूको वंशविस्तार वर्णित छ। तमघासको उधिनढुङ्गामा बसाइँ सरेर आएका लक्ष्मण पन्थीका वंशज भागीरथ पन्थी भए। यिनका वंशजहरूको वर्णन यसमा गरिएको छ। अर्घाखाँचीका माझकोट, धैरेनी, किसान, अड्गुरी एवम् पाल्पा र लमजुङसम्म पन्थीहरूको बसोबास भएकाले धेरै पन्थीहरूको नाम नजानेर यहाँ समावेश गर्न नसकिएको भन्दै सबैतिरबाट नामावली प्राप्त होस् भन्ने अनुरोधसमेत आफूले गरेको बताउँदै चतुर्थ सोपानको समाप्ति गरिएको छ।

वंशदर्शन काव्यमा प्रस्तुत चार ओटै सोपानमा डा. लक्ष्मीकान्त पन्थीको वैदुष्यपूर्ण गवेषणात्मक परिश्रम यथेष्ट मात्रामा समर्पित भएको देखिन्छ।

प्राज्ञ
**डा. टीकाराम पन्थी**
पूर्वशिक्षाध्यक्ष
मसंवि

# Preface

As we see the interest and abilities of people in Sanskrit dwindling in Nepal, it is quite heartening for the lovers of Sanskrit literature to see that a few scholars are still writing beautiful Sanskrit poems. Dr. Lakshmikanta Panthi (b. 1951) is one such rare scholar. He hails from Gulmi district of western Nepal. He was educated first at home under the guidance of his illustrious father the late Bhimakanta Panthi (1921-2001), himself a scholar of Sanskrit, and, later on, under many teachers in Tribhuvan University.

Dr. Panthi has a remarkable command of Sanskrit language, literature, grammar and astrology. Steeped in the traditional Brahmana family culture, he observed its discipline strictly: performing religious duties including the worship of deities, and respect for ancestors particularly the father and mother.

Besides this volume, Dr. Panthi has also translated two well-known Nepali poems into Sanskrit: 1. Lekhanath Paudyal's Ritu Vichara (similar to Kalidsa's Ritusamhara) and 2. Mukunda Sharan Uapadhyaya's Prakrita Pokhara. This volume of Dr. Panthi's original poems consists of five parts: 1. Jeevandarshanam, 2. Lakshmivaibhavam, 3. Sarasvatavaibhavam, 4. Jagajjananivaibhavam and 5. Vamshadarshanam.

1. Jeevanadarshanam. This part contains an autobiographical poem of considerable length (171 verses describing the poet's own life from his birth in 1951 up to 2018), and a collection of 182 long and short poems consisting of 1,822 verses written on different topics. Many are devotional poems, reflecting the poet's goal of life that is spiritual advancement. Dr. Panthi is indeed a prolific writer as well as a good

student of many disciplines of Sanskrit education such as grammar, lexicon, prosody, epics, Vedanta, Jyautisha (astrology) and ethics.

2. Lakshmivaibhavam. It is a long devotional poem with two subsections (consisting of a total of 690 verses) devoted to Lakshmi the Hindu goddess of beauty and wealth. It is a beautiful poem with many striking similes, metaphors, rhymes and rhythms. Another great Sanskrit scholar the late Tika Ram Panthi in his preface to this volume has written that the poems of Dr. Lakshmikanta Panthi are unique or matchless in their beauty and dramatic expressions with exaggerated simile.

3. Sarasvatavaibhavam. Sarasvativaibhavam is a poem dedicated as a prayer to Sarasvat—the goddess of learning or education. It is a long poem of 109 anushtubh stanzas divided into four subsections: 1. Samsmaranam, 2. Nepala-citram, 3. Vagvaibhavam, and 4. Arundhatisamstava. Goddess Sarasvati is synonymous with language or speech — **ब्राह्मी तु भारती भाषा गीर् वाग् वाणी सरस्वती**. Language is also called 'tongue' so the poet claims that goddess Sarasvati resides in the tongue of humans distinguishing them as distinctly different from other animals.

4. Jananivaibhavam. Jagat Jananivaibhavam is a poem dedicated to shakti, the goddess of power, force or energy. This section consists of 7 different subsections with 284 verses. The verses in this section remind one of the prayers to Kali made in the fourth and eleventh chapters of Durgasaptashati. They also remind one of Saundaryalahari of Shankaracharya.

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि।
अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति।।

तनीयांसं पांसुं तव चरणपङ्केरुहभवं
विरिञ्चिः सञ्चिन्वन् विरचयति लोकानविकलम्।
वहत्येनं शौरिः कथमपि सहस्रेण शिरसां
हरः सङ्क्षुभ्यैनं भजति भसितोद्धूलनविधिम्।।

Following the Hindu thought as such, Dr. Panthi says that shakti is the primeval cause of creation. According to him, it was this shakti that created the Hindu trinity of gods (Brahma, Vishnu and Shiva) who create, sustain and destroy/recycle everything in the world/universe. One wonders if it is the same power/force/energy that caused the big bang as the modern science speculates.

Although the Hindu gods are also presented in their various anthropomorphic forms/images, the Ved_nta philosophy postulates that the ultimate element is formless; it is abstract. It is a concept tantamount to atheism since it does not accept the concept of god as in common sense. Srimad Bhagavatam (8.3.24) says "it is neither god, nor demon, nor human, nor animal, nor female, nor neuter, nor male, nor any living being. It is neither quality, nor action. It is neither existent, nor non-existent. It is that which remains after negating everything." But there is some energy that creates the universe. For Dr. Panthi it is 'Shakti.'

5. Vamshadarshanam. Lastly, this volume by Dr. Panthi describes the history and genealogy of the Panthis themselves under the title Vamshadarshanam. It is a long poem running up to 397 verses divided into four sopanas (ladders). It is a good material for those who are interested in the social and anthropological history of the Brahmans in the hills of Nepal. Like many other Brahmans in Nepal the Panthis belong to Bharadvaja gotra (clan) whose three best-known names (tri-pravara) are Angirasa, Barhaspatya and Bharadvaja.

It is said that the Bharadvaja Brahmans lived in Ujjain during the reign of Vikramaditya. The Nepali Brahmans with surnames Bhandari, Chaulagain, Devkota, Kandel, Niraula, Panthi, Pokhrel, Subedi etc. belong to the same ancestor — Bharadvaja. The surname Panthi originates from the Sanskrit word pantha or the path that was traversed by one Sadananda like a yayavara (nomad), settling finally in the western hills of Nepal. He was the first Panthi.

This is a good book by Dr. Panthi, and I would like to recommend it to many readers and researchers.

**Dr. Jaya Raj Acharya**
Kathmandu, Nepal

# Foreword

Dr. Lakshmi Kanta Panthi has now become reknown after having translated “Ritu Vichara” into Sanskrit version. He has also transformed “Prakrit Pokhara” of poet Mukunda Sharan Upadhyaya into Sanskrit. I have read both of these versions. Recently he gave me his own original construction “Kavyamalika” to read, after having read it I found in it an introduction to ancestral literary works beginning grandfather to the author himself. I think it was necessary to do that because nobody would have known what perspective they had in our traditional literary works in author’s family literary activities are rather important matter as wealth being always ignored. The little “Kavyamalike” itself refers to a wealth made from different flowers ordered in various threads in the form of classical meters almost Anustup, Shardoolavikridita, Vansastha etc. and adored with figures of speech, displays different aspects of concepts viewed by our forefather’s as texted in Vedas as a typical way to go through for the human being.

I hope this literary construction will fetch a great deal of reputation to the author who used to be my closer classmate during our earlier academic stage.

**Prof. Purushottam Panthi**
Kathmandu

## पद्यमालोपहार:

लक्ष्मीकान्त: प्रचुरकविताकामिनीनां विलास:
वैदुष्येण प्रथितमहिम: शारदाकान्त एष:।
चारित्र्येण स्वकृतसुकृतैरीड्यते य: समाजे
काव्याऽऽकाशे कविरविरसौ भाति नित्यं मनस्वी।।१।।

सत्या वाणी प्रसरति सदा यस्य पीयूषतुल्या
शिक्षां दत्ते भवहितकरीं स्वानुभूताममूल्याम्।
यस्य प्रज्ञाऽस्त्यनुपमधनु: सव्यसाची प्रयोगे
जीव्यात् सोऽयं सुकृतितनयै: काव्यरूपै: सदैव।।२।।

राष्ट्रप्रेमप्रकृतिरचनाचित्रणादिप्रयोगे
नानाक्षेत्रेऽप्रतिहतगति: सत्सखा मे सतीर्थ्य:।
काव्यैरेतैरमरतनयै: शोभतां यत्र तत्र
नान्य: पुत्र: क्वचिदपि भवेत् तत्सम: प्रीतिदायी।।३।।

एको ब्रह्मा विलसति सदा काव्यसर्गे प्रवृत्तो
नोर्मेश्चक्रं भ्रमति वपुषि ब्रह्मवद् य: प्रकाशी।
तन्माहात्म्यप्रकथनमयं सूर्यनारायणाय
दीपो नूनं भवतु सुखदं तेऽर्पये त्वं गृहाण।।४।।

स्फुटं कवित्वं कविना निरूपित-
मालोक्यते जीवनदर्शनेऽधिकम्।
तथैव काव्येषु कवित्वसिद्धता
विलोक्यते भावपदैरलङ्कृतै:।।५।।

त्रिभाषया भूमिकया विराजिता
कृतिर्विशिष्टा सुतकाव्यमालिका।
यस्यामनेकाः कविताः सुकोमलाः
काव्यानि तस्यां रुचिराणि दृश्यताम्।।६।।

कवितानिकषोपलः कविः
कविताकाञ्चनसम्परीक्षकः।
धरति स्वककाव्यमालिकां
कविताकाव्यविभूषणाञ्चिताम्।।७।।

तव काव्यकृतौ समाहिताः
करजाः शुक्लपदाः सुता इव।
रसिका गुणिनः स्वलङ्कृता
भुवि ते शुक्लयशांसि तन्वताम्।।८।।

पदमानधनादिभूषितो
विनयी दुर्लभ एव किन्त्वयम्।
अपवादतया विराजते
ह्यनुकूला न हि यद्यपि स्थितिः।।९।।

स्वसुता धनहारिणः पितुः
कुसुता एव विशेषतो भुवि।
परमेष सुकाव्यसत्सुता-
नधिलाभेन समुज्ज्वलः खलु।।१०।।

अधुना गुणिने पुरस्कृता
फणिनारायणशर्मणा मया।
तव काव्यमहत्त्वगुम्फिता
पदमाला भवते समर्प्यते।।११।।

**– पं. फणिनारायणसिग्देलः**

# धन्यवादाः

श्रीमान् लक्ष्मीकान्तपन्थी विपश्चित् शास्त्रान्वेषी लेखकः काव्यकारः।
काल्यास्तीरे शालशाखीव वल्या पत्न्या युक्तो राजते राजधान्याम्।।१।।

आसीद् गुल्मीमण्डले भीमकान्तः पन्थी स्रष्टा यो महाकाव्यकारः।
तस्य ज्येष्ठः पुत्र एषोऽस्ति विद्वान् लक्ष्मीकान्तस्तद्गुणस्थो गृहस्थः।।२।।

शास्त्राभ्यासे लेखने पाठने च काव्याऽऽलापे लग्नचित्तोऽधुनाऽयम्।
यस्याऽनन्या पुष्पमालेव रम्या छन्दोबद्धा काव्यमालाऽस्त्यपूर्वा।।३।।

संसारोऽसौ सर्जकाऽऽरामभूमिः सन्त्युत्फुल्लाः सर्जनाः पुष्पतुल्याः।
ताः सङ्गृह्य श्रीमता लेखकेन नित्याऽम्लाना गुम्फिता काव्यमाला।।४।।

सेयं माला कण्ठमालेव सद्भिर्धार्या कण्ठे हारवत्कामिनीनाम्।
अम्लानेयं मालिका शब्दपुष्पैर्विद्वत्कण्ठे सौरभैर्भातु धन्या।।५।।

यस्यां देशप्रेमसंवर्द्धयित्री यस्यां विद्यामानसंवर्द्धयित्री।
दृश्या गम्या भावना साधना च भाषा भक्तिश्चेतना लभ्यतेऽत्र।।६।।

श्लोकाऽऽगारे पुस्तकेऽस्मिन् प्रविष्टः सन्तुष्टोऽसौ पाठकः स्वादुनिष्ठः।
रम्योद्याने माधवर्तौ यथा स्युः पुष्पाऽऽकृष्टाः सुष्ठुगन्धा मिलिन्दाः।।७।।

विद्यां वाचं शास्त्ररीत्या च भव्यां शिक्षायुक्तान् दोषहीनान् विचारान्।
रीतिवृत्तिप्रेरणादायिभावान् श्लोके श्लोके काव्यमालाऽऽवृणोति।।८।।

यो विद्याया वारिधिः ख्यातनामा लक्ष्मीकान्तो विज्ञप्राध्यापकश्च।
तस्मै चाष्टौ श्लोकपूर्वं ददाति वारं वारं धन्यवादान् मुकुन्दः।।९।।

**– पं. मुकुन्दशर्मा चालिसे**

# शुभाऽऽकाङ्क्षा:

लक्ष्मीकान्त: किमलिखदिदं पाठकास्तद् विचारं
कुर्युर्मन्येऽहमिह कविता: सन्ति शास्त्रीयवादे।
भिन्ने भिन्ने विदितविषये निर्मितं शब्दचित्रं
काव्याऽऽनन्दं प्रकिरति भृशं श्रोत्रयो: पद्यबन्ध:।।१।।
नूत्नान्येव रसान्वितानि सुपदान्याधाय यद् वर्णितं
तेषां भावसमाश्रितोऽर्थविषयो लोकोपकारक्षम:।
भाषाऽपीह भवादृशी च सरला भावार्थसम्बोधिनी
लक्ष्मीकान्त कवे! भवद्भिरचितं काव्यं प्रमोदावहम्।।२।।
विलोक्य पद्यानि भवत्कृतानि प्रसन्नतां याति मनो मदीयम्।
धन्यो भवान् धन्यतमोऽस्म्यहञ्च ज्ञात्वा मनोज्ञां किल तीर्थवार्ताम्।।३।।
मानुषं जन्म लब्ध्वाऽपि यदि नाराध्यते शिव:।
शववज्जीवनं तस्य शिवाभिर्दूयतेऽनिशम्।।४।।
अतीव सुन्दरं कार्यं मनो मोमुद्यते मम।
शीघ्रं प्रकाशमायातु भूयस्य: शुभकामना:।।५।।

**– डा. आत्रेयो विष्णुराज:**

⁂

पठनीया मननीया: कविता: प्रेरणाप्रदा:।
यान्तु सङ्ग्रहरूपेणाऽवश्यं गोचरतां दृशाम्।।१।।
उत्साह: स्तूयते सम्यक् सत्यं तादृश एव स:।
मनोहराणां पद्यानां कर्तु: स्यात् कीदृशं मन:।।२।।
सुखराशि: शिवांशोऽहममलो नित्यचेतन:।
इत्याऽऽत्मानं विजानीयात् चेत् किमत्राऽवशिष्यते।।३।।
भवदध्वनि वर्ततां शिवं शिवमेवेह मनोऽनुचिन्तयेत्।
शिवकर्म कुरु स्वचेतसा जगदेतच्छिव एव रक्षतात्।।४।।

यदीयचरणार्चनं भवनवज्वरोन्मूलनं
यदीयमवधारितं चरितमाशु मुक्तिप्रदम्।
दयार्द्रहृदयं भजन् मनुजमानदानातुरं
तमत्र परमादरं प्रणम चित्त! गङ्गाधरम्।।५।।
भोगं ददाति कामं योगं प्रयच्छतीयं
क्लान्तिं निरस्य चान्ते शान्तिं प्रयच्छतीयम्।
सेवस्व विश्ववाचां जननीमनादिवाणीं
पीयूषतोऽपि मधुरां भज मित्र! देववाणीम्।।६।।
पद्यानि विद्वन्! हृदयं प्रविश्य कोणप्रकोणान्तरमार्द्रयन्ति।
मनः परे ब्रह्मणि वासुदेवे रतं निकामं भवतां सदा स्यात्।।७।।

**– पं. हरिहरशर्मा अर्यालः**

❊ ❊

भवान् लक्ष्मीकान्तनामा सञ्ज्ञयाऽपि समृद्धिमान्।
वाग्देवीशरणो धीमान् कवितारमणोऽप्यसि।।१।।
पौरस्त्यदर्शने मग्न-मनसा सहभागिनाम्।
साहित्यप्रेमिणाञ्चैव धर्मशास्त्रानुरागिणाम्।।२।।
हिन्दूदर्शनशास्त्रेषु प्रज्ञापारमिता तव।
प्रकाशयति हृन्नेत्रं चैतन्य-सविता तव।।३।।
भावकोऽसि स्वयं भोक्ता ह्यस्तित्वं भविता तव।
स्निग्धसंस्कृतभाषायां रचिताः कवितास्तव।।४।।
पण्डितानां रसज्ञानां सुधासिन्धुस्वरूपिणी।
त्वदीया मृदुरचना लघु वा दीर्घरूपिणी।।५।।
शिक्षाप्रदायकाः श्लोका अर्थगाम्भीर्यपूर्वकाः।
दृश्यन्ते बहुशस्ते हि सरसाः सरला अपि।।६।।
शीघ्रं प्रकाशमायान्तु पुस्तकाकारसञ्चिताः।
भूरि वर्धापनं तेऽस्तु शुभाऽऽकाङ्क्षाः समर्पिताः।।७।।

**– पं. नारायणो ज्ञवाली**

# समर्पणम्

यस्योत्पत्तिस्थितिकृतिषु वै चेतनान् भावपूर्णान्
श्रद्धायुक्तान् सुकृतविभवान् पूजनीयान् विशुद्धान्।
यस्योन्नत्यै गतिविधिषु तान् चेष्टमानान् विनीतान्
नित्यानन्दान् विदितविषयान् पुण्यतीर्थानमोघान्।।१।।

मातापित्रोर्विमलचरणान् सादरं सम्प्रणम्य
तेभ्यः शुक्लां स्वकररचितां संस्कृतां चारुवर्णाम्।
स्निग्धां मालां सुपद-सुमनामर्पयत्येष पुत्रः
सानन्दास्ते विमलचरणाः सन्तु कारुण्यपूर्णाः।।२।।

सालङ्कारा रसगुणयुता शोभना नास्ति माला
शुष्काऽप्येषा भवतु सुखदा कोमला भावबोधा।
शक्त्या हीनो विभवविकलो गौरवैः सौरभैश्च
प्रज्ञामन्दो ग्रथनमकरोद् बालिशः किङ्करोतु।।३।।

न शक्तिर्भावबोधा मे न काव्यनिपुणा मतिः।
प्रीत्या संयोजितैः शब्दैर्ग्रथिता काव्यमालिका।।४।।

शिल्पसन्धानमज्ञातं रहितं वृत्तबन्धनैः।
रसभावगुणैर्हीनं क्षमध्वं मां विपश्चितः।।५।।

मदीयाः कविताः श्रुत्वा येऽतिनन्दन्ति तान्प्रति।
मदीयाः कविताः श्रुत्वा येऽतिनिन्दन्ति तान्प्रति।।६।।

यतो हि ब्रह्मणो रूपमानन्दं शास्त्रविश्रुतम्।
जनाः प्राप्नुयुरानन्दं नन्दनान्निन्दनादपि।।७।।

* *

# पुरो वाचः

वक्तव्यं मेऽत्र किञ्चिन् मम रुचिरभवद् बाल्यकालात् कवित्वे
स्नाने पूजाविधाने पठितुमनुगते वाचने वा श्रुतौ वा।
छन्दोबन्धेन यद्वा लयमधुरतया वोक्तिवैचित्र्यभावात्
मातुस्तातात् पितृव्याच्छ्रुतिविषयगतात् कृष्यमाणोऽहमासम्।।१।।

पौरस्त्यानां कवीनां कृतिपठनतया भावबोधेन किं वा
स्वान्तःस्थं शुद्धभावं प्रकटमकरवं पद्यबन्धेन सर्वम्।
ज्ञातं यच्चानुभूतं नयनपथगतं तद् बुधानां पुरस्तात्
छन्दोभिः स्वीयभावान् प्रकटयितुमसौ निर्मितः पद्यबन्धः।।२।।

धन्यास्ते तातपादास्तदनु च गुरवः सन्ति धन्या मदीयाः
धन्यास्ते देशिका यैर्मम रुचिरधिकं वर्द्धिता चारुशब्दैः।
धन्यास्ते पूर्वजाताः सुमधुरकवयो यत्कृतान् काव्यबन्धान्
पाठं पाठं तदीयां सृतिमनुसरता चेतसा प्रेरितोऽहम्।।३।।

धन्योऽसौ मत्पितृव्यः प्रभवति ससुखं भूमिकालेखनार्थे
धन्यो विद्याग्रजो मे प्रमुदितमनसा संस्तवो येन दत्तः।
ताभ्यामाप्तौ सुलेखौ सुर-जनवचसोर्मुद्रितौ पूर्वभागे
ताभ्यां धन्याऽभिजाता कृतिरपि लसिता काव्यमाला मदीया।।४।।

पितृव्यो मे शेखरः सञ्ज्ञयापि येनोक्ता मे भूमिका संस्कृतेऽपि।
टीकारामो विद्वदग्रेसरोऽस्ति येनैवाप्ता भूमिका विस्तृता मे।।५।।

सम्मत्यर्थं पद्यबन्धैः प्रदत्तौ प्रेम्णा पूर्णौ मित्रवर्यौ मदीयौ।
धन्यौ ब्रूवन्नत्र ताभ्यां कविभ्यां भूयस्योऽहं स्वर्पये धन्यवादान्।।६।।

पितृव्यः शेखरोऽस्माकं टीकारामोऽग्रजो बुधः।
द्वावुभौ धन्यवादार्हौ भूमिकावाक्यलेखतः।।७।।

पितृव्यः शेखरो धन्यष्टीकारामोऽग्रजोऽपि मे।
भूमिकाभ्यां ययोरेषा राजिता काव्यमालिका।।८।।

उभाभ्यामिह धीमद्भ्यामेकैकमनुपूर्वशः।
धन्यवादानर्पयामि प्रसन्नोऽहमहर्निशम्।।९।।

जननीवैभवे काव्ये संस्तवेन समन्विताम्।
योऽलिखद् भूमिकां सुष्ठु जयराजो जयत्यसौ।।१०।।

कवये जयराजाय सुहृद्वर्याय चार्पये।
लक्ष्मीकान्तो धन्यवादान् दीर्घायुष्यं विशेषतः।।११।।

अनन्यौ द्वौ सखायौ मे शशि-दीनौ महत्तमौ।
प्रकाशनार्थे-लेखस्याऽनुवादार्थे सहायकौ।।१२।।

द्वाभ्यां शुभाशिषो यच्छन्नाभारः प्रकटीकृतः।
विशेषतो धन्यवादास्ताभ्यां सस्नेहमर्पिताः।।१३।।

फणिनारायणो धीमान् मुकुन्दश्च महाकवी।
मान्यौ ताभ्यां च भूयस्यो धन्यवादान् समर्पये।।१४।।

अन्येषां कविवर्याणां जनानामाप्तसम्मतिः।
दीयते लघुरूपा चाऽलघुत्वेन विमर्शिता।।१५।।

पठकैः पाठकैर्मेऽत्र मुखपत्रे प्रकाशिताः।
कविभिः शंसिता भावा दर्शिताऽत्र शुभाशयाः।।१६।।

मदर्थं कविताभिर्यैः शुभाकाङ्क्षाः प्रदर्शिताः।
युष्माकं कविताभ्योऽहं धन्यवादान् समर्पये।।१७।।

आत्रेयो विष्णुराजश्च बुधो हरिहरस्तथा।
नारायणो ज्ञवाली च तान् धन्यान् प्रवदाम्यहम्।।१८।।

मदीया धन्यवादा वो विलसन्तु सुखावहाः
अधुना भवदुक्त्याऽहमुत्साहभरितोऽभवम्।।१९

भक्तिभावनयोपेताः साधनाचेतनात्मिकाः।
प्रकुर्वत्यः सहायं मे धन्या दुहितरोऽभवन्।।२०।।

धन्यो नेपालदेशोऽस्ति धन्या नेपालसंस्कृतिः।
नेपालीया जना धन्या धन्याऽस्माकं परम्परा।।२१।।

एतैर्विबोधितोऽस्मीह यथाशक्ति कृतश्रमः।
वेगेनोड्डीयते गृध्रश्चटको न तथाम्बरे।।२२।।

नमस्तेभ्यः कविभ्यो यत्कृतयः पठितास्ततः।
लेखने प्रेरणा प्राप्ता गुरुभ्योऽपि नमो नमः।।२३।।

नमस्तेभ्यः स्वकलमान् स्वापयित्वापि येऽनिशम्।
गालिं दत्वा मादृशेभ्यः सुखीयन्ति निरन्तरम्।।२४।।

अस्य प्रकाशनार्थेऽर्थान् यच्छद्भ्योऽहं विशेषतः।
उदारदानशीलेभ्यो धन्यवादान् समर्पये।।२५।।

लघुकविकृतिरेषा मालिका काव्यपूर्वा
न हि सरसगुणाढ्या सौरभैर्गौरवा स्यात्।
अरुचिरखरकाचैर्गुम्फितापीह सत्सु
सुरुचिरमृदुसूक्तै रत्नपूर्णेव भूयात्।।२६।।

गुरुकविकृतिसाम्यं नैव कस्यापि काव्यं
मनुजसुलभदोषाः स्युर्मदीया अनेके।
तदिह बुधवरेण्याः सन्तु कारुण्यपूर्णा
विचलितपदमार्गान् सज्जनाः सूद्धरन्ति।।२७।।

स्वान्तःसुखाय रचितानि मनोगतानि
पद्यानि नैकविषयेषु निवेदितानि।
एवंविधैः सुमनसो मुदिता भवेयु-
रज्ञानिनं मनसि मामपि भावयेयुः।।२८।।

**– रचयिता**

# धन्यवादपूर्व-आभारः

येनाऽहं सुखपाठितोऽनवरतं शब्दादिशास्त्रं ततः
साहित्यं निगमागमादिसहितं सद्धर्मशास्त्रं पुनः।
तर्कं कोषमहो! कवित्वसुलभं वेदान्ततत्त्वं मम
तातं तं प्रणमामि पादयुगले श्रीभीमकान्तं गुरुम्।।१।।

येनैव प्रतिपादिता सुधिषणा सद्विद्यया भूषिता
शिक्षां दातुमलं भविष्णुरनयोऽबोधादिवैक्लव्यतः।
सद्विद्याविभवं च यत्करुणया काले समासादितं
तेनैव प्रतिपालये स्वमुदरं तं भीमकान्तं भजे।।२।।

वन्दे मातुश्चरणतलयोः पादयोर्मत्पितुश्च
ध्यायं ध्यायं गुरुचरणयोराशिषा जीवितोऽहम्।
स्मारं स्मारं स्वगृहरमणीं यत्सहायो मदर्थं
पाठे लेखेऽधिकसमयतो ग्रन्थिता काव्यमाला।।३।।

यस्मिन् सूत्रे स्वकररचितां कीदृशीं काव्यमालां
रम्याऽरम्या भवति न तथा वीक्षणे लग्नचित्ताः।
श्रुत्वा बुद्ध्वा मम दुहितरः शब्दपुष्पाणि चेतुं
लग्नास्ताभ्यो ग्रथनसमये धन्यवादान् ददामि।।४।।

नेपालावनिमध्यभागवितते गुल्मीप्रदेशाङ्किते
रेसुङ्गाशिखराङ्कवर्तिविषये रम्यं स्थलं विद्यते।
तत्रस्थैरपि सभ्यशिक्षितजनैः प्रेम्णा हि सञ्चालितं
'रेसुङ्गा' इति नामधेयनगरं वर्वर्ति रामायितम्।।५।।

'रेसुङ्गा' इति नामसिद्धनगरे गुल्मीस्थले मध्यमे
विख्यातः किरणाग्रशब्दसहितः पुस्तालयो वर्तते।
तस्य स्वर्णमहोत्सवे प्रचलिते वर्षे समासादिते
सैषा मे लघुरूपिणी समुदिता सत्काव्यमाला नवा।।६।।

ते पुस्तालयचालकाः सुकृतिनो धन्या गुणैर्मानिताः
तत्कार्यार्थकृतज्ञतामनुभवन् धन्यान् वदन् हर्षितः।
आभारं प्रकटीकरोमि समितेः सञ्चालकानां प्रति
युष्मद् दृष्टिकटाक्षपातबलतः पुस्तं प्रकाशं गतम्।।७।।

(जसले मलाई सानैदेखि व्याकरण, साहित्य, नीतिशास्त्र, वेद, पुराण, धर्मशास्त्र, तर्कशास्त्र, कविता गर्न सिकाउने शब्दकोष र वेदान्तशास्त्र आदि राम्रोसँग पढाउनुभयो त्यस्ता मेरा पिताज्यूका पाउमा प्रणाम गर्दछु। जसले दिनुभएको विद्या र बुद्धिले केही नजानेको अबोध म विद्यार्थी पढाउन सक्षम भएँ, जसको कृपाले ठीक समयमा विद्यारूपी सम्पत्ति पाएको हुँदा त्यसैबाट आफ्नो र परिवारको समेत पेट पाल्न सक्ने भएँ त्यस्ता मेरा पिता पं. भीमकान्त पन्थीलाई सधैँ सम्झिरहन्छु। पूज्य आमाका र बुबाका चरणकमलमा प्रणाम गर्दछु, किनभने म उहाँहरूकै शुभ आशीर्वादले बाँचेको छु। मैले आफ्नी जीवनसँगिनीलाई पनि सम्झिरहन्छु र धन्यवाद दिन्छु, किनभने मेरा लागि पढ्न र लेख्नमा धेरै समयदेखि उनको सहयोग मिल्यो जसले गर्दा यो 'काव्यमालिका' तयार भयो। त्यस्तै मैले जुन छन्दरूपी सूत्रमा यो 'काव्यमालिका' तयार गर्थें त्यसलाई राम्रो भयो कि भएन भनेर हेर्नमा मन लगाएका र कतै नमिलेका ठाउँमा यो शब्दरूपी फूल उन्दा राम्रो हुन्छ भन्दै शब्द चयन गर्न लाग्ने गरेका मेरा छोरीहरूलाई पनि धेरै धन्यवाद दिन्छु।

नेपालको मध्यभागमा फैलिएर बसेको गुल्मी जिल्लामा रेसुङ्गा शिखरको काखमा तम्घास भन्ने राम्रो ठाउँ छ। त्यस ठाउँमा रहेबसेका सभ्य-शिक्षित व्यक्तिहरूले माया गरेर बढाएको-चलाएको रेसुङ्गा भन्ने नगरपालिका राम्रो छ र विकसित हुँदै छ। यस्तो गुल्मी जिल्लाको माझमा रहेको रेसुङ्गा शिखरको काखमा प्रसिद्ध रेसुङ्गा भन्ने नगरपालिकामा किरण पुस्तकालय रहेको छ। त्यस पुस्तकालयको अहिले स्वर्ण महोत्सव चलिरहेको वर्षमा मेरो यो सानो र नयाँ

‘काव्यमालिका’ नामको कवितासङ्ग्रह प्रकाशित भएको छ। त्यहाँ किरण पुस्तकालयका सञ्चालकजनहरू सबैले जानिएका, मानिएका र आफ्ना गुणले धन्य हुनुहुन्छ। उहाँहरूले यो मेरो ‘काव्यमालिका’ पुस्तक प्रकाशन गर्ने निर्णय गर्नुभएको बुझेर उहाँहरू साँच्चै नै धन्य हुनुहुन्छ भन्दै म हर्षित भएको छु र उहाँहरूप्रति धन्यवादसहित आभार प्रकट गर्दछु। साथै तपाईंहरूको दृष्टि पर्न आएकाले नै यो पुस्तक प्रकाशित भएको हो भन्ने ठान्दछु। धेरैधेरै धन्यवाद!)

# उपक्रमः


| | |
|---|---|
| प्रकाशकीय | १ |
| 'काव्यमालिकाम्' प्रति मदीया दृष्टिः | ३ |
| काव्यमालिकाका कृतिहरूमाथि विहङ्गम दृष्टि | १६ |
| Preface | ३० |
| Foreword | ३४ |
| पद्यमालोपहारः | ३५ |
| धन्यवादाः | ३७ |
| शुभाकाङ्क्षाः | ३८ |
| समर्पणम् | ४० |
| पुरोवाचः | ४१ |
| धन्यवादपूर्वं-आभारः | ४६ |


## जीवनदर्शनम्

### प्रथमोन्मेषः


| | *श्लोकसङ्ख्या* | *पृष्ठसङ्ख्या* |
|---|---|---|
| १. मङ्गलाचरणम् | ७ | ३ |
| २. मङ्गलम् | ६ | ४ |
| ३. गणेशप्रार्थना | ६ | ५ |
| ४. अनुतापः | ६ | ६ |
| ५. सदाचारः | ९ | ७ |
| ६. श्रीरामः शरणं मम | ५ | ८ |
| ७. श्रीकृष्णार्पणमस्तु | २० | ९ |
| ८. नमः शिवाय | २१ | ११ |
| ९. श्रीशिवचत्वारिंशम् | ४३ | १३ |
| १०. श्रीगणेशचत्वारिंशम् | ४२ | २१ |
| ११. हरिहरप्रार्थना | १ | २८ |

| | | |
|---|---|---|
| १२. नागप्रार्थना | १ | २८ |
| १३. सत्यसाईभगवत्प्रार्थना | १४ | ३८ |
| १४. षोडषोपचारपूजाक्रमः | ६ | ३१ |
| १५. पितरौ | ३० | ३१ |
| १६. पितृसूक्तम् | २८ | ३४ |
| १७. पितृचरणस्मरणम् | २६ | ३८ |
| १८. सपत्नमाता | ४ | ४२ |
| १९. मातृसूक्तिः | ७ | ४३ |
| २०. कृपामूर्तिः | २ | ४४ |
| २१. माता | ८ | ४४ |
| २२. सरस्वतीस्तोत्रम् | ८ | ४६ |
| २३. कथं कथं मे समयः प्रयातः | ९ | ४७ |


**द्वितीयोन्मेषः**


| | *श्लोकसङ्ख्या* | *पृष्ठसङ्ख्या* |
|---|---|---|
| २४. अल्पज्ञता | १७ | ४८ |
| २५. शिष्टाचारः | ५ | ५० |
| २६. साहित्यं किम् | २ | ५१ |
| २७. काव्यम् | ७ | ५१ |
| २८. जीवनं कवित्वं च | २ | ५२ |
| २९. क-वि-ता | २ | ५२ |
| ३०. हिन्दवः के? | ६ | ५३ |
| ३१. शिक्षा | ४ | ५३ |
| ३२. शोभा | २ | ५४ |
| ३३. भूषणम् | ७ | ५४ |
| ३४. शब्दार्थौ ब्रह्म | १० | ५५ |
| ३५. चत्वारि धामानि | ३ | ५६ |
| ३६. गृहमन्दिरम् | ८ | ५६ |
| ३७. कथाश्रवणम् | ९ | ५७ |
| ३८. जीवनलक्ष्यम् | ८ | ५८ |
| ३९. प्रेममार्गः | १० | ५९ |

| | | |
|---|---|---|
| ४०. विषयानन्दभजनानन्दौ | ७ | ६० |
| ४१. भागवतार्थः | १६ | ६१ |
| ४२. व्यवहारः | ५ | ६२ |
| ४३. सुखसाधनम् | ३ | ६३ |
| ४४. दुःखहेतुः | १ | ६३ |
| ४५. प्रसादग्रहणम् | ३ | ६३ |
| ४६. विवेकः | १० | ६४ |
| ४७. प्रारब्धम् | ७ | ६५ |
| ४८. पुण्यम् | ७ | ६५ |
| ४९. प्रकृतिभावः | ६ | ६६ |
| ५०. सन्तोषः | ९ | ६७ |
| ५१. जीवनसाफल्यम् | १२ | ६७ |
| ५२. धनार्जनम् | ८ | ६९ |
| ५३. धनधर्मौ | ८ | ६९ |
| ५४. कामरामौ | ११ | ७० |
| ५५. सुखदुःखे | ७ | ७१ |
| ५६. भेदाभेदौ | ४ | ७२ |
| ५७. मुक्तिबन्धने | ७ | ७२ |
| ५८. भगवद्वासः | २ | ७३ |
| ५९. भिन्नता | ३ | ७३ |
| ६०. गुणज्ञः | ४ | ७४ |
| ६१. परिश्रमफलम् | ९ | ७४ |
| ६२. दुःखम् | ५ | ७५ |
| ६३. पापम् | ८ | ७६ |
| ६४. शान्तिः | ११ | ७६ |
| ६५. वासना | ५ | ७८ |
| ६६. सद्गतिः | ७ | ७८ |
| ६७. त्यागः | ७ | ७९ |
| ६८. ब्रह्मानन्दः | ६ | ८० |
| ६९. देहराज्यम् | ७ | ८० |
| ७०. सामर्थ्यम् | ६ | ८१ |

| | | |
|---|---|---|
| ७१. सद्गुरुः | १० | ८२ |
| ७२. ईश्वरः | ८ | ८३ |
| ७३. ईश्वरस्मरणम् | ८ | ८३ |
| ७४. दिव्यजीवनम् | ८ | ८४ |
| ७५. तत्त्वान्वेषः | १८ | ८५ |
| ७६. ईशवासः | ८ | ८७ |
| ७७. स्वर्गः | ६ | ८७ |
| ७८. के धर्मा धार्मिकाश्च | २ | ८८ |
| ७९. नृस्वभावः | २ | ८८ |
| ८०. मनः | १० | ८९ |
| ८१. मनःशुद्धिः | ६ | ९० |
| ८२. ज्ञानेन्द्रियविनयः | १५ | ९० |
| ८३. सदुत्साहः | ५ | ९२ |
| ८४. कर्णधारः | ४ | ९२ |
| ८५. मैत्रीभावः | ४ | ९३ |
| ८६. राष्ट्रोन्नतिहेतुः | ५ | ९३ |
| ८७. नेतृयोग्यता | २ | ९४ |
| ८८. निन्दकः | ५ | ९४ |
| ८९. साहित्यनगरी | ५ | ९५ |


## तृतीयोन्मेषः


| | *श्लोकसङ्ख्या* | *पृष्ठसङ्ख्या* |
|---|---|---|
| ९०. वृथा गतम् | १८ | ९६ |
| ९१. आकाङ्क्षा | ९ | ९७ |
| ९२. ग्रहसंस्तुतिः | १ | ९८ |
| ९३. ग्रहसंहतिः | १५ | ९९ |
| ९४. सूर्यादिग्रहाणां यन्त्रनिर्माणविधि | २ | १०१ |
| ९५. वंशो द्विधा | १४ | १०२ |
| ९६. प्रेषितपत्रम् | १६ | १०३ |
| ९७. विद्वान् | ३ | १०५ |
| ९८. कविशिरोमणिलेखनाथः | ७ | १०५ |

| | | |
|---|---|---|
| ९९. कविमुकुन्दशरण: | ८ | १०६ |
| १००. पुरुषोत्तमाय नम: | १ | १०७ |
| १०१. आचार्य: खेमराज: | ५ | १०८ |
| १०२. काव्यं यशोवर्द्धकम् | ५ | १०८ |
| १०३. मन्थलीयं कविं प्रति | ४ | १०९ |
| १०४. शोकोद्गार: | ८ | ११० |
| १०५. शब्दचित्रम् | ४ | १११ |
| १०६. प्रयागपञ्चकम् | ५ | १११ |
| १०७. घटाष्टकम् | ८ | ११२ |
| १०८. नेनेपाल: काव्यं प्रति | २ | ११३ |
| १०९. डा. टीकारामबुधं प्रति | १८ | ११३ |
| ११०. नारायणस्मृतौ | ४२ | ११६ |
| १११. दैवज्ञं प्रति | ४१ | १२३ |
| ११२. वैयाकरणस्वरूपम् | १०८ | १२७ |
| ११३. जगदम्बिकावैभवकाव्यसार: | १२ | १३८ |
| ११४. जगदीश्वरवैभवकाव्यसार: | ८ | १३९ |
| ११५. हिरण्याक्षो हिरण्यकशिपुश्च | २ | १४० |
| ११६. रावण: कंसश्च | ३ | १४० |
| ११७. गीतासार: | ४ | १४० |
| ११८. पौराणिकं निर्देशनम् | १६ | १४१ |
| ११९. शिवाम्बुनोर्महत्त्वम् | २ | १४२ |
| १२०. निवेदनम् | १५ | १४३ |
| १२१. प्रकाशकीयम् | १ | १४४ |
| १२२. प्रकाशकीयम् | १९ | १४५ |
| १२३. अनुवादकीयम् | २२ | १४७ |
| १२४. अनुवादकीयम् | १८ | १४९ |
| १२५. अनुवादकीयम् | १९ | १५१ |
| १२६. नमो वाच: | १८ | १५२ |
| १२७. धन्यतमं वदामि | ९ | १५४ |
| १२८. शुभाऽऽशंसा | २१ | १५५ |
| १२९. श्रद्धा-शब्द-पुष्पाणि | ३ | १५७ |

| | | |
|---|---|---|
| १३०. प्रशस्तिशेखरः | ६ | १५८ |
| १३१. प्रशस्तिप्रसूनम् | १५ | १५८ |
| १३२. कवितावरोऽयम् | १८ | १६० |
| १३३. वन्दना युगलम् | १० | १६२ |
| १३४. अमरकोशभूमिकायाम् | ६ | १६४ |
| १३५. विवाहविषयः | १ | १६५ |
| १३६. प्रवृत्तिनिवृत्ती | १६ | १६५ |
| १३७. यथा राजा तथा प्रजा | १ | १६७ |
| १३८. प्रजातन्त्रम् | २ | १६७ |
| १३९. राजानं ज्ञानेन्द्रं प्रति | ३ | १६७ |
| १४०. मुग्धताहेतुः | २ | १६८ |
| १४१. नृत्यम् | १ | १६८ |
| १४२. स्वयंवरनिमन्त्रणा | ५ | १६९ |
| १४३. स्वयंवरामन्त्रणम् | ५ | १६९ |
| १४४. स्वयंवरामन्त्रणपत्रम् | ७ | १७० |
| १४५. स्वयंवरामन्त्रणपत्रम् | ४ | १७० |
| १४६. स्वयंवरामन्त्रणपत्रम् | ४ | १७१ |
| १४७. आमन्त्रणम् | ४ | १७१ |
| १४८. कन्यार्थिनः प्रति प्रश्नः | १ | १७२ |
| १४९. आमन्त्रणपत्रे मुद्रणार्थम् | ४ | १७२ |
| १५०. स्वयंवरामन्त्रणपत्रम् | ८ | १७३ |
| १५१. विवाहे वरस्वागतम् | २ | १७३ |
| १५२. पुत्रीविवाहस्मृतौ | ४ | १७४ |
| १५३. पूजा नित्या | ३ | १७५ |
| १५४. का विद्या? | १२ | १७५ |
| १५५. गृहस्थगीता | ८ | १७७ |
| १५६. जीवनदर्शनम् | १० | १७७ |
| १५७. तीर्थयात्रासंस्मरणम् | १० | १७९ |
| १५८. तीर्थयात्राप्रसङ्गः | २८ | १८० |
| १५९. दुःखं पञ्चविधम् | ७ | १८३ |
| १६०. जन्मोत्सवार्थे | ३ | १८४ |
| १६१. प्राप्तोपहारः | २ | १८५ |

| | | |
|---|---|---|
| १६२. समस्यापूर्तय: | ६ | १८५ |
| १६३. अर्ज्यालवंशावलि: | ३३ | १८६ |
| १६४. पित्रो: स्थितिं प्राप्नुम | ४ | १८९ |
| १६५. शब्दार्थविचार: | २२ | १८९ |
| १६६. पद्माकल्कि धाम | ४ | १९१ |
| १६७. गोविन्दोऽवतु | २ | १९२ |
| १६८. धन्या गुरव: | २ | १९२ |
| १६९. ग्राम्यस्थिति: | १ | १९३ |
| १७०. 'नारी' शब्दार्थ: | १ | १९३ |
| १७१. जायास्मृतौ | २ | १९३ |
| १७२. समालिङ्गनम् | ३ | १९४ |
| १७३. यात्रावसरे स्मरणीयम् | १ | १९४ |
| १७४. संस्कृतं स्याज्जने जने | ५ | १९४ |
| १७५. काशीहिन्दूविश्वविद्यालय: | ५० | १९४ |
| १७६. श्रीशौ सदा रक्षताम् | २ | १९९ |
| १७७. अभिनन्दनपत्रम् | ९ | २०० |
| १७८. उन्नतिकारणानि | ४ | २०१ |
| १७९. परिचयपङ्क्तय: | ३३ | २०१ |
| १८०. तत् सत् | १६ | २०४ |
| १८१. सम्भवन्तु | ४ | २०६ |
| १८२. कृष्णं वन्दे मनश्चौरम् | ६ | २०७ |
| १८३. उपसंहार: | १४ | २०७ |


## चतुर्थोन्मेष:


| | *श्लोकसङ्ख्या* | *पृष्ठसङ्ख्या* |
|---|---|---|
| १८४. स्वपरिचय: | १७१ | २०९ |
| १८५. लक्ष्मीवैभवम् (काव्यम्) | ६९० | २२७ |
| १८६. सारस्वतवैभवम् (काव्यम्) | १०९ | २९३ |
| १८७. जगज्जननीवैभवम् (काव्यम्) | २८४ | ३०५ |
| १८८. वंशदर्शनम् (काव्यम्) | ३८५ | ३४३ |
| १८९. परिशिष्टानि | १–९ | ३७९ |